विरक्त इति । अनेनापरं वैराग्यं दर्शितम् । पुरुषदर्शनाभ्यासादागमानुमानाचार्योपदेशसमधिगतस्य पुरुषस्य दर्शनं तस्याभ्यासः पौनःपुन्येन निषेवणं तस्मात्तस्य दर्शनस्य शुद्धौ रजस्तमःपरिहाण्या सत्त्वैकतानता तया यो गुणपुरुषयोः प्रकर्षेण विवेकः पुरुषः शुद्धोऽनन्तस्तद्विपरीता गुणा इति तेनाप्यायिता बुद्धिर्यस्य योगिनः स तथोक्तः । तदनेन धर्ममेघाख्यः समाधिरुक्तः । स तथाभूतो योगी गुणेभ्यो व्यक्ताव्यक्तधर्मकेभ्यः सर्वथा विरक्तः सत्त्वपुरुषान्यताख्यातावपि गुणात्मिकायां यावद्विरक्त इति । तत्तस्माद्द्वयं वैराग्यम् । पूर्वं हि वैराग्यं सत्त्वसमुद्रेकविधूततमसि रजःकणकलङ्कसंपृक्ते चित्तसत्त्वे । तच्च तौष्टिकानामपि समानम् । ते हि तेनैव प्रकृतिलया बभूवुः । यथोक्तम्- वैराग्यात्प्रकृतिलय इति (सां० का० ४५) । तत्र तयोर्द्वयोर्मध्ये यदुत्तरं तज्ज्ञानप्रसादमात्रम् । मात्रग्रहणेन निर्विषयतां सूचयति । तदेव हि तादृशं चित्तसत्त्वं रजोलेशमलेनाप्यपरामृष्टमस्याश्रयोऽत एव ज्ञानप्रसाद इत्युच्यते । चित्तसत्त्वं हि प्रसादस्वभावमपि रजस्तमःसंपर्कान्मलिनतामनुभवति । वैराग्याभ्यासविमलवारिधाराधौतसमस्तरजस्तमोमलं त्वतिप्रसन्नं ज्ञानप्रसादमात्रपरिशेषं भवति । तस्य गुणानुपादेयत्वाय दर्शयति-यस्योदये प्रत्युदितख्यातिः । ख्यातिविशेषे सति वर्तमानख्यातिमानित्यर्थः । प्रापणीयं कैवल्यं प्राप्तम् । यथा वक्ष्यति- जीवन्नेव विद्वान्मुक्तो भवति (भाष्य ४।३०) । संस्कारमात्रस्य च्छिन्नमूलस्य सिद्धत्वादिति भावः । कुतः प्राप्तं, यतः - क्षीणाः क्षेतव्याः क्लेशा अविद्यादयः सवासनाः । नन्वस्ति धर्माधर्मसमूहो भवस्य जन्ममरणप्रबन्धस्य संक्रमः प्राणिनाम् । तत्कुतः कैवल्यमित्यत आह-छिन्न इति । श्लिष्टानि निःसंधीनि पर्वाणि यस्य स तथोक्तः । धर्माधर्मसमूहस्य समूहिनः पर्वाणि तानि श्लिष्टानि । न हि जातु जन्तुर्मरणजन्मप्रबन्धेन त्यक्ष्यते । सोयं भवसक्रमः क्लेशक्षये छिन्नः । यथा वक्ष्यति- 'क्लेशमूलः कर्माशयः' (२।१२) 'सति मूले तद्विपाकः, (२।१३) इति । ननु प्रसंख्यानपरिपाकं धर्ममेघं च निरोधमन्तरा किं तदस्ति यज्ज्ञानप्रसादमात्रमित्यत आह-ज्ञानस्यैवेति । धर्ममेघभेद एव परं वैराग्यं नान्यत् । यथा वक्ष्यति- 'प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः' (४।२९) । 'तदा सर्वावरणमलापेतस्य ज्ञानस्यानन्त्याज्ज्ञेयमल्पम्' (४।३१) इति च । तस्मादेतस्य हि नान्तरीयकमविनाभावि कैवल्यामिति ॥१६॥

અપર વૈરાગ્ય કહીને પર કહે છે : પુરુષના જ્ઞાનથી ગુણોમાં વિરક્તિ થાય એ પર વૈરાગ્ય છે. અપર વૈરાગ્ય પરનું કારણ છે. પરમાં પ્રવેશવાનું દ્વાર છે. જોયેલા અને સાંભળેલા વિષયોમાં દોષદર્શી વિરક્ત છે, એમ કહીને અપર વૈરાગ્ય કહ્યો. પુરુષદર્શનનો અભ્યાસ એટલે આગમ, અનુમાન અને આચાર્યના ઉપદેશથી જાણેલા આત્માનું દર્શન, અને એનો અભ્યાસ એટલે વારંવાર સેવન. એનાથી

આત્મદર્શન શુદ્ધ બને. રજસ્, તમસ્ દૂર થઈ, સત્ત્વમાં એકતાનતા થાય. એનાથી ગુણો અને પુરુષનો સ્પષ્ટ વિવેક થાય. પુરુષ શુદ્ધ અને અનંત છે, અને ગુણો એનાથી વિપરીત છે એ હકીકત નિઃશંકપણે સમજાય. એથી સંતુષ્ટ બનેલી બુદ્ધિવાળો યોગી પરવૈરાગ્યયુક્ત બને છે. આનાથી ધર્મમેઘ સમાધિની પ્રાપ્તિ કહી. આવો યોગી વ્યક્ત-અવ્યક્ત ધર્મવાળા ગુણોથી પણ વિરક્ત થાય છે. અને સત્ત્વ તેમજ પુરુષની ભિન્નતાના વિવેકજ્ઞાનરૂપ ગુણાત્મક વિચારથી પણ વિરક્ત થાય છે.

આમ બે વૈરાગ્ય કહ્યા. પહેલો અપર વૈરાગ્ય સત્ત્વગુણની વૃદ્ધિથી તમોગુણ દૂર થવા છતાં રજોગુણના અણુઓથી કલંકિત ચિત્તસત્ત્વમાં ઉત્પન્ન થાય છે. આ વૈરાગ્ય તૌષ્ટિકોમાં (એનાથી જ સંતુષ્ટ થતા યોગીઓમાં) જોવા મળે છે. આના કારણે તેઓ પ્રકૃતિલયની અવસ્થામાં અટકી જાય છે. કહ્યું છે કે "વૈરાગ્યથી પ્રકૃતિ લય થાય છે." બીજો પર વૈરાગ્ય જ્ઞાનપ્રસાદમાત્ર છે. માત્ર શબ્દથી નિર્વિષયતા સૂચવે છે. આવું ચિત્ત રજોગુણના અણુ જેટલા મળથી પણ રહિત હોવાથી, પર વૈરાગ્યનો આશ્રય બને છે. તેથી એને જ્ઞાનપ્રસાદ કહે છે. ચિત્ત સ્વયં પ્રસાદ સ્વભાવનું છે. છતાં રજસ્-તમસ્ ના સંપર્કથી મલિન બને છે. વૈરાગ્યના અભ્યાસરૂપ નિર્મળ જળની ધારાથી ધોવાયેલું ચિત્ત બધા રજસ્-તમસ્ ના મળોથી રહિત બનીને અત્યંત સ્વચ્છ તેમજ જ્ઞાનપ્રસાદ માત્રરૂપ રહે છે. આવા યોગીને ગુણોની જરા પણ આવશ્યકતા રહેતી નથી, એ વાત "યસ્યોદયે પ્રત્યુદિત ખ્યાતિઃ" વગેરેથી કહી છે. એના ઉદયથી યોગીમાં જ્ઞાન પ્રગટે છે. અન્ય જ્ઞાનોની જગાએ એનામાં ફક્ત વર્તમાન વિવેકજ્ઞાન શેષ રહે છે.

(આવો કૃતકૃત્ય યોગી વિચારે છે :) મેળવવા યોગ્ય કૈવલ્ય મેળવ્યું. જેમ આગળ કહેશે : જીવતાં જ જ્ઞાની મુક્ત થાય છે. એટલે કે અવિદ્યારૂપ મૂળ નષ્ટ થવાથી સંસ્કારમાત્ર શેષ રહે છે. આ કારણે કૈવલ્ય પ્રાપ્ત થાય છે. કૈવલ્ય શાથી મળ્યું ? કારણ કે ક્ષીણ કરવાયોગ્ય અવિદ્યા વગેરે ક્લેશો વાસનાસાથે ક્ષીણ થઈ ગયા.

ધર્મ, અધર્મનો સંચય સાંકળની જેમ પ્રાણીઓના જન્મમરણના બંધનનું કારણ છે. એ બાકી હોય તો કૈવલ્ય કેવી રીતે થાય ? એના જવાબમાં "છિન્નઃ શ્લિષ્ટપર્વા ભવસંક્રમ..." વગેરેથી કહે છે કે પરસ્પર સંકળાયેલા ધમાધર્મરૂપ સંચિત કર્મોના પર્વ (સાંધાઓ) છૂટા પાડી દીધા. જન્મમરણનો ક્રમ પ્રાણીને છોડતો નથી, એ ભવસંક્રમ ક્લેશોનો નાશ થતાં છેદાય છે. આગળ કહેશે : "કર્માશયનું મૂળ ક્લેશો છે, મૂળ રહે તો કર્મવિપાક, થાય છે."

પ્રસંખ્યાન (વિચાર)નો પરિપાક ધર્મમેઘ સમાધિ છે. એ નિરોધથી સિદ્ધ

થાય છે, તો આ "જ્ઞાનપ્રસાદમાત્ર" શું છે ? એના જવાબમાં કહે છે કે જ્ઞાનની જ પરાકાષ્ઠા વૈરાગ્ય છે. પર વૈરાગ્ય અને ધર્મમેઘ સમાધિમાં કોઈ અંતર નથી. આગળ કહેશે : "પ્રસંખ્યાનમાં પણ વિરક્ત યોગીને વિવેકખ્યાતિથી ધર્મમેઘસમાધિ થાય છે. ત્યારે બધાં આવરણરૂપ મળો નષ્ટ થાય છે, અને જ્ઞાન અનંત હોવાથી જ્ઞેય અલ્પ જણાય છે." તેથી પર વૈરાગ્ય અને કૈવલ્યમાં કાંઈ અંતર નથી. ૧૬

★

अथोपायद्वयेन निरुद्धचितवृत्तेः कथमुच्यते संप्रज्ञातः समाधिरिति-

હવે બે ઉપાયો (અભ્યાસ-વૈરાગ્ય)થી નિરુદ્ધ ચિત્તવૃત્તિવાળા યોગીને કેવી રીતે સંપ્રજ્ઞાત સમાધિ થાય છે, એ કહેવાય છે -

वितर्कविचारानन्दास्मितारूपानुगमात्संप्रज्ञातः ॥१७॥

વિતર્ક, વિચાર, આનંદ અને અસ્મિતાનાં રૂપોના અવલંબનથી સંપ્રજ્ઞાત સમાધિ થાય છે. ૧૭

भाष्य

वितर्कश्चित्तस्यालम्बने स्थूल आभोगः । सूक्ष्मो विचारः । आनन्दो ह्लादः । एकात्मिका संविदस्मिता । तत्र प्रथमश्चतुष्ट्यानुगतः समाधिः सवितर्कः । द्वितीयो वितर्कविकलः सविचारः । तृतीयो विचारविकलः सानन्दः । चतुर्थस्तद्विकलोऽस्मितामात्र इति । सर्व एते सालम्बनाः समाधयः ॥१७॥

વિતર્ક એટલે સ્થૂલ પદાર્થનું અવલંબન લઈને એના સ્વરૂપને જાણવાનો ચિત્તનો પ્રયત્ન. વિચાર એટલે સૂક્ષ્મ પદાર્થનું અવલંબન લઈને થતો યત્ન. આનંદ એટલે ચિત્તની સ્થિરતાથી થતો આનંદ. આત્મા સાથે બુદ્ધિની એકરૂપતાનું જ્ઞાન અસ્મિતા છે. પહેલા સવિતર્કમાં ચારેનો સહયોગ છે. બીજા સવિચારમાં વિતર્ક હોતો નથી. ત્રીજા સાનંદમાં વિચાર પણ નથી હોતો. અને ચોથા સાસ્મિતામાં ફક્ત અસ્મિતા હોય છે, આનંદ હોતો નથી. આ બધા સમાધિઓ અવલંબન વાળા છે. ૧૭

तत्त्व वैशारदी

उपायमभिधाय सप्रकारोपेयकथनाय पृच्छति-अथोपायद्वयेनेति । वितर्क-

विचारानन्दास्मितारूपानुगमात्संप्रज्ञातः । संप्रज्ञातपूर्वकत्वादसंप्रज्ञातस्य प्रथमं संप्रज्ञातोपवर्णनम् । संप्रज्ञातसामान्यं वितर्कविचारानन्दास्मितानां रूपैः स्वरूपैरनुगमात्प्रतिपत्तव्यम् । वितर्कं विवृणोति-चित्तस्येति । स्वरूपसाक्षात्कारवती प्रज्ञा आभोगः । स च स्थूलविषयत्वात्स्थूलः । यथा हि प्राथमिको धानुष्कः स्थूलमेव लक्ष्यं विध्यत्यथ सूक्ष्ममेवं प्राथमिको योगी स्थूलमेव पाञ्चभौतिकं चतुर्भुजादि ध्येयं साक्षात्करोत्यथ सूक्ष्ममिति । एवं चित्तस्यालम्बने सूक्ष्म आभोगः स्थूलकारणभूतसूक्ष्मपञ्चतन्मात्रलिङ्गालिङ्गविषयो विचारः । तदेवं ग्राह्यविषयं दर्शयित्वा ग्रहणविषयं दर्शयति- आनन्द इति । इन्द्रिये स्थूलालम्बने चित्तस्याभोगो ह्लाद आनन्दः । प्रकाशशीलतया खलु सत्त्वप्रधानादहंकारादिन्द्रियाण्युत्पन्नानि । सत्त्वं सुखमिति तान्यपि सुखानीति तस्मिन्नाभोगो ह्लाद इति । ग्रहीतृविषयं संप्रज्ञातमाह-एकात्मिका संविदिति । अस्मिताप्रभवानीन्द्रियाणि । तेनैषामस्मिता सूक्ष्मं रूपम् । सा चात्मना ग्रहीत्रा सह बुद्धिरेकात्मिका संवित् । तस्यां च ग्रहीतुरन्तर्भावाद्भवति ग्रहीतृविषयः संप्रज्ञात इति । चतुर्णामपरमप्यवान्तरविशेषमाह-तत्र प्रथम इति । कार्यं कारणानुप्रविष्टं न कारणं कार्येण । तदयं स्थूल आभोगः स्थूलसूक्ष्मेन्द्रियास्मिताकारणचतुष्टयानुगतो भवति । उत्तरे तु त्रिद्वयेककारणकास्त्रिद्वयेकरूपा भवन्ति । असंप्रज्ञाताद्भिनत्ति-सर्व एव इति ॥१७॥

"अथोपायद्वयेन" વગેરેથી ઉપાયો કહ્યા પછી, પ્રકારો સાથે ઉપેયો (પ્રાપ્તવ્ય અવસ્થાઓ) વિષે કહેવા માટે પ્રશ્ન પૂછે છે. અને એના જવાબમાં વિતર્ક, વિચાર, આનંદ અને અસ્મિતાના અવલંબનથી થતો સંપ્રજ્ઞાત સમાધિ ઉપેય છે, એમ કહે છે. સંપ્રજ્ઞાત પછી અસંપ્રજ્ઞાત સમાધિ થાય છે. તેથી પહેલાં સંપ્રજ્ઞાતની ચર્ચા કરે છે. વિતર્ક, વિચાર, આનંદ અને અસ્મિતાનાં રૂપો સાથે કે એમના આલંબનથી થતો સમાધિ સંપ્રજ્ઞાત છે.

"चित्तस्य आभोगः" વગેરેથી વિતર્કનું વિવરણ કરે છે. ધ્યેય પદાર્થના સ્વરૂપને પ્રકાશિત કરતી પ્રજ્ઞા આભોગ છે. એ આભોગ સ્થૂલ વિષયવાળો હોવાથી સ્થૂલ હોય છે. જેમ શિખાઉ બાણાવળી પહેલાં સ્થૂલ લક્ષ્ય વીંધે અને પછી સૂક્ષ્મ લક્ષ્ય વીંધે, એમ શિખાઉ યોગી શરૂઆતમાં સ્થૂલ, ચાર ભુજાવાળા પાંચભૌતિક ધ્યેય સ્વરૂપનો સાક્ષાત્કાર કરે છે, પછી સૂક્ષ્મનો. આમ ચિત્તના આલંબન તરીકે સૂક્ષ્મ આભોગ પણ હોય છે. સ્થૂલ ભૂતોના કારણરૂપ સૂક્ષ્મ પાંચ તન્માત્રાઓ, લિંગ (મહત્તત્વ) અલિંગ (અવ્યક્ત પ્રકૃતિ)ના વિષયવાળા સમાધિને સવિચાર કહે છે. આમ ગ્રાહ્ય વિષય દર્શાવીને "आनंद" વગેરેથી ગ્રહણ વિષય દર્શાવે છે. સ્થૂલ ઇન્દ્રિય આલંબન હોય ત્યારે ચિત્તનો આભોગ આલ્હાદ હોય છે. પ્રકાશગુણયુક્ત

સત્ત્વની પ્રધાનતાવાળા અહંકારથી ઇન્દ્રિયો ઉત્પન્ન થાય છે. સત્ત્વ સુખદ છે, તેથી ઇન્દ્રિયો પણ સુખરૂપ છે. એમનો આભોગ આલ્હાદયુક્ત હોય છે. "એકાત્મિકા સંવિત્..." વગેરેથી ગ્રહીતા વિષય યુક્ત સંપ્રજ્ઞાત સમાધિ વિષે કહે છે. અસ્મિતાથી ઇન્દ્રિયો ઉત્પન્ન થાય છે. તેથી એ એમનું સૂક્ષ્મ રૂપ છે. અસ્મિતા ગ્રહીતા-આત્મા-તરીકે જણાતી હોવાથી, આત્મા સાથે એકરૂપ હોવાની ચેતના છે. આ સંપ્રજ્ઞાતમાં ગ્રહીતા ધ્યેય વિષય છે, કારણ કે આત્મા હંમેશા અસ્મિતા (અહંકાર) પાછળ છુપાયેલો રહે છે. આ કારણે અસ્મિતાનુગત સમાધિ ગ્રહીતાના વિષયવાળો સંપ્રજ્ઞાત સમાધિ કહેવાય છે.

"तत्र प्रथम.." વગેરેથી એ ચારેની બીજી અવાન્તર (ગૌણ) વિશેષતા દર્શાવે છે. કાર્યમાં કારણનો પ્રવેશ હોય છે, કારણમાં કાર્યનો નહીં. તેથી સ્થૂલ આભોગમાં સ્થૂલ, સૂક્ષ્મ, ઇન્દ્રિય અને અસ્મિતા એ ચારેય ભેદો મોજૂદ હોય છે. ત્યાર પછીનામાં ત્રણ, બે, એકની મોજૂદગી હોવાથી, એમના જેવા રૂપવાળા હોય છે. "सर्व एते सालंबनाः" વગેરેથી સંપ્રજ્ઞાત અને અસંપ્રજ્ઞાતનો તફાવત કહે છે. ૧૭

★

अथासंप्रज्ञातः समाधिः किमुपायः, किंस्वभावो वेति-

હવે અસંપ્રજ્ઞાતસમાધિનો ઉપાય શું છે, અને સ્વરૂપ કેવું છે ?-

विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः ॥१८॥

વિરામના અનુભવના અભ્યાસથી ઉત્પન્ન થતો, અને (ચિત્તમાં) ફક્ત સંસ્કાર બાકી રહે, એ અન્ય (અસંપ્રજ્ઞાત સમાધિ) છે. ૧૮

ભાષ્ય

सर्ववृत्तिप्रत्यस्तमये संस्कारशेषो निरोधश्चित्तस्य समाधिरसंप्रज्ञातः । तस्य परं वैराग्यमुपायः । सालम्बनो ह्यभ्यासस्तत्साधनाय न कल्पत इति विरामप्रत्ययो निर्वस्तुक आलम्बनीक्रियते । स चार्थशून्यः । तदभ्यासपूर्वं चित्तं निरालम्बनमभावप्राप्तमिव भवतीत्येष निर्बीजः समाधिरसंप्रज्ञातः ॥१८॥

બધી વૃત્તિઓ શાન્ત થતાં, ફક્ત (એમના) સંસ્કાર શેષ રહે, એવો ચિત્તનો નિરોધ અસંપ્રજ્ઞાત સમાધિ છે. પર વૈરાગ્ય એનો ઉપાય છે. એટલે

કે સાવલંબ અભ્યાસ એનું સાધન બનતો નથી. વસ્તુના અભાવવાળો વિરામનો અનુભવ આમાં આલંબન છે, કોઈ પદાર્થ નહીં. આના અભ્યાસથી અવલંબનના અભાવને લીધે, ચિત્ત પણ અભાવને પ્રાપ્ત થયું હોય, એવું જણાય છે. આ અસંપ્રજ્ઞાત કે નિર્બીજ સમાધિ છે. ૧૮

तत्त्व वैशारदी

क्रमप्राप्तमसंप्रज्ञातमवतारयितुं पृच्छति-अथेति । विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः । पूर्वपदेनोपायकथनमुत्तराभ्यां च स्वरूपकथनम् । मध्यमं पदं विवृणोति - सर्ववृत्तीति । प्रथमं पदं व्याचष्टे-तस्य परमिति । विरामो वृत्तीनाम-भावस्तस्य प्रत्ययः कारणं तस्याभ्यासस्तदनुष्ठानं पौनःपुन्यं तदेव पूर्वं यस्य स तथोक्तः । अथापरं वैराग्यनिरोधकारणं कस्मान्न भवतीत्यत आह- सालम्बनो हीति। कार्यसरूपं कारणं युज्यते न विरूपम् । विरूपं चापरं वैराग्यं सालम्बनं निरालम्बन-समाधिना कार्येण । तस्मान्निरालम्बनादेव ज्ञानप्रसादमात्रात्तस्योत्पत्तिर्युक्ता । धर्मेमेघसमाधिरेव हि नितान्तविगलितरजस्तमोमलाद् बुद्धिसत्त्वादुपजातस्तद्विषयातिक्रमेण प्रवर्तमानोऽनन्तो विषयावद्यदर्शी समस्तविषयपरित्यागाच्च स्वरूपप्रतिष्ठः सन्निरालम्बनः संस्कारमात्रशेषस्य निरालम्बनस्य समाधेःकारणमुपपद्यते सारूप्यादिति । आलम्बनीकरणमाश्रयणमभावप्राप्तमिव वृत्तिरूपकार्याकरणान्निर्बीजो निरालम्बनः । अथ वा बीजं क्लेशकर्माशयास्ते निष्क्रान्ता यस्मात्स तथा ॥१८॥

"अथासंप्रज्ञातः समाधिः किमुपायः..." વગેરેથી પ્રશ્ન પૂછે છે. જવાબમાં સૂત્રથી કહે છે કે વિરામના અનુભવના અભ્યાસથી પ્રગટતો, સંસ્કારશેષ સમાધિ અન્ય (અસંપ્રજ્ઞાત) છે. સૂત્રના પહેલા શબ્દથી ઉપાય, અને બાકીના શબ્દોથી સ્વરૂપ કહે છે. "सर्ववृत्तिप्रत्यस्तमये" વગેરેથી મધ્યવાળા શબ્દનું વિવરણ આપે છે. અને "तस्य परं वैराग्यमुपायः"થી પ્રથમ પદની વ્યાખ્યા કરે છે. વિરામ એટલે વૃત્તિઓનો અભાવ, એના કારણનો અભ્યાસ એટલે અનુષ્ઠાન કે વારંવાર અનુભવવા યત્ન કરવો એ પૂર્વમાં (કારણરૂપ) છે, એવો સમાધિ અસંપ્રજ્ઞાત છે. "सालम्बनो ह्यभ्यासः तत्साधनाय न कल्पते..." વગેરેથી અપર વૈરાગ્ય નિરોધનું કારણ કેમ ન બની શકે, એ વાત કહે છે. કારણમાં સમાનરૂપવાળું કાર્ય હોય એ યોગ્ય છે, અસમાન રૂપવાળું નહીં. અપર વૈરાગ્ય સાલમ્બન હોવાથી નિરાલમ્બ સમાધિરૂપ કાર્યથી અસમાન રૂપવાળો છે. આ કારણે નિરાલંબ જ્ઞાનપ્રસાદથી એ ઉત્પન્ન થાય એ યોગ્ય છે. બુદ્ધિસત્વમાંથી રજસ્-તમસ્ના બધા મળો દૂર થયા પછી, ઉત્પન્ન થયેલો ધર્મમેઘસમાધિ, વિષયોને અતિક્રમીને રહે છે, અને વિષયદોષ જુએ છે.

તેથી વિષયોનો ત્યાગ કરીને સ્વરૂપમાં પ્રતિષ્ઠિત થાય છે, તેમજ આલંબન વિના, સંસ્કાર માત્ર શેષરૂપ હોય છે. તે આ સમાધિના સમાનરૂપવાળો હોવાથી, એનું કારણ બને એ યોગ્ય છે. આલંબન લેવું એટલે આશ્રય લેવો. વૃત્તિરૂપ કાર્ય બંધ થયું હોવાથી ચિત્ત અભાવને પ્રાપ્ત થયું હોય, એવો સમાધિ નિર્બીજ કે નિરાલંબ કહેવાય છે. અથવા ક્લેશો અને કર્માશય બીજ છે, એ ન હોવાથી એ નિર્બીજ છે. ૧૮

★

स खल्वयं द्विविधः - उपायप्रत्ययो भवप्रत्ययश्च । तत्रोपायप्रत्ययो योगिनां भवति- આ (સમાધિ)-બે પ્રકારનો છે : ઉપાય પ્રત્યય અને ભવ પ્રત્યય. યોગીઓ માટે ઉપાય પ્રત્યય (અને-)

भवप्रत्ययो विदेहप्रकृतिलयानाम् ॥१९॥

વિદેહ અને પ્રકૃતિલયોને એ જન્મસિદ્ધ છે. ૧૯

भाष्य

विदेहानां देवानां भवप्रत्ययः । ते हि स्वसंस्कारमात्रोपयोगेन चित्तेन कैवल्यपदमिवानुभवन्तः स्वसंस्कारविपाकं तथाजातीयकमतिवाहयन्ति । तथा प्रकृतिलयाः साधिकारे चेतसि प्रकृतिलीने कैवल्यपदमिवानुभवन्ति, यावन्न पुनरावर्ततेऽधिकारवशाच्चित्तमिति ॥१९॥

વિદેહ એટલે દેવોને એ સમાધિ જન્મસિદ્ધ હોય છે. તેઓ પોતાના સંસ્કાર માત્રનો ઉપયોગ કરતા ચિત્તથી, કૈવલ્ય અનુભવતા હોઈ તે તે જાતિના સંસ્કારોના પરિપાકને અનુરૂપ જીવન જીવે છે. અને પ્રકૃતિલયોનું ચિત્ત સાધિકાર હોવાથી, કૈવલ્ય અનુભવતા હોય એમ ત્યાં સુધી રહે છે, જ્યાં સુધી એમના સાધિકાર ચિત્તનો અવધિ પૂરો થતાં પાછા સંસારમાં આવતા નથી. ૧૯

तत्त्व वैशारदी

निरोधसमाधेरवान्तरभेदं हानोपादानांङ्गमादर्शयति - स खल्वयं निरोधसमाधिर्द्विविधः-उपायप्रत्ययो भवप्रत्ययश्च । उपायो वक्ष्यमाणः श्रद्धादिः प्रत्ययः कारणं यस्य निरोधसमाधेः स तथोक्तः । भवन्ति जायन्तेऽस्यां जन्तव इति भवोऽविद्या, भूतेन्द्रियेषु वा विकारेषु प्रकृतिषु वाऽव्यक्तमहदहंकारपञ्चतन्मात्रेष्वनात्मस्वात्म-

ख्यातिस्तौष्टिकानां वैराग्यसंपन्नानाम् । स खल्वयं भवः प्रत्ययः कारणं यस्य निरोधसमाधेः स भवप्रत्ययः । तत्र तयोर्मध्य उपायप्रत्ययो योगिनां मोक्षमाणानां भवति । विशेषविधानेन शेषस्य मुमुक्षुसंबन्धं निषेधति । केषां तर्हि भवप्रत्यय इत्यत्र सूत्रेणोत्तरमाह-भवप्रत्ययो विदेहप्रकृतिलयानाम् । विदेहाश्च प्रकृतिलयाश्च तेषामित्यर्थः । तद्व्याचष्टे-विदेहानां देवानां भवप्रत्ययः । भूतेन्द्रियाणामन्यतममात्मत्वेन प्रतिपन्नास्तदुपासनया तद्वासनावासितान्तःकरणाः पिण्डपातानन्तरमिन्द्रियेषु भूतेषु वा लीनाः संस्कारमात्रावशेषमनसः षाट्कौशिकशरीररहिता विदेहाः । ते हि स्वसंस्कारमात्रोपयोगेन चित्तेन कैवल्यपदमिवानुभवन्तः प्राप्नुवन्तो विदेहाः । अवृत्तिकत्वं च कैवल्येन सारूप्यं, साधिकारसंस्कारशेषता च वैरूप्यम् । संस्कारमात्रोपभोगेनेति क्वचित्पाठः । तस्यार्थः - संस्कारमात्रमेवोपभोगो यस्य न तु चित्तवृत्तिरित्यर्थः । प्राप्तावधयः स्वसंस्कारविपाकं तथाजातीयकमतिवाहयन्त्यतिक्रमन्ति पुनरपि संसारे विशन्ति । तथा च वायुप्रोक्तम्-

"दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः । भौतिकास्तु शतं पूर्णम्" इति । तथा प्रकृतिलयाश्चाव्यक्तमहदहंकारपञ्चतन्मात्रेष्वन्यतममात्मत्वेन प्रतिपन्नास्तदुपासनया तद्वासनावासितान्तःकरणाः पिण्डपातानन्तरमव्यक्तादीनामन्यतमे लीनाः । साधिकारेऽचरितार्थे । एवं हि चरितार्थं चेतः स्याद्यदि विवेकख्यातिमपि जनयेदजनितसत्त्वपुरुषान्यताख्यातेस्तु चेतसोऽचरितार्थस्यास्ति साधिकारतेति । साधिकारे चेतसि प्रकृतिलीने कैवल्यपदमिवानुभवन्ति, यावन्न पुनरावर्ततेऽधिकारवशाच्चित्तमिति । प्रकृतिसाम्यमुपगतमप्यवर्धि प्राप्य पुनरपि प्रादुर्भवति ततो विविच्यते । यथा वर्षातिपाते मृद्भावमुपगतो मण्डूकदेहः पुनरम्भोदवारिधारावसेकान्मण्डूकदेहभावमनुभवतीति । तथा च वायुप्रोक्तम्-

"सहस्रं त्वाभिमानिकाः ।
बौद्धा दश सहस्राणि तिष्ठन्ति विगतज्वराः ॥
पूर्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः ।
पुरुषं निर्गुणं प्राप्य कालसंख्या न विद्यते ॥" इति ।

तदस्य पुनर्भवप्राप्तिहेतुतया हेयत्वं सिद्धम् ॥१९॥

સ્વીકાર અને અસ્વીકાર (ની સમજણ) માટે ઉપયોગી હોવાથી નિરોધ સમાધિના ગૌણ ભેદો "સખલ્વયં દ્વિવિધઃ...." વગેરેથી દર્શાવે છે. આ સમાધિ બે પ્રકારનો છે : ઉપાયથી મેળવાય એવો અને જન્મથી જ પ્રાપ્ત થતો. આગળ કહેવાનારા શ્રદ્ધા વગેરે ઉપાયો જેનું કારણ છે, એ નિરોધ સમાધિ ઉપાય પ્રત્યય છે. પ્રાણીઓ જેમાં જન્મે એ ભવ છે. અવિદ્યા, પાંચ મહાભૂતો, ઇન્દ્રિયો વગેરે વિકારો

તેમ જ અવ્યક્ત, મહત્, અહંકાર અને પાંચ તન્માત્રાઓ અનાત્મા છે. એમાં આત્મબુદ્ધિવાળા, તૌષ્ટિકો (એમાં જ સંતોષ માનનારા) વૈરાગ્યવાળા હોવા છતાં ફરીથી જન્મે છે. પરંતુ એમનો એ જન્મ નિરોધ સમાધિના કારણરૂપ હોવાથી, એને ભવપ્રત્યય કહે છે. મોક્ષ ઇચ્છતા યોગીઓનો સમાધિ ઉપાય પ્રત્યય હોય છે. વિશેષ વિધાન કરીને બીજાઓના મોક્ષસંબંધનો નિષેધ કરે છે.

ભવ પ્રત્યય સમાધિ કોને થાય ? એનો જવાબ સૂત્રથી આપે છે કે વિદેહ અને પ્રકૃતિલયોને ભવપ્રત્યય સમાધિ થાય છે. એની સમજૂતી આપે છે કે વિદેહ બનેલા દેવોને ભવ પ્રત્યય સમાધિ થાય છે. ભૂતો અથવા ઇન્દ્રિયોને આત્મા માનીને, એમની ઉપાસનાથી જેમનું અંતઃકરણ એમની વાસનાથી રંગાયું છે, તેથી તેઓ શરીરના નાશ પછી ઇન્દ્રિયો કે ભૂતોમાં લીન થાય છે. એમના ચિત્તમાં સંસ્કારમાત્ર શેષ રહેલો હોવાથી તેઓ છ કોશોવાળા દેહ વિનાના હોય છે, તેથી વિદેહ કહેવાય છે. તેઓ સંસ્કારમાત્રનો ઉપયોગ કરતા ચિત્તથી કૈવલ્ય અનુભવતા હોય એમ રહે છે. તેઓ વૃત્તિશૂન્ય કૈવલ્યના અનુભવમાં સમાન, પણ ચિત્તનો અધિકાર (કાર્ય) બાકી હોવાથી (મુક્ત પુરુષોથી) અસમાન હોય છે "સંસ્કારમાત્રોપભોગ" એવો પાઠ ક્યાંક મળે છે. એનો અર્થ સંસ્કારમાત્રનો ઉપભોગ, વૃત્તિનો નહીં, એવો થાય. અવધિ પૂરો થાય ત્યાં સુધી તે તે વર્ગના પોતાના સંસ્કારોના પરિપાકને અનુભવે છે અને ફરીથી સંસારમાં પ્રવેશ કરે છે.

આ વિષે વાયુ પુરાણમાં કહ્યું છે : "ઇન્દ્રિયચિંતકો દસ મન્વન્તર સુધી, અને ભૂતચિંતકો પૂરાં સો મન્વન્તર સુધી (કૈવલ્ય જેવી અવસ્થામાં) રહે છે."

પ્રકૃતિલયો અવ્યક્ત, મહત્, અહંકાર, અને પાંચતન્માત્રાઓમાંથી એકને આત્મા માનીને, એની ઉપાસનાના કારણે, એની વાસનાથી રંગાયેલા અંતઃકરણવાળા, શરીર પડ્યા પછી એમાં લીન બનીને પોતાના અધિકાર સુધી રહે છે.

વિવેકખ્યાતિ ઉત્પન્ન થતાં ચિત્ત ચરિતાધિકાર (કૃતકૃત્ય) બને છે. પરંતુ સત્ત્વ અને પુરુષની ભિન્નતાનું જ્ઞાન ન થાય, તો અચરિતાર્થ ચિત્ત સાધિકાર રહે છે. એવું ચિત્ત પ્રકૃતિમાં લીન થઈ, સંસારમાં પાછું ન ફરે ત્યાં સુધી કૈવલ્ય અનુભવતું હોય એમ રહે છે. પ્રકૃતિલય પામ્યા છતાં, આવું ચિત્ત સાધિકાર હોવાથી પાછું ઉત્પન્ન થાય છે, જેમ વર્ષા ઋતુ પૂરી થતાં માટી બનેલો દેડકાનો દેહ, વરસાદના પાણીનો ફરીથી અભિષેક થતાં, ફરીથી દેહભાવ પ્રાપ્ત કરે છે. આ વિષે વાયુપુરાણમાં કહ્યું છે : "પ્રકૃતિના કોઈ તત્ત્વમાં અભિમાન કરનારા હજાર વર્ષ સુધી, બૌદ્ધો દુઃખ રહિત બની દસ હજાર વર્ષ સુધી, અવ્યક્તનું ચિંતન કરનારા

લાખ વર્ષો સુધી કૈવલ્ય જેવી દશામાં રહે છે. પણ નિર્ગુણ પુરુષને પ્રાપ્ત કર્યા પછી કાળની મર્યાદા નથી.''

આમ આ (પ્રકૃતિલય) ફરીથી જન્મવાના હેતુરૂપ હોવાથી, ત્યાજ્ય છે, એમ સિદ્ધ થયું. ૧૯

★

श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम् ॥२०॥

શ્રદ્ધા, ઉત્સાહ, સ્મૃતિ, સમાધિ અને પ્રજ્ઞાપૂર્વક બીજાઓ (યોગીઓ)ને અસંપ્રજ્ઞાત સમાધિ થાય છે. ૨૦

भाष्य

उपायप्रत्ययो योगिनां भवति । श्रद्धा चेतसः संप्रसादः । सा हि जननीव कल्याणी योगिनं पाति । तस्य हि श्रद्दधानस्य विवेकार्थिनो वीर्यमुपजायते । समुपजातवीर्यस्य स्मृतिरुपतिष्ठते । स्मृत्युपस्थाने च चित्तमनाकुलं समाधीयते । समाहितचित्तस्य प्रज्ञाविवेक उपावर्तते, येन यथार्थं वस्तु जानाति । तदभ्यासात्तद्विषयाच्च वैराग्यादसंप्रज्ञातः समाधिर्भवति ॥२०॥

ઉપાયપ્રત્યય યોગીઓને શ્રદ્ધા વગેરેથી સમાધિલાભ થાય છે. શ્રદ્ધા એટલે (ધ્યેય સાથે એકતાની કલ્પનાથી થતી) પ્રસન્નતા. એ (શ્રદ્ધા) હિતૈષિણી માતાની જેમ યોગીનું રક્ષણ કરે છે. શ્રદ્ધાયુક્ત, વિવેકજ્ઞાનની અભીપ્સાવાળા યોગીમાં ઉત્સાહ અને શક્તિ ઉત્પન્ન થાય છે. શક્તિમાન્ યોગીમાં સ્મૃતિ (સતત સજગતા) પેદા થાય છે. એનાથી ચિત્ત વ્યાકુળતાવિનાનું બનીને સમાધિમાં પ્રવેશે છે. ચિત્ત સમાહિત થતાં વિવેક- ખ્યાતિ ઉત્પન્ન થાય છે, જેનાથી યોગી યથાર્થ સદ્વસ્તુને જાણે છે. એના અભ્યાસથી અને ઉપસ્થિત થતા તે તે વિષયમાં વૈરાગ્ય કેળવવાથી અસંપ્રજ્ઞાત સમાધિ થાય છે. ૨૦

तत्त्व वैशारदी

योगिनां तु समाधेरुपायक्रममाह-श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम् । नन्विन्द्रियादिचिन्तका अपि श्रद्धावन्त एवेत्यत आह-श्रद्धा चेतसः संप्रसादः । स

चागमानुमानाचार्योपदेशसमधिगततत्त्वविषयो भवति हि चेतसः संप्रसादोऽभिरुचिरतीच्छा श्रद्धा नेन्द्रियादिष्वात्माभिमानिनामभिरुचिरसंप्रसादो हि स व्यामोहमूलत्वादित्यर्थः । कुतोऽसावेव श्रद्धेत्यत आह-सा हि जननीव कल्याणी योगिनं पाति विमार्गपातजन्मनोऽनर्थात् । सोऽयमिच्छाविशेष इष्यमाणविषयं प्रयत्नं प्रसूत इत्याह-तस्य हि श्रद्दधानस्य । तस्य विवरणं-विवेकार्थिनो वीर्यमुपजायते । स्मृतिर्ध्यानम् । अनाकुलमविक्षिप्तम् । समाधीयते योगाङ्गसमाधियुक्तं भवति । यमनियमादिनान्तरीकसमाध्युपन्यासेन च यमनियमादयोऽपि सूचिताः । तदेवमखिलयोगाङ्गसंपन्नस्य संप्रज्ञातो जायत इत्याह-समाहितचित्तस्येति । प्रज्ञाया विवेकः प्रकर्ष उपजायते । संप्रज्ञातपूर्वमसंप्रज्ञातोत्पादमाह- तदभ्यासात् तत्रैव तत्तद्भूमिप्राप्तौ तद्विषयाच्च वैराग्यादसंप्रज्ञातः समाधिर्भवति । स हि कैवल्यहेतुः । सत्त्वपुरुषान्यताख्यातिपूर्वो हि निरोधश्चित्तमखिलकार्यकरणेन चरितार्थमधिकारादवसादयति ॥२०॥

યોગીઓ માટે ક્રમપૂર્વક સમાધિનો ઉપાય કહે છે : બીજાઓને (યોગીઓને) શ્રદ્ધા, ઉત્સાહ, સ્મૃતિ, સમાધિ, અને પ્રજ્ઞાપૂર્વક સમાધિ થાય છે.

ઇન્દ્રિયવગેરેના ચિંતકો પણ શ્રદ્ધાવાળા હોય છે, તેથી શ્રદ્ધાનો અર્થ પ્રસન્નતા એવો કરે છે. આગમ, અનુમાન અને આચાર્યના ઉપદેશથી અસંપ્રજ્ઞાતસમાધિ માટે અભિરુચિવાળી અભીપ્સાથી એવી પ્રસન્નતા ઉત્પન્ન થાય છે. જે લોકો ઇન્દ્રિય વગેરેને આત્મા ગણવાના કારણે વ્યામોહમાં પડ્યા છે. તેઓમાં આ પ્રસન્નતા અને અભીપ્સા ઉત્પન્ન થતાં નથી. આને જ શ્રદ્ધા કેમ કહેવામાં આવે છે ? કારણ કે એ પ્રેમાળ માતાની જેમ યોગીનું અવળા માર્ગે જવાથી ઉત્પન્ન થતા અનિષ્ટથી રક્ષણ કરે છે. એ અભીપ્સાના વિષયને સ્પષ્ટ કરી, એની પ્રાપ્તિના પ્રયત્નને જન્મ આપે છે. શ્રદ્ધાયુક્ત, વિવેકની ઇચ્છાવાળા યોગીમાં શક્તિ પેદા થાય છે. સ્મૃતિ એટલે ધ્યેયની નિરંતર સભાનતા. અવિક્ષેપ એટલે થોડા વખત માટે સ્થિરતા નહીં, પણ સતત એકાગ્રતાવાળી સ્થિરતા. એનાથી યોગના અંગ તરીકે વર્ણવેલો સમાધિ થાય છે. યમનિયમ વગેરેથી સમાધિ બહુ દૂર નથી, તેથી યમનિયમ પણ સૂચવ્યા. સમાહિત ચિત્તવાળા યોગીમાં પ્રજ્ઞાના વિકાસરૂપે વિવેક ઉત્પન્ન થાય છે. સંપ્રજ્ઞાત પછી, અસંપ્રજ્ઞાત સમાધિ થાય છે. અભ્યાસથી એની ભૂમિ (અવસ્થા) દૃઢ થતાં, પછીથી એના વિષયમાં પણ વૈરાગ્ય થવાથી અસંપ્રજ્ઞાત સમાધિ થાય છે. એ કૈવલ્યનો હેતુ છે. સત્ત્વ અને પુરુષની ભિન્નતાનું જ્ઞાન ઉત્પન્ન થતાં ચિત્તનો નિરોધ થાય છે, જેનાથી ચરિતાર્થ બનેલું ચિત્ત બધાં કાર્યકરણોના અધિકારથી નિવૃત્ત થાય છે. ૨૦

★

તે ખલુ નવ યોગિનો મૃદુમધ્યાધિમાત્રોપાયા ભવન્તિ । તદ્યથા- મૃદૂપાયો, મધ્યોપાયોઽધિમાત્રોપાય ઇતિ । તત્ર મૃદૂપાયોઽપિ ત્રિવિધઃ- મૃદુસંવેગો, મધ્યસંવેગસ્તીવ્રસંવેગ ઇતિ । તથા મધ્યોપાયસ્તથાધિમાત્રોપાય ઇતિ । તત્રાધિમાત્રોપાયાનામ્ - યોગીઓ નવ પ્રકારના હોય છે. મૃદુ, મધ્યમ અને તીવ્ર ઉપાયવાળા. જેમકે કેટલાક મંદ ઉપાયવાળા, કેટલાક મધ્યમ ઉપાયવાળા અને કેટલાક તીવ્ર ઉપાયવાળા હોય છે. એમાં મૃદુ ઉપાયવાળા ત્રણ પ્રકારના હોય છે, મંદગતિ, મધ્યમગતિ અને તીવ્રગતિવાળા. મધ્યમ ઉપાયવાળા પણ આ રીતે ત્રણ પ્રકારની ગતિવાળા, અને તીવ્ર ઉપાયવાળા પણ ત્રણ પ્રકારની ગતિવાળા હોય છે. એમાં તીવ્રઉપાયવાળાઓમાં-

तीव्रसंवेगानामासन्नः ॥२१॥

તીવ્રગતિવાળા યોગીઓને સમાધિલાભ જલ્દી થાય છે. ૨૧

भाष्य

समाधिलाभः समाधिफलं च भवतीति ॥२१॥

તીવ્રગતિવાળા યોગીઓને સમાધિલાભ અને સમાધિનું ફળ (કૈવલ્ય) જલ્દી મળે છે. ૨૧

तत्त्व वैशारदी

ननु श्रद्धादयश्चेद्योगोपायास्तर्हि सर्वेषामविशेषेण समाधितत्फले स्याताम् । दृश्यते तु कस्यचित्सिद्धिः कस्यचिदसिद्धिः कस्यचिच्चिरेण सिद्धिः कस्यचिच्चिरतरेण कस्यचित्क्षिप्रमित्यत आह-ते खलु नव योगिन इति । उपायः श्रद्धादयो मृदुमध्याधिमात्राः प्राग्भवीयसंस्कारादृष्टवशाद्येषां ते तथोक्ताः । संवेगो वैराग्यं तस्यापि मृदुमध्यतीव्रता प्राग्भवीयवासनादृष्टवशादेवेति तेषु यादृशां क्षेपीयसी सिद्धिस्तान्दर्शयति सूत्रेण - तीव्रसंवेगानामासन्न इति सूत्रम् । शेषं भाष्यम् । समाधेः संप्रज्ञातस्य फलमसंप्रज्ञातस्तस्यापि कैवल्यम् ॥२१॥

જો શ્રદ્ધા વગેરે યોગના ઉપાયો હોય, તો બધાને સરખી રીતે સમાધિલાભ અને એનું ફળ (કૈવલ્ય) મળવું જોઈએ. પરંતુ જોવામાં આવે છે કે કોઈને સિદ્ધિ મળે છે, કોઈને મળતી નથી. કોઈને લાંબા સમય પછી, અને કોઈને એના કરતાં પણ વધારે સમય પછી મળે છે. જ્યારે કેટલાકને જલ્દી સિદ્ધિ મળે છે. આ શંકાના સમાધાન માટે ભાષ્યકાર "તે ખલુ નવ યોગિનો મૃદુમધ્યાધિમાત્રોપાયા..." વગેરેથી

કહે છે કે શ્રદ્ધા વગેરે ઉપાયો પૂર્વજન્મના સંસ્કારોને કારણે અને અદૃષ્ટ (પ્રારબ્ધ)ને કારણે મૃદુ, મધ્યમ અને તીવ્ર એમ ત્રણ પ્રકારના હોય છે. સંવેગ એટલે વૈરાગ્ય એની પણ મંદતા, મધ્યતા અને તીવ્રતા પૂર્વ જન્મની વાસનાઓ અને અદૃષ્ટને કારણે જ થાય છે. એમાં જેમને અત્યંત ઓછા સમયમાં સિદ્ધિ મળે છે, એમના વિષે સૂત્રથી કહે છે કે તીવ્ર વૈરાગ્યવાળા યોગીને જલ્દી સિદ્ધિ મળે છે. આ સૂત્ર છે, અને બાકીનું ભાષ્ય છે. સંપ્રજ્ઞાત સમાધિનું ફળ અસંપ્રજ્ઞાત સમાધિ છે, અને એનું ફળ કૈવલ્ય છે. ૨૧

मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः ॥२२॥

તીવ્રમાં પણ મૃદુ, મધ્ય અને અત્યંત તીવ્ર એવા ભેદથી વધારાના ભેદો થાય છે. ૨૨

ભાષ્ય

मृदुतीव्रो मध्यतीव्रोऽधिमात्रतीव्र इति, ततोऽपि विशेषः । तद्विशेषान्मृदु तीव्रसंवेगस्यासन्नस्ततो मध्यतीव्रसंवेगस्यासन्नतरस्तस्मादधिमात्रतीव्रसंवेगस्याधिमात्रोपायस्यासन्नतमः समाधिलाभः समाधिफलं चेति ॥२२॥

તીવ્રતામાં પણ મૃદુતીવ્ર, મધ્યમતીવ્ર અને અત્યંત તીવ્ર એવા ભેદોને કારણે અગાઉ કહ્યા કરતાં પણ વિશેષતા છે. આ વિશેષતાના કારણે મૃદુતીવ્ર સંવેગવાળાને જલ્દી, મધ્ય તીવ્ર સંવેગવાળાને એનાથી પણ જલ્દી અને અત્યંતતીવ્ર સંવેગવાળાને અને પૂર્ણતત્પરતાથી ઉપાયો યોજનારા યોગીને સૌથી વધારે જલ્દીથી સમાધિ અને સમાધિનું ફળ મળે છે. ૨૨

તત્ત્વ વૈશારદી

मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः । निगदव्याख्यातेन भाष्येण व्याख्यातमिति ॥२२॥

તીવ્રસંવેગવાળા યોગીઓમાં પણ મૃદુ, મધ્યમ અને અત્યંત વેગવાળાઓને અગાઉ જણાવ્યા કરતાં વિશેષ ત્વરાથી સમાધિ થાય છે. આ હકીકત ભાષ્યમાં સ્પષ્ટપણે કહેવાઈ છે. ૨૨

★

किमेतस्मादेवासन्नतरः समाधिर्भवति, अथास्य लाभे भवत्यन्योऽपि कश्चिदुपायो

ન વેતિ- આટલાથી જ સમાધિલાભ વધુ નજીક હોય છે, કે એના લાભ માટે બીજો પણ કોઈ ઉપાય છે ?

ईश्वरप्रणिधानाद्वा ॥२३॥

અથવા ઈશ્વરનું પ્રણિધાન (ભક્તિવિશેષ) કરવાથી (સમાધિ થાય છે). ૨૩

भाष्य

प्रणिधानाद्भक्तिविशेषादावर्जित ईश्वरस्तमनुगृह्णात्यभिध्यानमात्रेण । तदभिध्यानमात्रादपि योगिन आसन्नतरः समाधिलाभः समाधिफलं च भवतीति ॥२३॥

પ્રણિધાન એટલે ભક્તિવિશેષ. એનાથી પ્રસન્ન થયેલા ઈશ્વર ફક્ત પોતાની ઇચ્છાથી ભક્તપર અનુગ્રહ કરે છે. એમના અભિધ્યાન (સંકલ્પ)માત્રથી યોગીને જલ્દી સમાધિ અને એનું ફળ પ્રાપ્ત થાય છે. ૨૩

तत्त्व वैशारदी

सूत्रान्तरं पातयितुं विमृशति-किमेतस्मादेवेति । नवा शब्दः संशयनिवर्तकः । ईश्वरप्रणिधानाद्वा । व्याचष्टे-प्रणिधानाद्भक्तिविशेषान्मानसाद्वाचिकात्कायिका-द्वावर्जितोऽभिमुखीकृतस्तमनुगृह्णाति । अभिध्यानमनागतार्थेच्छा-इदमस्याभिमतमस्त्विति: । तन्मात्रेण न व्यापारान्तरेण । शेषं सुगमम् ॥२३॥

"किमेतस्मादेव..." વગેરેથી બીજા સૂત્રને રજૂ કરવા માટે પ્રશ્ન કરે છે. અહીં "न वा" શબ્દ સંશય નિવૃત્ત કરે છે. સૂત્ર સજાવવતાં કહે છે કે પ્રણિધાન કે વિશેષપ્રકારની ભક્તિથી, એટલે કે મન, વાણી કે શરીરથી કરેલી ભક્તિથી પ્રસન્ન થઈને, અભિમુખ થયેલા ઈશ્વર ભક્ત પર અનુગ્રહ કરે છે. અભિધ્યાન એટલે અપ્રાપ્ત વસ્તુ આને પ્રાપ્ત થાઓ એવી માત્ર ઇચ્છા. એનાથી જ, બીજા કોઈ વ્યાપારથી નહીં. બાકીનું સરળ છે. ૨૩

★

अथ प्रधानपुरुषव्यतिरिक्तः कोऽयमीश्वरो नामेति- પ્રધાન અને પુરુષથી જુદો આ ઈશ્વર નામનો કોણ છે ?

क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ॥२४॥

ક્લેશ, કર્મવિપાક અને આશયથી ન સ્પર્શાયેલો વિશેષ પ્રકારનો પુરુષ ઈશ્વર છે. ૨૪

भाष्य

अविद्यादयः क्लेशाः, कुशलाकुशलानि कर्माणि, तत्फलं विपाकः, तदनुगुणा वासना आशयाः । ते च मनसि वर्तमानाः पुरुषे व्यपदिश्यन्ते, स हि तत्फलस्य भोक्तेति । यथा जयः पराजयो वा योद्धृषु वर्तमानः स्वामिनि व्यपदिश्यते । यो ह्यनेन भोगेनापरामृष्टः स पुरुषविशेष ईश्वरः ।

कैवल्यं प्राप्तास्तर्हि सन्ति च बहवः केवलिनः, ते हि त्रीणि बन्धनानि च्छित्त्वा कैवल्यं प्राप्ताः । ईश्वरस्य च तत्संबन्धो न भूतो न भावी । यथा मुक्तस्य पूर्वा बन्धकोटिः प्रज्ञायते, नैवमीश्वरस्य । यथा वा प्रकृतिलीनस्योत्तरा बन्धकोटिः संभाव्यते, नैवमीश्वरस्य । स तु सदैव मुक्तः सदैवेश्वर इति ।

योऽसौ प्रकृष्टसत्त्वोपादानादीश्वरस्य शाश्वतिक उत्कर्षः स किं सनिमित्त आहोस्विन्निर्निमित्त इति ? तस्य शास्त्रं निमित्तम् ।

शास्त्रं पुनः किंनिमित्तम् ? प्रकृष्टसत्त्वनिमित्तम् ।

एतयोः शास्त्रोत्कर्षयोरीश्वरसत्त्वे वर्तमानयोरनादिः संबन्धः । एतस्मादेतद्भवति सदैवेश्वरः सदैव मुक्त इति । तच्च तस्यैश्वर्यं साम्यातिशयविनिर्मुक्तम्, न तावदैश्वर्यान्तरेण तदतिशय्यते । यदेवातिशयि स्यात्तदेव तत्स्यात् । तस्माद्यत्र काष्ठाप्राप्तिरैश्वर्यस्य स ईश्वरः । न च तत्समानमैश्वर्यमस्ति, कस्मात्, द्वयोस्तुल्ययोरेकस्मिन्युगपत्कामितेऽर्थे नवमिदमस्तु पुराणमिदमस्त्वित्येकस्य सिद्धावितरस्य प्राकाम्यविधातादूनत्वं प्रसक्तम् । द्वयोश्च तुल्ययोर्युगपत्कामितार्थप्राप्तिर्नास्ति, अर्थस्य विरुद्धत्वात् तस्माद्यस्य साम्यातिशयैर्विनिर्मुक्तमैश्वर्यं स एवेश्वरः । स च पुरुषविशेष इति ॥२४॥

અવિદ્યા વગેરે ક્લેશો છે. કુશળ (ધર્મ) અને અકુશળ (અધર્મ) કર્મો છે, એમનું ફળ વિપાક છે. એમને અનુરૂપ વાસનાઓ આશય છે. આ બધાં મનમાં રહે છે, છતાં પુરુષમાં છે, એમ કહેવાય છે, કારણ કે એ એમનાં ફળ ભોગવનાર છે. જેમ યોદ્ધાઓમાં રહેલા જય કે પરાજય સ્વામી

(રાજા)માં રહેલા કહેવાય છે. જે આવા ભોગથી અસ્પૃષ્ટ છે એ પુરુષવિશેષ ઈશ્વર છે.

કૈવલ્ય પ્રાપ્ત કરનારા ઘણા કેવલીઓ છે. એમણે ત્રણ બંધનો કાપીને કૈવલ્ય પ્રાપ્ત કર્યું છે. પણ ઈશ્વરને તો આ બંધનોનો સંબંધ ભૂતકાળમાં કે ભવિષ્યમાં કદી થતો નથી. જેમ મુક્તની અગાઉની બંધનની કોટિ જણાય છે એવી ઈશ્વરને નથી. અથવા પ્રકૃતિલીનની ભાવી બંધનકોટિ સંભવિત છે, એવી ઈશ્વરને નથી. એ તો સદૈવ મુક્ત, સદૈવ ઈશ્વર છે.

ઈશ્વરનો આવો ઉત્તમ સત્ત્વના ઉપાદાન (સ્વીકાર)ને કારણે જણાતો સનાતન ઉત્કર્ષ છે, એ નિમિત્ત (કારણ)વાળો છે કે નિમિત્ત વિનાનો છે ? (એનો જવાબ છે) શાસ્ત્ર એનું નિમિત્ત છે. શાસ્ત્રનું શું નિમિત્ત છે ? પ્રકૃષ્ટ સત્ત્વગુણ શાસ્ત્રનું નિમિત્ત છે. આ બે પ્રકૃષ્ટ સત્ત્વગુણ અને શાસ્ત્ર-ઈશ્વરમાં રહે છે. એમનો આ સંબંધ અનાદિ છે. આ કારણે ઈશ્વર સદૈવ ઈશ્વર અને મુક્ત છે. એનું આવું ઐશ્વર્ય સમાનતાથી અને વિશેષતાથી મુક્ત છે. બીજું કોઈ ઐશ્વર્ય એના કરતાં વધારે નથી. જે શ્રેષ્ઠ ઐશ્વર્ય છે એ ઈશ્વરનું છે. જેમાં ઐશ્વર્યની પરાકાષ્ઠા છે, એ ઈશ્વર છે. વળી, એના જેવું ઐશ્વર્ય બીજામાં નથી. કારણ કે બે સમાન ઐશ્વર્યવાળા એક પદાર્થમાં એકી સાથે આ નવી બને અને આ જૂની બને એમ ઇચ્છે, તો એમાંથી એકની ઇચ્છા સિદ્ધ થતાં, બીજાનું પ્રાકામ્ય નષ્ટ થાય અને વિરુદ્ધ હોવાના કારણે, ઇચ્છિત પદાર્થની પ્રાપ્તિ થાય નહીં. તેથી જેનું ઐશ્વર્ય સમાનતા અને અધિકતાથી મુક્ત હોય, એ ઈશ્વર છે - એ પુરુષ વિશેષ છે. ૨૪

तत्त्व वैशारदी

ननु चेतनाचेतनाभ्यामेव व्यूढं नान्येन विश्वम् । ईश्वरश्चेदचेतनस्तर्हि प्रधानम् । प्रधानविकाराणामपि प्रधानमध्यपातात् । तथा च न तस्यावर्जनम्, अचेतनत्वात् । अथ चेतनस्तथापि चितिशक्तेरौदासीन्यादसंसारितया चास्मितादिविरहात्कुत आवर्जनं कुतश्चाभिध्यानमित्याशयवानाह-अथ प्रधानेति । अत्र सूत्रेणोत्तरमाह-क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः । अविद्यादयः क्लेशाः । क्लिश्यन्ति खल्वमी पुरुषं सांसारिकविविधदुःखप्रहारेणेति । कुशलाकुशलानीति धर्माधर्माः । तेषां च कर्मजत्वादुपचारात्कर्मत्वम् । विपाको जात्यायुर्भोगाः । विपाकानुगुणा

वासनास्ताश्चित्तभूमावाशेरत इत्याशयाः । न हि करभजातिनिर्वर्तकं कर्म प्राग्भवीयकरभभोगभावितां भावनां न यावदभिव्यनक्ति तावत्करभोचिताय भोगाय कल्पते । तस्माद्भवति करभजात्यनुभवजन्मा भावना करभविपाकानुगुणेति । नन्वमी क्लेशादयो बुद्धिधर्मा न कथंचिदपि पुरुषं परामृशन्ति । तस्मात्पुरुषग्रहणादेव तदपरामर्शसिद्धेः कृतं क्लेशकर्मेत्यादिनेत्यत आह-ते च मनसि वर्तमानाः सांसारिके पुरुषे व्यपदिश्यन्ते । कस्मात्, स हि तत्फलस्य भोक्ता चेतयितेति । तस्मात्पुरुषत्वादीश्वरस्यापि तत्संबन्धः प्राप्त इति तत्प्रतिषेध उपपद्यत इत्याह- यो ह्यनेन बुद्धिस्थेनापि पुरुषमात्रसाधारणेन भोगेनापरामृष्टः स पुरुषविशेष ईश्वरः । विशिष्यत इति विशेषः । पुरुषान्तराद्व्यवच्छिद्यते ।

विशेषपदस्य व्यावर्त्यं दर्शयितुकामः परिचोदनापूर्वं परिहरति-कैवल्यं प्राप्तास्तर्हीति । प्रकृतिलयानां प्राकृतो बन्धः । वैकारिको बन्धो विदेहानाम् । दक्षिणादिबन्धो दिव्यादिव्यविषयभोगभाजाम् । तान्यमूनि त्रीणि बन्धनानि । प्रकृतिभावनासंस्कृतमनसो हि देहपातानन्तरमेव प्रकृतिलयतामापन्ना इति तेषां पूर्वा बन्धकोटिः प्रज्ञायते, तेनोत्तरकोटिविधानमात्रम् । इह तु पूर्वापरकोटिनिषेध इति । संक्षिप्य विशेषं दर्शयति-स तु सदैव मुक्तः सदैवेश्वर इति । ज्ञानक्रियाशक्तिसंपद् ऐश्वर्यम् ।

अत्र पृच्छति-योऽसाविति । ज्ञानक्रिये हि न चिच्छक्तेरपरिणामिन्याः संभवत इति रजस्तमोरहितविशुद्धचित्तसत्त्वाश्रये वक्तव्ये । न चेश्वरस्य सदा मुक्तस्याविद्या-प्रभवचित्तसत्त्वसमुत्कर्षेण सह स्वस्वामिभावः संबन्धः संभवतीत्यत उक्तं-प्रकृष्टसत्त्वोपादानादिति । नेश्वरस्य पृथग्जनस्येवाविद्यानिबन्धनश्चित्तसत्त्वेन स्वस्वामिभावः, किं तु तापत्रयपरीतान्प्रेत्यभावमहार्णवाज्जन्तूनुद्धरिष्यामि ज्ञानधर्मोपदेशेन । न च ज्ञानक्रिया सामर्थ्यातिशयसंपत्तिमन्तरेण तदुपदेशः । न चेयमपहतरजस्तमोमलविशुद्धसत्त्वोपादानं विनेत्यालोच्य सत्त्वप्रकर्षमुपादत्ते भगवानपरामृष्टोऽप्यविद्यया । अविद्याभिमानी चाविद्यायास्तत्त्वमविद्वान्भवति न पुनरविद्यामविद्यात्वेन सेवमानः । न खलु शैलूषो रामत्वमारोप्य तास्ताश्चेष्टा दर्शयन्भ्रान्तो भवति । तदिदमाहार्यमस्य रूपं न तात्त्विकमिति । स्यादेतत्-उद्दिधीर्षया भगवता सत्त्वमुपादेयं तदुपादानेन च तदुद्दिधीर्षा, अस्या अपि प्राकृतत्वात् । तथा चान्योन्यसंश्रय इत्यत उक्तं-शाश्वतिक इति । भवेदेतदेवं यदीदंप्रथमता सर्गस्य भवेत् । अनादौ तु सर्गसंहारप्रबन्धे सर्गान्तरसमुत्पन्नसंजिहीर्षावधिसमये पूर्णे मया सत्त्वप्रकर्ष उपादेय इति प्रणिधानं कृत्वा भगवाञ्जगत्संजहार । तदा चेश्वरचित्तसत्त्वं प्रणिधानवासितप्रधानसाम्यमुपगतमपि परिपूर्णे महालयावधौ प्रणिधानवासना-

वशात्तथैवेश्वरचित्तसत्त्वभावेन परिणमते । यथा चैत्रः श्वः प्रातरेवोत्थातव्यं मयेति प्रणिधाय सुप्तस्तदैवोत्तिष्ठते प्रणिधानसंस्कारात् । तस्मादनादित्वादीश्वरप्रणिधानसत्त्वोपादानयोः शाश्वतिकत्वेन नान्योन्यसंश्रयः । न चेश्वरस्य चित्तसत्त्वं महाप्रलयेऽपि न प्रकृतिसाम्यमुपैतीति वाच्यम् । यस्य हि न कदाचिदपि प्रधानसाम्यं न तत्प्राधानिकं नापि चितिशक्तिरज्ञत्वादित्यर्थान्तरमप्रमाणिकमापद्येत । तच्चायुक्तम् । प्रकृतिपुरुषव्यतिरेकेणार्थान्तराभावात् । सोऽयमीदृश ईश्वरस्य शाश्वतिक उत्कर्षः । किं सनिमित्तः सप्रमाणक आहोस्विन्निर्निमित्तो निष्प्रमाणक इति । उत्तरं-तस्य शास्त्र निमित्तम् । श्रुतिस्मृतीतिहासपुराणानि शास्त्रम् ।

चोदयति-शास्त्रं पुनः किं निमित्तम् । प्रत्यक्षानुमानपूर्वं हि शास्त्रम् न चेश्वरस्य सत्त्वप्रकर्षे कस्यचित्प्रक्षत्यमनुमानं वास्ति । न चेश्वरप्रत्यक्षप्रभवं शास्त्रमिति युक्तम् । कल्पयित्वापि ह्ययं ब्रूयादात्मैश्वर्यप्रकाशनायेति भावः । परिहरति-प्रकृष्टसत्त्वनिमित्तम् । अयमभिसंधिः-मन्त्रायुर्वेदेषु तावदीश्वरप्रणीतेषु प्रवृत्तिसामर्थ्यादर्थाव्यभिचारविनिश्चयात्प्रामाण्यं सिद्धम् । न चौषधिभेदानां तत्संयोगविशेषाणां च मन्त्राणां च तत्तद्वर्णावापोद्धारेण सहस्रेणापि पुरुषायुषैर्लौकिकप्रमाणव्यवहारो शक्तः कर्तुमन्वयव्यतिरेकौ । न चागमादन्वयव्यतिरेकौ ताभ्यां चागमस्तत्संतानयोरनादित्वादिति प्रतिपादयितुं युक्तम् । महाप्रलये तत्संतानयोर्विच्छेदात् । न च तद्भावे प्रमाणाभावः । अभिन्नं प्रधानविकारो जगदिति हि प्रतिपादयिष्यते । सदृशपरिणामस्य च विसदृशपरिणामता दृष्टा । यथा क्षीरेक्षुरसादेर्दधिगुडादिरूपा । विसदृशपरिणामस्य पूर्वं सदृशपरिणामता च दृष्टा । तदिह प्रधानेनापि महदहङ्कारादिरूपविसदृशपरिणामेन सता भाव्यं कदाचित्सदृशपरिणामेनापि । सदृशपरिणामश्चास्य साम्यावस्था । स च महाप्रलयः । तस्मान्मन्त्रायुर्वेदप्रणयनात्तावद्भगवतो विगलितरजस्तमोमलावरणतया परितः प्रद्योतमानं बुद्धिसत्त्वप्रकर्षादेव भवितुमर्हति । न च सत्त्वोत्कर्षे रजस्तमःप्रभवौ बिभ्रमविप्रलम्भौ संभवतः । तत्सिद्धं प्रकृष्टसत्त्वनिमित्तं शास्त्रमिति ।

स्यादेतत्-प्रकर्षकार्यतया प्रकर्षं बोधयच्छास्त्रं शेषवदनुमानं भवेत्र त्वागम इत्यत आह-एतयोरिति । न कार्यत्वेन बोधयत्यपि त्वनादिवाच्यवाचकभावसंबन्धेन बोधयतीत्यर्थः । ईश्वरस्य हि बुद्धिसत्त्वे प्रकर्षो वर्तते, शास्त्रमपि तद्वाचकत्वेन तत्र वर्तत इति । उपसंहरति-एतस्माद् ईश्वरबुद्धिसत्त्वप्रकर्षवाचकाच्छास्त्रादेतद्भवति ज्ञायते विषयेण विषयिणो लक्षणात्सदैवेश्वरः सदैव मुक्त इति । तदेवं पुरुषान्तराद्व्यवच्छिद्येश्वरान्तरादपि व्यवच्छिनत्ति-तच्च तस्येति । अतिशयविनिर्मुक्तिमाह-न तावदिति । कुतः-यदेवेति । कस्मात्सर्वातिशयविनिर्मुक्तं तदैश्वर्यमित्यत आह-

तस्माद्यत्रेति । अतिशयनिष्ठामप्राप्तानामौपचारिकमैश्वर्यमित्यर्थः । साम्यविनिर्मुक्तिमाह-न च तत्समानमिति । प्राकाम्यमविहतेच्छता । तद्विघातादूनत्वम् । अनूनत्वे वा द्वयोरपि प्राकाम्यविघातः कार्यानुत्पत्तेः । उत्पत्तौ वा विरुद्धधर्मसमालिङ्गितमेकदा कार्यमुपलभ्येतेत्याशयवानाह-द्वयोश्चेति । अविरुद्धाभिप्रायत्वे च प्रत्येकमीश्वरत्वे कृतमन्यैरेकेनैवेशनायाः कृतत्वात् । संभूयकारित्वे वा न कश्चिदीश्वरः परिषद्वत् । नित्येशनायोगिनां च पर्यायायोगात्कल्पनागौरवप्रसङ्गाच्चेति द्रष्टव्यम् । तस्मात्सर्वमवदातम् ॥२४॥

વિશ્વ ચેતન અને અચેતનનો વ્યૂહ છે, અન્ય કોઈ તત્ત્વ નથી. ઈશ્વર અચેતન હોય તો પ્રધાન છે. પ્રધાનના વિકારો પણ પ્રધાનમાં જ ગણાય. તેથી ઈશ્વરમાં પ્રસન્નતા સંભવે નહીં. અને ચેતન હોય તો પણ ચિતિશક્તિ ઉદાસીન હોવાથી, અસંસારી છે. તેથી એમાં અસ્મિતા વગેરે ન હોઈ શકે. તો એમાં પ્રસન્ન કે અભિમુખ થઈને કલ્યાણ કરવાની ઇચ્છા કેવી રીતે સંભવે ? ''અથ પ્રધાનપુરુષ વ્યતિરિક્તः કોઽયમીશ્વરો નામ ?'' વડે આવી શંકા કરીને સૂત્રથી એનું સમાધાન કરે છે. ક્લેશ, કર્મવિપાક અને આશયથી અસ્પૃષ્ટ પુરુષવિશેષ ઈશ્વર છે.

અવિદ્યા વગેરે ક્લેશો છે, કારણ કે એ સંસારી પુરુષોને વિવિધ દુઃખોના આઘાતથી હેરાન કરે છે. કુશળ, અકુશળ એટલે ધર્મ અને અધર્મ કર્મથી ઉત્પન્ન થતા હોવાથી એમને ઉપચારથી (ગૌણ દૃષ્ટિએ) કર્મ કહે છે. જન્મ, આયુષ્ય અને ભોગ કર્મવિપાક (ફળ) છે. વિપાકને અનુરૂપ વાસનાઓ ચિત્તભૂમિમાં સૂતેલી રહેવાથી આશય કહેવાય છે. પૂર્વજન્મનાં જે કર્મ ઊંટનો જન્મ આપે, એ ઊંટના શરીર માટે યોગ્ય ભોગો વ્યક્ત ન કરે, ત્યાં સુધી, તેને અનુરૂપ ભોગ આપ્યા કરે છે. તેથી ઊંટના જીવન દરમ્યાનના અનુભવોને પ્રગટ કરનારી વાસનાઓ એના જીવનના અનુભવોને અનુરૂપ હોવી જોઈએ.

આ ક્લેશ વગેરે બુદ્ધિના ધર્મ છે, અને ક્યારેય પણ પુરુષને સ્પર્શતા નથી. તેથી પુરુષ શબ્દના પ્રયોગથી એમનો અસ્પર્શ સિદ્ધ થતો હોવાથી, ''ક્લેશકર્મવિપાકાશયૈરપરામૃષ્टः...''વગેરે કહેવાની શી જરૂર છે ? એના જવાબમાં કહે છે કે એ બધાં મનમાં રહેલાં હોવા છતાં સાંસારિક પુરુષમાં રહેલાં કહેવાય છે, કારણ કે એ એમનો ભોક્તા છે, અને ચેતન છે. ઈશ્વર પણ પુરુષ હોવાથી એને એમનો સંબંધ પ્રાપ્ત થાય છે. તેથી ઈશ્વરમાં એમનો નિષેધ કરવો જરૂરી છે, એમ કહે છે. જે પુરુષમાત્રમાટે સમાન છે, એવા બુદ્ધિમાં રહેલા ભોગથી પણ ન સ્પર્શાતો વિશેષ પ્રકારનો પુરુષ ઈશ્વર છે. સંસારી પુરુષોથી ભિન્ન હોવાપણું વિશેષતા છે. તેથી એ બીજા પુરુષોથી જુદો છે. ''કૈવલ્યંપ્રાપ્તાસ્તર્હિ...'' વગેરેથી વિશેષ એમ

કહીને જેમને અલગ રાખવા જરૂરી છે, એવા (મુક્ત) પુરુષોનો નિર્દેશ કરી, પ્રશ્નપૂર્વક એમનું નિરાકરણ કરે છે.

પ્રકૃતિલયોનું બંધન પ્રાકૃતિક છે. વિદેહોનું વૈકારિક છે, અને દિવ્ય તેમજ લૌકિક ભોગ ભોગવતા પુરુષોનું બંધન દક્ષિણા વગેરે સાથે સંબંધિત છે. આમ ત્રણ પ્રકારનાં બંધન છે. "સ તુ સદૈવ મુક્તઃ, સદૈવ ઈશ્વરઃ" ... વગેરેથી પ્રકૃતિની ભાવનાના સંસ્કારયુક્ત મનવાળા, શરીર પડ્યા પછી પ્રકૃતિ લય પામે છે, એમને ભવિષ્યમાં બંધનની સંભાવના દર્શાવી, બીજા (મુક્ત) પુરુષોને પૂર્વકાળમાં બંધન હતું એમ જણાવી, ઈશ્વરમાં પૂર્વ અને ઉત્તર બંને કોટિઓનાં બંધનનો નિષેધ કરી, સંક્ષેપમાં એની વિશેષતા દર્શાવે છે. ઐશ્વર્ય એટલે જ્ઞાન અને ક્રિયાશક્તિની સંપત્તિ. "યોઽસૌ પ્રકૃષ્ટ સત્ત્વોપાદાનાદીશ્વરસ્ય શાશ્વતિક ઉત્કર્ષ :..." વગેરેથી ઈશ્વરના શાશ્વત ઉત્કર્ષ વિષે પૂછે છે : અપરિણામિની ચિતિશક્તિમાં જ્ઞાન કે ક્રિયા સંભવતાં નથી. તેથી રજોગુણ, તમોગુણવિનાના શુદ્ધ ચિત્તસત્ત્વનો આશ્રય કહેવો જોઈએ. સદા મુક્ત ઈશ્વરને અવિદ્યાથી ઉત્પન્ન થયેલા ચિત્તસત્ત્વના ઉત્કર્ષ સાથે સ્વ-સ્વામીભાવ સંબંધ સંભવતો નથી, તેથી પ્રકૃષ્ટ સત્ત્વનું ઉપાદાન ઈશ્વર કરે છે, એમ કહ્યું. ઈશ્વરને સાધારણ મનુષ્યોની જેમ અવિદ્યાના કારણે ઉત્પન્ન થતા ચિત્તસત્ત્વ સાથે સ્વ-સ્વામીભાવ સંબંધ થતો નથી. પરંતુ ઈશ્વર (કરુણાથી) વિચારે છે કે ત્રણ પ્રકારના તાપોથી ઘેરાયેલા, જન્મમરણના ઊંડા ભવસાગરમાં ડૂબેલા જીવોનો હું જ્ઞાન અને ધર્મના ઉપદેશથી ઉદ્ધાર કરીશ. આવો ઉપદેશ જ્ઞાન અને ક્રિયાના નિરતિશય સામર્થ્યવાળા ઐશ્વર્ય વિના થઈ શકે નહીં, અને એવું ઐશ્વર્ય રજસ્-તમસ્થી વિમુક્ત શુદ્ધ સત્ત્વનો સ્વીકાર કર્યા વિના સંભવે નહીં. આવું વિચારીને ભગવાન અવિદ્યાના સંસ્પર્શથી સદૈવ મુક્ત હોવા છતાં, સત્ત્વપ્રકર્ષનો સ્વીકાર કરે છે. અવિદ્યાના તત્ત્વને ન જાણનાર એનું અભિમાન કરે છે, પણ અવિદ્યાને અવિદ્યા તરીકે જાણીને સેવનાર એમ કરતો નથી. અભિનેતા પોતાના ઉપર રામપણાનો આરોપ કરીને, એને અનુરૂપ તે તે ચેષ્ટા કરતો હોવા છતાં ભ્રાન્ત થતો નથી. એ જાણે છે કે અભિનય માટે સ્વીકારેલું આ રૂપ છે, તાત્ત્વિક નથી.

ભલે. પણ ભગવાન ઉદ્ધાર કરવાની ઇચ્છાથી સત્ત્વનો સ્વીકાર કરે છે, અને સત્ત્વનો સ્વીકાર કરીને ઉદ્ધારવાની ઇચ્છા કરે છે, આમ એ બેનો અન્યોન્યાશ્રય થયો, કારણ કે પ્રકૃતિને સ્વીકાર્યા વિના ઇચ્છા ઉત્પન્ન થાય નહીં. આ શંકાને નિવારવા માટે ઈશ્વરના ઉત્કર્ષને શાશ્વતિક કહ્યો. આ સૃષ્ટિ જો પહેલી વખત થઈ હોય તો આવી શંકા થાય, પણ સર્જન અને પ્રલયનો પ્રબંધ અનાદિ છે. તેથી પ્રલયનો અવધિ પૂરો થાય, ત્યારે મારે સત્ત્વનો પ્રકર્ષ સ્વીકારવો, એવું પ્રણિધાન કરીને, ભગવાને જગતનો સંહાર કર્યો. ત્યારે એ સંકલ્પની વાસનાથી રંગાયેલું

ઈશ્વરનું ચિત્તસત્ત્વ, પ્રધાનસાથે સામ્ય પ્રાપ્ત કર્યા પછી પણ મહાપ્રલયનો અવધિ પૂરો થયે, સંકલ્પની વાસનાના બળે પહેલાંની જેમ સત્ત્વભાવથી પરિણમે છે. જેમ ચૈત્ર આવતી કાલે સવારે મારે વહેલા ઊઠવું છે, એવો સંકલ્પ કરીને, એ સંકલ્પ બળથી વહેલો ઊઠે છે. આમ, ઈશ્વરનો સંકલ્પ અને સત્ત્વનો સ્વીકાર બંને અનાદિ હોવાથી શાશ્વતિક છે. તેથી અન્યોન્યાશ્રય દોષ થતો નથી.

ઈશ્વરનું ચિત્તસત્ત્વ મહાપ્રલયમાં પણ પ્રકૃતિ સાથે સામ્ય પ્રાપ્ત કરતું નથી- એમ ન માનવું જોઈએ. પ્રધાન સાથે જેનું ક્યારે પણ સામ્ય ન થાય, એ પ્રાકૃતિક નથી. તેમજ એ ચિતિશક્તિ પણ નથી, કારણ કે ચિત્તસત્ત્વ સ્વભાવે જડ છે. આમ, એ કંઈક અપ્રામાણિક બીજી જ વસ્તુ છે, એવો દોષ આવી પડે, જે અયોગ્ય છે. કારણ કે પ્રકૃતિ અને પુરુષથી અતિરિક્ત અન્ય તત્ત્વનો અભાવ છે.

ઈશ્વરનો આવો સનાતન ઉત્કર્ષ છે. એ સકારણ કે સપ્રમાણ છે કે નિમિત્ત વિનાનો અને અપ્રામાણિક છે ? આનો ઉત્તર એ છે કે શ્રુતિ, સ્મૃતિ, ઇતિહાસ, પુરાણ વગેરે શાસ્ત્ર એમાં પ્રમાણ છે. શાસ્ત્ર વિષે પૂછે છે : શાસ્ત્રનું નિમિત્ત શું છે ? શાસ્ત્ર પ્રત્યક્ષ અને અનુમાનના આધારે રચાય છે. ઈશ્વરના સત્ત્વપ્રકર્ષનું કોઈને પ્રત્યક્ષ કે અનુમાનથી જ્ઞાન થતું નથી. વળી, શાસ્ત્ર ઈશ્વરના પ્રત્યક્ષ જ્ઞાનના આધારે રચાય છે, એમ માનવું પણ યોગ્ય નથી, કારણ કે ઈશ્વર પોતાના ઐશ્વર્યના પ્રકાશ માટે એમ કરે છે, એવો દોષ કોઈ એમાં દર્શાવી શકે. આના પરિહાર માટે કહે છે કે શાસ્ત્ર પ્રકૃષ્ટ સત્ત્વ નિમિત્તવાળું છે. આનો ભાવ એ છે કે ઈશ્વરે રચેલા વેદમંત્રો અને આયુર્વેદ વિષયક અર્થોમાં કોઈ ફેરફાર જોવા મળતો નથી. આ કારણે લોકો વિશ્વાસપૂર્વક તે તે વિષયોમાં પ્રવૃત્તિ કરે છે. આમ એમની પ્રામાણિકતા સ્વયંસિદ્ધ છે. ઔષધોના ભેદો અને એમનાં વિવિધ મિશ્રણો, અને મંત્રોને પોતપોતાના વર્ગમાં ગોઠવવાનું અને છૂટા પાડવાનું કામ લૌકિક પ્રમાણોના આધારે કોઈ પણ મનુષ્ય હજાર જીવનો જેટલા લાંબા સમયમાં કરવા સમર્થ નથી. એમાં રહેલા ભેદાભેદનું જ્ઞાન આગમથી અને આગમનું જ્ઞાન ભેદાભેદના જ્ઞાનથી એમ અનાદિકાળથી ચાલ્યા આવતા પરસ્પરાશ્રયને કારણે સિદ્ધ થશે, અને આમ વેદમંત્રો અને આયુર્વેદનો વ્યવહાર સિદ્ધ થશે, એમ કહી શકાય નહીં, કારણ કે મહાપ્રલયમાં એ બેના અન્યોન્યાશ્રયની પરંપરા પણ નષ્ટ થાય છે.

વળી, એમની હયાતિમાં પ્રમાણ નથી, એમ ન કહેવાય. જગત પ્રધાનનું તેના જેવું પ્રમાણ છે, એ વાત આગળ કહેવાશે. દૂધમાંથી દહીં અને શેરડીના રસમાંથી ગોળ જેવાં અસમાન પરિણામ જોવા મળે છે, એથી ઊલટું, કારણના જેવા ગુણવાળાં કાર્ય પણ જોવામાં આવે છે. આમ પ્રધાન મહત્, અહંકાર વગેરે રૂપ વિસદૃશ (અસમાન) પરિણામ નિપજાવે છે, અને ક્યારેક સદૃશ પરિણામ પણ

નિપજાવે છે. એનું સદંશ પરિણામ પ્રલયકાળમાં એની સામ્યાવસ્થા છે. તેથી, મંત્રો અને આયુર્વેદનું પ્રણયન કરનાર ભગવાનનું રજસ્-તમસના મળોના આવરણ વિનાનું, ચોતરફ પ્રકાશતું બુદ્ધિસત્વ અવશ્ય સ્વીકારવું જોઈએ. અભ્યુદય (લૌકિક પ્રગતિ) અને નિઃશ્રેયસ (મોક્ષ)નો ઉપદેશ કરનાર વેદરાશિ ભગવાને રચ્યો છે, એ એમની બુદ્ધિમાં સત્ત્વના પ્રકર્ષથી જ શક્ય બને. અને સત્ત્વના પ્રકર્ષમાં રજસ્-તમસ્થી પ્રગટતા ભ્રમ અને છેતરપિંડી રહી શકે નહીં. તેથી શાસ્ત્ર પ્રકૃષ્ટ સત્ત્વના કારણે ઉત્પન્ન થાય છે, એમ સિદ્ધ થયું.

ભલે. પ્રકૃષ્ટ સત્ત્વનું કાર્ય હોવાથી પ્રકૃષ્ટ જ્ઞાનવાળું શાસ્ત્ર સાચો વ્યવહાર ઉપદેશી શકે. પરંતુ એ શેષવત્ (બાકી રહેલા ચિન્હથી વસ્તુનું) અનુમાન છે, આગમ (શબ્દ) પ્રમાણ નથી. આના જવાબમાં કહે છે કે ઈશ્વરમાં રહેલા પ્રકૃષ્ટ સત્ત્વ અને શાસ્ત્રનો સંબંધ અનાદિ છે. શાસ્ત્ર પ્રકૃષ્ટ સત્ત્વનું કાર્ય છે, માટે પ્રકૃષ્ટ જ્ઞાનનો ઉપદેશ આપે છે, એવું નથી, પણ અનાદિ વાચ્ય-વાચક સંબંધથી બોધ આપે છે. ઈશ્વરના દિવ્ય ચિત્તસત્ત્વમાં પ્રકર્ષ છે, અને એ પ્રકર્ષને દર્શાવતું શાસ્ત્ર પણ ત્યાં જ રહે છે.

આ ચર્ચા પૂરી કરતાં ભાષ્યકાર કહે છે કે ઈશ્વરની દિવ્ય જ્ઞાનશક્તિના પ્રકર્ષને જણાવતું શાસ્ત્ર એક બીજી વાત પણ કહે છે કે વિષયીના આશ્રયવિના વિષય ટકી શકે નહીં. તેથી વિષયરૂપ શાસ્ત્રથી પ્રકાશિત લક્ષણવાળા એ વિષયી ઈશ્વર સદૈવ ઈશ્વર છે, સદૈવ મુક્ત છે.

"તચ્ચ તસ્યૈશ્વર્યં સામ્યાતિશયનિર્મુક્તમ્" વગેરેથી કહે છે કે ઈશ્વર જેમ બીજા સાધારણ પુરુષોથી ભિન્ન છે, એમ બીજા ઈશ્વરથી પણ જુદો છે. "ન તાવત્" વગેરેથી એનાથી અધિક ઐશ્વર્યયુક્ત કોઈ નથી, એમ કહે છે. કારણ કે બીજાના ઐશ્વર્યની અતિશયતાથી રહિત હોય એને જ ઐશ્વર્યયુક્ત કહેવાય. "તસ્માદ્યત્ર"... વગેરેથી અતિશયની પરાકાષ્ઠા ન પામ્યા હોય, એવાઓનું ઐશ્વર્ય ઔપચારિક (ગૌણ) છે, એમ કહે છે. "ન ચ તત્સમાનમ્" વગેરેથી કહે છે :- એના જેવું ઐશ્વર્ય બીજામાં નથી, એમ કહે છે. "દ્વયોશ્ચ".... વગેરેથી કહે છે : પ્રાકામ્ય કે અપ્રતિહત ઇચ્છાનો વિઘાત થાય, તો એકનું અલ્પ સામર્થ્ય પ્રગટ થાય અથવા કાર્ય ઉત્પન્ન ન થાય, તો બંનેની ઇચ્છાનો પ્રતિઘાત થાય. કદાચ કાર્ય ઉત્પન્ન થાય તો પણ વિરુદ્ધ ધર્મોના આશ્રયવાળું હોય. સરખા અભિપ્રાયવાળા બે ઈશ્વર છે, એમ માનવા કરતાં એક ઈશ્વર સર્વનું શાસન કરે છે, એમ માનવું વધારે યોગ્ય છે. દિવ્ય શાસનનો હેતુ એક ઈશ્વરથી પૂરો થાય છે.

ઘણા ઈશ્વરો મતૈક્યથી કાર્ય કરે છે, એમ માનીએ, તો એ (ગણતંત્રની)

પરિષદ જેવું થયું. વળી, નિત્ય દિવ્ય ઐશ્વર્યમાં શ્રદ્ધાવાળા માટે એ ઐશ્વર્યની બીજાને સોંપણીનો વિચાર અયોગ્ય છે. એમાં કલ્પનાગૌરવ દોષ આવે છે. એકથી કાર્યસિદ્ધ થતું હોય, તો અનેકની કલ્પના કરવી ન્યાયવિરુદ્ધ છે. આમ બધું સ્પષ્ટ છે. ૨૪

★

किं च - અને -

तत्र निरतिशयं सर्वज्ञबीजम् ॥२५॥

એમાં (ઈશ્વરમાં) સર્વજ્ઞતાનું બીજ નિરતિશય (જેનાથી ચડિયાતું ન હોય એવું) છે. ૨૫

भाष्य

यदिदमतीतानागतप्रत्युत्पन्नप्रत्येकसमुच्चयातीन्द्रियग्रहणमल्पं बह्विति सर्वज्ञबीजमेतद्धि वर्धमानं यत्र निरतिशयं स सर्वज्ञः । अस्ति काष्ठाप्राप्तिः सर्वज्ञबीजस्य सातिशयत्वात्परिमाणवदिति ।

यत्रकाष्ठाप्राप्तिर्ज्ञानस्य स सर्वज्ञः । स च पुरुषविशेष इति । सामान्यमात्रोपसंहारे च कृतोपक्षयमनुमानं न विशेषप्रतिपत्तौ समर्थम्, इति तस्य संज्ञादिविशेषप्रतिपत्तिरागमतः पर्यन्वेष्या । तस्यात्मानुग्रहा-भावेऽपि भूतानुग्रहः प्रयोजनम्, ज्ञानधर्मोपदेशेन कल्पप्रलयमहाप्रलयेषु संसारिणः पुरुषानुद्धरिष्यामीति । तथा चोक्तम्- आदिविद्वान्निर्माणचित्तमधिष्ठाय कारुण्याद्भगवान्परमर्षिरासुरये जिज्ञासमानाय तन्त्रं प्रोवाचेति ॥२५॥

§ અતીન્દ્રિય પદાર્થોનું, એકનું કે સમૂહનું, ભૂતકાળનું, ભવિષ્યકાળનું કે વર્તમાન કાળનું, નાની કે મોટી વસ્તુનું જ્ઞાન સર્વજ્ઞતાનું બીજ કે કારણ છે. એ કોઈમાં ઓછું તો કોઈમાં વધારે પ્રગટ થયેલું જણાય છે. વધતાં વધતાં, જેથી આગળ વધી ન શકાય એવી કક્ષાએ જેમાં પહોંચે એ સર્વજ્ઞ છે. પરિમાણ(માપ)ની જેમ જ્ઞાન વધારે કે ઓછું હોઈ શકે છે, તેથી એ પરાકાષ્ઠાએ પહોંચી શકે છે. જેમાં જ્ઞાનની આવી પરાકાષ્ઠા હોય એ સર્વજ્ઞ છે, અને એ પુરુષવિશેષ છે. અનુમાનથી થતું જ્ઞાન સામાન્ય માત્રને ગ્રહણ કરવા માટે સમર્થ છે. તેથી એ પુરુષની વિશેષતા જાણવા માટે સમર્થ નથી.

એ પુરુષવિશેષનાં નામો વગેરે વિશેષોનું જ્ઞાન આગમ (વેદ)માંથી મેળવવું જોઈએ.

ઈશ્વરને પોતાનો કોઈ હેતુ પાર પાડવાનો નથી. છતાં પ્રાણીઓ પર અનુગ્રહ કરવો એ એનું પ્રયોજન છે. કલ્પ, પ્રલય અને મહાપ્રલય દરમ્યાન સતત જન્મમરણ રૂપ સંસાર અનુભવતા જીવોનો જ્ઞાન અને ધર્મના ઉપદેશથી ઉદ્ધાર કરીશ, એવો એમનો હેતુ છે. આ વિષે કહ્યું છે કે આદિ વિદ્વાન પરમ ઋષિ ભગવાન કપિલે કરુણાથી પોતાના સંકલ્પ વડે નિર્મેલા ચિત્તનો આશ્રય કરીને, જિજ્ઞાસુ આસુરી મુનિને તંત્ર (સાંખ્યશાસ્ત્ર) કહ્યું.

तत्त्व वैशारदी

एवमस्य क्रियाज्ञानशक्तौ शास्त्रं प्रमाणमभिधाय ज्ञानशक्तावनुमानं प्रमाणयति- किञ्चेति-तत्र निरतिशयं सर्वज्ञबीजम् । व्याचष्टे-यदिदमिति । बुद्धिसत्त्वावरकतमोऽपगमतारतम्येन यदिदमतीतानागतप्रत्युत्पन्नानां प्रत्येकं च समुच्चयेन च वर्तमानानामतीन्द्रियाणां ग्रहणं, तस्य विशेषणमल्पं बह्विति, सर्वज्ञबीजं कारणम् । कश्चित्किंचिदेवातीतादि गृह्णाति कश्चिद्बहु कश्चिद्बहुतरं कश्चिद्बहुतममिति ग्राह्यापेक्षया ग्रहणस्याल्पत्वं बहुत्वं कृतम् । एतद्विवर्धमानं यत्र निष्क्रान्तमतिशयात्स सर्वज्ञ इति । तदनेन प्रमेयमात्रं कथितम् । अत्र प्रमाणयति- अस्ति काष्ठाप्राप्तिः सर्वज्ञबीजस्येति । साध्यनिर्देशः । निरतिशयत्वं काष्ठा, यतः परमतिशयवत्ता नास्तीति । तेन नावधिमात्रेण सिद्धसाधनम् । सातिशयत्वादिति हेतुः । यद्यत्सातिशयं तत्तत्सर्वं निरतिशयं, यथा कुवलामलकबिल्वेषु सातिशयं महत्त्वमात्मनि निरतिशयमिति व्याप्तिं दर्शयति - परिमाणवदिति । न च गरिमादिभिर्गुणैर्व्यभिचार इति सांप्रतम् । न खल्ववयवगरिमातिशयी गरिमावयविनः । किं त्वापरमाणुभ्य आन्त्यावयविभ्यो यावन्तः केचन तेषां सर्वेषां प्रत्येकवर्तिनो गरिम्णः समाहृत्य गरिमवर्धमानाभिमानः । ज्ञानं तु न प्रतिज्ञेयं समाप्यत इत्येकद्विबहुविषयतया युक्तं सातिशयमिति न व्यभिचारः । उपसंहरति- यत्र काष्ठेति ।

ननु सन्ति बहवस्तीर्थंकरा बुद्धार्हतकपिलर्षिप्रभृतयः । तत्कस्मात्त एव सर्वज्ञा न भवन्त्यस्मादनुमानादित्यत आह-सामान्येति । कुतस्तर्हि तद्विशेषप्रतिपत्तिरित्यत आह- तस्येति । बुद्धादिप्रणीतश्चागमाभासो न त्वागमः, सर्वप्रमाणबाधितक्षणिकनैरात्म्यादिमार्गोपदेशकत्वेन विप्रलम्भकत्वादिति भावः । तेन श्रुतिस्मृतीतिहासपुराणलक्षणादागमत आगच्छन्ति बुद्धिमारोहन्ति अस्मादभ्युदयनिःश्रेयसोपाया

इत्यागमः । तस्मात्संज्ञादिविशेषप्रतिपत्तिः, संज्ञाविशेषः शिवेश्वरादिः श्रुत्यादिषु प्रसिद्धः । आदिपदेन षडङ्गतादशाव्ययते संगृहीते । यथोक्तं वायुपुराणे-

"सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ॥" (१२।३३)

तथा- "ज्ञानं वैराग्यमैश्वर्यं तपः सत्यं क्षमा धृतिः ।
स्रष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमेव च ।
अव्ययानि दशैतानि नित्यं तिष्ठन्ति शंकरे ॥"
(तत्रैव १० ।६५-६६) इति ।

स्यादेतत्-नित्यतृप्तस्य भगवतो वैराग्यातिशयसंपन्नस्य स्वार्थे तृष्णासंभवात्कारुणिकस्य च सुखैकतानजनसर्जनपरस्य दुःखबहुलजीवलोकजननानुपपत्तेरप्रयोजनस्य च प्रेक्षावतः प्रवृत्त्यनुपपत्तेः क्रियाशक्तिशालिनोऽपि न जगत्क्रियेत्यत आह- तस्यात्मानुग्रहाभावेऽपीति । भूतानां प्राणिनामनुग्रहः प्रयोजनम् । शब्दाद्युपभोगविवेकख्यातिरूपकार्यकरणात्किल चरितार्थं चित्तं निवर्तते । ततः पुरुषः केवली भवति । अतस्तत्प्रयोजनाय कारुणिको विवेकख्यात्युपायं कथयति । तेनाचरितार्थत्वाच्चित्तस्य जन्तूनीश्वरः पुण्यापुण्यसहायः सुखदुःखे भावयन्नपि नाकारुणिकः । विवेकख्यात्युपायकथने द्वारमाह- ज्ञानधर्मोपदेशेनेति । ज्ञानं न धर्मश्च ज्ञानधर्मौ, तयोरुपदेशेन ज्ञानधर्मसमुच्चयाल्लब्धविवेकख्यातिपरिपाकात्कल्पप्रलये ब्रह्मणो दिनावसाने यत्र सत्यलोकवर्जं जगदस्तमेति । महाप्रलये ससत्यलोकस्य ब्रह्मणोऽपि निधने संसारिणः स्वकारणगामिनोऽतस्तदा मरणदुःखभाजः । कल्पेत्युपलक्षणमन्यदापि । स्वार्जितकर्मपाकवशेन जन्ममरणादिभाजः पुरुषानुद्धरिष्यामीति कैवल्यं प्राप्य पुरुषा उद्धृता भवन्तीत्यर्थः । एतच्च करुणाप्रयुक्तस्य ज्ञानधर्मोपदेशनं कापिलानामपि सिद्धमित्याह-तथा चोक्तमिति । पञ्चशिखाचार्येण-आदिविद्वान् कपिल इति । आदिविद्वानिति पञ्चशिखाचार्यवचनमादिमुक्तस्वसंतानादिगुरुविषयं न त्वानादिमुक्तपरमगुरुविषयम् । आदिमुक्तेषु कदाचिन्मुक्तेषु विद्वत्सु कपिलोऽस्माकमादिविद्वान्मुक्तः स एव च गुरुरिति । कपिलस्यापि जायमानस्य महेश्वरानुग्रहादेव ज्ञानप्राप्तिः श्रूयत इति । कपिलो नाम विष्णोरवतारविशेषः प्रसिद्धः । स्वयंभूर्हिरण्यगर्भः । तस्यापि सांख्ययोगप्राप्तिर्वेदे श्रूयते । स एवेश्वर आदिविद्वान्कपिलो विष्णुः स्वयंभूरिति भावः । स्वायंभुवानां त्वीश्वर इति भावः ॥२५॥

આમ એની (ઈશ્વરની) ક્રિયા અને જ્ઞાનશક્તિમાં શાસ્ત્રનું પ્રમાણ આપીને, "किं च" વગેરે સૂત્રથી એની જ્ઞાનશક્તિ દર્શાવવા અનુમાન પ્રમાણ પ્રસ્તુત કરે છે :

એમાં સર્વજ્ઞતાનું બીજ કે કારણ અન્યથી ન ઓળંગી શકાય એવું છે. "યદિદં..." વગેરેથી આનું વિવરણ કરે છે. બુદ્ધિસત્ત્વનું આવરણ કરનાર તમોગુણના ઓછા-વત્તા ક્ષયના પ્રમાણમાં, અતીતનાં અને અનાગતમાં પેદા થનારાં રૂપોમાંથી પ્રત્યેકનું કે સમૂહનું, વર્તમાન હોય છતાં ઇન્દ્રયોની મર્યાદા બહાર રહેલા પદાર્થોનું ઓછું કે વધારે જ્ઞાન સર્વજ્ઞતાનું બીજ કે હેતુ છે. અતીત વગેરે વિષે કોઈ ઓછું જાણે છે, કોઈ એનાથી વધારે જાણે છે. કોઈ વળી સૌથી વધારે જાણે છે, આમ જ્ઞેય પદાર્થોનું જ્ઞાન ઓછું કે વધારે હોય છે. એમાં વૃદ્ધિ થતાં થતાં, જે પુરુષમાં એ અતિશયરહિત બને, એ સર્વજ્ઞ છે. આનાથી પ્રમેય વિષે કહ્યું. હવે પ્રમાણની ચર્ચા કરે છે. સર્વજ્ઞતાના બીજની પરાકાષ્ઠા એ સાધ્યનો નિર્દેશ છે. નિરતિશયપણું પરાકાષ્ઠા છે, કારણ કે એનાથી વધારે અતિશયતા નથી. અવધિનો નિશ્ચય કરવામાત્રથી સાધ્ય સિદ્ધ થતું નથી. સાતિશયપણાથી હેતુ કહ્યો. "પરિમાણવત્" વગેરે દૃષ્ટાન્તથી કહે છે કે જે સાતિશય છે એ નિરતિશય રૂપ પરાકાષ્ઠા અવશ્ય પ્રાપ્ત કરે છે. જેમ કમળ, આમળું અને બીલું. એમનામાં પરિમાણ સાતિશય છે. આત્મામાં એ નિરતિશય છે, એમ વ્યાપ્તિ દર્શાવે છે. ગરિમા વગેરે ગુણોમાં આ નિયમમાં કોઈ ફેરફાર નથી. અવયવોની ગરિમા કરતાં અવયવીની ગરિમા વધારે ન હોઈ શકે. પરંતુ સૂક્ષ્મ અંતિમ અવયવો એવા પરમાણુઓથી માંડીને (આકાશ સુધીના) જેટલા ગરિમાવાળા પદાર્થો છે. એ બધામાં રહેલી ગરિમાનો સરવાળો કરીને, વધતી જતી ગરિમાનું જ્ઞાન મેળવી શકાય. પરંતુ જ્ઞાન તો પ્રત્યેક જ્ઞેયમાં સમાપ્ત થાય છે. તેથી એક, બે અથવા ઘણા પદાર્થવિષયક જ્ઞાનમાં સાતિશયતા યોગ્ય છે, માટે ત્યાં નિયમનો વ્યભિચાર (ફેરફાર) નથી. "યત્ર કાષ્ઠાપ્રાપ્તિર્જ્ઞાનસ્ય સ સર્વજ્ઞઃ" જ્યાં જ્ઞાનની પરાકાષ્ઠા થાય એ સર્વજ્ઞ છે, એમ કહીને આ ચર્ચા પૂરી કરે છે.

બુદ્ધ, અર્હંત, કપિલ ઋષિ વગેરે ઘણા તીર્થંકરો છે. આ અનુમાનથી તેઓ સર્વજ્ઞ છે એમ નિર્ણય કેમ ન કરી શકાય ? "સામાન્યમાત્ર..." વગેરેથી એના જવાબમાં કહે છે કે અનુમાનથી ફક્ત સામાન્યનું જ્ઞાન થાય. તો વિશેષનું જ્ઞાન કેવી રીતે થાય ? એના જવાબમાં "તસ્ય વિશેષપ્રતિપત્તિરાગમતઃ પર્યન્વેષ્યા"થી કહે છે કે ઈશ્વરની વિશેષતાનું જ્ઞાન શ્રુતિમાંથી મેળવવું જોઈએ. બુદ્ધ વગેરે દ્વારા રચિત આગમો નથી, આગમાભાસ છે, કારણ કે તેઓ બધાં પ્રમાણોથી બાધિત ક્ષણિકત્વ, નૈરાત્મ્ય વગેરેનો ઉપદેશ કરતાં હોવાથી છળયુક્ત છે, એવો ભાવ છે. શ્રુતિ, સ્મૃતિ, ઇતિહાસ, પુરાણ વગેરેથી આવીને બુદ્ધિમાં અભ્યુદય, નિઃશ્રેયસના ઉપાયો સ્થિર થાય છે, તેથી એમને આગમ કહેવામાં આવે છે. માટે ઈશ્વર વિષેના વિશેષોનું તેમજ, શિવ, મહેશ્વર વગેરે સંજ્ઞાઓનું જ્ઞાન શ્રુતિ વગેરેમાં પ્રસિદ્ધ છે, એ ત્યાંથી જાણવું જોઈએ.વગેરે શબ્દથી ઈશ્વરનાં છ અંગો અને દસ અવ્યયોના

જ્ઞાનનો પણ સંગ્રહ સમજી લેવો જોઈએ. જેમ વાયુપુરાણમાં કહ્યું છે :-

"સર્વજ્ઞતા, સંતોષ, અનાદિ જ્ઞાન, સ્વતંત્રતા, અલુપ્ત નિત્યશક્તિમત્તા, અને અનંત શક્તિ. ભગવતત્ત્વને જાણનારા આ છને મહેશ્વરનાં અંગો તરીકે વર્ણવે છે." - વાયુપુરાણ, ૧૨.૩૩

"જ્ઞાન, વૈરાગ્ય, ઐશ્વર્ય, તપ, સત્ય, ક્ષમા, ધૃતિ, સૃષ્ટૃત્વ, આત્મજ્ઞાન, અને અધિષ્ઠાતૃત્વ (સ્વામિત્વ) એ દસ અવ્યયો શંકરમાં નિત્ય રહે છે." - વાયુપુરાણ, ૧૦.૬૫-૬૬

अथ लब्धस्थितिकस्य चेतसः किंस्वरूपा किंविषया वा समापत्तिरिति ? तदुच्यते- હવે પૂર્ણપણે સ્થિર થયેલા ચિત્તની કેવા સ્વરૂપની અને કયા વિષયમાં સમાપત્તિ (તદ્રૂપતા) થાય છે ? એ કહેવાય છે-

क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु
तत्स्थतदञ्जनता समापतिः ॥४१॥

ક્ષીણ થયેલી વૃત્તિઓવાળું ચિત્ત ઉત્તમ જાતિના સ્ફટિક મણિની જેમ ગ્રહીતા, ગ્રહણ અને ગ્રાહ્યમાં રહીને એમના જેવું રૂપ ધારણ કરે એને સમાપંત્તિ કહેવાય. ૪૧

भाष्य

क्षीणवृत्तिरेति प्रत्यस्तमितप्रत्ययस्येत्यर्थः । अभिजातस्येव मणेरिति दृष्टान्तोपादानम् । यथा स्फटिक उपाश्रयभेदात्तत्तद्रूपोपरक्त उपाश्रयरूपाकारेण निर्भासते तथा ग्राह्यालम्बनोपरक्तं चित्तं ग्राह्यसमापन्नं ग्राह्यस्वरूपाकारेण निर्भासते । तथा भूतसूक्ष्मोपरक्तं भूतसूक्ष्मसमापन्नं भूतसूक्ष्मस्वरूपाभासं भवति । तथा स्थूलालम्बनोपरक्तं स्थूलरूपसमापंन्नं स्थूलरूपाभासं भवति । तथा विश्वभेदोपरक्तं विश्वभेदसमापन्नं विश्वरूपाभासं भवति ।

तथा ग्रहणेष्वपीन्द्रियेषु द्रष्टव्यम् । ग्रहणालम्बनोपरक्तं ग्रहणसमापन्नं ग्रहणस्वरूपाकारेण निर्भासते । तथा ग्रहीतृपुरुषालम्बनोपरक्तं ग्रहीतृपुरुष समापन्नं ग्रहीतृपुरुषस्वरूपाकारेण निर्भासते । तथा मुक्तपुरुषालम्बनोपरक्तं मुक्तपुरुषसमापन्नं मुक्तपुरुषस्वरूपाकारेण निर्भासत इति । तदेवमभिजात-मणिकल्पस्य चेतसो ग्रहीतृग्रहणग्राह्येषु पुरुषेन्द्रियभूतेषु या तत्स्थतदञ्जनता तेषु स्थितस्य तदाकारापत्तिः सा समापत्तिरित्युच्यते ॥४१॥

ક્ષીણવૃત્તિ એટલે વિચારો વિનાનું, ઉત્તમ જાતિના મણિની જેમ, એ

દૃષ્ટાન્ત છે. જેમ સ્ફટિક પાસે રહેલા જુદા જુદા પદાર્થોને કારણે, એ નજીકના પદાર્થના રૂપના આકારવાળો દેખાય છે, એમ ગ્રાહ્ય આલંબનના રંગે રંગાયેલું ચિત્ત ગ્રાહ્યના રૂપવાળું અને ગ્રાહ્યના આકારવાળું દેખાય છે. એ રીતે સૂક્ષ્મ ભૂતોના રૂપથી રંગાયેલું ચિત્ત સૂક્ષ્મ ભૂતોના સ્વરૂપના આભાસવાળું બને છે. અને સ્થૂલ આલંબનના રૂપે રંગાયેલું ચિત્ત સ્થૂલ રૂપવાળું બનીને સ્થૂલ રૂપના આભાસવાળું બને છે. તેમજ વિશ્વના ભિન્ન ભિન્ન પદાર્થોના રૂપે રંગાયેલું ચિત્ત જગતના વિભિન્ન પદાર્થોના આકારવાળું બનીને દુનિયાની જુદી જુદી વસ્તુઓના આભાસવાળું બને છે.

એ રીતે ગ્રહણો કે ઇન્દ્રિયો વિષે પણ જાણવું. ગ્રહણના આલંબનના રૂપે રંગાયેલું ચિત્ત, ગ્રહણના આકારવાળું બનીને ગ્રહણ સ્વરૂપના આકારથી ભાસે છે. તથા ગ્રહીતા પુરુષના આલંબનના રૂપથી રંગાયેલું, ગ્રહીતા પુરુષ સાથે એકરૂપ બનેલું, ગ્રહીતા પુરુષના આકારે ભાસે છે. એમ મુક્ત પુરુષના આલંબનથી રંગાયેલું, મુક્ત પુરુષ સાથે એકરૂપ બનેલું, મુક્ત પુરુષના સ્વરૂપના આકારવાળું ભાસે છે.

આમ અભિજાત મણિ જેવું ચિત્ત ગ્રહીતા, ગ્રહણ અને ગ્રાહ્ય એટલે કે પુરુષ, ઇન્દ્રિયો અને ભૂતોમાં રહીને, તદંજનતા એટલે એમના આકારવાળું બને, એને સમાપત્તિ કહેવામાં આવે છે. ૪૧

तत्त्व वैशारदी

तदेवं चित्तस्थितेरुपाया दर्शिताः । लब्धस्थितिकस्य चित्तस्य वशीकारोऽपि दर्शितः । संप्रति लब्धस्थितिकस्य चेतसः किंविषयः किंरूपश्च संप्रज्ञातो भवतीति पृच्छति- अथेति । अत्रोत्तरसूत्रमवतारयति-तदुच्यत इति । सूत्रं पठति-क्षीणवृत्तेरित्यादि समापत्त्यन्तम् । तद्व्याचष्टे-क्षीणेति । अभ्यासवैराग्याभ्यां क्षीणराजसतामस-प्रमाणादिवृत्तेश्चित्तस्य । तस्य व्याख्यानं प्रत्यस्तमितप्रत्ययस्येति । तदनेन चित्तसत्त्वस्य स्वभावस्वच्छस्य रजस्तमोभ्यामभिभव उक्तः । दृष्टान्तं स्पष्टयति-यथेति । उपाश्रय उपाधिर्जपाकुसुमादिः । उपरक्तस्तच्छायापन्नः । उपाश्रयस्य यदात्मीयं रूपं लोहितनीलादि तदेवाकारस्तेन लक्षितो निर्भासते । दार्ष्टान्तिके योजयति - तदा ग्राह्येति । ग्राह्यं च तदालम्बनं च तेनोपरक्तं तदनुविद्धम् । तदनेन ग्रहीतृग्रहणाभ्यां व्यवच्छिनत्ति । आत्मीयमन्तःकरणरूपमपिधाय ग्राह्यसमापन्नं ग्राह्यतामिव प्राप्तमिति यावत् । अतो ग्राह्यस्वरूपाकारेण निर्भासते । ग्राह्योपरागमेव सूक्ष्मस्थूलताभ्यां विभजते-भूतसूक्ष्मेति ।

विश्वभेदश्चेतनाचेतनस्वभावो गवादिर्घटादिश्च द्रष्टव्यः तदनेन वितर्कविचारानुगतौ समाधी दर्शितौ ।

तथा ग्रहणेष्वपीन्द्रियेष्विति । गृह्यन्त एभिरर्था इति ग्रहणानीन्द्रियाणि । एतदेव स्पष्टयति-ग्रहणालम्बनेति । ग्रहणं चालम्बनं च तदिति ग्रहणालम्बनम् । तेनोपरक्तमनुविद्धमात्मीयमन्तःकरणरूपमपिधाय ग्रहणमिव बहिष्करणमिवापन्नमिति । तदनेनानन्दानुगतमुक्त्वाऽस्मितानुगतमाह-तथा ग्रहीतृपुरुषेति । अस्मितास्पदं हि ग्रहीता पुरुष इति भावः । पुरुषत्वाविशेषादनेनैव मुक्तोऽपि पुरुषः शुकप्रह्लादादिः समाधिविषयतया संग्रहीतव्य इत्याह- तथा मुक्तेति । उपसंहरंस्तत्स्थतदञ्जनतापदं व्याचष्टे-तदेवमिति । तेषु ग्रहीतृग्रहणग्राह्येषु स्थितस्य धारितस्य ध्यानपरिपाक-वशादपहतरजस्तमोमलस्य चित्तसत्त्वस्य या तदञ्जनता तदाकारता सा समापत्तिः संप्रज्ञातलक्षणो योग उच्यते । तत्र च ग्रहीतृग्रहणग्राह्येष्विति सौत्रः पाठक्रमोऽर्थ-क्रमविरोधान्नादर्तव्यः । एवं भाष्येऽपि प्रथमं भूतसूक्ष्मोपन्यासो नादरणीय इति सर्वं रमणीयम् ॥४१॥

અત્યાર સુધી ચિત્તની સ્થિરતાના ઉપાયો બતાવ્યા. સ્થિરતાપ્રાપ્ત ચિત્તની કુશળતા પણ બતાવી. હવે "અથ લબ્ધસ્થિતિકસ્ય ચેતસઃ..." વગેરેથી પૂર્ણ સ્થિરતા મેળવેલા ચિત્તનો વિષય કયો હોય છે અને એને કેવારૂપવાળો સંપ્રજ્ઞાત સમાધિ થાય છે, એ વિષે પ્રશ્ન કરે છે. "તદુચ્યતે" એમ કહીને આગળનું સૂત્ર "ક્ષીણવૃત્તેરભિજાતસ્યેવ."... વગેરે પ્રસ્તુત કરે છે. "ક્ષીણવૃત્તેઃ..." વગેરેથી સૂત્ર સમજાવે છે. અભ્યાસ અને વૈરાગ્યથી રાજસ, તામસ પ્રમાણ વગેરે વૃત્તિઓનો ક્ષય થયા પછી, કે બધા પ્રત્યયોનો અસ્ત થયા પછી, એવો અર્થ છે. આનાથી સ્વભાવે જ સ્વચ્છ એવા ચિત્તસત્ત્વની રજોગુણ અને તમોગુણથી દબાઈ ન જવાની વાત કરી. "યથા..." વગેરેથી દૃષ્ટાન્ત આપીને સ્પષ્ટતા કરે છે. ઉપાશ્રય એટલે ઉપાધિ કે નજીક મૂકેલી વસ્તુ, દાખલા તરીકે જપાકુસુમ વગેરે. એમનાથી ઉપરક્ત એટલે એમની છાયાવાળા બનવું. ઉપાધિનું જે પોતાનું લાલ, નીલ વગેરે રૂપ, એ જ આકાર વાળો સ્ફટિક દેખાય છે. "તદા ગ્રાહ્ય"... વગેરેથી દૃષ્ટાન્તનો મુખ્ય વાત સમજાવવા ઉપયોગ કરે છે. ગ્રાહ્ય વસ્તુને અવલંબીને એટલે એનાથી રંગાઈને. આમ ગ્રહીતા અને ગ્રહણથી ગ્રાહ્યનો ભેદ દર્શાવ્યો. પોતાના અંતઃકરણ તરીકેના રૂપને છુપાવીને ગ્રાહ્ય વસ્તુ સાથે એકરૂપ થયેલું એટલે ગ્રાહ્ય બની ગયેલું (ચિત્ત) એમ સમજવું જોઈએ. આ કારણે ગ્રાહ્યના રૂપના આકારે ભાસે છે.

"ભૂતસૂક્ષ્મ..." વગેરેથી ગ્રાહ્યના ઉપરાગને સ્થૂલ અને સૂક્ષ્મ એમ બે વિભાગોમાં વિભાજિત કરે છે. વિશ્વના વિભિન્ન પદાર્થો એટલે ચેતન ગાય વગેરે

અને અચેતન ઘડા વગેરે સમજવાં. આનાથી વિતર્ક અને વિચારથી અનુગત એમ બે સંપ્રજ્ઞાત સમાધિ સમજવા જોઈએ.

ગ્રહણો એટલે ઇન્દ્રિયો. જે વડે વસ્તુઓનું ગ્રહણ થાય છે, તેથી ઇન્દ્રિયો ગ્રહણ કહેવાય છે. "ગ્રહણાલંબન..." વગેરેથી આ વાત સ્પષ્ટ કરે છે. ગ્રહણના આલંબનથી રંગાયેલું કે વીંધાયેલું ચિત્ત, પોતાનું અંતઃકરણરૂપ છુપાવીને ગ્રહણરૂપ કે બાહ્ય કરણરૂપ બને છે. આનાથી આનંદાનુગત સંપ્રજ્ઞાત સમાધિ કહ્યો. હવે "ગ્રહીતૃપુરુષ..." વગેરેથી અસ્મિતાનુગત સંપ્રજ્ઞાત સમાધિ વિષે કહે છે. ગ્રહીતા પુરુષના સ્વરૂપવાળું એટલે અસ્મિતારૂપવાળું સમજવું. ગ્રહીતા પુરુષનું અસ્મિતા સ્થાન છે, એવો ભાવ છે.

"તથા મુક્તપુરુષાલંબનોપરક્તમ્"... વગેરેથી શુક, પ્રલ્હાદ વગેરે મુક્ત પુરુષો પણ, પુરુષરૂપ હોવાના કારણે, સમાધિના વિષય તરીકે ગ્રહણ કરવા યોગ્ય છે, એમ કહે છે. "તદેવમ્" વગેરેથી "તત્સ્થતદંજનતા" શબ્દ સમજાવે છે. ધારણાથી સ્થિર થયેલું, ધ્યાનના પરિપાકથી રજસ્-તમસ્ના મળોવિનાનું ચિત્ત ગ્રહીતા, ગ્રહણ અને ગ્રાહ્યમાં રહીને, એમના રૂપે રંગાયેલું બનવાથી એમના આકારવાળું બને, ત્યારે એની જે અવસ્થા થાય છે, એને સમાપત્તિ કે સંપ્રજ્ઞાત લક્ષણવાળો યોગ કહે છે.

સૂત્રકારે સૂત્રમાં ગ્રહણ કરેલો ગ્રહીતા, ગ્રહણ અને ગ્રાહ્ય એવો ક્રમ અર્થક્રમથી વિરુદ્ધ હોવાને કારણે સ્વીકારવો ન જોઈએ. ભાષ્યમાં પણ ભૂતસૂક્ષ્મનો પહેલાં કરેલો ઉલ્લેખ સ્વીકારવા જેવો નથી. આમ બધું રમણીય છે. ૪૧

★

तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का समापत्तिः ॥४२॥

જે શબ્દ, અર્થ અને જ્ઞાનના વિકલ્પોથી મિશ્રિત હોય એ સવિતર્ક સમાપત્તિ છે. ૪૨

ભાષ્ય

तद्यथा गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञानमित्यविभागेन विभक्तानामपि ग्रहणं दृष्टम् । विभज्यमानाश्चाऽन्ये शब्दधर्मा अन्येऽर्थधर्मा अन्ये ज्ञानधर्मा इत्येतेषां विभक्तः पन्थाः । तत्र समापन्नस्य योगिनो यो गवाद्यर्थः समाधिप्रज्ञायां समारूढः स चेच्छब्दार्थज्ञानविकल्पानुविद्ध

उपावर्तते सा संकीर्णा समापत्तिः सवितर्केत्युच्यते ॥४२॥

દાખલા તરીકે ગાય શબ્દ, ગાય અર્થ (વસ્તુ), અને ગાયનું જ્ઞાન જુદાં છે, છતાં જુદાં ન હોય એમ ગ્રહણ થતાં જોવામાં આવે છે. વિશ્લેષણ કરતાં શબ્દના ધર્મો અન્ય, અર્થના ધર્મો અન્ય અને જ્ઞાનના ધર્મો જુદા જણાય છે. આમ એમના અસ્તિત્વનો માર્ગ જુદો છે. એમાં સમાપન્ન યોગીની સમાધિ પ્રજ્ઞામાં ગાય વગેરે આરૂઢ થયેલો પદાર્થ જો શબ્દ, અર્થ અને જ્ઞાનના વિકલ્પોથી વીંધાયેલો (યુક્ત) હોય, તો એ જટિલ સમાપત્તિ સવિતર્ક કહેવાય છે. ૪૨

तत्त्व वैशारदी

सामान्यतः समापत्तिरुक्ता । सेयमवान्तरभेदाच्चतुर्विधा भवति । तद्यथा सवितर्का निर्वितर्का सविचारा निर्विचारा चेति । तत्र सवितर्कायाः समापत्तेर्लक्षणमाह- तत्रेत्यादि समापत्यन्तं सूत्रम् । तत्र तासु समापत्तिषु मध्ये सवितर्का समापत्तिः प्रतिपत्तव्या । कीदृशी ? शब्दश्चार्थश्च ज्ञानं च तेषां विकल्पाः । वस्तुतो भिन्नानामपि शब्दादीनामितरेतराध्यासाद्विकल्पोऽप्येकस्मिन्भेदमादर्शयति भिन्नेषु चाभेदम्, तेन शब्दार्थज्ञानविकल्पैः संकर्णा व्यामिश्रेत्यर्थः । तद्यथा गौरिति शब्द इति । गौरित्युपात्तयोरर्थज्ञानयोः शब्दाभेदविकल्पो दर्शितः । गौरित्यर्थ इति । गौरित्युपात्तयोः शब्दज्ञानयोरर्थाभेदविकल्पो दर्शितः । गौरिति ज्ञानमिति । गौरित्युपात्तयोः शब्दार्थयोर्ज्ञानाभेदविकल्पः । तदेवमविभागेन विभक्तानामपि शब्दार्थज्ञानानां ग्रहणं लोके द्रष्टव्यम् । यद्यविभागेन ग्रहणं कुतस्तर्हि विभाग इत्यत आह- विभज्यमानाश्चेति । विभज्यमानाश्चान्वयव्यतिरेकाभ्यां परीक्षकैरन्ये शब्दधर्मा ध्वनिपरिणाममात्रस्य शब्दस्योदात्तादयो धर्माः, अन्येऽर्थस्य जडत्वमूर्तत्वादयः, अन्ये प्रकाशमूर्तिविरहादयो ज्ञानस्य धर्मा इति । तस्मादेतेषां विभक्तः पन्थाः स्वरूपभेदोन्नयनमार्गः । तत्र विकल्पिते गवाद्यर्थे समापन्नस्येति । तदनेन योगिनोऽपरं प्रत्यक्षमुक्तम् । शेषं सुगमम् ॥४२॥

સામાન્ય સમાપત્તિ કહી. એ પેટા ભેદોથી ચાર પ્રકારની છે : સવિતર્કા, નિર્વિતર્કા, સવિચારા અને નિર્વિચારા. "तत्र"... વગેરેથી સવિતર્ક સમાપત્તિનું લક્ષણ કહે છે. એ ચાર સમાપત્તિઓમાંથી સવિતર્ક સમાપત્તિ જાણવી જોઈએ ? એ કેવી છે ?. શબ્દ, અર્થ અને જ્ઞાનના વિકલ્પો છે. ખરેખર ભિન્ન એવા શબ્દ વગેરેના પરસ્પર અધ્યાસથી વિકલ્પ એકમાં ભેદ દર્શાવે છે અને ભિન્નમાં અભેદ. આ કારણે શબ્દ, અર્થ અને જ્ઞાનના વિકલ્પોથી સંકીર્ણ એટલે મિશ્રિત (સમાપત્તિ હોય છે).

"तद्यथा गौरिति शब्दः" - જેમ ગાય એ શબ્દ છે. ગાય એમ કહેવાથી જણાતા અર્થ અને જ્ઞાનનો શબ્દથી અભેદરૂપ વિકલ્પ દર્શાવ્યો. "गौरित्यर्थ :" - ગાય એ અર્થ (પ્રાણી) છે. ગાય એમ કહેવાથી જણાતા શબ્દ અને જ્ઞાનનો અર્થથી અભેદરૂપ વિકલ્પ દર્શાવ્યો. "गौरिति ज्ञानम्"-ગાય એ જ્ઞાન છે. ગાય એમ કહેવાથી જણાતા શબ્દ અને અર્થનો જ્ઞાનથી અભેદરૂપ વિકલ્પ દર્શાવ્યો. આમ જુદાં હોવા છતાં શબ્દ, અર્થ અને જ્ઞાનનું જુદાં ન હોય એ રીતે ગ્રહણ થતું લોકમાં જોવામાં આવે છે..

જો અવિભાગથી ગ્રહણ થતું હોય તો વિભાગ ક્યાંથી આવ્યો ? એના જવાબમાં "विभजयमनाश्च" વગેરેથી કહે છે કે અન્વય (સહભાવ) અને વ્યતિરેક (અસહભાવ)ની રીતે વિદ્વાનો વિશ્લેષણ કરે ત્યારે શબ્દના ધર્મો જુદા જણાય છે. શબ્દ ધ્વનિઓનું માત્ર પરિણામ છે, ઉદાત્ત વગેરે એના ધર્મો છે. અર્થ (વસ્તુ)ના જડપણું, મૂર્તપણું વગેરે જુદા છે. અને જ્ઞાનના પ્રકાશ તેમજ અમૂર્તપણું વગેરે ધર્મો જુદા છે. તેથી એમના સ્વરૂપના અસ્તિત્વનો માર્ગ ભિન્ન છે. આવા વિકલ્પિત ગાય વગેરે પદાર્થમાં સમાપત્તિ (સવિતર્ક છે). આનાથી યોગીનું અપર પ્રત્યક્ષ કહ્યું. બાકીનું સુગમ છે. ૪૨

★

यदा पुनः शब्दसंकेतस्मृतिपरिशुद्धौ श्रुतानुमानज्ञानविकल्पशून्यायां समाधिप्रज्ञायां स्वरूपमात्रेणावस्थितोऽर्थस्तत्स्वरूपाकारमात्रतयैवावच्छिद्यते सा च निर्वितर्का समापत्तिः । तत्परं प्रत्यक्षम् । तच्च श्रुतानुमानयोर्बीजम् ततः श्रुतानुमाने प्रभवतः । न च श्रुतानुमान- ज्ञानसहभूतं तद्दर्शनम् । तस्मादसंकीर्णं प्रमाणान्तरेण योगिनो निर्वितर्कसमाधिजं दर्शनमिति । निर्वितर्कायाः समापत्तेरस्याः सूत्रेण लक्षणं द्योत्यते-

પરંતુ ચિત્ત જ્યારે શબ્દના સંકેતથી ઉત્પન્ન થયેલી સ્મૃતિ વગરનું અને શુદ્ધ બને, ત્યારે યોગીને સમાધિ પ્રજ્ઞામાં વસ્તુ, શ્રુતજ્ઞાન અને અનુમાનજ્ઞાન વિના, એના પોતાના વિશેષ સ્વરૂપમાં એના સ્વરૂપના આકારમાત્રથી સ્વતંત્રપણે જણાય, એ નિર્વિતર્ક સમાપત્તિ છે. એ પર (શ્રેષ્ઠ) પ્રત્યક્ષ છે. અને એ શ્રુત(સાંભળવામાં આવતો શબ્દ કે આગમ) અને અનુમાનનું બીજ છે. એનાથી શ્રુત અને અનુમાન ઉત્પન્ન થાય છે. અને એ શ્રુત અને અનુમાન જ્ઞાનના સહકારથી (એમની સાથે) ઉત્પન્ન થતું દર્શન નથી. તેથી યોગીનું આ નિર્વિતર્કસમાધિથી ઉત્પન્ન થયેલું દર્શન કોઈ પણ અન્ય પ્રમાણ સાથે ભળેલું નથી. આ નિર્વિતર્ક સમાપત્તિનું લક્ષણ સૂત્રવડે પ્રગટ કરવામાં આવે છે -

स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का ॥४३॥

સ્મૃતિની પરિશુદ્ધિ (નિવૃત્તિ) થતાં, સ્વરૂપે શૂન્ય જેવા બનેલા ચિત્તમાં ફક્ત ગ્રાહ્ય પદાર્થને પ્રકાશિત કરતી સમાપત્તિ નિર્વિતર્ક છે. ૪૩

भाष्य

या शब्दसंकेतश्रुतानुमानज्ञानविकल्पस्मृतिपरिशुद्धौ ग्राह्य-स्वरूपोपरक्ता प्रज्ञा स्वमिव प्रज्ञास्वरूपं ग्रहणात्मकं त्यक्त्वा पदार्थमात्रस्वरूपा ग्राह्यस्वरूपापन्नेव भवति सा निर्वितर्का समापत्तिः । तथा च व्याख्यातम् ।

तस्या एकबुद्ध्युपक्रमो ह्यर्थात्माऽणुप्रचयविशेषात्मा गवादिर्घटादिर्वा लोकः । स च संस्थानविशेषो भूतसूक्ष्माणां साधारणो धर्म आत्मभूतः, फलेन व्यक्तेनानुमितः स्वव्यञ्जकाञ्जनः प्रादुर्भवति, धर्मान्तरस्य कपालादेरुदये च तिरोभवति । स एष धर्मोऽवयवीत्युच्यते । योऽसावेकश्च महांश्चाणीयांश्च स्पर्शवांश्च क्रियाधर्मकश्चानित्यश्च तेनावयविना व्यवहाराः क्रियन्ते । यस्य पुनरवस्तुकः स प्रचयविशेषः सूक्ष्मं च कारणमनुपलभ्य-मविकल्पस्य तस्यावयव्यभावादतद्रूपप्रतिष्ठं मिथ्याज्ञानमिति प्रायेण सर्वमेव प्राप्तं मिथ्याज्ञानमिति ।

तदा च सम्यग्ज्ञानमपि किं स्याद्विषयाभावात् । यद्यदुपलभ्यते तत्तदवयवित्वेनाघ्रातम् । तस्मादस्त्यवयवी यो महत्त्वादिव्यवहारापन्नः समापत्तेर्निर्वितर्काया विषयो भवति ॥४३॥

જેમાં શબ્દસંકેત, શ્રુત, અનુમાનજ્ઞાન અને વિકલ્પથી ઉત્પન્ન થયેલી સ્મૃતિ પરિશુદ્ધ (નિવૃત્ત) થાય, અને ગ્રાહ્ય અર્થ સ્વરૂપે રંગાયેલી પ્રજ્ઞા, પોતાનું ગ્રહણાત્મક પ્રજ્ઞાસ્વરૂપ ત્યજીને ફક્ત પદાર્થના રૂપવાળી, ગ્રાહ્ય સ્વરૂપ સાથે જાણે કે એકાકાર બને એ નિર્વિતર્ક સમાપત્તિ છે. અને આને સ્પષ્ટ કરતાં કહ્યું છે : - આ (નિર્વિતર્ક સમાપત્તિ)નો લોક (વિષય) ગાય વગેરે કે ઘડો વગેરે છે, જે એક બુદ્ધિ (ઘડો એક છે એવા ખ્યાલ)નો આરંભ (ઉત્પન્ન) કરે છે, અને એ અણુઓના વિશેષ સમૂહરૂપ, પદાર્થરૂપ છે. આ સૂક્ષ્મભૂતોનો વિશેષ પ્રકારનો (દા.ત. ઘડાનો) આકાર (સંસ્થાન) એમનો

આત્મભૂત સાધારણ ધર્મ જેનું વ્યક્ત થતા ફળ (પરિણામ) વડે અનુમાન કરાય છે, અને પોતાને વ્યક્ત કરનારાં કારણો (પ્રાપ્ત થયે) પ્રાદુર્ભાવ પામે છે, તેમજ ઠીકરાં વગેરેરૂપ બીજો ધર્મ ઉત્પન્ન થતાં તિરોભાવ પામે છે. આ ધર્મ અવયવી કહેવાય છે. આ અવયવી એક છે, મોટો કે નાનો (સૂક્ષ્મ) હોય છે, સ્પર્શધર્મવાળો છે, ક્રિયાધર્મ(પાણી લાવવું વગેરે વ્યવહારરૂપ ધર્મ) વાળો છે, અને અનિત્ય છે. એ અવયવી વડે વ્યવહારો સિદ્ધ થાય છે.

જેને માટે આવો વિશેષ પ્રકારનો પ્રચય (આકાર) અવાસ્તવિક છે, અને સૂક્ષ્મ હોવાથી કારણ અપ્રાપ્ય છે, એને આ બેમાંથી એક પણ વિકલ્પ અનુપલબ્ધ હોવાથી, અવયવીના અભાવના કારણે, એના રૂપમાં અપ્રતિષ્ઠિત જ્ઞાન મિથ્યા હોવાથી, પ્રાયઃ બધું જ જ્ઞાન મિથ્યા છે, એવો પ્રસંગ પ્રાપ્ત થયો. વળી, વિષય ન હોવાથી સમ્યક્ જ્ઞાન પણ કેવી રીતે હોય ? જે જે ઉપલબ્ધ થાય છે, એ બધું અવયવીરૂપે જ મળે છે. તેથી મોટું નાનું વગેરે વ્યવહારો સાથે જોડાયેલો અવયવી છે, જે નિર્વિતર્ક સમાપત્તિનો વિષય બને છે. ૪૩

तत्त्व वैशारदी

सूत्रं योजयितुं प्रथमतस्तावन्निर्वितर्कां व्याचष्टे-यदा पुनरिति । परिशुद्धिरपनयः । शब्दसंकेतस्मरणपूर्वे खल्वागमानुमाने प्रवर्तेते । संकेतश्चायं गौरिति शब्दार्थज्ञानानामितरेतराध्यासात्मा । ततश्चागमानुमानज्ञानविकल्पौ भवतः । तेन तत्पूर्वा समाधिप्रज्ञा सवितर्का । यदा पुनरर्थमात्रप्रवणेन चेतसार्थमात्रादृतेन तदभ्यासान्नान्वरीयकतामुपगता संकेतस्मृतिस्त्यक्ता, तत्त्यागे च श्रुतानुमानज्ञानविकल्पौ तन्मूलौ त्यक्तौ, तदा तच्छून्यायां समाधिप्रज्ञायां स्वरूपमात्रेणावस्थितोऽर्थस्तत्स्वरूपमात्रतयैव न तु विकल्पितेनाकारेण परिच्छिद्यते, सा निर्वितर्का समापत्तिरिति । तद्योगिनां परं प्रत्यक्षमसदारोपगन्धस्याप्यभावात् । स्यादेतत्-परेण प्रत्यक्षेणार्थतत्त्वं गृहीत्वा योगिन उपदिशन्त्युपपादयन्ति च । कथं चातद्विषयाभ्यामागमपरार्थानुमानाभ्यां सोऽर्थ उपदिश्यत उपपाद्यते च । तस्मादागमानुमाने तद्विषये ते च विकल्पाविति परमपि प्रत्यक्षं विकल्प एवेत्यत आह-तच्च श्रुतेति । यदि हि सवितर्कमिव श्रुतानुमानसहभूतं तदनुषक्तं स्याद्भवेत्संकीर्णम् । तयोस्तु बीजमेवैतत् । ततो हि श्रुतानुमाने प्रभवतः । न च यद्यस्य कारणं तत्तद्विषयं भवति । न हि धूमज्ञानं वह्निज्ञानकारणमिति वह्निविषयम् । तस्मादविकल्पेन प्रत्यक्षेण गृहीत्वा विकल्प्योपदिशन्ति चोपपादयन्ति च । उपसंहरति-

तस्मादिति । व्याख्येयं सूत्रं योजयति - निर्वितर्काया इति । स्मृतिपरिशुद्धावित्यादि सूत्रम् । शब्दसंकेतश्च श्रुतं चानुमानं च तेषां ज्ञानमेव विकल्पस्तस्मात्स्मृतिस्तस्याः परिशुद्धिरपगमस्तस्याम् । अत्र च संकेतस्मृतिपरिशुद्धिर्हेतुः । श्रुतादिज्ञानस्मृतिपरिशुद्धिश्च हेतुमती । अनुमानशब्दश्च कर्मसाधनोऽनुमेयवाचकः । स्वमिवेतीवकारो भिन्नक्रम-स्त्यक्त्वेतिपदानन्तरं द्रष्टव्यः ।

विषयविप्रतिपत्तिं निराकरोति-तस्या एकेति । एकां बुद्धिमुपक्रमत आरभत इत्येकबुद्ध्युपक्रमः । तदनेन परमाणवो नानात्मानो न निर्वितर्कविषया इत्युक्तं भवति । योग्यत्वेऽपि तेषां परमसूक्ष्माणां नानाभूतानां महत्त्वैकार्थसमवेतैकत्वनिर्भासप्रत्यय-विषयत्वायोगात् । अस्तु तर्हि परमार्थसत्सु परमाणुषु सांवृत्तः प्रतिभासधर्मः स्थौल्यमित्यत आह- अर्थात्मेति । नासति बाधके स्थूलमनुभवसिद्धं शक्यापह्नवमिति भावः । तत्र ये पश्यन्ति द्व्यणुकादिक्रमेण गोघटादय उपजायन्त इति तान्प्रत्याह-अणुप्रचयेति । अणूनां प्रचयः स्थूलरूपपरिणामः । स च विशिष्यतेऽन्य-स्मात्परिणामान्तरात् । स एवात्मा स्वरूपं यस्य स तथोक्तः । गवादिर्भोगायतनम् । घटादिर्विषयः । तच्चैतदुभयमपि लोक्यत इति लोकः । नन्वेषभूतसूक्ष्मेभ्यो भिन्नोऽभिन्नो वा स्यात् । भिन्नश्चेत्कथं तदाश्रयः कथं च तदाकारः । न हि घटः पटादन्य-स्तदाकारस्तदाश्रयो वा । अभिन्नश्चेत्तद्वदेव सूक्ष्मोऽसाधारणश्च स्यादत आह-स चेति । अयमभिप्रायः -नैकान्ततः परमाणुभ्यो भिन्नो घटादिरभिन्नो वा । भिन्नत्वे गवाश्ववद्धर्मधर्मिभावानुपपत्तेः । अभिन्नत्वे धर्मिरूपवत्तदनुपपत्तेः । तस्मात्कथञ्चिद्भिन्नः कथञ्चिदभिन्नश्चास्थेयः । तथा च सर्वमुपपद्यते । भूतसूक्ष्माणामिति षष्ठ्या कथंचिद्भेदं सूचयति । आत्मभूत इति चाभेदम् । फलेन व्यक्तेन तदनुभवलक्षणेन तद्व्यवहारलक्षणेन च व्यक्तेन विप्रतिपन्नं प्रत्यनुमापितः । कारणाभेदेन च कारणाकारतोपपन्नेत्याह-स्वव्यञ्जकाञ्जन इति । स किं तदात्मभूतो धर्मो नित्यः । नेत्याह-धर्मान्तर इति । धर्मान्तरस्य कपालादेरुदय इत्यर्थः । तस्यावयविनः परमाणुभ्यो व्यावृत्तं रूपमादर्शयति-स एष इति । परमाणुसाध्यायाः क्रियाया अन्या क्रिया मधूदकादिधारणलक्षणा तद्धर्मक इति । न केवलमनुभवादपि तु व्यवहारतोऽपि तन्निबन्धनत्वाल्लोकयात्राया इत्याह-तेनेति ।

स्यादेतत्-असति बाधकेऽनुभवोऽवयविनं व्यवस्थापयेत् । अस्ति च बाधकं यत्सत्तत्सर्वमनवयवं यथा विज्ञानम् । सच्च गोघटादीति स्वभाव हेतुः । सत्त्वं हि विरुद्धधर्मसंसर्गरहितत्वेन व्याप्तम् । तद्विरुद्धश्च विरुद्धधर्मसंसर्गः सावयव उपलभ्यमानो व्यापकविरुद्धोपलब्ध्या सत्त्वमपि निवर्तयति । अस्ति चावयविनि तद्देशत्वाऽतद्देश-

त्वावृतत्वानावृतत्वरक्तत्वारक्तत्वचलत्वाचलत्वलक्षणो विरुद्धधर्मसंसर्ग इत्यत आह-यस्य पुनरिति । अयमभिप्रायः-अनुभवसिद्धं सत्त्वं हेतुः क्रियते यत्किल पांशुलपादुको हालिकोऽपि प्रतिपद्यतेऽन्यद्वानुभवसिद्धात् । तत्रान्यदसिद्धत्वादहेतुः । अनुभवसिद्धं तु घटादीनां सत्त्वमर्थक्रियाकारित्वरूपं न स्थूलादन्यत् । सोऽयं हेतुः स्थूलत्वमपाकुर्वन्नात्मानमेव व्याहन्ति । ननु न स्थूलत्वमेव सत्त्वम् । अपि त्वसतो व्यावृत्तिः । अस्थौल्यव्यावृत्तिश्च स्थौल्यम् । व्यावर्त्यभेदाच्चव्यावृत्तयो भिद्यन्ते । अतः स्थौल्याभावेऽपि न सत्त्वव्याहतिः, अन्यत्वात् । भवतु वा व्यावृत्तिभेदादवसायविषयभेदः । यत्पूर्वकास्त्ववसायास्तस्यानुभवस्याविकल्पस्य प्रमाणस्य को विषय इति निरूपयतु भवान् । रूपपरमाणवो निरन्तरोत्पादा अगृहीतपरमसूक्ष्मतत्वा इति चेद्, हन्तैतेगन्ध-रसस्पर्शपरमाणुभिरन्तरिता न निरन्तराः । तस्मादन्तरालाग्रह एकघनवनप्रत्यय-वत्परमाण्वालम्बनः सन्नयं विकल्पो मिथ्येति तत्प्रभवा विकल्पा न पारम्पर्येणापि वस्तुप्रतिबद्धा इति कुतस्तदवसितस्य सत्त्वस्यानवयवत्वसाधकत्वम् । तस्मादविकल्पकस्य प्रत्यक्षस्य प्रामाण्यमिच्छता तदनुभूयमानस्थौल्यस्यैव सत्त्वमविकल्पावसेयम-कामयताप्यभ्युपेयम् । तथा च तद्बाधमानं सत्त्वमात्मानमेवापबाधेत । परमसूक्ष्माः परमाणवो विजातीपरमाण्वनन्तरिता अनुभवविषया इति व्याहतमङ्गीकरणम् । तदिदमुक्तं-यस्य पुनरवस्तुकः स प्रचयविशेषो निर्विकल्पस्य विषयः । सन्तु तर्हि सूक्ष्माः परमाणवो निर्विकल्पविषया इत्यत आह- सूक्ष्मं च कारणमनुपलभ्यमविकल्पस्येति । तस्यावयव्यभावाद्धेतोरतद्रूपप्रतिष्ठं मिथ्याज्ञानमिति लक्षणेन सर्वमेव प्राप्तं मिथ्याज्ञानं यत्स्थौल्यालम्बनं यच्च तदधिष्ठानसत्त्वालम्बनमित्यर्थः । नन्वेतावतापि न ज्ञानमात्मनि मिथ्या भवति तस्यावयवित्वेनाप्रकाशादित्यत आह- प्रायेणेति ।

ननु किमेतावतापीत्यत आह- तदा चेति । सत्त्वादिज्ञानं चेन्मिथ्या तदा सत्त्वादिहेतुकमनवयवित्वादिज्ञानमपि मिथ्यैव । तस्यापि हि निर्विकल्पागोचर-स्थूलमेवावसेयतया विषयः, स च नास्तीति तात्पर्यार्थः । विषयाभाव एव कुत इत्यत आह- यद्यदिति । विरोधश्च परिणामवैचित्र्येण भेदाभेदेन चोक्तोपपत्त्यनुसारेणोद्धर्तव्य इति सर्वं रमणीयम् ॥४३॥

"यदा पुनः..."थी सूत्रने योजवा माटे, पहेलां निर्वितर्क समापत्ति समजावे छे. परिशुद्धि एटले दूर करवुं. शब्दसंकेतना स्मरणपूर्वक आगम अने अनुमान प्रवर्ते छे. अने संकेत, गाय એ शब्द, એનો અર્થ અને એનું જ્ઞાન, એ ત્રણેના પરસ્પર અધ્યાસરૂપ છે. એનાથી આગમ (શબ્દ) અને અનુમાનજ્ઞાન રૂપ વિકલ્પો ઉત્પન્ન થાય છે. તેથી એમની સાથે થતી સમાધિ-પ્રજ્ઞા સવિતર્કા છે. પણ જ્યારે

ચિત્ત અર્થમાત્રમાં એકાગ્ર થાય, અર્થમાત્રનો આદર કરે, અને એનો જ સતત અભ્યાસ કરે, તો અવકાશ ન મળવાથી સંકેત સ્મૃતિ ત્યજાય છે, એનો ત્યાગ થતાં તન્મૂલક શ્રુત, અનુમાન જ્ઞાનજન્ય વિકલ્પો ત્યજાય છે, ત્યારે એમનાથી શૂન્ય એવી સમાધિપ્રજ્ઞામાં સ્વરૂપમાત્રવડે સ્થિર થયેલો પદાર્થ, પોતાના સ્વરૂપમાત્રરૂપ હોવાથી, વિકલ્પિત આકારોથી છૂટો પડે છે, એ નિર્વિતર્ક સમાપત્તિ છે. એ, આરોપના ગંધથી પણ રહિત હોવાથી, યોગીઓનું પર-પ્રત્યક્ષ કહેવાય છે.

ભલે. પણ યોગીઓ પર-પ્રત્યક્ષથી પદાર્થના તત્ત્વને જાણીને, એનો ઉપદેશ અને નિરૂપણ કરે છે. આગમ (શબ્દ) અને પરાર્થ (બીજાને માટે કહેલું) અનુમાનનો જે વિષય નથી, એવા પદાર્થનો ઉપદેશ અને પ્રતિપાદન તેઓ એ બે વડે કેવી રીતે કરી શકે ? માટે વિકલ્પરૂપ આગમ અને અનુમાનનો વિષય પદાર્થ છે, તેથી પર-પ્રત્યક્ષ પણ વિકલ્પ જ છે. આ શંકાનો જવાબ "तच्च श्रुतानुमानयोर्बीजम्..." વગેરેથી આપતાં કહે છે કે જો નિર્વિતર્ક જ્ઞાન સવિતર્કની જેમ શ્રુત અને અનુમાન સાથે, એમનાથી સંબંધિત બનીને ઉત્પન્ન થતું હોત તો સંકીર્ણ થાત, પણ આ તો એ બંનેનું બીજ છે. એનાથી શ્રુત અને અનુમાન ઉત્પન્ન થાય છે. અને જે જેનું કારણ હોય એ એનો વિષય ન બની શકે. ધુમાડાનું જ્ઞાન અગ્નિના જ્ઞાનનું કારણ હોવાથી અગ્નિને પોતાનો વિષય ન બનાવી શકે. તેથી વિકલ્પ વિનાના પ્રત્યક્ષથી ગ્રહણ કરીને, વિકલ્પના આશ્રયે યોગીઓ પદાર્થનો ઉપદેશ આપે છે અને એનું નિરૂપણ કરે છે. "तस्मात्"... વગેરેથી ચર્ચા સમાપ્ત કરતાં કહે છે કે આ કારણે યોગીઓનું નિર્વિતર્ક સમાધિથી ઉત્પન્ન થયેલું દર્શન બીજાં પ્રમાણોથી સંકીર્ણ નથી. "निर्वितर्कायाः..." વગેરેથી જેની વ્યાખ્યા કરવાની છે એ સૂત્ર સાથે સંબંધ યોજે છે.

"स्मृतिपरिशुद्धौ..." વગેરે સૂત્ર છે. શબ્દસંકેત, શ્રુત (આગમ કે શબ્દ) અને અનુમાનજન્ય જ્ઞાન વિકલ્પ છે, એનાથી સ્મૃતિ ઉત્પન્ન થાય છે. એ સ્મૃતિની પરિશુદ્ધિ, નિવૃત્તિ, થતાં નિર્વિતર્ક સમાપત્તિ થાય છે. સંકેતસ્મૃતિનો નાશ હેતુ છે. એ હેતુથી શ્રુત વગેરે જ્ઞાનની સ્મૃતિ પરિશુદ્ધ થાય છે. અનુમાન શબ્દ કર્મસાધન હોવાથી અનુમેય પદાર્થનો વાચક છે. "स्वमिव"માં "ઇવ" ભિન્નક્રમ હોવાથી "त्यक्त्वा" શબ્દ પછી મૂકવો જોઈએ.

"तस्या एकबुद्ध्युपक्रमः".. વગેરેથી (નિર્વિકલ્પ સમાપત્તિ) વિષે રહેલા વિરોધોનું નિરાકરણ કરે છે. એક પદાર્થ છે - એવા ખ્યાલનો આરંભ કરે છે, માટે "એક બુદ્ધ્યુપક્રમ" કહેવાય છે. આનાથી પરમાણુઓ ઘણા હોવાને કારણે નિર્વિતર્કના વિષય નથી, એમ કહ્યું છે. યોગ્યતા હોવા છતાં અતિસૂક્ષ્મ હોવાથી, ઘણા હોવાથી, મોટાપણું અને એકપણું ન હોવાથી, એટલે કે સમન્વિત રીતે એક હોવાનો આભાસ

ન હોવાથી પરમાણુઓ જ્ઞાનનો વિષય બનતા નથી.

ખરેખર હયાત પરમાણુઓમાં સ્થૂલતારૂપ પ્રાતિભાસિક સંવૃત્તિધર્મ ઉત્પન્ન થાય છે એમ કહી શકાય કે નહીં ? એના જવાબમાં "અર્થાત્મા" વગેરેથી કહે છે કે સ્થૂલપણું અનુભવસિદ્ધ હોવાથી, એનો બાધ કરનારાં પ્રબળ કારણો ન હોય ત્યાં સુધી, એને ટાળી શકાય નહીં. જે લોકો દ્વયણુક વગેરે ક્રમથી ગાય, ઘડો વગેરે ઉત્પન્ન થાય છે એમ માને છે. એમને "અણુપ્રચયઃ..." વગેરેથી કહે છે કે અણુઓનો સ્થૂલરૂપે પરિણમતો પ્રચય, બીજાં પરિણામોથી ભિન્ન છે. એવો અણુપ્રચય આત્મા કે સ્વરૂપ છે, એવા ગાય, ઘડો વગેરે પદાર્થો છે. ગાય વગેરે ભોગાયતન છે. ઘડો વગેરે (જડ હોવાથી) ફક્ત વિષય છે. એ બંને (જડ-ચેતન) રૂપ જગત્ અવલોકાય છે, માટે લોક કહેવાય છે.

આ લોક સૂક્ષ્મભૂતોથી ભિન્ન કે અભિન્ન હોવો જોઈએ. ભિન્ન હોય તો એમના આશ્રયે રહેનાર અને એમના આકારવાળો શાથી છે ? વસ્ત્ર ઘડાથી ભિન્ન છે, તેથી એના આકારનો કે એના આશ્રયરૂપ નથી. અને અભિન્ન હોય તો એમની જેમ સૂક્ષ્મ અને અસાધારણ (સ્વતંત્ર) હોવો જોઈએ. આ શંકાના જવાબમાં "સ ચ સંસ્થાનવિશેષો ભૂતસૂક્ષ્માણાં સાધારણો ધર્મ આત્મભૂતઃ..." વગેરેથી કહે છે એનો અભિપ્રાય એ છે કે ઘડા વગેરે પરમાણુઓથી અત્યંત ભિન્ન કે અભિન્ન નથી. અત્યંત ભિન્ન હોય તો ગાય-ઘોડા વગેરેની જેમ ધર્મધર્મીભાવ થાય નહીં, અને અત્યંત અભિન્ન હોય તો પણ ધર્મધર્મીભાવ થાય નહીં. તેથી થોડો ભેદ અને થોડો અભેદ છે, એમ સ્વીકારવું જોઈએ. આનાથી બધું યોગ્ય રીતે સમજી શકાય છે. "ભૂતસૂક્ષ્માણાં.." માં છઠ્ઠી વિભક્તિ પ્રયોજીને થોડો ભેદ, અને "આત્મભૂતઃ" કહીને થોડો અભેદ સૂચવે છે. વ્યક્ત થયેલા, અનુભવી શકાય અને વ્યવહાર કરી શકાય એવા ફળથી, એના વિરોધીના સમાધાન માટે અનુમાન પ્રયોજે છે. કારણથી અભિન્ન હોવાના કારણે કારણનો આકાર કાર્યમાં આવે એ યોગ્ય છે, એમ "સ્વવ્યંજકાંજન"... વગેરેથી કહ્યું.

શું એ એનો આત્મભૂત કે નિત્ય ધર્મ છે ? જવાબમાં "ધર્માન્તર..." વગેરેથી ના કહે છે. ધર્માન્તર એટલે ઠીકરાં વગેરે બીજા ધર્મનો ઉદય થતાં (ઘડો નષ્ટ થાય છે) એવો અર્થ છે. એ અવયવીનું પરમાણુઓથી ભિન્ન રૂપ "સ એષ.." વગેરેથી દર્શાવે છે. પરમાણુથી સિદ્ધ થતી ક્રિયા કરતાં જુદી ક્રિયા મધ, પાણી વગેરે ધારણ કરવાની ક્રિયા - (ઘડો કરે છે) માટે એવા ધર્મવાળો છે. ફક્ત અનુભવથી નહીં, વ્યવહારથી પણ આ વાત બરોબર છે, એમ સમજાય છે, કારણ કે એનાથી લોકયાત્રા સિદ્ધ થાય છે, એમ "તેન..." વગેરેથી કહે છે.

ભલે, પણ બાધક ન હોય તો અનુભવ અવયવીનું અસ્તિત્વ સિદ્ધ કરે. અને બાધક છે કે જે સત્ છે એ બધું નિરવયવ છે, જેમકે વિજ્ઞાન. અને સત્ ગાય, ઘડો વગેરે પદાર્થોના અસ્તિત્વ (ભાવ)નો હેતુ છે. સત્તા વિરુદ્ધ ધર્મના સંબંધથી રહિત હોય છે એવી વ્યાપ્તિ (બધે લાગુ પડતો નિયમ) છે. વિરુદ્ધ ધર્મનો સંબંધ એ નિયમથી વિરુદ્ધ છે. એ અવયવવાળા પદાર્થોમાં ઉપલબ્ધ થાય છે. (એટલે કે અવયવી નષ્ટ થતાં અસત્ બની જાય છે). આમ વ્યાપક નિયમથી વિરુદ્ધ ધર્મ એમાં ઉપલબ્ધ થતો હોવાથી, એની સત્તાને નિવૃત્ત કરે છે. અને અવયવીમાં, આ દેશમાં હોવું અને ન હોવું, આવૃત હોવું તેમજ અનાવૃત હોવું, રક્તત્વ અને અરક્તત્વ, ચલ (ગતિશીલ) હોવું અને અચલ હોવું, એવાં લક્ષણવાળો વિરુદ્ધ ધર્મનો સંબંધ જોવા મળે છે. (માટે અનુભવ અવયવીની સત્તા સિદ્ધ કરતો નથી). આ શંકાના જવાબમાં "यस्य पुनः अवस्तुकः स प्रचयविशेषः" વગેરેથી કહે છે, એનો અભિપ્રાય એ છે કે અનુભવસિદ્ધ સત્તા (સ્થૂલ પદાર્થના અસ્તિત્વનો) હેતુ છે, જે મેલાં પગરખાંવાળો હળ ચલાવનાર (અભણ ખેડૂત) પણ અનુભવે છે. જે અનુભવસિદ્ધથી જુદો નથી, ત્યાં બીજી વસ્તુ અસિદ્ધ હોવાથી હેતુ બની શકે નહીં. ઘડા વગેરેનું અસ્તિત્વ અનુભવસિદ્ધ અને કાર્યક્ષમ છે, એ સ્થૂળથી ભિન્ન નથી. જે હેતુ સ્થૂલપણાને નકારે એ પોતાને જ નકારે છે.

સ્થૂલ હોવું એ જ સત્તા નથી પણ અસત્થી વ્યાવૃત્તિ છે. સ્થૂલતાના અભાવની વ્યાવૃત્તિ એટલે સ્થૂલતા. જેમની વ્યાવૃત્તિ કરવાની હોય એવા વ્યાવર્ત્ય ઘણા હોવાથી વ્યાવૃત્તિઓ પણ ભિન્ન ભિન્ન છે. તેથી સ્થૂલતાના અભાવમાં પણ સત્તા નષ્ટ થતી નથી, કેમકે એ એનાથી અન્ય (ભિન્ન) છે. વ્યાવૃત્તિભેદથી નિશ્ચિત કરવા ઇચ્છેલા વિષયોનો પણ ભેદ છે. અવિકલ્પ અનુભવરૂપ પ્રમાણથી પદાર્થો નિશ્ચિત કરવામાં આવે છે, એ પ્રમાણનો વિષય તમારા મતમાં કયો છે ? એનું આપ નિરૂપણ કરો. તમે કહો કે રૂપના પરમાણુઓ, વચ્ચે અન્તર (અવકાશ) વિના ઉત્પન્ન થતા હોવાથી અને અત્યંત સૂક્ષ્મ હોવાથી ગ્રહણ કરી શકાતા નથી, તો (અમારો જવાબ છે કે) ખરેખર તો ગન્ધ, રસ, સ્પર્શના પરમાણુઓ વડે (રૂપના પરમાણુઓ) અન્તરિત (વચ્ચે આવે) છે, નિરન્તર કે અન્તરવિનાના નથી. તેથી (વૃક્ષો વચ્ચેનું) અન્તરાલ ગ્રહણ ન થતાં, એક સઘન વન છે, એવા જ્ઞાનની જેમ, પરમાણુઓને અવલંબતો હોવાથી આ વિકલ્પ મિથ્યા છે, તેથી તેના આધારે ઉત્પન્ન થયેલા વિકલ્પો પરંપરાથી પણ વસ્તુ સાથે સંકળાયેલા નથી. આ કારણે એમના સહારે નિશ્ચિત કરેલી સત્તાના નિરવયવપણાના સાધક તેઓ કેવી રીતે બની શકે ?

આ કારણે વિકલ્પવિનાના પ્રત્યક્ષનું પ્રામાણિકપણું સ્વીકારવા માગતા

લોકોએ એના (પ્રત્યક્ષ) વડે અનુભવાતી સ્થૂલતાનું વિકલ્પ વિનાનું અસ્તિત્વ-ભલે તેઓ (સ્થૂલ પદાર્થોની) કામના વિનાના નિષ્કામ પુરુષો હોય છતાં પણ-સ્વીકારવું જોઈએ. એની સત્તાને નકારતા લોકો પોતાને જ નકારે છે. અત્યંત સૂક્ષ્મ અને વિજાતીય (ભિન્ન જાતિના) પરમાણુઓથી અંતર વિનાના પરમાણુઓ અનુભવનો વિષય બને છે, એવું સ્વીકારતો મત પોતે જ વ્યાહત (પોતાની મેળે હણાયેલો) છે. આ વાત "યસ્ય પુનરવસ્તુકઃ સ પ્રચયવિશેષઃ...."વગેરેથી કહી છે.

ભલે, તો પછી સૂક્ષ્મ પરમાણુઓ નિર્વિકલ્પ (પ્રત્યક્ષ)ના વિષય બનો. એના જવાબમાં "સૂક્ષ્મં ચ કારણમનુપલભ્યમવિકલ્પસ્ય..." વગેરેથી કહે છે કે અવયવીના અભાવના કારણે, અતદ્રૂપપ્રતિષ્ઠ (વસ્તુના પોતાના રૂપમાં પ્રતિષ્ઠિત નથી એવું) જ્ઞાન મિથ્યા જ્ઞાન છે, એવું (મિથ્યાજ્ઞાનનું) લક્ષણ હોવાથી, બધું જ જ્ઞાન- ભલે સ્થૂલતાને અવલંબતું હોય કે એના અધિષ્ઠાનરૂપ સત્તાને અવલંબતું હોય-મિથ્યાજ્ઞાન છે, એવો અર્થ છે. આમ હોવા છતાં, અવયવી તરીકે અપ્રકાશિત રહેતું જ્ઞાન, સ્વયં જ્ઞાનરૂપ હોવાથી પોતાના સ્વરૂપમાં મિથ્યા નથી, તેથી ભાષ્યકાર "પ્રાયેણ", મોટાભાગનું (બૌદ્ધોનું) જ્ઞાન મિથ્યા છે, એમ કહે છે.

આવું હોય તો પણ શી હાનિ છે ? એના જવાબમાં "તદા ચ..." વગેરેથી કહે છે કે (સ્થૂલ પદાર્થની) સત્તાનું જ્ઞાન જો મિથ્યા હોય તો સત્તા વગેરેના હેતુરૂપ નિરવયવત્વ વગેરે જ્ઞાન પણ મિથ્યા જ છે. કારણ કે એનો વિષય પણ વિકલ્પરહિત (પ્રત્યક્ષ)થી જણાતો અને નિશ્ચિતરૂપે જાણવા ઇચ્છેલો સ્થૂલ પદાર્થ જ છે. અને એવો પદાર્થ તો એમના મતમાં નથી, એવું તાત્પર્ય છે. વિષયનો જ અભાવ કેવી રીતે કહેવાય ? એના જવાબમાં "યદ્યદુપલભ્યતે, તત્તદવયવિત્વેનાઘ્રાતમ્" વગેરેથી કહે છે કે જે જે વિષય તરીકે ઉપલબ્ધ થાય છે, એ અવયવીપણાથી સંબદ્ધ છે. વિરોધનો પરિહાર પરિણામવૈચિત્ર્યથી, (કારણ અને કાર્યના) ભેદ અને અભેદથી અને કહેલી યુક્તિઓ અનુસાર કરવો જોઈએ. આમ બધું રમણીય છે. ૪૩

★

एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता ॥૪૪॥

આનાથી જ સૂક્ષ્મવિષયવાળી સવિચાર અને નિર્વિચાર (સમાપત્તિ) સમજાવાઈ છે. ૪૪

ભાષ્ય

तत्र भूतसूक्ष्मेष्वभिव्यक्तधर्मकेषु देशकालनिमित्तानुभवावच्छिन्नेषु

या समापत्तिः सा सविचारेत्युच्यते । तत्राप्येकबुद्धिनिर्ग्राह्यमेवोदितधर्मविशिष्टं भूतसूक्ष्ममालम्बनीभूतं समाधिप्रज्ञायामुपतिष्ठते ।

या पुनः सर्वथा सर्वतः शान्तोदिताव्यपदेश्यधर्मानवच्छिन्नेषु सर्वधर्मानुपातिषु सर्वधर्मात्मकेषु समापत्तिः सा निर्विचारेत्युच्यते । एवं स्वरूपं हि तद्भूतसूक्ष्ममेतेनैव स्वरूपेणालम्बनीभूतमेव समाधि-प्रज्ञास्वरूपमुपरञ्जयति ।

प्रज्ञा च स्वरूपशून्येवार्थमात्रा यदा भवति तदा निर्विचारेत्युच्यते । तत्र महद्वस्तुविषया सवितर्का निर्वितर्का च, सूक्ष्मवस्तुविषया सविचारा निर्विचारा च । एवमुभयोरेतयैव निर्वितर्कया विकल्पहानिर्व्याख्यातेति ॥४४॥

દેશ, કાળ અને નિમિત્તના અનુભવવડે મર્યાદિત, તેમજ અભિવ્યક્ત થયેલા ધર્મવાળાં સૂક્ષ્મ ભૂતોમાં જે સમાપત્તિ થાય છે, એ સવિચાર કહેવાય છે. એમાં પણ "એક" એમ બુદ્ધિ વડે ગ્રહણ કરાતાં અને વ્યક્ત થયેલા ધર્મથી વિશિષ્ટ એવાં સૂક્ષ્મ ભૂતો અવલંબન બનીને સમાધિપ્રજ્ઞામાં પ્રકાશિત થાય છે.

અને જે સર્વથા, સર્વ પ્રકારના શાન્ત (ભૂતકાલીન) ઉદિત (વર્તમાન કાલીન) અને અવ્યપદેશ્ય (ભવિષ્યકાળના) ધર્મો વિનાના, સર્વ ધર્મોના આશ્રયભૂત, સર્વધર્મરૂપ (સૂક્ષ્મ ભૂતોમાં) સમાપત્તિ થાય એ નિર્વિચાર છે. સૂક્ષ્મ ભૂતો આવા સ્વરૂપનાં છે, તેથી પોતાના એ સ્વરૂપથી જ (યોગીના ચિત્તનું) અવલંબન બનીને સમાધિ પ્રજ્ઞાના રૂપને પોતાના આકારવાળું બનાવે છે. અને પ્રજ્ઞા પોતાના સ્વરૂપે જાણે શૂન્ય હોય એવી, ફક્ત વિષયભૂત પદાર્થરૂપ બને, ત્યારે નિર્વિચાર કહેવાય છે. એમાં મોટા (સ્થૂલ) પદાર્થને વિષય બનાવે એ સવિતર્ક અને નિર્વિતર્ક છે, અને સૂક્ષ્મવસ્તુવિષયવાળી સવિચાર અને નિર્વિચાર સમાપત્તિ છે. આ બંને વિકલ્પવિનાની છે, એ હકીકત નિર્વિતર્કના લક્ષણથી દર્શાવાઈ છે. ૪૪

तत्त्व वैशारदी

एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता । अभिव्यक्तो घटादिर्धर्मो यैस्ते तथोक्ताः । घटादिधर्मोपगृहीता इति यावत् । देश उपर्यधःपार्श्वादिः ।

कालो वर्तमानः । निमित्तं पार्थिवस्य परमाणोर्गन्धतन्मात्रप्रधानेभ्यः पञ्चतन्मात्रेभ्य उत्पत्तिः । एवमाप्यस्य परमाणोर्गन्धतन्मात्रवर्जितेभ्यो रसतन्मात्रप्रधानेभ्यश्चतुर्भ्यः । एवं तैजसस्य गन्धरसतन्मात्ररहितेभ्यो रूपतन्मात्रप्रधानभ्यस्त्रिभ्यः । एवं वायवीयस्य गन्धादितन्मात्ररहिताभ्यां स्पर्शप्रधानाभ्यां स्पर्शशब्दतन्मात्राभ्याम् । एवं नाभसस्य शब्द-तन्मात्रादेवैकस्मात् । तदिदं निमित्तं भूतसूक्ष्माणाम् । एतेषां देशकालनिमित्तानामनुभवः, तेनावच्छिन्नेषु । नानुभूतविशेषणा विशेष्ये बुद्धिरुपजायत इत्यर्थः । ननु सवितर्कया सह किं सारूप्यं सविचाराया इत्यत आह-तत्रापीति । पार्थिवो हि परमाणुः पञ्चतन्मात्रप्रचयात्मैकबुद्धिनिर्ग्राह्यः । एवमाप्यादयोऽपि चतुस्त्रिद्व्येकतन्मात्रात्मान एकबुद्धिनिर्ग्राह्या वेदितव्या । उदितो वर्तमानो धर्मस्तेन विशिष्टम् । एतावता चात्र संकेतस्मृत्यागमानुमानविकल्पानुवेधः सूचितः । न हि प्रत्यक्षेण स्थूले दृश्यमाने परमाणवः प्रकाशन्ते, अपि त्वागमानुमानाभ्याम् । तस्मादुपपन्नमस्यां संकीर्णत्वमिति ।

निर्विचारामाह-या पुनरिति । सर्वथा सर्वेण नीलपीतादिना प्रकारेण । सर्वत इति हि सार्वविभक्तिकस्तसिः सर्वैर्देशकालनिमित्तानुभवैरित्यर्थः । तदनेन स्वरूपेण कालानवच्छेदः परमाणूनामिति दर्शितम् । नापि तदारब्धधर्मद्वारेणेत्याह-शान्तेति । शान्ता अतीता उदिता वर्तमाना अव्यपदेश्या भविष्यन्तो धर्मास्तैरनवच्छिन्नेषु । नन्वनवच्छिन्ना धर्मैः परमाणवः किमसंबद्धा एव तैरित्यत आह—सर्वधर्मानुपातिष्विति । कतमेन संबन्धेन धर्माननुपतन्ति परमाणव इत्यतर्थः । कस्मात्पुनरियं समापत्ति-रेतद्विषयेत्यत आह- एवंस्वरूपं हीति । वस्तुतत्त्वग्राहिणी नातत्त्वे प्रवर्तत इत्यर्थः ।

विषयमभिधायास्याः स्वरूपमाह-प्रज्ञा चेति । संकलय्य स्वरूपभेदो-पयोगिविषयमाह-तत्रेति । उपसंहरति-एवमिति । उभयोरात्मनश्च निर्विचारायाश्चेति ॥४४॥

આનાથી (નિર્વિતર્કથી) સૂક્ષ્મ વિષયવાળી સવિચાર અને નિર્વિચાર (સમાપત્તિ) સમજાવાઈ છે. અભિવ્યક્ત ધર્મવાળાં (સૂક્ષ્મ ભૂતો) એટલે પ્રગટ કર્યો છે ઘડા વગેરેનો ધર્મ જેમણે એવાં. ઘડા વગેરે ધર્મોથી યુક્ત એવો અર્થ છે. દેશ એટલે ઉપર, નીચે, બાજુમાં વગેરે. કાળ એટલે વર્તમાન. નિમિત્ત એટલે કારણ, પૃથ્વીના પરમાણુની ગંધતન્માત્રા જેમાં મુખ્ય હોય એવી પાંચ તન્માત્રાઓથી ઉત્પત્તિ. એમ જળના પરમાણુની ગંધ તન્માત્રા વિનાની રસતન્માત્રા જેમાં પ્રધાન હોય એવી ચાર તન્માત્રાઓથી ઉત્પત્તિ. એ રીતે તેજના પરમાણુની ગન્ધ, રસ તન્માત્રાવિનાની રૂપતન્માત્રા જેમાં મુખ્ય છે એવી ત્રણ તન્માત્રાઓથી ઉત્પત્તિ. એ જ રીતે, વાયુના પરમાણુની ગંધ વગેરે ત્રણ તન્માત્રાઓ વિનાની, સ્પર્શ તન્માત્રા જેમાં મુખ્ય છે, એવી સ્પર્શ અને શબ્દ તન્માત્રાઓથી ઉત્પત્તિ. એમ આકાશના પરમાણુની ફક્ત

એક શબ્દ તન્માત્રાથી ઉત્પત્તિ. આ સૂક્ષ્મભૂતોનું નિમિત્ત કે કારણ છે, અને એ દેશ, કાળ અને નિમિત્તોના અનુભવ (જ્ઞાન)થી મર્યાદિત છે. જે વિશેષ્યોનાં વિશેષણો અનુભવ્યાં (જાણ્યાં) ન હોય, એમાં બુદ્ધિ પ્રવેશતી નથી. સવિચારની સવિતર્ક સાથે કઈ સમાનતા છે ? એના જવાબમાં "તત્રાપિ એક બુદ્ધિનિગ્રાહ્યમ્..." વગેરેથી કહે છે કે પાંચ તન્માત્રાઓના પ્રચય (સમૂહ) રૂપ પૃથ્વીનો પરમાણુ "એક છે", એમ બુદ્ધિથી ગ્રહણ કરાય છે. આ રીતે જળ વગેરેના પરમાણુઓ ચાર, ત્રણ, બે અને એક તન્માત્રા રૂપ હોવા છતાં બુદ્ધિથી એક એમ ગ્રહણ કરાય છે, એમ જાણવું જોઈએ. ઉદિત એટલે વર્તમાન ધર્મ, એનાથી વિશિષ્ટ છે એમ કહ્યું, તેથી આ સમાપત્તિમાં (શબ્દ) સંકેત, સ્મૃતિ, આગમ, અનુમાન અને વિકલ્પનો અનુવેધ (સંબંધ) સૂચવ્યો છે. પ્રત્યક્ષથી સ્થૂલ પદાર્થ દેખાય ત્યારે પરમાણુઓ પ્રકાશિત થતા (દેખાતા) નથી, પણ આગમ અને અનુમાનથી જાણી શકાય છે. તેથી આ (સવિચાર સમાપત્તિ)નું સંકીર્ણપણું યોગ્ય છે.

"યા પુનઃ..." વગેરેથી નિર્વિચાર સમાપત્તિ કહે છે. સર્વથા એટલે નીલ, પીળું વગેરે પ્રકારોથી. સર્વતઃ એટલે બધા દેશ, કાળ, નિમિત્તના અનુભવોથી (રહિત) એવો અર્થ છે. "સર્વતઃ"માં "તસિ" પ્રત્યય બધી વિભક્તિઓ દર્શાવે છે. આનાથી પરમાણુઓ સ્વરૂપે કાળથી મર્યાદિત નથી એમ દર્શાવ્યું. "શાન્ત..." વગેરેથી એમના વડે આરબ્ધ ધર્મથી પણ નહીં, એમ કહ્યું. શાન્ત એટલે ભૂતકાળના, ઉદિત એટલે વર્તમાન અને અવ્યપદેશ્ય એટલે ભવિષ્યના ધર્મોથી મર્યાદિત ન થતા (પરમાણુઓ હોય છે). પરમાણુઓ ધર્મોથી મર્યાદિત નથી, તો શું એમનાથી અસંબદ્ધ જ રહે છે ? એના જવાબમાં ''સર્વધર્માનુપાતિષુ.'' વગેરેથી કહે છે કે તેઓ બધા ધર્મોના આશ્રય છે. પરમાણુઓ કયા સંબંધથી ધર્મોના આશ્રય બને છે. એના જવાબમાં "સર્વધર્માત્મકેષુ..." વગેરેથી કહે છે કે એમનાથી ઉત્પન્ન થયેલા ઘડા વગેરે ધર્મો, પરમાણુઓથી થોડા ભિન્ન અને થોડા અભિન્ન છે, એવો અર્થ છે. આ સમાપત્તિ એમને શાથી વિષય બનાવે છે ? એના જવાબમાં "એવં સ્વરૂપં હિ"... વગેરેથી કહે છે કે સૂક્ષ્મ ભૂતોનું આવું સ્વરૂપ છે, તેથી એ સ્વરૂપથી અવલંબન બનીને સમાધિપ્રજ્ઞામાં પ્રગટ થાય છે. સમાપત્તિ વસ્તુતત્ત્વને ગ્રહણ કરનારી હોવાથી, તત્ત્વ ન હોય એમાં પ્રવર્તતી નથી, એવો અર્થ છે.

"પ્રજ્ઞા ચેતિ"થી નિર્વિચાર સમાપત્તિનો વિષય કહીને, એનું સ્વરૂપ કહે છે. "તત્ર"વગેરેથી સંકલન કરીને બંનેના સ્વરૂપભેદની ઉપયોગી વાત કરે છે. "એવમુભયોઃ..." વગેરેથી કહે છે કે બંને એટલે કે પોતાનામાં અને નિર્વિચાર સમાપત્તિમાં વિકલ્પનો અભાવ સમજાવ્યો. ૪૪

★

सूक्ष्मविषयत्वं चालिङ्गपर्यवसानम् ॥४५॥

સૂક્ષ્મ વિષય અલિંગ (પ્રકૃતિ) સુધી વિસ્તરે છે. ૪૫

भाष्य

पार्थिवस्याणोर्गन्धतन्मात्रं सूक्ष्मो विषयः, आप्यस्य रसतन्मात्रम्, तैजसस्य रूपतन्मात्रम्, वायवीयस्य स्पर्शतन्मात्रम्, आकाशस्य शब्दतन्मात्रमिति । तेषामहंकारः । अस्यापि लिङ्गमात्रं सूक्ष्मो विषयः । लिङ्गमात्रस्याप्यलिङ्गं सूक्ष्मो विषयः न चालिङ्गात्परं सूक्ष्ममस्ति । नन्वस्ति पुरुषः सूक्ष्म इति ? सत्यम् । तथा लिङ्गात्परमलिङ्गस्य सौक्ष्म्यं न चैवं पुरुषस्य किं तु लिङ्गस्यान्वयिकारणं पुरुषो न भवति, हेतुस्तु भवतीति । अतः प्रधाने सौक्ष्म्यं निरतिशयं व्याख्यातम् ॥४५॥

પાર્થિવ (પૃથ્વીના) અણુનો ગંધતન્માત્રા સૂક્ષ્મ વિષય છે. જળના પરમાણુનો રસ તન્માત્રા, તેજના પરમાણુનો રૂપ તન્માત્રા, વાયુના પરમાણુનો સ્પર્શતન્માત્રા, આકાશના પરમાણુનો શબ્દતન્માત્રા, એમનો (શબ્દતન્માત્રાઓનો) અહંકાર, અહંકારનો લિંગમાત્ર, લિંગમાત્રનો અલિંગ સૂક્ષ્મ વિષય છે. અલિંગથી આગળ કોઈ સૂક્ષ્મતત્ત્વ નથી.

પણ પુરુષ એનાથી પણ સૂક્ષ્મ છે ને ? સાચી વાત છે. પરંતુ લિંગથી પર અલિંગની જેવી સૂક્ષ્મતા છે, એવી સૂક્ષ્મતા પુરુષની નથી. પુરુષ લિંગનું અન્વયી (ઉપાદાન) કારણ બનતો નથી, પણ હેતુ બને છે. તેથી પ્રધાનમાં સૂક્ષ્મતાની પરાકાષ્ઠા જણાવી. ૪૫

तत्त्व वैशारदी

किं भूतसूक्ष्म एव ग्राह्यविषया समापत्तिः समाप्यते ? न । किंतु-सूक्ष्मविषयत्वं चालिङ्गपर्यवसानम् । पार्थिवस्य परमाणोः संबन्धिनी या गन्धतन्मात्रता सा समापत्तेः सूक्ष्मो विषयः । एवमुत्तरत्रापि योज्यम् । लिङ्गमात्रं महत्तत्त्वं तद्धि लयं गच्छति प्रधान इति । अलिगं प्रधानं तद्धि न क्वचिल्लयं गच्छतीत्यर्थः । अलिंगपर्यवसानत्वमाह- न चालिङ्गात्परमिति । चोदयति- ननु इति । पुरुषोऽपि सूक्ष्मो नालिङ्गमेवेत्यर्थः । परिहरति-सत्यमिति । उपादानतया सौक्ष्म्यमलिङ्ग एव नान्यत्रेत्यर्थः । तत्र पुरुषार्थनिमित्तत्वान्महदहंकारादेः पुरुषोऽपि कारणमलिङ्गवदिति । कुत एवं

लक्षणमलिङ्गस्यैव सौक्ष्म्यमित्याशयवान्पृच्छति-किं त्विति । उत्तरमाह-लिङ्गस्येति। सत्यं कारणं न तूपादानम् । यथा हि प्रधानं महदादिभावेन परिणमते न तथा पुरुषस्तद्धेतुरपीत्यर्थः । उपसंहरति-अतः प्रधान एवं सौक्ष्म्यं निरतिशयं व्याख्यातम् ॥४५॥

શું સૂક્ષ્મ ભૂતોમાં ગ્રાહ્ય વિષયવાળી સમાપત્તિ સમાપ્ત થાય છે ? ના. સૂક્ષ્મતાનો અંત અલિંગ (પ્રકૃતિ)માં આવે છે. પૃથ્વીના પરમાણુની ગંધમાત્રા સમાપત્તિનો સૂક્ષ્મ વિષય છે. એમ આગળ પણ સૂક્ષ્મતાના ક્રમમાં યોજવું. લિંગમાત્ર એટલે મહત્તત્ત્વ, કારણ કે એ પ્રધાનમાં લય પામે છે. અલિંગ એટલે પ્રધાન, કારણ કે એ ક્યાંય પણ લય પામતું નથી, એવો અર્થ છે. "न चालिंगात्परम्" વગેરેથી અલિંગમાં સૂક્ષ્મતાની પરાકાષ્ઠા કહે છે. "ननु" વગેરેથી પ્રશ્ન કરે છે કે ફક્ત અલિંગ નહીં, પુરુષ પણ સૂક્ષ્મ છે. "सत्यम्" વગેરેથી એનો પરિહાર (નિરાકરણ) કરતાં કહે છે કે ઉપાદાન તરીકે સૂક્ષ્મતા અલિંગમાં જ છે, બીજે નથી. મહત્, અહંકાર વગેરે પુરુષાર્થરૂપ નિમિત્તવાળા છે, તેથી પુરુષ પણ અલિંગની જેમ કારણ છે. આવા લક્ષણવાળા અલિંગની જ સૂક્ષ્મતા કેમ ? એના જવાબમાં "लिंगस्य..." વગેરેથી કહે છે કે સાચી વાત છે પુરુષ કારણ છે, પણ ઉપાદાન કારણ નથી. જેમ પ્રધાન મહત્ વગેરે રૂપે પરિણમે છે, એમ પુરુષ પરિણમતો નથી. છતાં એ હેતુ પણ છે. ચર્ચા સમાપ્ત કરતાં કહે છે : માટે પ્રધાનમાં જ સૂક્ષ્મતાની પરાકાષ્ઠા છે, એમ સમજાવ્યું છે. ૪૫

★

ता एव सबीजः समाधिः ॥४६॥

એ (ચાર સમાપત્તિઓ) સબીજ સમાધિ જ છે. ૪૬

ભાષ્ય

ताश्चतस्रः समापत्तयो बहिर्वस्तुबीजा इति समाधिरपि सबीजः । तत्र स्थूलेऽर्थे सवितर्को निर्वितर्कः, सूक्ष्मेऽर्थे सविचारो निर्विचार इति चतुर्धोपसंख्यातः समाधिरिति ॥४६॥

એ ચાર સમાપત્તિઓ બાહ્યવસ્તુઓના બીજવાળી છે, તેથી સમાધિ પણ સબીજ છે. એમાં સ્થૂલ પદાર્થમાં સવિતર્ક અને નિર્વિતર્ક, તેમજ સૂક્ષ્મ પદાર્થમાં સવિચાર અને નિર્વિચાર એમ ચાર પ્રકાર સમાધિના વર્ણવ્યા. ૪૬

तत्त्व वैशारदी

चतसृणामपि समापत्तीनां ग्राह्यविषयाणां संप्रज्ञातत्वमाह-ता एव सबीजः समाधिः । एवकारो भिन्नक्रमः सबीज इत्यस्यानन्तरं द्रष्टव्यः । ततश्चतस्रः समापत्तयो ग्राह्यविषयाः सबीजतया नियम्यन्ते । सबीजता त्वनियता ग्रहीतृग्रहणगोचरायामपि समापत्तौ विकल्पाविकल्पभेदेनानिषिद्धा व्यवतिष्ठते । तेन ग्राह्ये चतस्रः समापत्तयो ग्रहीतृग्रहणयोश्च चतस्र इत्यष्टौ सिद्धा भवन्तीति । निगदव्याख्यातं भाष्यम् ॥४६॥

ચારે ગ્રાહ્યવિષયક સમાપત્તિઓનું સંપ્રજ્ઞાતપણું "તાએવ સબીજઃ સમાધિઃ" વડે કહ્યું. "એવ" શબ્દ ભિન્નક્રમ છે. એને "સબીજઃ" પછી મૂકવો જોઈએ. તેથી ચાર ગ્રાહ્ય પદાર્થ વિષયક સમાપત્તિઓ સબીજ છે એમ જાણવું. સબીજપણું ગ્રહીતા અને ગ્રહણ વિષયક વિકલ્પ અને અવિકલ્પ સમાપત્તિઓમાં પણ નિષિદ્ધ નથી. તેથી ગ્રાહ્યવિષયક ચાર સમાપત્તિઓ અને ગ્રહીતા, ગ્રહણવિષયક ચાર સમાપત્તિઓ મળીને આઠ છે એમ નક્કી થાય છે. ભાષ્યમાં કરેલી વ્યાખ્યા સ્પષ્ટ છે. ૪૬

★

निर्विचारवैशारद्येऽध्यात्मप्रसादः ॥४७॥

નિર્વિચાર સમાધિમાં કુશળતા થતાં અધ્યાત્મ ક્ષેત્ર પ્રકાશિત થાય છે. ૪૭

भाष्य

अशुद्ध्यावरणमलापेतस्य प्रकाशात्मनो बुद्धिसत्त्वस्य रजस्तमोभ्यामनभिभूतः स्वच्छः स्थितिप्रवाहो वैशारद्यम् । यदा निर्विचारस्य समाधेर्वैशारद्यमिदं जायते तदा योगिनो भवत्यध्यात्मप्रसादो भूतार्थविषयः क्रमाननुरोधी स्फुटः प्रज्ञालोकः । तथा चोक्तम्-

प्रज्ञाप्रसादमारुह्य अशोच्यः शोचतो जनान् ।
भूमिष्ठानिव शैलस्थः सर्वान्प्राज्ञोऽनुपश्यति ॥४७॥

(तुल.शान्ति. १७।२०)

(નિર્વિચાર સમાપત્તિ દરમ્યાન) અશુદ્ધિ, આવરણ અને મળ વિનાના પ્રકાશરૂપ બુદ્ધિસત્ત્વના રજસ્-તમસ્થી ન દબાયેલા સ્વચ્છ, સ્થિર પ્રવાહમાં (નિરંતર) સ્થિતિ થાય એ વૈશારદ્ય કે કુશળતા છે. યોગી જ્યારે નિર્વિચાર સમાધિની આવી કુશળતા મેળવે, ત્યારે એના આધ્યાત્મિક ક્ષેત્રમાં

પ્રકાશ થાય છે, જેથી એની પ્રજ્ઞા અસ્તિત્વ ધરાવતા બધા પદાર્થોનું ક્રમવિના સ્પષ્ટ દર્શન કરે છે. આ વિષે કહ્યું પણ છે :- "શોકરહિત પ્રાજ્ઞ પુરુષ પર્વતના શિખર પર રહેલો મનુષ્ય જેમ ભૂમિપર રહેલાઓને જુએ, એમ પ્રજ્ઞાના પ્રાસાદ પર ચઢીને શોક કરતાં બધાં પ્રાણીઓને જુએ છે." ૪૭

तत्त्व वैशारदी

चतुसृष्वपि समापत्तिषु ग्राह्यविषयासु निर्विचाराया: शोभनत्वमाह-निर्विचारवैशारद्येऽध्यात्मप्रसाद: । वैशारद्यपदार्थमाह-अशुद्धीति । रजस्तम-सोरुपचयोऽशुद्धि: सैवावरणलक्षणो मलस्तस्मादपेतस्य प्रकाशात्मन: प्रकाशस्वभावस्य बुद्धिसत्त्वस्य । अतएवानभिभूत इति । स्यादेतत्-ग्राह्यविषया चेत्समापत्ति: कथमात्मविषय: प्रसाद इत्यत आह-भूतार्थविषय इति । नात्मविषय: किं तु तदाधार इत्यर्थ: । क्रमाननुरोधी । युगपदित्यर्थ: । अत्रैव परमर्षिगाथामुदाहरति-तथा चेति। ज्ञानालोकप्रकर्षेणात्मानं सर्वेषामुपरि पश्यन्दुखत्रयपरीताञ्शोचतो जनाञ्जानाति ॥४७॥

ગ્રાહ્યવિષયક ચાર સમાપત્તિઓમાં નિર્વિચારનું શુભપણું જણાવે છે. નિર્વિચારમાં વિશારદ થવાથી યોગીની અંદર પ્રકાશ થાય છે. "અશુદ્ધ્યાવરણમલાપેતસ્ય"... વગેરેથી વૈશારદ્ય શબ્દનો અર્થ કહે છે. રજોગુણ અને તમોગુણ વધે એ અશુદ્ધિ છે. એ જ આવરણ કરનાર મળ છે. એ બે વિનાનું બુદ્ધિસત્ત્વ સ્વભાવે જ પ્રકાશરૂપ છે. તેથી એ મળથી અભિભૂત થતું નથી.

પણ સમાપત્તિ બાહ્યવિષયક હોય, તો આત્મવિષયક પ્રકાશ કેવી રીતે થાય ? એના જવાબમાં "ભૂતાર્થ વિષયઃ"... થી કહે છે કે ભલે આત્મા એનો વિષય ન હોય, પણ આત્મા જેમનો આશ્રય છે, એવા હકીકતમાં અસ્તિત્વ ધરાવતા પદાર્થો એનો વિષય છે. "ક્રમાનનુરોધી" એટલે ક્રમની અપેક્ષાવિના એકી સાથે બધા પદાર્થોને પ્રકાશિત કરે છે. "તથા ચ" વગેરેથી આ વિષે મહાન્ ઋષિની ગાથાનો ઉલ્લેખ કરે છે. પોતે બધાથી ઉપર જ્ઞાન-પ્રકાશના સર્વોચ્ચ બિન્દુએ સ્થિર થઈને ત્રિવિધ દુઃખોથી ઘેરાયેલા, શોક કરતા લોકોને જુએ છે- જાણે છે. ૪૭

★

ऋतम्भरा तत्र प्रज्ञा ॥४८॥

ત્યાં ઋતંભરા પ્રજ્ઞા છે. ૪૮

ભાષ્ય

तस्मिन्समाहितचित्तस्य या प्रज्ञा जायते तस्या ऋतम्भरेति संज्ञा

भवति । अन्वर्था च सा, सत्यमेव बिभर्ति । न च तत्र विपर्यास-ज्ञानगन्धोऽप्यस्तीति । तथा चोक्तम्-

आगमेनानुमानेन ध्यानाभ्यासरसेन च ।
त्रिधा प्रकल्पयन्प्रज्ञां लभते योगमुत्तमम् ॥ इति ॥४८॥

એમાં સમાહિત ચિત્તવાળા યોગીમાં જે પ્રજ્ઞા ઉત્પન્ન થાય છે એનું નામ ઋતંભરા છે. એ સંજ્ઞા સાર્થક છે, સત્યને જ ધારણ કરે છે. ત્યાં વિપર્યાસ જ્ઞાન (અવળા જ્ઞાન)ની ગંધ પણ નથી. આ વિષે કહ્યું છે :- "આગમથી અનુમાનથી અને ધ્યાનાભ્યાસમાં રસ ઉત્પન્ન થવાથી, એમ ત્રણ રીતે પ્રજ્ઞા કેળવીને ઉત્તમ યોગ પ્રાપ્ત કરે છે." ૪૮

तत्त्व वैशारदी

अत्रैव योगिजनप्रसिद्धान्वर्थसंज्ञाकथनेन योगिसंमतिमाह-ऋंतभरा तत्र प्रज्ञा। सुगमं भाष्यम् । आगमेनेति वेदविहितं श्रवणमुक्तम् । अनुमानेनेति मननम् । ध्यानं चिन्ता । तत्राभ्यासः पौनःपुन्येनानुष्ठानम् । तस्मिन्रस आदरः । तदनेन निदिध्यासन-मुक्तम् ॥४८॥

આ વિષે યોગીઓમાં પ્રસિદ્ધ સાર્થક સંજ્ઞા "ઋતંભરા પ્રજ્ઞા"નો ઉલ્લેખ કરીને યોગીઓની સંમતિ દર્શાવે છે. ભાષ્ય સુગમ છે. "આગમેન"થી વેદવિહિત શ્રવણ કહ્યું. "અનુમાનેન"થી મનન અને "ધ્યાન"થી ચિન્તન કહ્યું. એમનો અભ્યાસ એટલે વારંવાર અનુષ્ઠાન. એમાં રસ એટલે આદર. આનાથી નિદિધ્યાસન કહ્યું.૪૮

★

सा पुनः - એ (પ્રજ્ઞા) વળી -

श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् ॥४९॥

શ્રુતજ્ઞાન અને અનુમાનજ્ઞાનથી જુદા વિષયવાળી છે, કારણ કે એનો સંબંધ પદાર્થની વિશેષતા (ખાસિયત) સાથે છે. ૪૯

भाष्य

श्रुतमागमविज्ञानं तत्सामान्यविषयम् । न ह्यागमेन शक्यो विशेषोऽभिधातुम् । कस्मात् ? न हि विशेषेण कृतसंकेतः शब्द इति । तथानुमानं सामान्यविषयमेव । यत्र प्राप्तिस्तत्र गतिर्यत्र न प्राप्तिस्तत्र न

गतिरित्युक्तम् (द्र० १।७ भाष्य) । अनुमानेन च सामान्येनोपसंहारः । तस्माच्छ्रुतानुमानविषयो न विशेषः कश्चिदस्तीति ।

न चास्य सूक्ष्मव्यवहितविप्रकृष्टस्य वस्तुनो लोकप्रत्यक्षेण ग्रहणमस्ति । न चास्य विशेषस्याप्रमाणकस्याभावोऽस्तीति समाधिप्रज्ञानिर्ग्राह्य एव स विशेषो भवति- भूतसूक्ष्मगतो वा पुरुषगतो वा । तस्माच्छ्रुतानुमानप्रज्ञाभ्यामन्यविषया सा प्रज्ञा विशेषार्थत्वादिति ॥४९॥

શ્રુત કે આગમ જ્ઞાન સામાન્ય વિષયક છે. આગમ વડે વિશેષ કહી શકાય નહીં. કેમ ? કારણ કે શબ્દનો સંકેત વિશેષ માટે કરેલો નથી. અને અનુમાન પણ સામાન્યને જ પોતાનો વિષય બનાવે છે. જ્યાં પ્રાપ્તિ (શબ્દશક્તિની પહોંચ) છે, ત્યાં ગતિ (જ્ઞાનની ગતિ કે બોધ) છે. જ્યાં પ્રાપ્તિ નથી ત્યાં ગતિ નથી, એમ કહ્યું છે. અનુમાનના નિર્ણયોનો સામાન્યમાં અંત થાય છે. તેથી કોઈ વિશેષ શ્રુત અને અનુમાનનો વિષય બનતો નથી.

વળી, લૌકિક (ઇન્દ્રિય) પ્રત્યક્ષથી સૂક્ષ્મ, વ્યવધાનવાળી અને દૂર રહેલી વસ્તુઓનું ગ્રહણ થતું નથી. અને કોઈ પણ પ્રમાણથી ગ્રહણ ન થતા વિશેષો છે જ નહીં, એવું નથી. કારણ કે સમાધિપ્રજ્ઞાવડે એ વિશેષોનું ગ્રહણ થાય છે- પછી એ વિશેષો ભલે સૂક્ષ્મભૂતોમાં કે પુરુષમાં રહેલા હોય. તેથી શ્રુત અને અનુમાન જ્ઞાનથી જુદા વિષયવાળી એ (ऋतंभरा) પ્રજ્ઞા છે, કારણ કે એનો વિષય પદાર્થના વિશેષો છે. ૪૯

तत्त्व वैशारदी

स्यादेतत्-आगमानुमानगृहीतार्थविषयीभावनाप्रकर्षलब्धजन्मा निर्विचारागमानुमानविषयमेव गोचरयेत् । न खल्वन्यविषयानुभवजन्मा संस्कारः शक्तोऽन्यत्र ज्ञानं जनयितुमतिप्रसङ्गात् । तस्मान्निर्विचारा चेदृतंभरागमानुमानयोरपि तत्प्रसङ्ग इत्यत आह- श्रुतानुमानेत्यादि । बुद्धिसत्त्वं हि प्रकाशस्वभावं सर्वार्थदर्शनसमर्थमपि तमसावृतं यत्रैव रजसोद्घाट्यते तत्रैव गृह्णाति । यदा त्वभ्यासवैराग्याभ्यामपास्तरजस्तमोमलमनवद्यवैशारद्यमुद्द्योतते तदास्यातिपतितसमस्तमानमेयसीम्नः प्रकाशान्त्ये सति किं नाम यत्र गोचर इति भावः । व्याचष्टे-श्रुतमागमविज्ञानं तत्सामान्यविषयम् इति । कस्मात् ? न ह्यागमेन शक्यो विशेषोऽभिधातुम् । कुतः ? यस्मादानन्त्याद्व्यभिचाराच्च न विशेषेण कृतसंकेतः शब्दः । यस्मादस्य विशेषेण सह न वाच्यवाचकसंबन्धः

प्रतीयते । न च वाक्यार्थेऽपीदृशो विशेषः संभवति । अनुमानेऽपि लिङ्गलिङ्गि-संबन्धग्रहणाधीनजन्मनि गतिरेषैवेत्याह-तथानुमानमिति । यत्र प्राप्तिरित्यत्र यत्रतत्रशब्दयोः स्थानपरिवर्तनेन व्याप्यव्यापकभावोऽवगमयितव्यः । अतोऽत्रानुमानेन सामान्येनोपसंहारः । उपसंहरति-तस्मादिति ।

अस्तु तर्हि संबन्धग्रहानपेक्षं लोकप्रत्यक्षं न तत्सामान्यविषयमित्यत आह-न चास्येत्यादि । मा भूत्संबन्धग्रहाधीनं लोकप्रत्यक्षम्, इन्द्रियाधीनं तु भवत्येव । न चेन्द्रियाणामस्मिन्नस्ति योग्यतेत्यर्थः । ननु च यद्यागमानुमानप्रत्यक्षागोचरो विशेषस्तर्हि नास्ति, प्रमाणविरहादित्यत आह- न चेति । न हि प्रमाणं व्यापकं कारणं वा प्रमेयस्य येन तन्निवृत्तौ निवर्तेत । नो खलु कलावतश्चन्द्रस्य परभागवर्तिहरिणसद्भावं प्रति न संदिहते प्रामाणिका इत्यर्थः । इति तस्मात् । समाधिप्रज्ञानिर्ग्राह्य एवेति । अत्र च विवादाध्यासिताः परमाणव आत्मानश्च प्रातिस्विकविशेषशालिनो द्रव्यत्वे सति परस्परं व्यावर्तमानत्वाद्, ये द्रव्यत्वे सति परस्परं व्यावर्तन्ते ते प्रातिस्विक-विशेषशालिनो यथा खण्डमुण्डादय इत्यनुमानेनागमेन च ऋतंभरप्रज्ञोपदेशपरेण, यद्यपि विशेषो निरूप्यते तदनिरूपणे संशयः स्यान्न्यायप्राप्तत्वात्तथाप्यदूरविप्रकर्षेण तत्सत्त्वं कथंचिद्गोचरयतः श्रुतानुमाने । न तु साक्षाच्चार्थमिव समुच्चयादिपदानि लिङ्गसंख्यायोगितया । तस्मात्सिद्धं श्रुतानुमानप्रज्ञाभ्यामन्यविषयेति ॥४९॥

ભલે. પણ આગમ અને અનુમાનથી ગ્રહણ કરેલા વિષયોની ભાવનાના પ્રકર્ષથી ઉત્પન્ન થયેલી નિર્વિચાર સમાપત્તિ આગમ અને અનુમાનગમ્ય વિષયોને જ પ્રગટ કરી શકે. કારણ કે એક વિષયથી પેદા થયેલો સંસ્કાર બીજાનું જ્ઞાન ન કરાવી શકે. નહીં તો અતિપ્રસંગ થાય. તેથી ઋતંભરા જો નિર્વિચાર સમાપત્તિ હોય, તો એમાં આગમ અને અનુમાનનો પણ પ્રવેશ છે. આ શંકાના નિવારણ માટે "શ્રુતાનુમાન..." વગેરેથી કહે છે કે બુદ્ધિસત્ત્વ પ્રકાશ સ્વભાવવાળું છે અને બધા પદાર્થોનું દર્શન કરવા સમર્થ છે, પણ તમસ્નું એના પર થયેલું આવરણ રજસ્વડે જે પદાર્થવિષે હટાવાય, એને જ એ ગ્રહણ કરે છે. અભ્યાસ અને વૈરાગ્યથી રજસ્-તમસ્ના મળો દૂર થાય અને એની નિર્દોષ વિશદતા પ્રગટે, તેમજ એનો અનંત પ્રકાશ બધી પ્રમાણ-પ્રમેયની સીમાઓ ઓળંગી જાય, ત્યારે એને શું અગોચર રહે ? એવો ભાવ છે.

"શ્રુતમાગમવિજ્ઞાનમ્"થી ભાષ્યકાર સૂત્રની વ્યાખ્યા કરે છે. શ્રુતજ્ઞાન કે આગમજ્ઞાન સામાન્યવિષયક છે. કેમ ? કારણ કે આગમથી વિશેષ કહી શકાતો નથી. શાથી ? કારણ કે વિશેષો અનંત અને એકબીજા સાથે મળતા આવે એવા

હોવાથી શબ્દનો સંકેત વિશેષ વિષે હોતો નથી. તેમજ શબ્દનો વિશેષ સાથે વાચ્ય-વાચક સંબંધ નથી. વાક્યાર્થમાં પણ આવો વિશેષ સંભવતો નથી. ચિન્હ અને ચિન્હવાળાના સંબંધના જ્ઞાનથી ઉત્પન્ન થતા અનુમાનની પણ આવી જ ગતિ છે, એમ "તથાનુમાનમ્..." વગેરેથી કહે છે. "યત્ર પ્રાપ્તિ..." વગેરેમાં યત્ર અને તત્ર શબ્દનું સ્થાન બદલીને વ્યાપ્ય-વ્યાપકભાવ સમજવો જોઈએ. તેથી અનુમાન પણ સામાન્યમાં જ સમાપ્ત થાય છે "તસ્માત્..." વગેરેથી ઉપસંહાર કરતાં કહે છે કે આ કારણે શ્રુત અને અનુમાન વિશેષ વિષયક બની શકતા નથી.

તો પછી સંબંધ ગ્રહણની અપેક્ષા વિનાનું લોકપ્રત્યક્ષ વિશેષવિષયક બની શકે, કારણ કે એ સામાન્યવિષયક નથી. એના જવાબમાં "ન ચાસ્ય.." વગેરેથી કહે છે કે લોકપ્રત્યક્ષ ભલે સંબંધગ્રહણને આધીન ન હોય, છતાં ઇન્દ્રિયાધીન તો છે જ. અને ઇન્દ્રિયોની આમાં (વિશેષ ગ્રહણમાં) યોગ્યતા નથી, એવો અર્થ છે.

જો વિશેષ આગમ, અનુમાન અને પ્રત્યક્ષગોચર ન હોય, તો એ પ્રમાણના અભાવના કારણે છે જ નહીં. આના જવાબમાં "ન ચાસ્ય વિશેષસ્ય..." વગેરેથી કહે છે કે પ્રમાણ પ્રમેયનું કારણ નથી, તેમજ એની સાથે વ્યાપક નથી, જેથી એ (પ્રમાણ) નિવૃત્ત થતાં પ્રમેય પણ નિવૃત્ત થાય. પ્રામાણિક લોકો ચંદ્રની કળા જોઈને, એના બીજા (ન દેખાતા) ભાગમાં રહેલા હરણના અસ્તિત્વ વિષે સંદેહ કરતા નથી. માટે એ (વિશેષ) સમાધિપ્રજ્ઞા વડે જ ગ્રહણ કરાય એવો છે. અહીં ચર્ચાનો વિષય બનેલા પરમાણુઓ અને આત્માઓ (જીવો) દ્રવ્યરૂપ અને પરસ્પર ભિન્ન હોવાથી, પોતપોતાની ખાસ (સ્વતંત્ર) વિશેષતાવાળા છે. તેથી આવો અનુમાનનો પ્રયોગ થાય કે જે દ્રવ્યો હોય અને પરસ્પર ભિન્ન હોય, એ પોતપોતાની સ્વતંત્ર ખાસિયતવાળા હોય છે. દાખલા તરીકે ખાંડ અને મુંડન કરાવેલો યતિ વગેરે જુદા જુદા છે. આવા અનુમાનથી અને ઋતંભરાપ્રજ્ઞાનો ઉપદેશ કરતા આગમથી જો કે વિશેષનું નિરૂપણ થાય છે. જો આ રીતે એનું નિરૂપણ ન થાય, તો ન્યાયપ્રાપ્ત (સાધારણ બુદ્ધિથી એને સમજવા જતાં) સંશય થાય એ સ્વાભાવિક છે. છતાં શ્રુત અને અનુમાનજ્ઞાન દૂરથી પણ ઝાંખી ઝાંખી એના અસ્તિત્વની પ્રતીતિ ગમે તે રીતે કરાવે છે, પરંતુ આવી પ્રતીતિ સાક્ષાત્ પદાર્થનું પ્રત્યક્ષ કરીને, કે ચિન્હ અને સંખ્યાના સહયોગથી મેળવાતા અનુમાન જ્ઞાન કે ગણિતજ્ઞાન જેટલી સ્પષ્ટ હોતી નથી. માટે સમાધિ પ્રજ્ઞા શ્રુત અને અનુમાન પ્રજ્ઞાથી ભિન્ન વિષયવાળી છે, એમ સિદ્ધ થયું. ૪૯

★

समाधिप्रज्ञाप्रतिलम्भे योगिनः प्रज्ञाकृतः संस्कारो नवो नवो जायते-

સમાધિપ્રજ્ઞાના લાભથી યોગીને એ પ્રજ્ઞાથી નવો નવો સંસ્કાર ઉત્પન્ન થાય છે-

तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी ॥५०॥

એનાથી (સમાધિ પ્રજ્ઞાથી) ઉત્પન્ન થયેલો સંસ્કાર, બીજા સંસ્કારોનો પ્રતિબંધ (નિરોધ) કરે છે. ૫૦

भाष्य

समाधिप्रज्ञाप्रभवः संस्कारो व्युत्थानसंस्काराशयं बाधते । व्युत्थानसंस्काराभिभवात्तत्प्रभवाः प्रत्यया न भवन्ति । प्रत्ययनिरोधे समाधिरुपतिष्ठते । ततः समाधिजा प्रज्ञा, ततः प्रज्ञाकृताः संस्कारा इति नवो नवः संस्काराशयो जायते । ततश्च प्रज्ञा ततश्च संस्कारा इति । कथमसौ संस्काराशयश्चित्तं साधिकारं न करिष्यतीति । न ते प्रज्ञाकृताः संस्काराः क्लेशक्षयहेतुत्वाच्चित्तमधिकारविशिष्टं कुर्वन्ति । चित्तं हि ते स्वकार्यादवसादयन्ति । ख्यातिपर्यवसानं हि चित्तचेष्टितमिति ॥५०॥

સમાધિપ્રજ્ઞાથી ઉત્પન્ન થયેલો સંસ્કાર વ્યુત્થાનના સંસ્કારોના આશયનો નાશ કરે છે. વ્યુત્થાન સંસ્કારો દબાઈ જવાથી એમનાથી પ્રગટ થતા પ્રત્યયો (વિચારો) નષ્ટ થાય છે. પ્રત્યય નિરોધ થતાં (નિર્વિચાર દશા થતાં) સમાધિ થાય છે. એનાથી સમાધિથી ઉત્પન્ન થતી પ્રજ્ઞા પ્રગટે છે, એ પ્રજ્ઞાથી સંસ્કારો ઉત્પન્ન થાય છે, એમ નવો નવો સંસ્કારસમૂહ ઉત્પન્ન થાય છે. એનાથી પ્રજ્ઞા, એનાથી સંસ્કાર (એમ નિરોધ સંસ્કારાશય વધે છે).

આ સંસ્કારાશય ચિત્તને સાધિકાર કેમ ન બનાવે ? કારણ કે એ સમાધિ પ્રજ્ઞાથી ઉત્પન્ન થયેલા સંસ્કાર ક્લેશોનો ક્ષય કરવાના હેતુ હોવાથી ચિત્તને અધિકારવાળું બનાવતા નથી. (એથી ઊલટું) એ ચિત્તને પોતાના કાર્ય (અધિકાર)થી નિવૃત્ત કરે છે. (કારણ કે) ચિત્તનું કાર્ય વિવેકખ્યાતિ ઉત્પન્ન થાય ત્યાં સુધી જ ચાલે છે. ૫૦

तत्त्व वैशारदी

स्यादेतत्-भवतु परमार्थविषयः संप्रज्ञातो यथोक्तोपायाभ्यासात् । अनादिना तु व्युत्थानसंस्कारेण निरूढनिबिडतया प्रतिबन्धनीया समाधिप्रज्ञा सा वात्यावर्तमध्यवर्तिप्रदीपपरमाणुरिवेति शङ्कामपनेतुं सूत्रमवतारयति-समाधिप्रज्ञेति । सूत्रं

पठति-तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी । तदिति निर्विचारां समापत्तिं परामृशति। अन्येति व्युत्थानमाह । भूतार्थपक्षपातो हि धियां स्वभावस्तावदेवेयमनवस्थिता भ्राम्यति न यावत्तत्त्वं प्रतिलभते । तत्प्रतिलम्भे तत्र स्थितपदा सती संस्कारबुद्धिः संस्कारबुद्धिचक्रक्रमेणावर्तमानानादिमप्येतत् तत्त्वसंस्कारबुद्धिक्रमं बाधत एवेति । तथा च बाह्या अप्याहुः -

"निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः ।
न बाधोऽनादिमत्त्वेऽपि बुद्धेस्तत्पक्षपाततः ॥" इति ।

स्यादेतत्-समाधिप्रज्ञातोऽस्तु व्युत्थानजस्य संस्कारस्य निरोधः समाधिजस्तु संस्कारातिशयः समाधिप्रज्ञाप्रसवहेतुरस्त्यविकल इति तदवस्थैव चित्तस्य साधिकारतेति चोदयति-कथमसाविति । परिहरति-न त इति । चित्तस्य हि कार्यद्वयं शब्दाद्युपभोगो विवेकख्यातिश्चेति । तत्र क्लेशकर्माशयसहितं शब्दाद्युपभोगे प्रवर्तते । प्रज्ञाप्रभवसंस्कारोन्मूलितनिखिलक्लेशकर्माशयस्य तु चेतसोऽवसितप्रायाधिकारभावस्य विवेकख्यातिमात्रमवशिष्यते कार्यम् । तस्मात्समाधिसंस्काराश्चित्तस्य न भोगाधिकारहेतवः प्रत्युत तत्परिपन्थिन इति । स्वकार्याद्भोगलक्षणादवसादयन्ति, असमर्थं कुर्वन्तीत्यर्थः । कस्मात्ख्यातिपर्यवसानं हि चित्तचेष्टितम् । तावद्धि भोगाय चित्तं चेष्टते न यावद्विवेकख्यातिमनुभवति । संजातविवेकख्यातिनस्तु क्लेशनिवृत्तौ न भोगाधिकार इत्यर्थः ॥५०॥

નાખનાર વસ્તુ જોઈને પ્રૂજી ઊઠે છે. એ કંપથી મરણ નજીક છે, એવું અનુમાન કરીને, એનાથી ડરે છે, એવું જોવા મળે છે. દુઃખથી કે દુઃખના હેતુથી ભય થતો જોવા મળે છે. એણે આ જન્મમાં મરણ અનુભવ્યું નથી, એનું અનુમાન કર્યું નથી કે સાંભળ્યું નથી. તેથી આ પહેલાં એનું દુઃખપણું કે દુઃખનો હેતુ હોવાપણું એણે અનુભવ્યું છે, એમ જણાય છે. તેથી એની આવી સ્થિતિની સમજૂતી માટે ફક્ત સ્મૃતિ બાકી રહે છે. એ સ્મૃતિ સંસ્કાર વિના સંભવે નહીં, અને સંસ્કાર અનુભવવિના સંભવે નહીં અને આ જન્મમાં અનુભવ થયો નથી, માટે એ પૂર્વજન્મનો છે, એમ પૂર્વજન્મનો સંબંધ સૂચવાય છે.

"યથા ચાયમત્યન્તમૂઢેષુ દૃશ્યતે..." વગેરે વાક્યમાં તથા શબ્દ યથાની આકાંક્ષા રાખે છે. માટે અર્થના બળે પ્રાપ્ત થતા યથા શબ્દનો પ્રયોગ કરીને જેવો વાક્યાર્થ થાય, એ જણાવે છે. અત્યંત મૂઢ એટલે મંદતમ ચેતનાવાળા. "વિજ્ઞાત પૂર્વાપરાન્તસ્ય"થી વિદ્વત્તા દર્શાવે છે. અંત એટલે કોટી (છેડો). પુરુષની પૂર્વ કોટી સંસાર છે અને છેલ્લી કોટી કૈવલ્ય છે. એ બે જેણે શ્રુત અને અનુમાનજ્ઞાનથી જાણ્યાં હોય એ વિદ્વાન્ છે. આ મરણત્રાસ કીડાથી માંડીને વિદ્વાન્ સુધી રૂઢ એટલે પ્રસિદ્ધ છે.

અવિદ્વાન્ને મરણત્રાસ ભલે થતો, પણ વિદ્વાન્માં તો એ વિદ્યાથી નષ્ટ થયો હોવાથી સંભવે નહીં. મરણત્રાસ નષ્ટ ન થયો હોય, તો એમાં શુદ્ધસત્ત્વનો ઉદય થયો નથી, એમ કહેવાય. આવા આશયથી "કસ્માત્ ?" એમ પ્રશ્ન પૂછે છે. અને "સમાના હિ તયોઃ... વાસના"થી જવાબ આપે છે કે અહીં વિદ્વાન્થી શ્રુત અને અનુમાન જ્ઞાનવાળો પંડિત સમજવાનો છે, સંપ્રજ્ઞાત સમાધિવાળો મુખ્ય વિદ્વાન્ નહીં, એવો ભાવ છે. ૯

★

ते प्रतिप्रसवहेयाः सूक्ष्माः ॥१०॥

એ સૂક્ષ્મ ક્લેશો (ચિત્તના) પ્રલય વડે ત્યજવા યોગ્ય છે. ૧૦

ભાષ્ય

ते पञ्च क्लेशा दग्धबीजकल्पा योगिनश्चरिताधिकारे चेतसि प्रलीने सह तेनैवास्तं गच्छन्ति ॥१०॥

એ બળેલા બીજ જેવા પાંચ ક્લેશો, પોતાનો અધિકાર પૂરો થયે યોગીનું ચિત્ત લય પામે એની સાથે જ વિલીન (નષ્ટ) થઈ જાય છે. ૧૦

तत्त्व वैशारदी

तदेवं क्लेशा लक्षिताः । तेषां च हेयानां प्रसुप्ततनुविच्छिन्नोदाररूपतया चतस्रोऽवस्था दर्शिताः । कस्मात्पुनः पञ्चमी क्लेशावस्था दग्धबीजभावतया सूक्ष्मा न सूत्रकारेण कथितेत्यत आह- ते प्रतिप्रसवहेयाः सूक्ष्माः । यत्किल पुरुषप्रयत्नगोचरस्तदुपदिश्यते । न च सूक्ष्मावस्थाहानं प्रयत्नगोचरः । किं तु प्रतिप्रसवेन कार्यस्य चित्तस्यास्मितालक्षणकारणभावापत्त्या हातव्येति । व्याचष्टे त इति । सुगमम् ॥१०॥

આમ ક્લેશોનાં લક્ષણ કહ્યાં. તજવા યોગ્ય એ ક્લેશોની પ્રસુપ્ત, તનુ, વિચ્છિન્ન અને ઉદાર એમ ચાર અવસ્થાઓ કહી. તો કયા કારણસર સૂત્રકારે એમની બળેલા બીજ જેવી સૂક્ષ્મ પાંચમી અવસ્થા ન કહી ? એના જવાબમાં "ते प्रतिप्रसवहेयाः सूक्ष्माः" સૂત્રથી કહે છે કે જે કાર્ય પુરુષના પ્રયત્નથી સિદ્ધ થાય એવું હોય, એનો ઉપદેશ કરાય. સૂક્ષ્મ અવસ્થાનો વિનાશ પ્રયત્નસાધ્ય નથી. પરંતુ કાર્યરૂપ ચિત્ત ઊલટા ક્રમથી અસ્મિતારૂપ કારણભાવને પ્રાપ્ત થાય, એ રીતે તજવા યોગ્ય છે. "ते पंच क्लेशाः..." વગેરેથી સૂત્રની વ્યાખ્યા કરે છે, જે સુગમ છે. ૧૦

★

स्थितानां तु बीजभावोपगतानाम्- ચિત્તમાં રહેલા અને બીજભાવને પ્રાપ્ત થયેલા ક્લેશોની-

ध्यानहेयास्तद्वृत्तयः ॥११॥

એમની વૃત્તિઓ ધ્યાનથી તજવા યોગ્ય છે. ૧૧

भाष्य

क्लेशानां या वृत्तयः स्थूलास्तां क्रियायोगेन तनूकृताः सत्यः प्रसंख्यानेन ध्यानेन हातव्या यावत्सूक्ष्मीकृता यावद्दग्धबीजकल्पा इति । यथा वस्त्राणां स्थूलो मलः पूर्वं निर्धूयते पश्चात्सूक्ष्मो यत्नेनोपायेन वापनीयते तथा स्वल्पप्रतिपक्षाः स्थूला वृत्तयः क्लेशानां, सूक्ष्मास्तु महाप्रतिपक्षा इति ॥११॥

ક્લેશોની જે (ઉદારરૂપ) સ્થૂલ વૃત્તિઓ છે. જેમને ક્રિયાયોગથી ક્ષીણ (સૂક્ષ્મ) કરી છે, એમને પ્રસંખ્યાનરૂપ ધ્યાનથી રોકવી જોઈએ, જ્યાં સુધી સૂક્ષ્મ અને બળેલા બીજ જેવી ન બને. જેમ વસ્ત્રોનો સ્થૂલ મેલ ખંખેરીને દૂર કર્યા પછી સૂક્ષ્મ મેલ પ્રયત્નપૂર્વકના ઉપાયથી નષ્ટ કરાય છે,

એમ ક્લેશોની સ્થૂલ વૃત્તિઓ હળવા વિરોધી પ્રયત્નથી અને સૂક્ષ્મ વૃત્તિઓ મોટા, યુક્તિપૂર્વકના વિરોધી પ્રયત્નથી દૂર થાય એવી હોય છે. ૧૧

तत्त्व वैशारदी

अथ क्रियायोगतनूकृतानां क्लेशानां किंविषयात्पुरुषप्रयत्नाद्धानमित्यत आह- स्थितानां तु बीजभावोपगतानामिति । अनेन वन्ध्येभ्यो व्यवच्छिनत्ति । सूत्रं पठति- ध्यानहेयास्तद्वृत्तयः । व्याचष्टे-क्लेशानामिति । क्रियायोगतनूकृता अपि हि प्रतिप्रसवहेतुभावेन कार्यतः स्वरूपतश्च शक्या उच्छेत्तुमिति स्थूला उक्ताः । पुरुषप्रयत्नस्य प्रसंख्यानागोचरस्यावधिमाह-यावदिति । सूक्ष्मीकृता इति विवृणोति- दग्धेति । अत्रैव दृष्टान्तमाह- यथा वस्त्राणामिति । यत्नेन क्षालनादिना । उपायेन क्षारसंयोगादिना । स्थूलसूक्ष्मतामात्रतया दृष्टान्तदार्ष्टान्तिकयोः साम्यं न पुनः प्रयत्नापनेयतया, प्रतिप्रसवहेयेषु तदसंभवात् । स्वल्पः प्रतिपक्ष उच्छेदहेतुर्यासां तास्तथोक्ताः । महान्प्रतिपक्ष उच्छेदहेतुर्यासां तास्तथोक्ताः । प्रतिप्रसवस्य चाधस्तात् क्लेशोच्छेदसाधकं स्यात् प्रसंख्यानमित्यवरतया स्वल्पत्वमुक्तम् ॥११॥

ક્રિયાયોગથી ક્ષીણ બનાવેલા ક્લેશો પુરુષના કેવા પ્રયત્નથી દૂર થાય ? એના જવાબમાં "स्थितानां तु बीजभावोपगतानाम्"થી કહે છે કે ચિત્તમાં બીજ ભાવે રહેલા ક્લેશો ધ્યાનથી દૂર થાય છે. બીજભાવ પ્રાપ્ત થયેલા એમ કહીને વંધ્યથી ભેદ કહ્યો. "ध्यानहेयास्तद् वृत्तयः" એ સૂત્ર રજૂ કરે છે. "क्लेशानां या वृत्तयः..." વગેરે ભાષ્યથી એની વ્યાખ્યા કરે છે. કર્મયોગથી ક્ષીણ બનાવ્યા છે, છતાં કાર્યથી અને સ્વરૂપથી પ્રતિપ્રસવ (કારણમાં લયની) પ્રક્રિયાથી કારણભાવની પ્રાપ્તિ વડે ઉચ્છેદવા યોગ્ય છે, માટે સ્થૂલ કહ્યા. "यावत्सूक्ष्मीकृताः..." વગેરેથી પુરુષના ધ્યાનના પ્રયત્નનો અવધિ (મર્યાદા) દર્શાવે છે. सूक्ष्मीकृताःનું વિવરણ दग्धबीज कल्पाः શબ્દથી કરે છે. આ વિષે દૃષ્ટાન્ત આપે છે, "यथा वस्त्राणाम्" વગેરેથી. યત્નથી એટલે ધોવાથી અને ઉપાયથી એટલે ક્ષાર વગેરેના પ્રયોગથી. દૃષ્ટાન્ત અને એનાથી સમજાવવાની વાતમાં સ્થૂલતા અને સૂક્ષ્મતા માત્રમાં જ સમાનતા છે, પ્રયત્નથી દૂર કરવાની વાતમાં સમાનતા નથી. કારણ કે પ્રતિપ્રસવ (કારણમાં લય)ની પ્રક્રિયા વડે ત્યજવા યોગ્યમાં એનો (પ્રયત્નનો) સંભવ નથી. અલ્પ વિરોધી પ્રયત્નથી નષ્ટ થાય એવા ક્લેશોને સ્વલ્પપ્રતિપક્ષ અને વધારે વિરોધી પ્રયત્નથી નષ્ટ કરી શકાય એવા ક્લેશોને મહાપ્રતિપક્ષ કહે છે. પ્રતિપ્રસવ ક્લેશનાશક છે, એમ આગળ કહેવાશે. એની તુલનામાં પ્રસંખ્યાન (ધ્યાન)નું અલ્પપણું કહે છે, કારણ કે એ એનાથી ઊતરતી કક્ષાનું છે. ૧૧

★

क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः ॥१२॥

ક્લેશમૂલક કર્માશય દૃષ્ટ અને અદૃષ્ટ જન્મોમાં અનુભવવા યોગ્ય છે. ૧૨

भाष्य

तत्र पुण्यापुण्यकर्माशयः लोभमोहक्रोधप्रभवः । स दृष्टजन्मवेदनीयश्चादृष्टजन्मवेदनीयश्च । तत्र तीव्रसंवेगेन मन्त्रतपःसमाधिभिर्निर्वर्तित ईश्वरदेवतामहर्षिमहानुभावानामाराधनाद्वा यः परिनिष्पन्नः स सद्यः परिपच्यते पुण्यकर्माशय इति । यथा तीव्रक्लेशेन भीतव्याधितकृपणेषु विश्वासोपगतेषु वा महानुभावेषु वा तपस्विषु कृतः पुनः पुनरपकारः स चापि पापकर्माशयः सद्य एव परिपच्यते । यथा नन्दीश्वरः कुमारो मनुष्यपरिणामं हित्वा देवत्वेन परिणतः । तथा नहुषोऽपि देवानामिन्द्रः स्वकं परिणामं हित्वा तिर्यक्त्वेन परिणत इति । तत्र नारकाणां नास्ति दृष्टजन्मवेदनीयः कर्माशयः । क्षीणक्लेशानामपि नास्त्यदृष्टजन्मवेदनीयः कर्माशय इति ॥१२॥

પુણ્ય અને અપુણ્ય (પાપ) રૂપ કર્માશય લોભ, મોહ અને ક્રોધથી ઉત્પન્ન થાય છે. એનાં ફળ દૃષ્ટ (આ) કે અદૃષ્ટ (આવતા) જન્મમાં અનુભવવાં પડે છે. એમાં જે પુણ્યકર્માશય તીવ્ર વૈરાગ્યપૂર્વક કરેલા મંત્રજપ, તપ, સમાધિથી તેમજ ઈશ્વર, દેવતા, મહર્ષિ, મહાનુભાવોની આરાધનાથી ઉત્પન્ન થયેલો હોય એ તરત પરિપક્વ બનીને ફળ આપે છે. એ રીતે, તીવ્ર ક્લેશપૂર્વક ભયભીત, રોગી, ગરીબ અને વિશ્વાસે રહેલાં પ્રાણીઓ પર અથવા મહાન્ પ્રભાવવાળા તપસ્વીઓ પર વારંવાર કરેલો અપકાર એવો કર્માશય બનાવે છે, જે જલ્દી ફળ આપે છે. દાખલા તરીકે, કુમાર નન્દીશ્વર મનુષ્ય પરિણામ ત્યજીને દેવપણામાં પરિણમ્યા. અને નહુષ દેવોનો રાજા ઇન્દ્ર બનીને, એ પરિણામને ત્યાગીને પશુયોનિમાં પરિણમ્યો. નારકીય જીવોનો કર્માશય દૃષ્ટજન્મવેદનીય નથી હોતો, અને ક્ષીણક્લેશ મહાત્માઓનો કર્માશય અદૃષ્ટજન્મવેદનીય નથી હોતો. ૧૨

तत्त्व वैशारदी

स्यादेतत्-जात्यायुर्भोगहेतवः पुरुषं क्लिश्नन्तः क्लेशाः । कर्माशयश्च तथा, न त्वविद्यादयः । तत्कथमविद्यादयः क्लेशा इत्यत आह-क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः । क्लेशा मूलं यस्योत्पादे च कार्यकरणे च स तथोक्तः । एतदुक्तं भवति-अविद्यादिमूलो हि कर्माशयो जात्यायुर्भोगहेतुरित्यविद्यादयोऽपि तद्धेतवोऽतः क्लेशा इति । व्याचष्टे-तत्रेति । आशेरते सांसारिकाः पुरुषा अस्मिन्नित्याशयः । कर्मणामाशयो धर्माधर्मौ । कामात्काम्यकर्मप्रवृत्तौ स्वर्गादिहेतुर्धर्मो भवति । एवं लोभात्परद्रव्यापहारादावधर्मः । मोहादधर्मे हिंसादौ धर्मबुद्धेः प्रवर्तमानस्याधर्म एव । न त्वस्ति मोहजो धर्मः । अस्ति क्रोधजो धर्मः । तद्यथा ध्रुवस्य जनकापमानजन्मनः क्रोधात्तज्जिगीषयाहितत्वेन कर्माशयेन पुण्येनान्तरिक्ष-लोकवासिनामुपरि स्थानम् । अधर्मस्तु क्रोधजो ब्रह्मवधादिजन्मा प्रसिद्ध एव भूतानाम् । तस्य द्वैविध्यमाह-स दृष्टजन्मेति । दृष्टजन्मवेदनीयमाह-तीव्रसंवेगेनेति । यथासंख्यं दृष्टान्तावाह-यथा नन्दीश्वर इति । तत्र नारकाणामिति । येन कर्माशयेन कुम्भीपाकादयो नरकभेदाः प्राप्यन्ते तत्कारिणो नारकाः । तेषां नास्ति दृष्टजन्मवेदनीयः कर्माशयः । न हि मनुष्यशरीरेण तत्परिणामभेदेन वा सा तादृशी वत्सरसहस्रादिनिरन्तरोपभोग्या वेदना संभवतीति । शेषं सुगमम् ॥१२॥

ભલે. જન્મ આયુષ્ય અને ભોગ પુરુષને દુઃખ આપતા હોવાથી ક્લેશ કહેવાય. કર્માશય એમનું કારણ હોવાથી ક્લેશ કહેવાય. પણ અવિદ્યા વગેરે એવા નથી, તો પછી એમને ક્લેશ કેવી રીતે કહેવાય ? એના જવાબમાં "ક્લેશમૂલઃ કર્માશયો દૃષ્ટાદૃષ્ટ જન્મવેદનીયઃ" એ સૂત્ર રજૂ કરે છે. એમની ઉત્પત્તિ અને કાર્ય કરવાની યોગ્યતામાં ક્લેશો મૂળ તરીકે રહેલા હોય છે. કહેવાનો આશય એ છે કે અવિદ્યામૂલક કર્માશય જન્મ, આયુષ્ય અને ભોગનો હેતુ હોવાથી અવિદ્યા વગેરે પણ ક્લેશો કહેવાય છે. "तत्र तीव्रसंवेगेन मंत्र तपःसमाधिभिः..." વગેરેથી આ વિષય સમજાવે છે. સાંસારિક પુરુષો એમાં સૂતેલા રહે છે, માટે એ આશય કહેવાય છે.

ધર્મ અને અધર્મ કર્માશય છે. ઇચ્છાપૂર્વક કામ્ય કર્મો કરવાથી સ્વર્ગાદિનો હેતુ ધર્મ ઉત્પન્ન થાય છે. લોભથી બીજાનું ધન છીનવી લેવા વગેરેથી અધર્મ ઉત્પન્ન થાય છે. મોહથી હિંસા વગેરે અધર્મમાં ધર્મબુદ્ધિથી પ્રવર્તતો મનુષ્ય પણ અધર્મ જ કરે છે. ધર્મ કદીપણ મોહથી ઉત્પન્ન થતો નથી. પણ ક્રોધથી ધર્મ ઉત્પન્ન થઈ શકે છે. દાખલા તરીકે, પિતાના અપમાનને કારણે ઉત્પન્ન થયેલા ક્રોધથી ધ્રુવે પિતાનું સ્થાન મેળવવા માટે જે કર્માશય ઉત્પન્ન કર્યો, એનાથી એણે અંતરિક્ષ લોકમાં

વસનારાઓ કરતાં ઊંચું સ્થાન મેળવ્યું. અધર્મ પણ ક્રોધથી કરેલી બ્રહ્મહત્યા વગેરેથી ઉત્પન્ન થાય છે, એ વાત લોકોમાં પ્રસિદ્ધ જ છે. "स दृष्टजन्मवेदनीय..." વગેરેથી એના બે પ્રકારો કહે છે. "तीव्रसंवेगेन..." વગેરેથી દૃષ્ટ જન્મવેદનીય વિષે કહે છે. "यथानन्दीश्वरः"... વગેરેથી ક્રમશઃ બે દૃષ્ટાન્ત આપે છે. જે કર્માશયથી કુંભીપાક વગેરે નરકો પ્રાપ્ત થાય છે, એવાં કર્મ કરનાર નારકીય કહેવાય છે. એમનો કર્માશય દૃષ્ટજન્મવેદનીય હોતો નથી. કારણ કે મનુષ્ય શરીરથી અથવા એના પરિણામભેદથી હજારો વર્ષ સુધી સતત ભોગવી શકાય એવી વેદના સંભવતી નથી. બાકીનું સુગમ છે. ૧૨

★

सति मूले तद्विपाको जात्यायुर्भोगाः ॥१३॥

(ક્લેશરૂપ) મૂળ હોય તો જન્મ, આયુષ્ય અને ભોગરૂપ એનો (કર્મનો) વિપાક થાય છે. ૧૩

भाष्य

सत्सु क्लेशेषु कर्माशयो विपाकारम्भी भवति नोच्छिन्नक्लेशमूलः। यथा तुषावनद्धाः शालितण्डुला अदग्धबीजभावाः प्ररोहसमर्था भवन्ति नापनीततुषा दग्धबीजभावा वा, तथा क्लेशावनद्धः कर्माशयो विपाकप्ररोही भवति, नापनीतक्लेशो न प्रसंख्यानदग्धक्लेशबीजभावो वेति । स च विपाकस्त्रिविधो जातिरायुर्भोग इति ।

तत्रेदं विचार्यते-किमेकं कर्मैकस्य जन्मनः कारणमथैकं कर्मानेकं जन्माक्षिपतीति । द्वितीया विचारणा-किमनेकं कर्मानेकं जन्म निर्वर्तयत्यथानेकं कर्मैकं जन्म निर्वर्तयतीति । न तावदेकं कर्मैकस्य जन्मनः कारणम् । कस्मात् ? अनादिकालप्रचितस्यासंख्येयस्यावशिष्टकर्मणः सांप्रतिकस्य च फलक्रमानियमादनाश्वासो लोकस्य प्रसक्तः, स चानिष्ट इति । न चैकं कर्मानेकस्य जन्मनः कारणम् । कस्मात् ? अनेकेषु कर्मस्वेकैकमेव कर्मानेकस्य जन्मनः कारणमित्यवशिष्टस्य विपाक-कालाभावः प्रसक्तः, स चाप्यनिष्ट इति । न चानेकं कर्मानेकस्य जन्मनः कारणम् । कस्मात् ? तदनेकं जन्म युगपन्न संभवतीति, क्रमेणैव वाच्यम्, तथा च पूर्वदोषानुषङ्गः ।

तस्माज्जन्मप्रायणान्तरे कृतः पुण्यापुण्यकर्माशयप्रचयो विचित्रः प्रधानोपसर्जनभावेनावस्थितः प्रायणाभिव्यक्त एकप्रघट्टकेन मिलित्वा मरणं प्रसाध्य संमूर्च्छित एकमेव जन्म करोति । तच्च जन्म तेनैव कर्मणा लब्धायुष्कं भवति । तस्मिन्नायुषि तेनैव कर्मणा भोगः संपद्यत इति । असौ कर्माशयो जन्मायुर्भोगहेतुत्वात्त्रिविपाकोऽभिधीयत इति । अत एकभविकः कर्माशय उक्त इति ।

दृष्टजन्मवेदनीयस्त्वेकविपाकारम्भी भोगहेतुत्वाद्, द्विविपाकारम्भी वा भोगायुर्हेतुत्वान्नन्दीश्वरवन्नहुषवद्वेति । क्लेशकर्मविपाकानुभवनिर्वर्तिताभिस्तु वासनाभिरनादिकालसंमूर्छितमिदं चित्तं विचित्रीकृतमिव सर्वतो मत्स्यजालं ग्रन्थिभिरिवाततमित्येता अनेकभवपूर्विका वासनाः । यस्त्वयं कर्माशय एष एवैकभविक उक्त इति । ये संस्काराः स्मृतिहेतवस्ता वासनास्ताश्चानादिकालीना इति ।

यस्त्वसावेकभविकः कर्माशयः स नियतविपाकश्चानियतविपाकश्च । तत्र दृष्टजन्मवेदनीयस्य नियतविपाकस्यैवायं नियमो न त्वदृष्टजन्मवेदनीयस्यानियतविपाकस्य । कस्मात् ? यो ह्यदृष्टजन्मवेदनीयोऽनियतविपाकस्तस्य त्रयी गतिः - कृतस्याविपक्वस्य विनाशः, प्रधानकर्मण्यावापगमनं वा, नियतविपाकप्रधानकर्मणाभिभूतस्य वा चिरमवस्थानमिति ।

तत्र कृतस्याविपक्वस्य नाशो यथा शुक्लकर्मोदयादिहैव नाशः कृष्णस्य । यत्रेदमुक्तम्- "द्वे द्वे ह वै कर्मणी वेदितव्ये पापकस्यैको राशिः पुण्यकृतोऽपहन्ति । तदिच्छस्व कर्माणि सुकृतानि कर्तुमिहैव ते कर्म कवयो वेदयन्ते ।"

प्रधानकर्मण्यावापगमनम् । यत्रेदमुक्तं- "स्यात्स्वल्पः संकरः सपरिहारः सप्रत्यवमर्षः, कुशलस्य नापकर्षायालम्, कस्मात् ? कुशलं हि मे बह्वन्यदस्ति यत्रायमावापं गतः स्वर्गेऽप्यपकर्षमल्पं करिष्यति" इति ।

नियतविपाकप्रधानकर्मणाभिभूतस्य वा चिरमवस्थानम् । कथमिति ? अदृष्टजन्मवेदनीयस्य नियतविपाकस्यैव कर्मणः समानं मरणमभिव्यक्तिकारणमुक्तम्, न त्वदृष्टजन्मवेदनीयस्यानियतविपाकस्य ।

यत्त्वदृष्टजन्मवेदनीयं कर्मानियतविपाकं तन्नश्येदावापं वा गच्छेदभिभूतं वा चिरमप्युपासीत, यावत्समानं कर्माभिव्यञ्जकं निमित्तमस्य न विपाकाभिमुखं करोतीति । तद्विपाकस्यैव देशकालनिमित्तानवधारणादियं कर्मगतिर्विचित्रा दुर्विज्ञाना चेति । न चोत्सर्गस्यापवादान्निवृत्तिरित्येकभविकः कर्माशयो-ऽनुज्ञायत इति ॥૧૩॥

ક્લેશો હોય તો કર્માશય ફળ આપવાનો આરંભ કરે છે, ક્લેશરૂપ મૂળ ઉખાડી નાખ્યું હોય તો નહીં. જેમ છોતરાંવાળી ડાંગર જો બળેલા બીજ ભાવવાળી ન હોય તો ઊગવા સમર્થ બને છે, છોતરાં દૂર કર્યા પછી અથવા બીજભાવ બાળ્યા પછી નહીં. એમ ક્લેશોથી વીંટળાયેલો કર્માશય પક્વ બનીને ફળ આપે છે, ક્લેશો દૂર કર્યા પછી અથવા પ્રસંખ્યાનથી બીજભાવ બાળ્યા પછી નહીં. એ વિપાક જન્મ, આયુ અને ભોગ એમ ત્રણ પ્રકારનો હોય છે.

આ વિષયમાં એવું વિચારવામાં આવે છે કે એક કર્મ એક જન્મનું કારણ હોય છે કે અનેક જન્મોનું ? બીજી વિચારણા એવી છે કે અનેક કર્મો અનેક જન્મોનાં હેતુ હોય છે કે એક જન્મનાં ? એક કર્મ એક જન્મનું કારણ ન હોઈ શકે, કારણ કે અનાદિકાળથી સંચિત અસંખ્ય બાકી રહેલાં કર્મોનું અને વર્તમાન જન્મમાં કરવામાં આવતાં (ક્રિયમાણ) કર્મોનું ફળ મળવામાં ક્રમનો નિયમ ન હોવાથી લોકો વિશ્વાસ નહીં કરે, અને એ અનિષ્ટ છે. અને એક કર્મ જ અનેક જન્મોનું કારણ નથી. કેમ ? ઘણાં કર્મોમાંથી એક એક કર્મ જ અનેક જન્મોનું કારણ બને, તેથી બાકી રહેલાં કર્મોના વિપાક માટે સમય રહે નહીં, એ પણ અનિષ્ટ છે. અને અનેક કર્મો અનેક જન્મોનું કારણ નથી. કેમ ? અનેક જન્મો એકીસાથે સંભવે નહીં, માટે ક્રમથી થાય એમ કહેવું પડે, અને આ રીતે પણ અગાઉ જણાવેલા દોષનો પ્રસંગ આવે.

માટે જન્મ અને મરણ વચ્ચેના ગાળામાં કરેલો પુણ્ય અને અપુણ્ય કર્મોના આશયનો સંચય વિચિત્ર છે. એ મુખ્ય અને ગૌણભાવથી રહેલો છે. એ મૃત્યુવખતે પ્રગટ થઈ, એક સાંકળરૂપે મળીને, મરણ લાવીને એક જ જન્મ કરે છે. એ જન્મ એ જ કર્મથી આયુષ્ય નક્કી કરે છે, અને એ આયુષ્યમાં એ જ કર્મથી ભોગ પણ નક્કી થાય છે. આ કર્માશય જન્મ,

આયુ અને ભોગનો હેતુ હોવાથી "ત્રિવિપાક" (ત્રણ ફળઉત્પન્ન કરનાર) કહેવાય છે. તેથી કર્માશય "એક ભવિક" (એક જન્મ આપનાર) કહેવાય છે.

દૃષ્ટજન્મવેદનીય (વર્તમાન જન્મમાં ફળ આપનાર) કર્માશય ભોગ હેતુરૂપ હોય તો, એક વિપાકનો આરંભ કરનાર, અથવા ભોગ અને આયુના હેતુરૂપ હોય તો બે વિપાકોનો આરંભ કરનાર, એટલે નંદીશ્વર અને નહુષની જેમ દ્વિવિપાક અને એકવિપાકનો આરંભકરનાર બને છે.

અનાદિકાળથી ચાલ્યા આવતા ક્લેશ અને કર્મવિપાકના અનુભવોથી ઉત્પન્ન થયેલી અસંખ્ય વાસનાઓથી ભરેલું ચિત્ત વિચિત્ર રંગોવાળા કઢંગા ચિત્ર જેવું કે ઘણી ગાંઠોવાળી માછલાં પકડવાની જાળ જેવું જણાય છે, તેથી વાસનાઓ અનેક જન્મોમાં ઉત્પન્ન થયેલી માનવી જોઈએ. પરંતુ આ જે કર્માશય છે એને એકભવિક કહ્યો છે, જે સંસ્કારો સ્મૃતિનું કારણ છે, એ વાસનાઓ કહેવાય છે, અને અનાદિ કાળથી એકંઠી થયેલી છે.

એક ભવિક કર્માશય નિયતવિપાક (નિશ્ચિતપણે ફળઆપનાર) અને અનિયતવિપાક એમ બે પ્રકારનો છે. એમાં દૃષ્ટ જન્મવેદનીય (વર્તમાન જન્મમાં અનુભવવાનો) અને નિયતવિપાક કર્માશયને જ આ નિયમ લાગુ પડે છે, અદૃષ્ટ જન્મવેદનીય અને અનિયત વિપાકને નહીં. કેમ ? કારણ કે અદૃષ્ટજન્મવેદનીય અનિયતવિપાક કર્માશયની ત્રણ ગતિઓ છે. એક, કરેલા કર્મનો ફળ આપ્યા વિના વિનાશ. બે, મુખ્ય કર્મમાં ભળી જવું અને ત્રણ, નિયતવિપાકવાળા મુખ્ય કર્મથી લાંબા સમય સુધી દબાયેલા રહેવું. એમાં કરેલા કર્મનો ફળ આપ્યા વિના (પાક્યા વિના) વિનાશ એટલે અહીં જ શુક્લ કર્મથી કૃષ્ણ કર્મનો વિનાશ. આ વિષે કહ્યું છે :- "પાપીનાં બે બે કર્મો (કૃષ્ણ અને શુક્લકૃષ્ણ)ના સંચયને એક (તપ, સ્વાધ્યાય વગેરે) પુણ્યકર્મોથી થયેલો સંચય નષ્ટ કરે છે. તેથી કવિઓ (જ્ઞાની યોગીઓ) કહે છે કે અહીં જ સારાં કર્મ કરવાનો આગ્રહ રાખો."

પ્રધાન કર્મમાં ભળી જનારાં કર્મોવિષે કહ્યું છે : "જે થોડું સહેલાઈથી (પ્રાયશ્ચિત વગેરેથી) ટાળી શકાય એવું અને સહન કરી શકાય એવા દુઃખરૂપ

ફળવાળું મારું જે પાપમિશ્રિત કર્મ છે, એ મારા મોટા, મુખ્ય પુણ્યકર્મનો અપકર્ષ કરવા સમર્થ નથી. કારણ કે મારાં પુણ્ય કર્મનો સંચય એવડો મોટો છે કે એની સાથે ભળી જઈને મને સ્વર્ગમાં પણ થોડું દુઃખ આપશે.''

નિયતવિપાકવાળા મુખ્ય કર્મથી દબાયેલા રહીને લાંબા સમય સુધી રહેનારા કર્મોની શી વ્યવસ્થા છે ? જે કર્મો નિયતવિપાકવાળાં હોય અને જેમનું ફળ અદૃષ્ટ (ભવિષ્ય) જન્મવેદનીય હોય, એ જ્યારે એકીસાથે ફળ આપવા પ્રવૃત્ત થાય ત્યારે એમની અભિવ્યક્તિના પરિણામે મરણ થાય છે, એમ કહ્યું છે પણ અદૃષ્ટ જન્મવેદનીય, અનિયતવિપાક કર્મથી મરણ થતું નથી. જે અદૃષ્ટ જન્મવેદનીય અને અનિયતવિપાક કર્મ છે, એ અગાઉ કહ્યું એમ, નષ્ટ થાય, મુખ્ય સાથે ભળી જાય અથવા મુખ્ય કર્મથી દબાઈને લાંબા સમય સુધી ઉપાસના (તક મળ્યે ફળ આપવાનો વિચાર) કરતું પડ્યું રહે, અથવા બળવાન કર્મ પાસે (ઉપ) બેસી રહે (આસીત), જ્યાં સુધી એની જાતિનું એને અભિવ્યક્ત કરે એવું, નિમિત્ત ભૂત કર્મ એને વિપાક માટે અભિમુખ ન કરે. વિપાક માટે સ્થળ, કાળ અને અભિવ્યક્તિના નિમિત્તનો નિશ્ચય ન હોવાથી, કર્મની ગતિ વિચિત્ર અને દુર્વિજ્ઞેય (મુશ્કેલીથી જાણી શકાય એવી) હોય છે. નિયમ અપવાદને કારણે બદલાતો નથી કે નિવૃત્ત થતો નથી, માટે કર્માશય એકભવિક છે, એમ બધા આ શાસ્ત્રના આચાર્યો સ્વીકારે છે. ૧૩

तत्त्व वैशारदी

स्यादेतत्-अविद्यामूलत्वे कर्माशयस्य विद्योत्पादे सत्यविद्याविनाशान्मा नाम कर्माशयान्तरं चैषीत्, प्राचां तु कर्माशयानामनादिभवपरम्परासंचितानाम-संख्यातानामनियतविपाककालानां भोगेन क्षपयितुमशक्यत्वादशक्योच्छेदः संसारः स्यादित्यत आह- सति मूले तद्विपाको जात्यायुर्भोगाः इति । एतदुक्तं भवति-सुखदुःखफलो हि कर्माशयस्तादर्थ्येन तन्त्रान्तरीकतया जन्मायुषी अपि प्रसूते । सुखदुःखे च रागद्वेषानुषक्ते तदविनिर्भागवर्तिनी तदभावे न भवतः । न चास्ति संभवो न च तत्र यस्तुष्यति वोद्विजते वा तच्च तस्य सुखं वा दुःखं वेति । तदियमात्मभूमिः क्लेशसलिलावसिक्ता कर्मफलप्रसवक्षेत्रमित्यस्ति क्लेशानां फलोपजननेऽपि कर्माशय-सहकारितेति, क्लेशसमुच्छेदे सहकारिवैकल्यात्सन्नप्यनन्तोऽप्यनियतविपाककालोऽपि प्रसंख्यानदग्धबीजभावो न फलाय कल्पत इति । उक्तमर्थं भाष्यमेव द्योतयति-

सत्स्विति । अत्रैव दृष्टान्तमाह- यथा तुषेति । सतुषा अपि दग्धबीजभावाः स्वेदादिभिः । दार्ष्टान्तिके योजयति-तथेति । ननु न क्लेशाः शक्या अपनेतुम् । न हि सतामपनय इत्यत आह- न प्रसंख्यानदग्धक्लेशबीजभाव इति । विपाकस्य त्रैविध्यमाह- स चेति । विपच्यते साध्यते कर्मभिरिति विपाकः ।

कर्मैकत्वं ध्रुवं कृत्वा जन्मैकत्वानेकत्वगोचरा प्रथमा विचारणा । द्वितीया तु कर्मानेकत्वं ध्रुवं कृत्वा जन्मैकत्वानेकत्वगोचरा । तदेवं चत्वारो विकल्पाः । तत्र प्रथमं विकल्पमपाकरोति- न तावदेकं कर्मैकस्य जन्मनः कारणम् इति । पृच्छति-कस्मादिति । उत्तरमाह-अनादिकाल एकैकजन्मप्रचितस्यात एवासंख्येयस्यैकैकजन्मक्षपितादेकैकस्मात्कर्मणोऽवशिष्टस्य कर्मणः, सांप्रतिकस्य च फलक्रमानियमादनाश्वासो लोकस्य प्रसक्तः, स चानिष्ट इति । एतदुक्तं भवति-कर्मक्षयस्य विरलत्वात्तदुत्पत्तिबाहुल्याच्चान्योऽन्यसंपीडिताः कर्माशया निरन्तरोत्पत्तयो निरुच्छ्वासाः स्वविपाकं प्रतीति न फलक्रमः शक्योऽवधारयितुं प्रेक्षावतेत्यनाश्वासः पुण्यानुष्ठानं प्रति प्रसक्त इति । द्वितीयं विकल्पं निराकरोति- न चैकं कर्मानेकस्य जन्मनः कारणम् । पृच्छति-कस्मादिति । उत्तरमाह-अनेकेष्विति । अनेकस्मिञ्जन्मन्याहितमेकैकमेव कर्मानेकस्य जन्मलक्षणस्य विपाकस्य निमित्तमित्यवशिष्टस्य विपाककालाभावः प्रसक्तः स चाप्यनिष्टः । कर्मवैफल्येन तदननुष्ठानप्रसङ्गात् । यदैकजन्मसमुच्छेद्ये कर्मण्येकस्मिन्फलक्रमानियमादनाश्वासस्तदा कैव कथा बहुजन्मसमुच्छेद्ये कर्मण्येकस्मिन्। तत्र ह्यवसराभावाद्विपाककालाभाव एव सांप्रतिकस्येति भावः । तृतीयं विकल्पं निराकरोति- न चानेकं कर्मानेकस्य जन्मनः कारणम् । तत्र हेतुमाह- तदिति । तदनेकं जन्म युगपन्न संभवत्ययोगिन इति क्रमेण वाच्यम् । यदि हि कर्मसहस्रं युगपज्जन्मसहस्रं प्रसुवीत तत एव कर्मसहस्रप्रक्षयादवशिष्टस्य विपाककालः फलक्रमनियमश्च स्याताम् । न त्वस्ति जन्मनां यौगपद्यम् । एवमेव प्रथमपक्ष एवोक्तं दूषणमित्यर्थः ।

तदेवं पक्षत्रये निराकृते पारिशेष्यादनेकं कर्मैकस्य जन्मनः कारणमिति पक्षो व्यवतिष्ठत इत्याह- तस्माज्जन्मेति । जन्म च प्रायणं च जन्मप्रायणे । तयोरन्तरं मध्यम्। तस्मिन्विचित्रसुखदुःखफलोपहारेण विचित्रः । यदत्यन्तमुद्भूतमनन्तरमेव फलं दास्यति तत्प्रधानम् । यत्तु किञ्चिद्विलम्बेन तदुपसर्जनम् । प्रायणं मरणम् । तेनाभिव्यक्तः स्वकार्यारम्भणाभिमुखमुपनीत एकप्रघट्टकेन युगपत्संमूर्च्छितो जन्मादिलक्षणे कार्ये कर्तव्य एकलोलीभावमापन्न एकमेव जन्म करोति, नानेकम् । तच्च जन्म मनुष्यादिभावस्तेनैव कर्मणा लब्धायुष्कं कालभेदान्नियतजीवितं भवति । तस्मिन्नायुषि तेनैव कर्मणा भोगः सुखदुःखसाक्षात्कारः स्वसंबन्धितया संपद्यत इति । तस्मादसौ कर्माशयो

जात्यायुर्भोगहेतुत्वात्त्रिविपाकोऽभिधीयते । औत्सर्गिकमुपसंहरति- अत एकभविकः कर्माशय उक्त इति । एको भव एकभवः । पूर्वकाल (अष्टाध्यायी २।१।४६) इत्यादिना समासः । एकभवोऽस्यास्तीति मत्वर्थीयष्ठन् । क्वचित्पाठ ऐकभविक इति। तत्रैकभवशब्दाद्भवार्थे ठक्प्रत्ययः । एकजन्मावच्छिन्नमस्य भवनमित्यर्थः ।

तदेवमौत्सर्गिकस्यैकभविकस्य त्रिविपाकत्वमुक्त्वा दृष्टजन्मवेदनीयस्यैहिकस्य कर्मणस्त्रिविपाकत्वं व्यवच्छिनत्ति-दृष्टेति । नन्दीश्वरस्य खल्वष्टवर्षावच्छिन्नायुषो मनुष्यजन्मनस्तीव्रसंवेगाधिमात्रोपायजन्मा पुण्यभेद आयुर्भोगहेतुत्वाद् द्विविपाकः । नहुषस्य तु पार्ष्णिप्रहारविरोधिनागस्त्यस्येन्द्रपदप्राप्तिहेतुनैवकर्मणायुषो विहितत्वादपुण्यभेदो भोगमात्रहेतुः । ननु यथैकभविकः कर्माशयस्तथा किं क्लेशवासना भोगानुकूलाश्च कर्मविपाकानुभववासनाः । तथा च मनुष्यस्तिर्यग्योनिमापन्नो न तज्जातीयोचितं भुञ्जीतेत्यत आह- क्लेशेति । संमूर्छितमेकलोलीभावमापन्नम् । धर्माधर्माभ्यां व्यवच्छेत्तुं वासनायाः स्वरूपमाह - ये संस्कारा इति ।

औत्सर्गिकमेकभविकत्वं क्वचिदपवदितुं भूमिकामारचयति- यस्त्वसाविति । तुशब्देन वासनातो व्यवच्छिनत्ति । दृष्टजन्मवेदनीयस्य नियतविपाकस्यैवायमेक-भविकत्वनियमो न त्वदृष्टजन्मवेदनीयस्य । किंभूतस्यानियतविपाकस्येति । हेतुं पृच्छति- कस्मादिति । हेतुमाह-यो हीति । एकां तावद्गतिमाह-कृतस्येति । द्वितीयामाह- प्रधानेति । तृतीयामाह-नियतेति ।

तत्र प्रथमां विभजते-तत्र कृतस्येति । संन्यासिकर्मभ्योऽशुक्लाकृष्णेभ्योऽन्यानि त्रीण्येव कर्माणि कृष्णकृष्णशुक्लशुक्लानि । तदिह तपःस्वाध्यायादिसाध्यः शुक्लः कर्माशय उदित एवादत्तफलस्य कृष्णस्य नाशकोऽविशेषाच्च शबलस्यापि कृष्णभागयोगादिति मन्तव्यम् । अत्रैव भगवानाम्नायमुदाहरति-यत्रेदमिति । द्वे द्वे ह वै कर्मणी कृष्णकृष्णशुक्ले अपहन्तीति संबन्धः । वीप्सया भूयिष्ठता सूचिता । कस्येत्यत आह-पापकस्येति पापकस्य पुंस इत्यर्थः । कोऽसावपहन्तीत्यत आह एको राशिः पुण्यकृतः इति । समूहस्य समूहिसाध्यत्वात् । तदनेन शुक्लः कर्माशयस्तृतीय उक्तः । एतदुक्तं भवति- ईदृशो नामायं परपीडादिरहितसाधनसाध्यः शुक्लः कर्माशयो यदेकोऽपि सन्कृष्णान्कृष्णशुक्लांश्चात्यन्तविरोधिनः कर्माशयान्भूयसोऽप्यपहन्ति । तत्तस्मादिच्छस्वेति छान्दसत्वादात्मनेपदम् । शेषं सुगमम् । अत्र च शुक्लकर्मोदयस्यैव स कोऽपि महिमा यत इतरेषामभावो न तु स्वाध्यायादिजन्मनो दुःखात् । न हि दुःखमात्रविरोध्यधर्मोऽपि तु स्वकार्यदुःखविरोधी । न च स्वाध्यायादिजन्यं दुःखं

तस्य कार्यम्, तत्कार्यत्वे स्वाध्यायादिविधानानर्थक्यात्तद्बलादेव तदुत्पत्तेः । अनुत्पत्तौ वा कुम्भीपाकाद्यपि विधीयेत । अविधाने च तदनुत्पत्तेरिति सर्वं चतुरस्रम् ।

द्वितीयां गतिं विभजते-प्रधाने कर्मणि ज्योतिष्टोमादिके तदङ्गस्य पशुहिंसादेरावापगमनम् । द्वे खलु हिंसादेः कार्ये-प्रधानाङ्गत्वेन विधानात्तदुपकारः, "न हिंस्यात्सर्वा भूतानि" (तलु० शान्ति० २७८।५) इति हिंसायाः प्रतिषिद्धत्वादनर्थश्च । तत्र प्रधानाङ्गत्वेनानुष्ठानादप्रधानतैवेत्यतो न द्रागित्येव प्रधाननिरपेक्षा सती स्वफलमनर्थं प्रसोतुमर्हति, किं त्वारब्धविपाके प्रधाने साहायकमाचरन्ती व्यवतिष्ठते । प्रधानसाहायकमाचरन्त्याश्च स्वकार्ये बीजमात्रतयावस्थानं प्रधाने कर्मण्यावापगमनम् । यत्रेदमुक्तं पञ्चशिखेन- "स्वल्पः संकरो ज्योतिष्टोमादिजन्मनः प्रधानापूर्वस्य पशुहिंसादिजन्मनानर्थहेतुनाऽपूर्वेण सपरिहारः । शक्यो हि कियता प्रायश्चित्तेन परिहर्तुम् । अथ प्रमादतः प्रायश्चित्तमपि नाचरितं प्रधानकर्म विपाकसमये च विपच्येत तथापि यावन्तमसावनर्थं प्रसूते तावान्सप्रत्यवमर्षः । मृष्यन्ते हि पुण्यसंभारोपनीतसुख-सुधामहाह्रदावगाहिनः कुशलाः पापमात्रोपपादितां दुःखवह्निकणिकाम् । अतः कुशलस्य सुमहतः पुण्यस्य नापकर्षाय प्रक्षयाय पर्याप्तः । पृच्छति-कस्मादिति । उत्तरं-कुशलमिति । कुशलं हि मे पुण्यवतो बह्वन्यदस्ति । प्रधानकर्म विपाकतया व्यवस्थितं दीक्षणीयादिदक्षिणान्तम् । यत्रायं संकरः स्वल्पः स्वर्गेऽप्यस्य फले संकीर्णपुण्य-लब्धजन्मनः स्वर्गात्सर्वथा दुःखेनापरामृष्टादपकर्षमल्पमल्पदुःखसंभेद करिष्यतीति ।

तृतीयां गतिं विभजते-नियतेति । बलीयस्त्वेनेह प्राधान्यमभिमतं न त्वङ्गितया । बलीयस्त्वं च नियतविपाकत्वेनान्यदानवकाशत्वात् । अनियतविपाकस्य तु दुर्बलत्वमन्यदा सावकाशत्वात् । चिरमवस्थानं बीजभावमात्रेण । न पुनः प्रधानोपकारितया, तस्य स्वतन्त्रत्वात् । ननु प्रायणे नैकदैव कर्माशयोऽभिव्यज्यत इत्युक्तम् । इदानीं च चिरावस्थानमुच्यते । तत्कथं परं पूर्वेण न विरुध्यत इत्याशयवान्पृच्छति-कथमिति । उत्तरम्-अदृष्ट इति । जात्यभिप्रायमेकवचनम् । तदितरस्य गतिमुक्तामवधारयति-यत्त्वदृष्टेति । शेषं सुगमम् ॥१३॥

ભલે. કર્માશય અવિદ્યામૂલક છે. વિદ્યા (જ્ઞાન) ઉત્પન્ન થતાં અવિદ્યા નષ્ટ થાય. મૂળ નષ્ટ થવાથી ભલે નવાં કર્મોનો સંચય ન થાય. પણ અનાદિ જન્મ પરંપરામાં સંચિત થયેલાં અને જેમના વિપાકનો કાળ નિશ્ચિત નથી એવાં અસંખ્ય પ્રાચીન કર્માશયોનો ભોગથી નાશ થવો સંભવિત ન હોવાથી, સંસારનો ઉચ્છેદ થવો શક્ય નથી. આ શંકાના સમાધાન માટે "सति मूले..." વગેરે સૂત્રથી કહે છે કે મૂળ હોય તો જ જન્મ, આયુ અને ભોગરૂપ એમનો (કર્મોનો) વિપાક થાય.

કહેવાનો આશય એ છે કે કર્માશય સુખ-દુઃખ રૂપ ફળ આપનારો હોવાથી એને માટે જરૂરી એવાં જન્મ અને આયુષ્યને પણ ઉત્પન્ન કરે છે. સુખ અને દુઃખ, રાગ અને દ્વેષ સાથે સંકળાયેલાં અને એમના ભાગરૂપ હોવાથી, એમના અભાવમાં ઉત્પન્ન થતાં નથી. મનુષ્ય વસ્તુઓ જોઈને સંતુષ્ટ કે ઉદ્વગ્ન થતો હોય, તો એને એનાથી સુખ કે દુઃખ ન થાય એ શક્ય નથી. આત્મભૂમિ ક્લેશરૂપ પાણીથી સીંચાય તો જ કર્મફળની જન્મભૂમિ બને છે. આમ ક્લેશો ફળ ઉત્પન્ન કરવાના કાર્યમાં કર્માશયના સહયોગી છે. ક્લેશો નષ્ટ થતાં સહકારીના અભાવે અનંત અને વિપાકકાળ અનિશ્ચિત હોય એવો કર્મોનો સંચય પ્રસંખ્યાનથી બળેલા બીજ જેવો બનાવાયો હોવાથી ફળ ઉત્પન્ન કરવા માટે સમર્થ બનતો નથી.

"सत्सु क्लेशेषु कर्माशयो विपाकारंभी भवति..." વગેરેથી ભાષ્ય જ આ અર્થ પ્રગટ કરે છે. "तुषावनद्धाः शालितंडुलाः"... વગેરેથી આ વિષે દૃષ્ટાન્ત રજૂ કરે છે. છોડાંવાળો હોય તો પણ ડાંગર સ્વેદ (તાપ) વગેરેથી નષ્ટ થયેલા બીજ ભાવવાળી હોય તો અંકુરિત થતી નથી. "तथा क्लेशावनद्धः कर्माशयः" વગેરેથી દૃષ્ટાન્તને એનાથી સમજાવવા ઇચ્છેલી બાબતમાં યોજે છે.

પરંતુ ક્લેશો નષ્ટ થાય એ શક્ય નથી. સદ્વસ્તુ નષ્ટ થતી નથી. આ શંકાના નિવારણ માટે "न प्रसंख्यानदग्धक्लेशबीजभावः..." વગેરેથી કહે છે કે ધ્યાનથી ક્લેશોનો બીજભાવ બળી જાય તો કર્માશય ફળ આપવા સમર્થ થતો નથી. " स च विपाकस्त्रिविधः..." વગેરેથી વિપાક ત્રણ પ્રકારનો છે, એમ કહે છે. કર્મો વડે "विपच्यते" પકવવામાં કે સિદ્ધ કરવામાં આવે છે માટે વિપાક (ફળ) કહેવાય છે.

એક કર્મને ધ્રુવ માનીને, એ એક કે અનેક જન્મોનું કારણ બને છે, એ પહેલી વિચારણા. બીજી વિચારણા, અનેક કર્મોને ધ્રુવ માનીને, તેઓ એક કે અનેક જન્મોનું કારણ બને છે, એની ચર્ચા છે. આમ ચાર વિકલ્પો છે. એમાંથી પહેલા વિકલ્પનો "न तावदेकं कर्मैकस्य जन्मनः कारणम्" એક કર્મ એક જન્મનું કારણ નથી, એમ કહીને અસ્વીકાર કરે છે. પૂછે છે, કેમ ? "अनादिकाल-प्रचितस्य..." વગેરેથી ઉત્તર આપે છે કે અનાદિકાળથી એક પછી એક એમ ઘણા જન્મોમાં એકઠાં કરેલાં, અને તેથી અસંખ્ય એવા એક પછી એક થયેલા જન્મોમાં ભોગવેલા એક એક કર્મથી બાકી રહેલાં કર્મોનું ફળ અને વર્તમાન જીવનમાં થતાં કર્મોનું ફળ મળવામાં ક્રમનો કોઈ નિયમ ન હોવાથી લોકો આવા કર્મફળના કાયદામાં વિશ્વાસ કરશે નહીં અને એ અનિષ્ટ છે. કહેવાનો આશય એ છે કે કર્મોની ઉત્પત્તિ ઘણી ઝડપી છે અને એમનો ક્ષય ઓછો કે ધીમો છે,

તેથી એકબીજા સાથે અથડામણમાં આવતા કર્માશયો નિરંતર ઉત્પન્ન થવાના સ્વભાવવાળા અને ફળ આપવામાં અનિશ્ચિત હોવાથી બુદ્ધિમાન લોકો માટે ફળનો ક્રમ નક્કી કરવો અશક્ય છે. આ કારણે વિશ્વાસ ન રહેવાથી લોકો પુણ્યકર્મનું અનુષ્ઠાન કરવામાં શિથિલ બનશે.

બીજા વિકલ્પનું નિરાકરણ કરે છે : એક કર્મ અનેક જન્મોનું કારણ નથી. પૂછે છે, કેમ ? "અનેકેષુ..." વગેરેથી ઉત્તર આપે છે. અનેક જન્મોમાં એકઠાં કરેલાં કર્મોમાંથી એક એક કર્મ અનેક જન્મરૂપ ફળનું કારણ હોય તો બાકી રહેલાંનો વિપાકકાળ નહીં રહે, અને એ પણ અનિષ્ટ છે. કર્મો નિષ્ફળ છે એમ માની લોકો એમનું અનુષ્ઠાન નહીં કરે. જો એક જન્મમાં એક કર્મનું ફળ ભોગવાય, એવા ફળના ક્રમનિયમમાં લોકોને વિશ્વાસ ન હોય, તો એક કર્મનું ફળ ઘણા જન્મોમાં ભોગવાય, એમાં વિશ્વાસની વાત જ શી કરવી ? આ વિકલ્પમાં વર્તમાન જીવનમાં થતાં ક્રિયમાણ કર્મોને તકના અભાવમાં વિપાકનો સમય મળશે નહીં, એવો ભાવ છે.

ત્રીજા વિકલ્પનું "ન ચાનેકં કર્મોનેકસ્ય જન્મનઃ કારણમ્" અનેક કર્મો અનેક જન્મોનું કારણ નથી, એમ કહીને નિરાકરણ કરે છે. "તદનેકં જન્મ યુગપન્ન સંભવતિ..." વગેરેથી એનો હેતુ દર્શાવે છે. એ અનેક જન્મો જે યોગી નથી એવા સામાન્ય માણસો માટે એકી સાથે થઈ શકે નહીં, તેથી ક્રમશઃ થાય છે એમ કહેવું પડશે. જો હજાર કર્મો એકી સાથે હજાર જન્મો ઉત્પન્ન કરે, તો એનાથી હજાર કર્મોનો ક્ષય થતાં, બાકીનાં કર્મો માટે વિપાકનો સમય અને ફળના ક્રમનો નિયમ રહેશે. પણ જન્મો એકી સાથે થતા નથી. આમ પહેલા વિકલ્પમાં બતાવેલો દોષ આ વિકલ્પમાં પણ રહેશે, એવો અર્થ છે.

"તસ્માજ્જન્મપ્રાયણાન્તરે કૃતઃ" વગેરેથી કહે છે કે આમ ત્રણ વિકલ્પો અસ્વીકાર્ય હોવાથી, બાકી રહેલો અનેક કર્મો એક જન્મનું કારણ છે એ – વિકલ્પ સાચો છે એમ સિદ્ધ થાય છે. જન્મ અને મૃત્યુ વચ્ચેના સમય દરમ્યાન વિચિત્ર પ્રકારનાં સુખદુઃખોની ભેટ આપતો હોવાથી વિચિત્ર, પ્રધાન એટલે ઉત્પન્ન થઈને તરત ફળ આપનાર અને વિલંબથી ફળ આપનાર ગૌણ એવી વ્યવસ્થાથી, કર્માશય મરણ વખતે પ્રગટ થઈને, એટલે પોતાના કાર્યનો આરંભ કરવા અભિમુખ બનીને, એકી સાથે એક સાંકળની જેમ પોતાનું જન્મ વગેરે આપવાનું કાર્ય કરીને એક જ જન્મ ઉત્પન્ન કરે છે, અનેક નહીં.

આવો જન્મ એટલે મનુષ્યપણું વગેરે. અને એનું આયુષ્ય પણ એ જ

કર્મથી નક્કી થાય છે, જેનો કાળ ભિન્નભિન્ન અવધિવાળો હોય છે. એ આયુષ્ય (જીવન)માં એ જ કર્મ સુખદુઃખ અનુભવરૂપ ભોગ, અગાઉ જણાવેલા બે (જન્મ અને આયુષ્ય) સાથે સંકલિત રૂપે નિશ્ચિત કરે છે. આમ આ કર્માશય જન્મ, આયુષ્ય અને ભોગ એ ત્રણેનો હેતુ હોવાથી "ત્રિવિપાક" કહેવાય છે. "અતઃ એક ભવિકઃ કર્માશયઃ ઉક્તઃ"થી કર્મના સ્વીકૃત નિયમ વિષેની ચર્ચા પૂરી કરતાં કહે છે કે કર્માશય એક-ભવિક (એક જન્મનું કારણ) છે. એક ભવ જેને છે એ એકભવિક કહેવાય. "એક ભવ" શબ્દને પાણિનિના સૂત્ર "પૂર્વકાલ" (અષ્ટાધ્યાયી, ૨.૧.૪૯)થી મત્વર્થીય ઠક્ થતાં એકભવિક શબ્દ બને છે. ક્યાંક "ઐકભવિક" પાઠ છે. ત્યાં એકભવ શબ્દને હોવું એવા અર્થમાં ઠક્ પ્રત્યય થાય છે. એક જન્મથી મર્યાદિત હોવાપણું એવો એનો અર્થ થાય.

"દૃષ્ટજન્મવેદનીયસ્ત્વેકવિપાકારંભી..." વગેરેથી સિદ્ધાન્ત તરીકે સ્વીકારેલા એકભવિકનું ત્રિવિપાકપણું કહીને, દૃષ્ટજન્મવેદનીય, ઐહિક કર્મના ત્રિવિપાકપણાને (એની વિશેષતાને કારણે)જુદું પાડીને કહે છે. જેમનું આયુષ્ય આઠ જ વર્ષનું હતું, એવા નન્દીશ્વર મનુષ્ય તરીકે જન્મ્યા હતા. તીવ્ર વૈરાગ્યપૂર્વક શ્રેષ્ઠ ઉપાયોના અનુષ્ઠાનથી ઉત્પન્ન થયેલા વિશેષ પ્રકારના પુણ્યથી (વધારાનું) લાંબું આયુષ્ય અને (દિવ્ય) ભોગ એમને પ્રાપ્ત થયા હતા, તેથી એમનો કર્માશય દ્વિવિપાક કહેવાય. નહુષને પોતાના કર્મથી ઇન્દ્રપદની પ્રાપ્તિવાળું આયુષ્ય મળ્યું હતું, પણ અગસ્ત્ય મુનિને લાત મારવાના પાપકર્મથી તિર્યક્ તરીકે દુઃખભોગ પ્રાપ્ત થયો હતો, એ એનું વિશેષ પ્રકારનું પાપ ફક્ત ભોગનું કારણ હતું.

જેમ કર્માશય એકભવિક હોય છે, એમ કર્મફળથી ઉત્પન્ન થતી, ભોગને અનુકુળ ક્લેશ વાસનાઓ પણ એકભવિક છે ? જો વાસનાઓ પણ એકભવિક હોય તો મનુષ્ય તિર્યક્યોનિને પ્રાપ્ત કર્યા પછી, પશુજાતિને યોગ્ય ભોગ અનુભવી શકે નહીં. (કારણ કે એવા ભોગને અનુકૂળ વાસના છે જ નહીં). આ શંકાના સમાધાન માટે "ક્લેશકર્મવિપાકાનુભવ..." વગેરેથી કહે છે કે અનાદિકાળથી ક્લેશો અને કર્મફળના અનુભવોથી પેદા થયેલી વાસનાઓથી રંગાયેલું ચિત્ત વિવિધરંગી ચિત્ર જેવું કે ઘણી ગાંઠોવાળી માછલાં પકડવાની જાળ જેવું છે. માટે વાસનાઓ ઘણા જન્મોમાં ઉત્પન્ન થયેલી માનવી જોઈએ. સંમૂર્છિત એટલે ભેગાં મળીને એક શક્તિરૂપ બનેલું ચિત્ત. ધર્માધર્મરૂપ કર્માશયથી ભેદ દર્શાવવા "યે સંસ્કારાઃ સ્મૃતિહેતવઃ તાઃ વાસનાઃ, તાશ્ચાનાદિકાલીનાઃ"થી કહે છે કે જે સંસ્કારો સ્મૃતિના હેતુ છે, એ જ વાસનાઓ છે. અને એ વાસનાઓ અનાદિકાલીન છે.

ઉત્સર્ગ (સિદ્ધાન્ત) તરીકે સ્વીકારેલા એકભવિકવાદમાં અપવાદ બતાવતા

"यस्त्वसौ एकभविकः कर्माशयः..." વગેરેથી ભૂમિકા રચે છે. "तु" શબ્દ વાસનાઓથી (કર્માશયનો) ભેદ દર્શાવે છે. દૃષ્ટજન્મવેદનીય અને નિયતવિપાકને જ એકભવિકપણાનો નિયમ લાગુ પડે છે, અદૃષ્ટજન્મવેદનીયને નહીં. "કસ્માત્"થી એનું કારણ પૂછે છે. "यो हि अदृष्टजन्मवेदनीय..." વગેરેથી કારણ કહે છે. "कृतस्य.." વગેરેથી (ત્રણમાંથી) પહેલી ગતિ કહે છે. "प्रधानकर्मणि..." વગેરેથી બીજી ગતિ અને "नियतविपाक..." વગેરેથી ત્રીજી ગતિ કહે છે.

"तत्र कृतस्य..." વગેરેથી પહેલી ગતિની ચર્ચા કરે છે. સંન્યાસીનાં અશુક્લ, અકૃષ્ણ કર્મો સિવાય, બધાં કર્મ કૃષ્ણ(પાપ) શુક્લ (પુણ્ય) અને કૃષ્ણશુક્લ (મિશ્રિત) છે. અહીં (આ જન્મમાં) તપ, સ્વાધ્યાય વગેરેથી ઉત્પન્ન થતો શુક્લ કર્માશય કૃષ્ણ કર્મનો, એ ફળ આપે એ પહેલાં, નાશ કરે છે. અને કૃષ્ણ સાથે સમાનતા હોવાથી મિશ્ર કર્મનો પણ નાશ કરે છે, એમ માનવું જોઈએ. અહીં ભગવાન ભાષ્યકાર "यत्रेदम्" વગેરેથી વેદવાક્ય ઉદ્ધૃત કરે છે. બે બે એટલે કૃષ્ણ અને મિશ્ર કર્મોને શુક્લ કર્મ નષ્ટ કરે છે, એમ સંબંધ છે. વીપ્સા (બે વખત કહેવા)થી મોટું પ્રમાણ સૂચવ્યું છે. કોનાં ? એ પ્રશ્નના જવાબમાં "पापकस्य" એટલે પાપી પુરુષનાં એવો અર્થ છે. કોણ નષ્ટ કરે છે ? એના જવાબમાં પુણ્યોથી કરેલો એક સંચય એમ કહે છે. સમૂહ એના અવયવોથી સિદ્ધ થાય છે. આનાથી ત્રીજો શુક્લ કર્માશય કહ્યો. કહેવાનો આશય એ છે કે બીજાને પીડા ન થાય એવાં સાધનોથી સિદ્ધ કરેલા શુક્લ કર્માશયનો એવો મહિમા છે કે એ એકલો અત્યંત વિરોધી એવાં કૃષ્ણ અને કૃષ્ણશુક્લ કર્મોનો નાશ કરે છે. માટે સારાં કર્મ કરવાની ઇચ્છા કરો. "ईच्छस्व"માં આત્મનેપદ છાંદસ્ છે. બાકીનું સુગમ છે.

અહીં શુક્લ કર્મના ઉદયનો જ એવો અપૂર્વ મહિમા છે, જેનાથી બીજાં કર્મોનો અભાવ થાય છે. સ્વાધ્યાય, તપ (દ્વન્દ્વસહિષ્ણુતા) વગેરે સાથે જોડયેલું દુઃખ કૃષ્ણકર્મો (પાપો)નો નાશ કરતું નથી. દુઃખ દુઃખ તરીકે જ પાપકર્મરૂપ અધર્મનું વિરોધી નથી, પણ અધર્મથી જ ઉત્પન્ન થયેલા દુઃખનું વિરોધી છે. સ્વાધ્યાય વગેરે સાથે જોડાયેલું દુઃખ અધર્મથી જન્મ્યું નથી, પણ યોગી સાધકે એને બધાં દુઃખોના નાશના સાધન તરીકે સ્વેચ્છાથી સ્વીકાર્યું છે. જો સ્વાધ્યાય સહ-ભાવી દુઃખ અધર્મથી જન્મેલું હોત તો સ્વાધ્યાય વગેરેનો ઉપદેશ વ્યર્થ ગણાય. કારણ કે એ દૃષ્ટિએ તો ઉપદેશેલા સ્વાધ્યાય વગેરેથી અધર્મનું ફળ દુઃખ ઉત્પન્ન થાય છે, એમ માનવું પડે. અને આ રીતે વિચારવામાં આવે તો તીવ્ર સંવેગપૂર્વક કરવામાં આવતા તપ, સ્વાધ્યાય વગેરે સાથે જોડાયેલા (શાસ્ત્રે ઉપદેશેલા અને યોગીએ સ્વયં સ્વીકારેલા) દુઃખ અને કુંભીપાક વગેરે નરકોમાં અનુભવાતા દુઃખમાં- આ નરક દુઃખ ફક્ત શાસ્ત્રે ઉપદેશેલું નથી એ સિવાય- શો તફાવત ગણાય ? પણ

શાસ્ત્ર કુંભીપાક વગેરેનું વિધાન કરતું નથી, તેથી ફલિત થાય છે કે સ્વાધ્યાયાદિજન્ય દુઃખ અધર્મથી ઉત્પન્ન થતું નથી અને કૃષ્ણ કર્મનો નાશ કરતું નથી. આમ બધું બધી રીતે બરોબર છે.

બીજી ગતિ કહે છે. મુખ્ય જ્યોતિષ્ટોમ વગેરે કર્મમાં, એના અંગભૂત પશુહિંસા વગેરેનું ભળી જવું. હિંસા વગેરેનાં બે પરિણામ (ફળ) છે. પ્રધાનકર્મના અંગ તરીકે એના વિધાનથી, એને ઉપકારક છે, અને "ન હિંસ્યાત્સર્વા ભૂતાનિ" એ શ્રુતિવાક્યથી નિષિદ્ધ કર્મ હોવાથી અનર્થકારક છે. પ્રધાન કર્મના અંગ તરીકે અનુષ્ઠાન કર્યું હોવાથી એ અપ્રધાન (ગૌણ) છે, તેથી તરત પ્રધાનથી સ્વતંત્રપણે પોતાનું અનર્થ રૂપ ઉત્પન્ન કરવા સમર્થ નથી. પરંતુ જ્યારે પ્રધાન કર્મ ફળ આપવાનો આરંભ કરે ત્યારે એને સહાયક બનીને રહે છે. પ્રધાનની સહાયતા કરતી વખતે પોતાના કાર્યમાં બીજમાત્ર રૂપે રહેવું, એને પ્રધાન સાથે ભળવું કહે છે. આ વિષે પંચશિખાચાર્યે કહ્યું છે : "જ્યોતિષ્ટોમ વગેરે પ્રધાન કર્મથી ઉત્પન્ન થયેલા અપૂર્વનો, પશુહિંસા વગેરેથી ઉત્પન્ન થયેલા અનર્થના હેતુરૂપ અપૂર્વ સાથે થતો સંકર (મિશ્રણ) સપરિહાર છે. થોડા પ્રાયશ્ચિત્તથી એનો પરિહાર કરવો શક્ય છે. કદાચ પ્રમાદથી પ્રાયશ્ચિત ન કર્યું હોય, તો પણ મુખ્ય કર્મના વિપાક સમયે એનો પણ વિપાક થશે, છતાં પણ જેટલો અનર્થ એ ઉત્પન્ન કરશે એ સહન કરી શકાય એવો હશે. પુણ્ય સંભારને કારણે પ્રાપ્ત થયેલા અમૃત જેવા સુખના સરોવરમાં અવગાહન કરતા કુશળ પુરુષો, થોડા પાપથી ઉત્પન્ન થયેલી દુઃખ રૂપી અગ્નિની કણિકાને સહન કરી લે છે. માટે કુશળ પુરુષના મોટા પુણ્યના ક્ષય માટે એ પર્યાપ્ત નથી. પૂછે છે : "કસ્માત્" કેમ ? "કુશલં હિ મે બહ્વસ્તિ..." વગેરેથી ઉત્તર આપે છે કે પુણ્યશાળી એવા મારું પુણ્ય ઘણું છે. પ્રધાન કર્મની દીક્ષાથી માંડીને દક્ષિણા દાન સુધીનું એ કર્મ ફળ આપવા ઉપસ્થિત થયું છે. એ ફળરૂપ સ્વર્ગમાં પણ જ્યારે હું અત્યંત દુઃખરહિત સુખ ભોગવીશ, એમાં પેલું અલ્પ (અપુણ્યફળ) થોડા દુઃખનું મિશ્રણ કરશે.

"નિયતવિપાક" વગેરેથી ત્રીજી ગતિ વિષે કહે છે. નિયતવિપાક પ્રધાન કર્મથી દબાઈને લાંબા સમય સુધી રહેવું એ ત્રીજી ગતિ છે. પ્રધાનપણું બળવાન હોવાના કારણે છે, અંગી તરીકે નહીં. નિયતવિપાકપણાને કારણે બીજા સમયે અવકાશ ન હોવાથી એને બળવાન કહેવામાં આવે છે. અનિયતવિપાક કર્મ બીજા સમયે અવકાશવાળું હોવાથી દુર્બળ છે. લાંબા સમય સુધી રહેવું એટલે બીજ- ભાવમાત્ર રૂપે રહેવું, પ્રધાન કર્મના ઉપકારક તરીકે નહીં, કારણ કે એ સ્વતંત્ર છે. અગાઉ કહ્યું છે કે મરણ વખતે કર્માશય એકી સાથે અભિવ્યક્ત થાય

છે. હવે લાંબા સમય સુધી રહેવાનું કહેવામાં આવે છે. તે અગાઉના કથનથી આનો વિરોધ નથી? એવા આશયથી પૂછે છે : "કથમ્ ?" કેવી રીતે ?" અદૃષ્ટજન્મવેદનીયસ્ય" વગેરેથી જવાબ આપે છે. એકવચન જાતિના અભિપ્રાયથી પ્રયોજ્યું છે. "યત્ત્વદૃષ્ટજન્મવેદનીયમ્" વગેરેથી એનાથી ભિન્ન કર્મની અગાઉ કહેલી ગતિનો નિશ્ચય કરે છે. બાકીનું સુગમ છે. ૧૩

★

ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात् ॥१४॥

એ (જન્મ, આયુ અને ભોગ) પુણ્ય અને પાપરૂપ હેતુથી ઉત્પન્ન થયેલાં હોવાથી, સુખ અને સંતાપ (દુઃખ) રૂપ ફળ આપનારાં છે. ૧૪

भाष्य

ते जन्मायुर्भोगाः पुण्यहेतुकाः सुखफला, अपुण्यहेतुका दुःखफला इति । यथा चेदं दुःखं प्रतिकूलात्मकमेवं विषयसुखकालेऽपि दुःखमस्त्येव प्रतिकूलात्मकं योगिनः ॥१४॥

એ જન્મ, આયુષ્ય અને ભોગ પુણ્યના હેતુથી ઉત્પન્ન થયાં હોય, તો સુખરૂપ ફળ આપે છે. પાપ હેતુવાળાં હોય તો દુઃખરૂપ ફળ આપે છે. દુઃખ પ્રતિકૂળ હોય છે, એમ યોગીને વિષયસુખના સમયે પણ દુઃખ જ હોય છે. ૧૪

तत्त्व वैशारदी

उक्तं क्लेशमूलत्वं कर्मणाम् । कर्ममूलत्वं च विपाकानाम् । अथ विपाकाः कस्य मूलं येनामी त्यक्तव्या इत्यत आह- ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वाद् इति । सूत्रं व्याचष्टे- ते जन्मायुर्भोगा इति । यद्यपि जन्मायुषोरेव ह्लादपरितापपूर्वभावितया तत्फलत्वं न तु भोगस्य ह्लादपरितापोदयान्तरभाविनस्तदनुभवात्मनस्तथाप्यनुभाव्यतया भोग्यतया भोगकर्मतामात्रेण भोगफलत्वमिति मन्तव्यम् । नन्वपुण्यहेतुका जात्यायुर्भोगाः परितापफला भवन्तु हेयाः प्रतिकूलवेदनीयत्वात् । कस्मात्पुनः पुण्यहेतवस्त्यज्यन्ते सुखफला अनुकूलवेदनीयत्वात् । न चैषां प्रत्यात्मवेदनीयानुकूलता शक्या सहस्रेणाप्यनुमानागमैरपाकर्तुम् । न च ह्लादपरितापौ परस्परविनाभूतौ यतो ह्लाद उपादीयमाने परितापोऽप्यवर्जनीयतयाऽपतेत् । तयोर्भिन्नहेतुकत्वाद्भिन्नरूपत्वाच्चेत्यत आह- यथा चेदमिति ॥१४॥

કર્મો ક્લેશમૂલક અને વિપાક કર્મમૂલક છે, એમ કહ્યું. હવે વિપાકો કોનું મૂળ છે, જેથી એમનો ત્યાગ કરવો જોઈએ ? એના જવાબમાં "તે હ્લાદપરિતાપફલાઃ પુણ્યાપુણ્યહેતુત્વાત્" સૂત્રથી કહે છે કે એ (જન્મ, આયુ અને ભોગરૂપ) વિપાકો પુણ્ય અને પાપરૂપ હેતુથી ઉત્પન્ન થતા હોવાથી સુખ અને દુઃખરૂપ ફળ આપે છે. (માટે એ ત્યાજય છે.) "તે જન્માયુર્ભોગાઃ" વગેરેથી ભાષ્યકાર સૂત્રની વ્યાખ્યા કરે છે.

જન્મ અને આયુ સુખદુઃખ પહેલાં આવતાં હોવાથી એ બેનું ફળ સુખદુઃખ છે, એમ કહેવું યોગ્ય છે, એ (સુખદુઃખ) ભોગનું ફળ છે એમ કહેવું બરોબર નથી. કારણ કે સુખદુઃખ અનુભવ ભોગ છે, અને એ સુખદુઃખ પછી ઉત્પન્ન થાય છે. (પછીથી ઉત્પન્ન થનાર કારણ ન કહેવાય). છતાં પણ સુખદુઃખ અનુભવરૂપ ભોગનો એ બંને વિષય હોવાથી, ભોગનું ફળ સુખદુઃખ છે, એવું કહેવામાં આવ્યું છે, એમ માનવું જોઈએ.

પરંતુ પુણ્યના કારણે મળતું સુખરૂપ ફળ તો અનુકૂળ વેદનીય છે, એનો ત્યાગ શા માટે કરવો જોઈએ ? પ્રત્યેક આત્મા સુખને અનુકૂળ સંવેદનરૂપે અનુભવે છે, તેથી હજાર અનુમાનો અને આગમો વડે એ અનુભવને નકારી શકાય નહીં. અને સુખ તથા દુઃખ સહભાવી નથી, જેથી એક વિના બીજું ટકી શકે નહીં. તેથી સુખનો સ્વીકાર કરતાં દુઃખને પણ સ્વીકારવું જ પડે એવું નથી. એ બંનેનો હેતુ જુદો હોવાથી એમનું સ્વરૂપ પણ ભિન્ન છે. આવી આશંકાના નિવારણ માટે "યથા ચેદં દુઃખં પ્રતિફલાત્મકમેવં વિષયસુખકાલેપિ દુઃખમસ્તિ..." વગેરેથી કહે છે કે યોગીને દુઃખની જેમ વિષયસુખ સમયે એ સુખ પણ દુઃખ રૂપ જ જણાય છે. ૧૪

★

कथं तदुपपद्यते - એવું શી રીતે બની શકે-

परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः ॥१५॥

પરિણામ દુઃખ, તાપ દુઃખ, સંસ્કાર દુઃખ અને ગુણોની વૃત્તિઓમાં વિરોધ હોવાથી વિવેકી પુરુષ માટે બધું દુઃખ જ છે. ૧૫

ભાષ્ય

सर्वस्यायं रागानुविद्धश्चेतनाचेतनसाधनाधीनः सुखानुभव इति तत्रास्ति रागजः कर्माशयः । तथा च द्वेष्टि दुःखसाधनानि मुह्यति चेति

द्वेषमोहकृतोऽप्यस्ति कर्माशयः, तथा चोक्तम् । (भाष्य २।४ द्र०) । नानुपहत्य भूतान्युपभोगः संभवतीति हिंसाकृतोऽप्यस्ति शारीरः कर्माशय इति । विषयसुखं चाविद्येत्युक्तम् ।

या भोगेष्विन्द्रियाणां तृप्तेरुपशान्तिस्तत्सुखम् । या लौल्यादनुपशान्तिस्तद्दुःखम् । न चेन्द्रियाणां भोगाभ्यासेन वैतृष्ण्यं कर्तुं शक्यम् । कस्मात् ? यतो भोगाभ्यासमनुविवर्धन्ते रागाः कौशलानि चेन्द्रियाणामिति । तस्मादनुपायः सुखस्य भोगाभ्यास इति । स खल्वयं वृश्चिकविषभीत इवाशीविषेण दष्टो यः सुखार्थी विषयानुवासितो महति दुःखपङ्के निमग्न इति । एषा परिणामदुःखता नाम प्रतिकूला सुखावस्थायामपि योगिनमेव क्लिश्नाति ।

अथ का तापदुःखता ? सर्वस्य द्वेषानुविद्धश्चेतनाचेतनसाधनाधीनस्तापानुभव इति, तत्रास्ति द्वेषजः कर्माशयः । सुखसाधनानि च प्रार्थयमानः कायेन वाचा मनसा च परिस्पन्दते, ततः परमनुगृह्णात्युपहन्ति चेति परानुग्रहपीडाभ्यां धर्माधर्मावुपचिनोति । स कर्माशयो लोभान्मोहाच्च भवतीत्येषा तापदुःखतोच्यते ।

का पुनः संस्कारदुःखता ? सुखानुभवात्सुखसंस्काराशयो दुःखानुभवादपि दुःखसंस्काराशय इति । एवं कर्मभ्यो विपाकेऽनुभूयमाने सुखे दुःखे वा पुनः कर्माशयप्रचय इति ।

एवमिदमनादि दुःखस्रोतो विप्रसृतं योगिनमेव प्रतिकूलात्मकत्वादुद्वेजयति । कस्मात् ? अक्षिपात्रकल्पो हि विद्वानिति । यथोर्णातन्तुरक्षिपात्रे न्यस्तः स्पर्शेन दुःखयति नान्येषु गात्रावयवेषु । एवमेतानि दुःखान्यक्षिपात्रकल्पं योगिनमेव क्लिश्नन्ति नेतरं प्रतिपत्तारम् । इतरं तु स्वकर्मोपहृतं दुःखमुपात्तमुपात्तं त्यजन्तं, त्यक्तं त्यक्तमुपादानमनादिवासनाविचित्रया चित्तवृत्त्या समन्ततोऽनुविद्धमिवाविद्यया हातव्य एवाहंकारममकारानुपातिनं जातं जातं बाह्याध्यात्मिकोभयनिमित्तास्त्रिपर्वाणस्तापा अनुप्लवन्ते । तदेवमनादिना दुःखस्रोतसा व्यूह्यमानमात्मानं भूतग्रामं च दृष्ट्वा योगी सर्वदुःखक्षयकारणं सम्यग्दर्शनं शरणं प्रपद्यत इति ।

गुणवृत्तिविरोधाश्च दुःखमेव सर्वं विवेकिनः । प्रख्याप्रवृत्ति-स्थितिरूपा बुद्धिगुणाः परस्परानुग्रहतन्त्रीभूत्वा शान्तं घोरं मूढं वा प्रत्ययं त्रिगुणमेवारभन्ते । चलं च गुणवृत्तमिति क्षिप्रपरिणामि चित्तमुक्तम् । रूपातिशया वृत्त्यतिशयाश्च परस्परेण विरुध्यन्ते सामान्यानि त्वतिशयैः सह प्रवर्तन्ते । एवमेते गुणा इतरेतराश्रयेणोपार्जितसुखदुःखमोहप्रत्ययाः सर्वे सर्वरूपा भवन्तीति, गुणप्रधानभावकृतस्त्वेषां विशेष इति । तस्माद् दुःखमेव सर्वं विवेकिन इति ।

तदस्य महतो दुःखसमुदायस्य प्रभवबीजमविद्या । तस्याश्च सम्यग्दर्शनमभावहेतुः । यथा चिकित्साशास्त्रं चतुर्व्यूहम्-रोगो रोगहेतुरारोग्यं भैषज्यमिति, एवमिदमपि शास्त्रं चतुर्व्यूहमेव । तद्यथा- संसारः संसारहेतु-र्मोक्षो मोक्षोपाय इति । तत्र दुःखबहुलः संसारो हेयः । प्रधानपुरुषयोः संयोगो हेयहेतुः । संयोगस्यात्यन्तिकी निवृत्तिर्हानम् । हानोपायः सम्यग्दर्शनम् ।

तत्र हातुः स्वरूपमुपादेयं वा हेयं वा न भवितुमर्हति । हाने तस्योच्छेदवादप्रसङ्गः, उपादाने च हेतुवादः । उभयप्रत्याख्याने च शाश्वतवाद इत्येतत्सम्यग्दर्शनम् ॥१५॥

બધાં પ્રાણીઓને ચેતન અને અચેતન સાધનોને આધીન સુખનો અનુભવ રાગયુક્ત હોય છે. માટે એનાથી રાગજન્ય કર્માશય ઉત્પન્ન થાય છે અને દુઃખસાધનોનો દ્વેષ કરે છે, તેમજ મોહ પામે છે, તેથી દ્વેષમોહજન્ય કર્માશય પણ છે. કહ્યું છે કે પ્રાણીઓની હિંસા કર્યા વિના ઉપભોગ સંભવતો નથી. તેથી શરીરસંબંધી હિંસાજન્ય કર્માશય છે અને વિષયસુખ અવિદ્યા છે, એમ અગાઉ કહ્યું છે.

ઇન્દ્રિયોની ભોગવડે તૃપ્તિથી થતી શાન્તિ સુખ છે. લાલચને કારણે અશાન્તિ રહે છે, એ દુઃખ છે. ભોગના અભ્યાસથી ઇન્દ્રિયોની વિતૃષ્ણા (તૃષ્ણાની શાન્તિ) કરવી શક્ય નથી. કેમ ? કારણ કે ભોગાભ્યાસ પછી રાગ વધે છે, અને ઇન્દ્રિયોની કુશળતા વધે છે. માટે ભોગનો અભ્યાસ સુખનો ઉપાય નથી. સુખ માટે વિષયોની વાસનાથી રંગાઈને મોટા દુઃખરૂપી કીચડમાં ફસાયો, એ વીંછીના ઝેરથી ડરીને જાણે કે ઝેરી સાપના દંશનો

ભોગ બન્યો. વિષયસુખનું આવું પ્રતિકૂળ પરિણામ, પરિણામદુઃખ કહેવાય છે. સુખની અવસ્થામાં પણ એ ફક્ત યોગીને જ દુઃખ આપે છે.

તાપદુઃખ શું છે ? બધાં પ્રાણીઓને દ્વેષયુક્ત, ચેતન અને અચેતન સાધનોને આધીન સંતાપનો અનુભવ હોય છે. આમ દ્વેષથી કર્માશય ઉત્પન્ન થાય છે. સુખનાં સાધનોની ઇચ્છા રાખનાર શરીર, મન અને વાણીથી કાર્ય કરે છે. એ દરમ્યાન બીજાનો ઉપકાર અથવા અપકાર (હાનિ) કરે છે. આમ બીજાપર અનુગ્રહ કે પીડા કરવાથી ધર્મ અને અધર્મનો સંચય કરે છે. આ રીતે લોભથી અને મોહથી જે કર્માશય ઉત્પન્ન થાય છે, એને તાપદુઃખ કહેવાય છે.

સંસ્કારદુઃખ શું છે ? સુખના અનુભવથી સુખના સંસ્કારોનો અને દુઃખના અનુભવથી દુઃખના સંસ્કારોનો આશય (સમૂહ) ઉત્પન્ન થાય છે. કર્મના ફળરૂપ સુખ કે દુઃખના અનુભવથી ફરીથી કર્મોનો સંચય કે આશય ઉત્પન્ન થાય છે. આમ અનાદિકાળથી શરૂ થયેલો આ દુઃખોનો પ્રવાહ પ્રતિકૂળ લાગવાથી ફક્ત યોગીને જ ઉદ્વેગ કરે છે. કારણ કે એ જ્ઞાની આંખરૂપ પાત્ર જેવો છે. જેમ ઊનનો તાંતણો આંખમાં સ્પર્શથી દુઃખ ઉત્પન્ન કરે છે, શરીરના બીજા અવયવોને સ્પર્શથી પીડા પેદા કરતો નથી. આમ આ દુઃખો આંખની કીકી જેવા યોગીને ક્લેશ આપે છે, બીજા અનુભવનારાઓને નહીં. પોતાનાં કર્મોથી ઉત્પન્ન થયેલાં દુઃખોને આવે આવે એમ ત્યજતા અને ત્યજી ત્યજીને ફરીથી ગ્રહણ કરતા, અને અવિદ્યાથી ચોમેર ઘેરાયેલા હોય એમ અનાદિ વાસનાઓથી વિચિત્ર ચિત્તવૃત્તિઓવાળા ત્યજવા યોગ્ય અહંકાર અને મમત્વનું જ અનુસરણ કરતા બીજાઓની પાછળ પાછળ તો નિરંતર બાહ્ય અને આધ્યાત્મિક એમ બંને પ્રકારનાં નિમિત્તોથી ઉત્પન્ન થતા, ત્રણ પર્વ(પરિણામ, તાપ અને સંસ્કારરૂપ સાંધા)વાળા સંતાપો સતત વહી આવે છે. આમ અનાદિ દુઃખપ્રવાહમાં વહી રહેલા પોતાના આત્માને, તેમજ બધાં પ્રાણીઓને જોઈને યોગી બધા દુઃખોના ક્ષયના કારણ એવા સમ્યક્ દર્શનના શરણમાં જાય છે.

ગુણોની વૃત્તિઓમાં પરસ્પર વિરોધ હોવાથી, વિવેકી પુરુષ માટે

બધું દુઃખરૂપ જ છે. પ્રકાશ, પ્રવૃત્તિ અને સ્થિતિરૂપ બુદ્ધિના ગુણો, પરસ્પર સહયોગને પોતાનું (વ્યવસ્થા) તંત્ર બનાવી, શાન્ત, ઘોર અને મૂઢ એવા ત્રણ ગુણોરૂપ અનુભવોનો આરંભ કરે છે. અને ગુણચક્ર સતત ગતિશીલ હોવાથી ચિત્ત જલ્દી પરિણામ પામતું (બદલાતું) રહે છે, એમ કહ્યું છે. એમના સ્વરૂપની અને પ્રવર્તવાની તીવ્રતા સાથે તેઓ પરસ્પરનો વિરોધ કરે છે. સામાન્ય (ઓછા બળવાળા) અત્યંત શક્તિશાળી ગુણો સાથે પ્રવર્તે છે. આ ગુણો પરસ્પર એકબીજાનો આશ્રય લઈ સુખ, દુઃખ અને મોહરૂપ અનુભવો ઉત્પન્ન કરનારા, અને બધા બધાના રૂપવાળા હોય છે. એમની વિશેષતા એકની મુખ્યતા અને બીજાની ગૌણતા દ્વારા પ્રગટ થાય છે. માટે બધું વિવેકીની દૃષ્ટિએ દુઃખરૂપ જ છે.

આ મોટા દુઃખ સમુદાયની ઉત્પત્તિનું કારણરૂપ બીજ અવિદ્યા છે. સમ્યક્ દર્શન એ (અવિદ્યા)ના નાશનો હેતુ છે. જેમ રોગ, રોગનું કારણ, આરોગ્ય અને ઔષધિવિજ્ઞાનરૂપ ચાર વ્યૂહો (વિભાગો)વાળું ચિકિત્સાશાસ્ત્ર છે, એમ આ યોગશાસ્ત્ર પણ ચતુર્વ્યૂહ છે. સંસાર, સંસારનો હેતુ, મોક્ષ અને મોક્ષનો ઉપાય એ ચાર વ્યૂહો છે. ઘણાં દુઃખોવાળો સંસાર હેય (ત્યાજ્ય) છે. પ્રધાન અને પુરુષનો સંયોગ હેય(સંસાર)નો હેતુ છે. એમના સંયોગની નિવૃત્તિ હાન (ત્યાગ) છે. અને સમ્યક્ દર્શન હાનનો ઉપાય છે.

ત્યાગનાર (આત્મા)નું સ્વરૂપ સ્વીકારવા કે ત્યાગવા યોગ્ય હોઈ શકે નહીં. એનો વિનાશ માનવાથી ઉચ્છેદ(શૂન્ય)વાદનો પ્રસંગ આવે, અને એનો સ્વીકાર કરવામાં આવે, તો હેતુવાદ(એનો પણ કોઈ હેતુ હોવો જોઈએ, એવા વાદ)નો પ્રસંગ આવે. અને આ બંને વાદોનો અસ્વીકાર (ખંડન) કરવામાં આવે, તો શાશ્વતવાદ બાકી રહે, એ સમ્યક્ દર્શન છે. ૧૫

तत्त्व वैशारदी

यद्यपि न पृथग्जनैः प्रतिकूलात्मतया विषयसुखकाले संवेद्यते दुःखं तथापि तत् संवेद्यते योगिभिरिति प्रश्नपूर्वकं तदुपपादनाय सूत्रमवतारयति-कथं तदुपपद्यत इति । परिणामेत्यादि सूत्रम् । परिणामश्च तापश्च संस्कारश्चैतान्येव दुःखानि तैरिति । परिणामदुःखतया विषयसुखस्य दुःखतामाह-सर्वस्यायमिति । न खलु सुखं रागानुवेधमन्तरेण संभवति । न ह्यस्ति संभवो न तत्र तुष्यति तच्च तस्य सुखमिति।

रागस्य च प्रवृत्तिहेतुत्वात्प्रवृत्तेश्च पुण्यापुण्योपचयकारित्वात्तत्रास्ति रागजः कर्माशयोऽसतोऽनुपजननात् । तथा च सुखं भुञ्जानस्तत्र सक्तोऽपि विच्छिन्नावस्थेन द्वेषेण द्वेष्टि दुःखसाधनानि । तानि परिहर्तुमशक्तो मुह्यति चेति द्वेषमोहकृतोऽप्यस्ति कर्माशयः । द्वेषवन्मोहस्यापि विपर्ययापरनाम्नः कर्माशयहेतुत्वमविरुद्धम् । ननु कथं रक्तो द्वेष्टि मुह्यति वा । रागसमये द्वेषमोहयोरदर्शनादित्यत आह-तथा चोक्तमिति विच्छिन्नावस्थान्क्लेशानुपपादयद्भिरस्माभिः (२।४) । तदनेन वाङ्मनसप्रवृत्तिजन्मनी पुण्यापुण्ये दर्शिते । रागादिजन्मनः कर्तव्यमिदमिति मानसस्य संकल्पस्य साभिलाषत्वेन वाचनिकत्वम्याप्यविशेषात् । यथाहुः-

"साभिलाषश्च संकल्पो वाच्यार्थान्नातिरिच्यते ।"

इति । शारीरमपि कर्माशयं दर्शयति- नानुपहत्येति । अत एव धर्मशास्त्रकाराः "पञ्च सूना गृहस्थस्य" (मनु. ३।६८) इत्याहुः । स्यादेतत्- न प्रत्यात्मवेदनीयस्य विषयसुखस्य प्रत्याख्यानमुचितं योगिनामनुभवविरोधादित्यत आह- विषयसुखं चाविद्येत्युक्तमिति । चतुर्विधविपर्यासलक्षणामविद्यां दर्शयद्भिरिति । नापातमात्रमाद्रियन्ते वृद्धाः । अस्ति खल्वापाततो मधुविषसंपृक्तान्नोपभोगेऽपि सुखानुभवः प्रत्यात्मवेदनीयः किंत्वायत्यामसुखम् । इयं च दर्शिता भगवतैव-

"विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥" (गी. १८।३८) इति ।

चोदयति- या भोगेष्विति । न वयं विषयह्लादं सुखमातिष्ठामहे, किंत्वतृप्यतां पुंसाम् तत्तद्विषयप्रार्थनापरिक्लिष्टचेतसां तृष्णैव महद्दुःखम् । न चेयमुपभोगमन्तरेण शाम्यति । न चास्याः प्रशमो रागाद्यनुविद्ध इति नास्य परिणामदुःखतेति भावः । तृप्तेस्तृष्णाक्षयाद्धेतोरिन्द्रियाणामुपशान्तिरप्रवर्तनं विषयेष्वित्यर्थः । एतदेव व्यतिरेकमुखेन स्पष्टयति- या लौल्यादिति । परिहरति- न चेन्द्रियाणामिति । हेतावनोः प्रयोगः । सत्यं तृष्णाक्षयः सुखमनवद्यम् । तस्य तु न भोगाभ्यासो हेतुरपि तु तृष्णाया एव तद्विरोधिन्याः । यथाहुः-

"न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥"
महाभा० आदि. ८५।१२) इति । शेषमतिरोहितम् ।

तापदुःखतां पृच्छति- अथ केति । उत्तरम्- सर्वस्येति । सर्वजनप्रसिद्धत्वेन तत्स्वरूपप्रपञ्चमकृत्वा तापदुःखतापि परिणामदुःखतासमतया प्रपञ्चितेति ।

संस्कारदुःखतां पृच्छति- केति । उत्तरम्- सुखेति । सुखानुभवो हि

संस्कारमाधत्ते । स च सुखस्मरणं तच्च रागं स च मनःकायवचनचेष्टां सा च पुण्यापुण्ये ततो विपाकानुभवस्ततो वासनेत्येवमनादितेति । अत्र च सुखदुःखसंस्कारातिशयात्तत्स्मरणं तस्माच्च रागद्वेषौ ताभ्यां कर्माणि कर्मभ्यो विपाक इति योजना ।

तदेवं दुःखस्रोतः प्रसृतं योगिनमेव क्लिश्नाति नेतरं पृथग्जनमित्याह - एवमिदमनादीति । इतरं तु त्रिपर्वाणस्तापा अनुप्लवन्त इति संबन्धः । आधिभौतिकाधिदैविकयोस्तापयोर्बाह्यत्वेनैकत्वं विवक्षितम् । चित्ते वृत्तिरस्या इत्यविद्या चित्तवृत्तिस्तया हातव्य एव बुद्धीन्द्रियशरीरादौ दारापत्यादौ चाहंकारममकारानुपातिनमिति। तदत्र न सम्यग्दर्शनादन्यत्परित्राणमस्तीत्याह-तदेवमिति ।

तदेवमौपाधिकं विषयसुखस्य परिणामतः संस्कारतापसंयोगाच्च दुःखत्वमभिधाय स्वाभाविकमादर्शयति-गुणवृत्तिविरोधाच्चेति । व्याचष्टे-प्रख्येति । प्रख्याप्रवृत्तिस्थितिरूपा बुद्धिरूपेण परिणता गुणाः सत्त्वरजस्तमांसि परस्परानुग्रहन्त्राः शान्तं सुखात्मकं घोरं दुःखात्मकं मूढं विषादात्मकमेव प्रत्ययं सुखोपभोगरूपमपि त्रिगुणमारभन्ते । न च सोऽपि तादृशप्रत्यरूपोऽस्य परिणामः स्थिर इत्याह- चलं च गुणवृत्तिमिति क्षिप्रपरिणामि चित्तमुक्तं इति । नन्वेकः प्रत्ययः कथं परस्परविरुद्धशान्तघोरमूढत्वान्येकदा प्रतिपद्यत इत्यत आह-रूपातिशया वृत्त्यतिशयाश्च परस्परेण विरुध्यन्त इति । रुपाण्यष्टौ, भावा धर्मादयो वृत्तयः सुखाद्याः । तदिह धर्मेण विपच्यमानेनाधर्मस्तादृशो विरुध्यते । एवं ज्ञानवैराग्यैश्वर्यैः सुखादिभिश्च तादृशान्येव तद्विपरीतानि विरुध्यन्ते । सामान्यानि त्वसमुदाचरद्रूपाण्यतिशयैः समुदाचरद्भिः सहा विरोधात्प्रवर्तन्त इति । ननु गृह्णीम एतत्, तथापि विषयसुखस्य कुतः स्वाभाविकी दुःखतेत्यत आह-एतमेत इति । उपादानाभेदादुपादानात्मकत्वाच्चोपादेयस्याप्यभेद इत्यर्थः । तत्किमिदानीमात्यन्तिकमेव तादात्म्यम् । तथा च बुद्धिव्यपदेशभेदौ न कल्पेते इत्यत आह-गुणप्रधानेति । सामान्यात्मना गुणभावोऽतिशयात्मना च प्राधान्यम् । तस्मादुपाधितः स्वभावतश्च दुःखमेव सर्वं विवेकिन इति ।

दुःखं च हेयं प्रज्ञावताम् । न च तन्निदानहानमन्तरेण तद्धेयं भवितुमर्हति। न चापरिज्ञातं निदानं शक्यं हातुमिति मूलनिदानमस्य दर्शयति-तदस्येति । दुःखसमुदायस्य प्रभव उत्पत्तिर्यतस्तद्बीजमित्यर्थः । तदुच्छेदहेतुं दर्शयति-तस्याश्चेति। इदानीमस्य शास्त्रस्य सर्वानुग्रहार्थं प्रवृत्तस्य तद्विधेनैव शास्त्रेण सादृश्यं दर्शयति-यथेति । चत्वारो व्यूहाः संक्षिप्तावयवरचना यस्य तत्तथोक्तम् । ननु दुःखं हेयमुक्त्वा संसारं हेयमभिदधतः कुतो न विरोध इत्यत आह—तत्र दुःखबहुल इति । यत्कृत्वाऽविद्या संसारं करोति तदस्या अवान्तरव्यापारं संसारहेतुमाह-प्रधानपुरुषयोरिति ।

मोक्षस्वरूपमाह-संयोगस्येति । मोक्षोपायमाह-हानोपाय इति । केचित्पश्यन्ति, हातुः स्वरूपोच्छेद एव मोक्षः । यथाहुः-

"प्रदीपस्येव निर्वाणं विमोक्षस्तस्य तायिनः ।"

इति । अन्ये तु सवासनक्लेशसमुच्छेदाद्विशुद्धविज्ञानोत्पाद एव मोक्ष इत्याचक्षते । तान्प्रत्याह- तत्रेति । तत्र हानं तावद्दूषयति- हाने तस्येति । न हि प्रेक्षावान्कश्चिदात्मोच्छेदाय यतते । ननु दृश्यन्ते तीव्रगदोन्मूलितसकलसुखा दुःखमयीमिव मूर्तिमुद्वहन्तः स्वोच्छेदाय यतमानाः । सत्यम् । केचिदेव ते । न त्वेवं संसारिणो विविधविचित्रदेवाद्यानन्दभोगभागिनः । तेऽपि च मोक्षमाणा दश्यन्ते । तस्माद-पुरुषार्थप्रसक्तेर्न हातुः स्वरूपोच्छेदो मोक्षोऽभ्युपेयः । अस्तु तर्हि हातुः स्वरूपमुपादेयमित्यत आह-उपादाने च हेतुवाद इति । उपादाने हि कार्यत्वेनानित्यत्वे सति मोक्षत्वादेव च्यवेत । अमृतत्वं हि मोक्षः । नापि विशुद्धो विज्ञानसंतानो भवत्यमृतः । संतानिभ्यो व्यतिरिक्तस्य संतानस्य वस्तुसतोऽभवात् । संतानिनां चानित्यत्वात् । तस्मात्तथा यतितव्यं यथा शाश्वतवादो भवति । तथा च पुरुषार्थतापवर्गस्येत्याह- उभयप्रत्याख्यान इति । तस्मात्स्वरूपावस्थानमेवात्मनो मोक्ष इत्येतदेव सम्यग्दर्शनम् ॥१५॥

દૃશિમાત્ર એટલે ફક્ત દૃક્‌શક્તિરૂપ જે કોઈ પણ વિશેષણોથી સંબંધિત નથી. આ પુરુષ બુદ્ધિનો પ્રતિસંવેદી છે. એ બુદ્ધિ જેવા રૂપવાળો નથી અને એનાથી અત્યંત જુદા રૂપવાળો પણ નથી. કેમ સમાનરૂપવાળો નથી ? વિષયને જાણતી અને ન જાણતી એવી બુદ્ધિ પરિણામી છે. ગાય, ઘડો વગેરે એના વિષયોને એ જાણે છે, તેમજ નથી પણ જાણતી. એ એનું પરિણામીપણું દર્શાવે છે. જ્યારે પુરુષ હંમેશાં પોતાના વિષયને જાણે છે, એ એનું અપરિણામીપણું સ્પષ્ટ કરે છે. કેવી રીતે ? પુરુષનો વિષય બુદ્ધિ છે, એ પુરુષ વડે અગ્રહીત હોય એવો સંભવ નથી. તેથી પુરુષનું સદા જ્ઞાતવિષયપણું સિદ્ધ થાય છે, અને એ કારણે એનું અપરિણામીપણું પણ સિદ્ધ થાય છે. વળી બુદ્ધિ બીજાઓ સાથે મળીને કાર્ય કરતી હોવાથી બીજા માટે છે, જ્યારે પુરુષ ફક્ત પોતાના માટે છે. તેમજ બધા પદાર્થોનો નિશ્ચય કરનારી હોવાથી બુદ્ધિ ત્રણ ગુણોવાળી છે, અને તેથી અચેતન છે. પુરુષ તો ગુણોનો સાક્ષી છે. માટે બુદ્ધિ જેવા રૂપવાળો નથી.

તો પછી ભિન્ન રૂપવાળો હોવો જોઈએ. અત્યંત જુદા રૂપવાળો પણ નથી. કેમ ? એ શુદ્ધ હોવા છતાં પ્રત્યયને જોનાર છે. કારણ કે બુદ્ધિના પ્રત્યયને પોતાની અંદર જુએ છે. એને જોવાથી એના (બુદ્ધિના) જેવા રૂપવાળો ન હોવા છતાં એની સાથે એકરૂપ હોય એવો જણાય છે. આ વિષે કહ્યું છે : "ભોક્તૃશક્તિ અપરિણામી છે, વિષયોમાં સંચરણ કરતી નથી, છતાં પરિણામી પદાર્થમાં (બુદ્ધિમાં) પ્રતિબિંબિત થઈ હોય એવી બનીને એની (બુદ્ધિની) વૃત્તિનું અનુસરણ કરે છે." આ કારણે બુદ્ધિ ચેતન બની હોય એવું જણાય છે. આવી બુદ્ધિનું અનુકરણ કરવામાત્રથી બુદ્ધિ વૃત્તિથી જુદી ન હોય એવી (પુરુષની) જ્ઞાનવૃત્તિ કહેવામાં આવે છે. ૨૦

तत्त्व वैशारदी

व्याख्यातं दृश्यम् । द्रष्टुः स्वरूपावधारणार्थमिदमारभ्यते - द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः । व्याचष्टे- दृशिमात्र इति । विशेषणानि धर्मास्तैरपरामृष्टा । तदनेन मात्रग्रहणस्य तात्पर्यं दर्शितम् । स्यादेतत्-यदि सर्वविशेषणरहिता दृक्शक्तिर्न तर्हि शब्दादयो दृश्येरन् । न हि दृशिनाऽसंस्पृष्टं दृश्यं भवतीत्यत आह- स पुरुष इति । बुद्धिदर्पणे पुरुषप्रतिबिम्बसंक्रान्तिरेव बुद्धिप्रतिसंवेदित्वं पुंसः । तथा च दृशिच्छायापन्नया

बुद्ध्या संसृष्टाः शब्दादयो भवन्ति दृश्या इत्यर्थः । स्यादेतत्-पारमार्थिकमेव बुद्धिचैतन्ययोः कस्मादैक्यं नोपेयते, किमनया तच्छायापत्त्येत्यत आह- स बुद्धेर्न सरूप इति । तदाऽसरूपस्य तच्छायापत्तिरपि दुर्घटेत्यत आह- नात्यन्तं विरूप इति । तत्र सारूप्यं निषेधति- न तावदिति । हेतुं पृच्छति- कस्मादिति । सहेतुकं वैरूप्ये हेतुमाहज्ञातेति । परिणामिनी बुद्धिर्यस्मात्तस्माद्विरूपा । यदा खल्वियं शब्दाद्याकारा भवति तदा ज्ञातोऽस्याः शब्दादिलक्षणो भवति विषयः । तदनाकारत्वे त्वज्ञातः । तथा च कदाचिदेव तदाकारतां दधती परिणामिनीति । प्रयोगश्च भवति-बुद्धिः परिणामिनी ज्ञाताज्ञातविषयत्वाच्छ्रोत्रादिवदिति ।

तद्वैधर्म्यं पुरुषस्य तद्विपरीताद्धेतोः सिध्यतीत्याह-सदेति । स्यादेतत्- सदा ज्ञातविषयश्चेत्पुरुषो न तर्हि केवली स्यादित्याशयवान्पृच्छति-कस्मादिति । उत्तरम्-न हि बुद्धिश्च नामेति । बुद्ध्यग्रहणयोरस्ति सह संभवो निरोधावस्थायामत उक्तं विरोधसूचनाय पुरुषविषयश्चेति । तेनाद्यश्चकारो बुद्धिं विषयत्वेन समुच्चिनोति । परिशिष्टौ तु विरोधद्योतकौ चकाराविति । प्रयोगस्तु पुरुषोऽपरिणामी सदा संप्रज्ञातव्युत्थानावस्थयोर्ज्ञातविषयत्वात् । यस्तु परिणामी नासौ सदा ज्ञातविषयो भवति यथा श्रोत्रादिरिति व्यतिरेकी हेतुः । अपरमपि वैधर्म्यमाह-किं च परार्थेति । बुद्धिः खलु क्लेशकर्मवासनादिभिर्विषयेन्द्रियादिभिश्च संहत्य पुरुषार्थमभिनिर्वर्तयन्ती परार्था । प्रयोगश्च-परार्था बुद्धिः संहत्यकारित्वाच्छयनासनाभ्यङ्गवदिति । पुरुषस्तु न तथेत्याह-स्वार्थः पुरुष इति । सर्वं पुरुषाय कल्पते । पुरुषस्तु न कस्मैचिदित्यर्थः । वैधर्म्यान्तरमाह तथा सर्वार्थेति । सर्वानर्थाञ्छान्तघोरमूढांस्तदाकारपरिणता बुद्धिरध्यवस्यति, सत्त्वरजस्तमसां चैते परिणामा इति सिद्धा त्रिगुणा बुद्धिरिति । न चैवं पुरुष इत्याह-गुणानां तूपद्रष्टा पुरुष इति । तत्प्रतिबिम्बितः पश्यति न तु तदाकारपरिणत इत्यर्थः । उपसंहरति-अत इति ।

अस्तु तर्हि विरूप इति । नात्यन्तं विरूपः कस्माद्यतः शुद्धोऽपि प्रत्ययानुपश्यः । यथा चैतत्तथोक्तं "वृत्तिसारूप्यमितरत्र" (१।४) इत्यत्र । तथा चोक्तं पञ्चशिखेन-अपरिणामिनी हि भोक्तृशक्तिरात्मा । अत एव बुद्धावप्रतिसंक्रमा च परिणामिनि बुद्धिरूपेऽर्थे संक्रान्तेव तद्वृत्तिं बुद्धिवृत्तिमनुपतति । नन्वसंक्रान्ता कथं संक्रान्तेव कथं वा वृत्तिं विनानुपततीत्यत आह-तस्याश्चेति । प्राप्तश्चैतन्योपग्रह उपरागो येन रूपेण तत्तथा प्राप्तचैतन्योपग्रहं रूपं यस्याः सा तथोक्ता । एतदुक्तं भवति- यथा निर्मले जलेऽसंक्रान्तोऽपि चन्द्रमाः संक्रान्तप्रतिबिम्बतया संक्रान्त इव, एवमत्राप्यसङ्क्रान्ताऽपि सङ्क्रान्तप्रतिबिम्बा चितिशक्तिः सङ्क्रान्तेव, तेन बुद्ध्यात्मत्वमापन्ना बुद्धिवृत्तिमनुपततीति । तदनेनानुपश्य इति व्याख्यातं, तामनुकारेण पश्यतीत्यनुपश्य इति ॥२०॥

દૃશ્ય સમજાવ્યું. દ્રષ્ટાના સ્વરૂપનો નિર્ણય કરવા માટે આ સૂત્રનો આરંભ કરવામાં આવે છે. દ્રષ્ટા દૃશિ માત્ર છે, છતાં પ્રત્યયને (અનુ) બુદ્ધિ પછી જુએ છે. "દૃશિમાત્ર" વગેરેથી ભાષ્યકાર સૂત્ર સમજાવે છે. વિશેષણો એટલે ધર્મો. એમનાથી "અપરામૃષ્ટા" એટલે અસંબંધિત. આનાથી "માત્ર" શબ્દના ગ્રહણનું તાત્પર્ય દર્શાવ્યું.

ભલે. જો દૃક્શક્તિ બધાં વિશેષણો વિનાની હોય, તો શબ્દ વગેરે વિષયો દેખાય નહીં. દૃશિથી અસંબંધિત દૃશ્ય હોતું નથી. આ શંકાના સમાધાન માટે કહે છે : "સઃ પુરુષો બુદ્ધેઃ પ્રતિસંવેદી". બુદ્ધિરૂપ દર્પણમાં પુરુષના પ્રતિબિંબનું સંક્રમણ પુરુષનું બુદ્ધિપ્રતિસંવેદીપણું છે. આ રીતે દૃશિની છાયાવાળી બુદ્ધિથી સંબંધિત શબ્દ વગેરે વિષયો દૃશ્ય બને છે.

ભલે. બુદ્ધિ અને ચૈતન્યની એકતા સાચી છે એમ શા માટે સ્વીકારવામાં આવતું નથી. એની છાયા બુદ્ધિમાં પડે છે એમ માનવાની શી જરૂર છે ? એના જવાબમાં કહે છે કે "સ બુદ્ધેઃ ન સરૂપઃ" એ પુરુષ બુદ્ધિ જેવા રૂપવાળો નથી. તો જુદા રૂપવાળાની છાયા પણ પડી શકે નહીં. એના જવાબમાં "નાત્યન્તં વિરૂપઃ"થી કહે છે કે એ એનાથી અત્યંત ભિન્નરૂપવાળો પણ નથી. "ન તાવત્"થી સમાનરૂપનો નિષેધ કરે છે. "કસ્માત્ ?" કેમ ? એવા પ્રશ્નથી એનું કારણ પૂછે છે. ''જ્ઞાતાજ્ઞાત-વિષયત્વાત્પરિણામિની બુદ્ધિ"થી જુદું રૂપ હોવાનું કારણ જણાવતાં કહે છે કે પરિણામી હોવાના કારણે બુદ્ધિ પુરુષથી જુદા રૂપવાળી છે. જ્યારે બુદ્ધિ શબ્દ વગેરે આકારની બને છે ત્યારે શબ્દ વગેરે લક્ષણવાળો વિષય એને જ્ઞાત હોય છે. જ્યારે એવો એનો આકાર હોતો નથી, ત્યારે અજ્ઞાત હોય છે. અને ક્યારેક જ એમના આકારવાળી બનતી હોવાથી બુદ્ધિ પરિણામી છે. "જ્ઞાત અને અજ્ઞાતવિષયવાળી હોવાથી, શ્રોત્ર વગેરેની જેમ બુદ્ધિ પરિણામી છે." એવો પ્રયોગ પણ થાય.

''સદા જ્ઞાતવિષયત્વં તુ પુરુષસ્ય..." વગેરેથી વિપરીત કારણને લીધે પુરુષ બુદ્ધિથી વિપરીત ધર્મવાળો છે એવું સિદ્ધ થાય છે, એમ કહે છે.

ભલે. પણ પુરુષ સદા જ્ઞાતવિષય હોય, તો એ કેવલી ન ગણાય, એવા આશયથી ''કસ્માત્''-કેમ ? એવો પ્રશ્ન પૂછી, એના જવાબમાં ''ન હિ બુદ્ધિશ્ચ નામ પુરુષવિષયશ્ચ..." વગેરેથી કહે છે કે બુદ્ધિ પુરુષનો વિષય હોય અને અગૃહીત પણ હોય એવો સંભવ નથી. નિરોધ અવસ્થામાં બુદ્ધિ અને અગ્રહણનો સહભાવ સંભવે છે, માટે ''પુરુષવિષયશ્ચ'' એમ કહીને વિરોધ સૂચવ્યો. પહેલા ''ચ''કારથી બુદ્ધિને વિષયતરીકે ગૃહીત થયેલી દર્શાવે છે, અને બાકીના બે ''ચ''કારોથી વિરોધ સૂચિત કરે છે. પ્રયોગ આવો થશે : ''પુરુષ સંપ્રજ્ઞાત અને વ્યુત્થાન અવસ્થાઓમાં

જ્ઞાતવિષય હોવાથી અપરિણામી છે. જે શ્રોત્ર વગેરેની જેમ પરિણામી હોય એ સદા જ્ઞાતવિષય હોઈ શકે નહીં." અહીં હેતુ વ્યતિરેકી (નકારાત્મક) છે.

"કિં ચ પરાર્થા બુદ્ધિઃ સંહત્યકારિત્વાત્" વગેરેથી બીજું વૈધર્મ્ય (જુદાપણું) બતાવે છે. બુદ્ધિ ક્લેશ અને ક્લેશવાસના તેમજ વિષયો અને ઇન્દ્રિયો સાથે મળીને પુરુષના અર્થનું સંપાદન કરે છે, માટે પરાર્થા છે. પ્રયોગ આવો થશે. "શય્યા, આસન અને અભ્યંગની જેમ બીજાઓ સાથે મળીને કાર્ય કરતી હોવાથી બુદ્ધિ પરાર્થ (બીજા માટે) છે." પુરુષ એવો નથી એમ "સ્વાર્થઃ પુરુષઃ"થી કહે છે. બધું પુરુષ માટે હોય છે. પુરુષ કોઈ માટે હોતો નથી. "તથા સર્વાર્થાધ્યવસાયકત્વાત્ ત્રિગુણા બુદ્ધિઃ" વગેરેથી બીજું વૈધર્મ્ય બતાવે છે. બધા શાન્ત, ઘોર અને મૂઢ પદાર્થોનો, એમના આકારે પરિણમીને બુદ્ધિ નિર્ણય કરે છે. એ બધા સત્ત્વ, રજ અને તમનાં પરિણામો છે, માટે બુદ્ધિ ત્રિગુણાત્મક છે, એમ સિદ્ધ થયું. "ગુણાનાં તૂપદ્રષ્ટા પુરુષઃ" પુરુષ તો ગુણોનો સાક્ષી છે- એમ કહીને પુરુષ એવો નથી એમ કહે છે. બુદ્ધિમાં પ્રતિબંબિત થઈને પુરુષ જુએ છે, એના આકારમાં પરિણમીને નહીં. "અતઃ" વગેરેથી ઉપસંહાર કરે છે.

તો પછી વિરૂપ (ભિન્ન રૂપવાળો) હોવો જોઈએ. પણ પુરુષ બુદ્ધિથી અત્યંત વિરૂપ નથી. કારણ કે શુદ્ધ હોવા છતાં બુદ્ધિના પ્રત્યયને અનુ-પછીથી-જુએ છે. આ વાત અગાઉ "વૃત્તિસારૂપ્યમિતરત્ર", ૧.૪માં કહી છે. અને પંચશિખાચાર્યે પણ કહ્યું છે : "અપરિણામી ભોક્તૃશક્તિ (પુરુષ) બુદ્ધિમાં સંક્રાન્ત ન થયેલી હોવા છતાં પરિણામી બુદ્ધિરૂપ પદાર્થમાં જાણે સંક્રાન્ત થઈ હોય, એમ એની (બુદ્ધિની) વૃત્તિનું અનુસરણ કરે છે." પણ અસંક્રાન્ત છતાં સંક્રાન્ત કેવી રીતે થાય છે અને વૃત્તિ વિના અનુસરણ કેવી રીતે કરે છે ? "તસ્યાશ્ચ.." વગેરેથી જવાબ આપે છે કે ચૈતન્યના રંગે રંગાયેલી જાણે ચેતન જેવી હોય એવી બને છે. કહેવાનો આશય એ છે કે જેમ નિર્મળ જળમાં ચંદ્ર સંક્રાન્ત ન થયેલો હોવા છતાં જાણે સંક્રાન્ત થયો હોય એમ જણાય છે, એ રીતે અહીં પણ ચિતિશક્તિ અસંક્રાન્ત હોવા છતાં, સંક્રાન્ત થયેલા પ્રતિબિંબવાળી, જાણે સંક્રાન્ત થઈ હોય એમ જણાય છે. તેથી એ (ચિતિશક્તિ) બુદ્ધિના આકારસાથે એકરૂપ થઈને બુદ્ધિવૃત્તિનું અનુસરણ કરે છે. આનાથી "અનુપશ્યઃ" શબ્દની વ્યાખ્યા કરવામાં આવી. એને (બુદ્ધિને) અનુસરીને જોતી હોવાથી "અનુપશ્ય" કહેવાય છે. ૨૦

★

तदर्थ एव दृश्यस्यात्मा ॥૨૧॥

એ (પુરુષ)ને માટે જ દૃશ્યનું સ્વરૂપ છે. ૨૧

भाष्य

दृशिरूपस्य पुरुषस्य कर्मरूपतामापन्नं दृश्यमिति तदर्थ एव दृश्यस्यात्मा स्वरूपं भवतीत्यर्थः । तत्स्वरूपं तु पररूपेण प्रतिलब्धात्मकं भोगापवर्गार्थतायां कृतायां पुरुषेण न दृश्यत इति । स्वरूपहानादस्य नाशः प्राप्तः, न तु विनश्यति ॥२१॥

દૃશિરૂપ પુરુષનું કર્મ (ભોગ્ય) હોવાથી દૃશ્યનું સ્વરૂપ એને માટે જ છે, એવો અર્થ છે. એનું સ્વરૂપ અન્ય માટે અસ્તિત્વ ધરાવતું હોવાથી પુરુષના ભોગ અને મોક્ષનું સંપાદન કર્યા પછી, પુરુષ વડે જોવાતું નથી. આમ સ્વરૂપની હાનિ થવાથી એનો નાશ થવાનો પ્રસંગ આવ્યો, પણ નષ્ટ થતું નથી. ૨૧

तत्त्व वैशारदी

द्रष्टृदृश्ययोः स्वरूपमुक्त्वा स्वस्वामिलक्षणसम्बन्धाङ्गं दृश्यस्य द्रष्टृर्थत्वमाह-तदर्थ एव दृश्यस्यात्मेति । व्याचष्टे-दृशिरूपस्य पुरुषस्य भोक्तुः कर्मरूपतां भोग्यतामापन्नं दृश्यमिति, तस्मात्तदर्थ एव द्रष्टृर्थ एव दृश्यस्यात्मा भवति न तु दृश्यार्थः । ननु नात्मात्मार्थं इत्यत आह-स्वरूपं भवतीति । एतदुक्तं भवति-सुखदुःखात्मकं दृश्यं भोग्यम् । सुखदुःखे चानुकूलयितृप्रतिकूलयितृणी तत्त्वेन तदर्थे एव व्यवतिष्ठेते । विषया अपि हि शब्दादयस्तादात्म्यादेव चानुकूलयितारः प्रतिकूलयितारश्च । न चात्मैवैषामनुकूलनीयः प्रतिकूलनीयश्च, स्वात्मनि वृत्तिविरोधात् । अतः पारिशेष्याच्चितिशक्तिरेवानुकूलनीया प्रतिकूलनीया च । तस्मात्तदर्थमेव दृश्यं न तु दृश्यार्थम् । अतश्च तदर्थ एव दृश्यस्यात्मा न दृश्यार्थः; यत्स्वरूपमस्य यावत्पुरुषार्थमनुवर्तते, निर्वर्तिते च पुरुषार्थे निवर्तते इत्याह - स्वरूपमिति । स्वरूपं तु दृश्यस्य जडं पररूपेणात्मरूपेण चैतन्येन प्रतिलब्धात्मकमनुभूतस्वरूपं भोगापवर्गार्थतायां कृतायां पुरुषेण न दृश्यते । भोगः सुखाद्याकारः शब्दाद्यनुभवः । अपवर्गः सत्त्वपुरुषान्यतानुभवः । तच्चैतदुभयमप्यजानतो जडाया बुद्धेः पुरुषच्छायापत्त्येति पुरुषस्यैव । तथा च पुरुषभोगापवर्गयोः कृतयोर्दृश्यस्य भोगापवर्गार्थता समाप्यत इति भोगापवर्गार्थतायां कृतायामित्युक्तम् । अत्रान्तरे चोदयति-स्वरूपहानादिति । परिहरति न तु विनश्यतीति ॥२१॥

દ્રષ્ટા અને દૃશ્યનું સ્વરૂપ કહીને, હવે "तदर्थ एव..." વગેરે સૂત્રથી એ બેના સ્વ-સ્વામીભાવ લક્ષણવાળા સંબંધના અંગ તરીકે દૃશ્યની દ્રષ્ટા માટે જ હયાતિ છે, એમ કહે છે. "दृशिरूपस्य पुरुषस्य..." વગેરેથી સૂત્ર સમજાવે છે. દૃશિરૂપ ભોક્તા પુરુષનું કર્મ બનીને ભોગ્યપણાને પ્રાપ્ત થયેલું દૃશ્ય એને - પુરુષને

- માટે જ હોવાથી એનું સ્વરૂપ એને માટે છે, પોતાને માટે નહીં, એમ કહે છે. (સૂત્રમાં "આત્મા" શબ્દ પ્રયોજ્યો છે, તેથી પ્રશ્ન થાય છે કે) આત્મા, આત્મા માટે કેવી રીતે હોઈ શકે ? જવાબમાં "સ્વરૂપં ભવતિ"એમ કહે છે, એનો આશય એ છે કે સુખદુઃખરૂપ દૃશ્ય ભોગ્ય છે. અને સુખદુઃખ અનુકૂળ કે પ્રતિકૂળ સંવેદના ઉત્પન્ન કરનાર હોવાથી, તાત્વિક રીતે એ પુરુષ માટે અસ્તિત્વ ધરાવે છે. શબ્દ વગેરે વિષયો તાદાત્મ્યથી અનુકૂળતા કે પ્રતિકૂળતા ઉત્પન્ન કરે છે. તેઓ પોતાની અંદર વૃત્તિના વિરોધને કારણે પોતાને માટે અનુકૂળતા કે પ્રતિકૂળતા ઉત્પન્ન કરતા નથી. તેથી પરિશેષ (એક જ રસ્તો બાકી રહેવા)થી તેઓ ચિતિશક્તિને અનુકૂળ કે પ્રતિકૂળ સંવેદના પહોંચાડે છે, એમ કહેવું જોઈએ. તેથી ચિતશક્તિ માટે દૃશ્ય છે, પોતાના માટે નહીં. આ કારણે દૃશ્યનો આત્મા પુરુષ માટે છે, દૃશ્ય માટે નહીં. પુરુષના પ્રયોજનનું અનુસરણ કરે એ જ એનું સ્વરૂપ છે, માટે પુરુષાર્થ પૂરો થતાં પોતે નિવૃત્ત થાય છે. દૃશ્ય પોતે જડ છે. પોતાનાથી અન્ય પુરુષના ચૈતન્યથી લબ્ધાત્મક કે સ્વરૂપને પ્રાપ્ત થાય છે. તેથી પુરુષના ભોગ-મોક્ષરૂપ પ્રયોજન પૂરું કર્યા પછી એ પુરુષ વડે જોવાતું નથી. ભોગ એટલે સુખ વગેરે લક્ષણવાળા શબ્દ વગેરે વિષયોનો અનુભવ અને મોક્ષ એટલે સત્ત્વ અને પુરુષની ભિન્નતાનો અનુભવ. આ બંને (ભોગ-મોક્ષ)ને જડ હોવાથી ન જાણતી બુદ્ધિ, પુરુષની છાયાને કારણે જાણે છે. તેથી એ પુરુષની માલિકીની છે. અને એના મોક્ષરૂપ પ્રયોજનને પૂરું કર્યા પછી, દૃશ્યની ભોગ-મોક્ષ માટેની ક્ષમતા સમાપ્ત થાય છે. આ કારણે ભોગમોક્ષરૂપ પ્રયોજન સિદ્ધ થયા પછી પુરુષ એને જોતો નથી, એમ કહ્યું. તો પછી દૃશ્યની સ્વરૂપહાનિ થશે, એવી શંકાનો "ન તુ વિનશ્યતિ" - નષ્ટ થતું નથી- એમ કહીને પરિહાર કરે છે. ૨૧

કસ્માત્ ? કેમ (નષ્ટ થતું નથી) ?

कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात् ॥२२॥

કૃતાર્થ (મુક્ત) પુરુષ માટે નષ્ટ થયું હોવા છતાં, એનાથી અન્ય (બદ્ધ) પુરુષોને સમાનપણે દેખાતું હોવાથી. ૨૨

ભાષ્ય

कृतार्थमेकं पुरुषं प्रति दृश्यं नष्टमपि नाशं प्राप्तमप्यनष्टं तदन्यपुरुष-साधारणत्वात् । कुशलं पुरुषं प्रति नाशं प्राप्तमप्यकुशलान्पुरुषान्प्रति न कृतार्थमिति तेषां दृशेः कर्मविषयतामापन्नं लभत एव पररूपेणात्मरूपमिति । अतश्च दृग्दर्शनशक्त्योर्नित्यत्वादनादिः संयोगो व्याख्यात इति । तथा

चोक्तम्-धर्मिणामनादिसंयोगाद्धर्ममात्राणामप्यनादिः संयोग इति ॥२२॥

કૃતકૃત્ય એક પુરુષ પ્રત્યે દૃશ્ય નષ્ટ થયું હોવા છતાં, એનાથી અન્ય પુરુષો પ્રત્યે સાધારણતયા દેખાતું હોવાથી નષ્ટ થતું નથી. કુશળ (મુક્ત) પુરુષ પ્રતિ નષ્ટ થયું હોવા છતાં અકુશળ (બદ્ધ) પુરુષો પ્રતિ કૃતાર્થ ન થયું હોવાથી, એમની દૃશિ(દર્શનશક્તિ)ની કર્મ વિષયતાને પ્રાપ્ત થઈને, અન્યરૂપથી, પોતાના અસ્તિત્વને જાળવી રાખતું હોવાથી, નષ્ટ નથી થયું એમ કહેવાય છે. તેથી અગાઉ સમજાવ્યા પ્રમાણે, દૃક્શક્તિ અને દર્શનશક્તિ નિત્ય હોવાથી એમનો સંયોગ અનાદિ છે. વળી એમ પણ કહ્યું છે કે ધર્મીઓનો સંયોગ અનાદિ હોવાથી ધર્મમાત્રનો સંયોગ પણ અનાદિ છે.૨૨

तत्त्व वैशारदी

नन्वत्यन्तानुपलभ्यं कथं न विनश्यतीत्याशयवान्पृच्छति-कस्मादिति । सूत्रेणोत्तरमाह-कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात् । कृतोऽर्थो यस्य पुरुषस्य स तथा । तं प्रति नष्टमप्यनष्टं तद्दृश्यम् । कुतः ? सर्वान् पुरुषान्कुशलानकुशलान्प्रति साधारणत्वात् । व्याचष्टे - कृतार्थमेकमिति । नाशोऽदर्शनम् । अनष्टं तु दृश्यम्, अन्यपुरुषसाधारणत्वात् । तस्माद्दृश्यात्परस्यात्मनश्चैतन्यं रूपं तेन, तदिह श्रुतिस्मृतीतिहासपुराणप्रसिद्धमव्यक्तमनवयवमेकमनाश्रयं व्यापि नित्यं विश्वकार्यशक्तिमत् । यद्यपि कुशलेन तं प्रति कृतकार्यं न दृश्यते तथाप्यकुशलेन दृश्यमानं न नास्ति । न हि रूपमन्धेन न दृश्यत इति चक्षुष्मतापि दृश्यमानमभावप्राप्तं भवति । न च प्रधानवदेक एव पुरुषः, तन्नानात्वस्य जन्ममरणसुखदुःखोपभोगमुक्तिसंसारव्यवस्थया सिद्धेः । एकत्वश्रुतीनां च प्रमाणान्तरविरोधात्कथञ्चिद्देशकालविभागाभावेन भक्त्याप्युपपत्तेः । प्रकृत्येकत्वपुरुषनानात्वयोश्च श्रुत्यैव साक्षात्प्रतिपादनात् ।

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः ।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥ (श्वे० उप० ४।५)

इति श्रुतिः । अस्या एव श्रुतेश्चानेन सूत्रेणार्थोऽनूदित इति । यतो दृश्यं नष्टमप्यनष्टं पुरुषान्तरं प्रत्यस्ति, अतो दृग्दर्शनशक्त्योर्नित्यत्वादनादिः संयोगो व्याख्यातः । अत्रैवागमिनामनुमतिमाह-तथा चोक्तमिति । धर्मिणां गुणानामात्मभिरनादिसंयोगाद्धर्ममात्राणां महदादीनामप्यनादिः संयोग इति । एकैकस्य महदादेः संयोगोऽनादिरप्यनित्य एव यद्यपि तथापि सर्वेषां महदादीनां नित्यः, पुरुषान्तराणां साधारणत्वाद्, अत उक्तं धर्ममात्राणामिति । मात्रग्रहणेन व्याप्तिं गमयति । अत एतद्भवति-यद्यप्येकस्य महतः

संयोगोऽतीतामापन्नस्तथापि महदन्तरस्य पुरुषाणां संयोगो नातीत इति नित्य उक्तः ॥૨૨॥

સદંતર દેખાતું બંધ થયેલું દૃશ્ય નષ્ટ કેમ થતું નથી ? એવા આશયથી "કસ્માત્ ?" - કેમ ? - એવો પ્રશ્ન પૂછે છે. "કૃતાર્થં પ્રતિ..." વગેરે સૂત્રથી એનો જવાબ આપે છે. જે પુરુષનો અર્થ પૂરો થયો હોય એ કૃતાર્થ કહેવાય. એને માટે નષ્ટ થયું હોવા છતાં દૃશ્ય નષ્ટ થતું નથી. કેમ ? બધા કુશળ અને અકુશળ પુરુષો પ્રત્યે સર્વસાધારણ રીતે દેખાતું હોવાના કારણે. (મુક્ત પુરુષો પણ પ્રારબ્ધ ક્ષય થતાં સુધી દૃશ્ય જુએ છે, પણ પોતાના આત્માથી ભિન્ન તરીકે ન જોતા હોવાથી, એનું દેખાવું ન દેખાવું બંને સમાન છે.) "કૃતાર્થમેકમ્..." વગેરેથી ભાષ્યકાર સૂત્રની વ્યાખ્યા કરે છે. નાશ એટલે અદર્શન. દૃશ્ય અદર્શનપણાને પ્રાપ્ત થતું નથી, કારણ કે અન્ય પુરુષો પ્રત્યે એ સાધારણ (દૃશ્ય) છે. આ દૃશ્યથી પર આત્માનું સ્વરૂપ ચૈતન્ય છે. એ ચૈતન્યથી (દૃશ્યને પોતાના સ્વરૂપનો લાભ થાય છે). એ દૃશ્ય શ્રુતિ, સ્મૃતિ, પુરાણ અને ઇતિહાસમાં અવ્યક્ત, નિરવયવ, એક, આશ્રયરહિત, વ્યાપક, નિત્ય અને વિશ્વરૂપ કાર્યને ઉત્પન્ન કરવાની શક્તિથી યુક્ત તરીકે પ્રસિદ્ધ છે. જો કે કુશળને એ કૃતકાર્ય થયેલું હોવાથી દેખાતું નથી, છતાં અકુશળને દેખાતું હોવાથી નથી એમ નથી. અંધ માણસ રૂપ જોતો નથી, છતાં આંખોવાળા મનુષ્યો જુએ છે, તેથી એનો અભાવ થતો નથી.

વળી પ્રધાનની જેમ પુરુષ એક જ નથી. જન્મ, મરણ, સુખ-દુઃખ કે ભોગ અને મોક્ષરૂપ સંસાર વ્યવસ્થિત રીતે ચાલ્યા કરે છે, એથી પુરુષોનું બહુત્વ સિદ્ધ થાય છે. પુરુષ એક છે એમ કહેતી શ્રુતિઓ, અન્ય પ્રમાણોથી વિરુદ્ધ હોવાથી, દેશકાળવિભાગના અભાવને કારણે કે ભક્તિની અતિશયતાના કારણે વગેરે કોઈ યુક્તિથી સમજાવવી જોઈએ. પ્રકૃતિ એક અને પુરુષો અનેક છે, એ હકીકત સાક્ષાત્ શ્રુતિ જ પ્રતિપાદિત કરે છે : - "લાલ, સફેદ અને કાળી એક અજા (અજન્મા પ્રકૃતિ) પોતાના જેવા રૂપોવાળી ઘણી પ્રજા ઉત્પન્ન કરે છે. એક અજ (અજન્મા પુરુષ) એનું સેવન કરતાં એને અનુસરે છે. અને બીજો અજ ભોગવીને એને ત્યજે છે. (શ્વે. ઉ. ૪.૫) પ્રસ્તુત સૂત્ર આ શ્રુતિનો અર્થ પોતાની રીતે રજૂ કરે છે. દૃશ્ય નષ્ટ થવા છતાં, અન્ય પુરુષો પ્રતિ અનષ્ટ છે, તેથી દૃક્ અને દર્શનશક્તિઓ નિત્ય છે અને એમનો સંબંધ અનાદિ છે, એમ સમજવું જોઈએ. "તથા ચોક્તમ્" વગેરેથી આ વિષે આગમના અનુયાયીઓની સહમતિ દર્શાવે છે. આત્માઓ સાથે ધર્મી ગુણોનો સંયોગ અનાદિ છે, તેથી મહત્તત્ત્વ વગેરે ધર્મોનો સંયોગ પણ અનાદિ છે એમ માનવું જોઈએ, કેમકે એ ધર્મો અન્ય

(અકુશળ) પુરુષો પ્રત્યે સાધારણ છે. "માત્ર" શબ્દ પ્રયોજીને વ્યાપ્તિ દર્શાવે છે. તેથી એવું સિદ્ધ થયું કે એક મહત્નો એક પુરુષ સાથેનો સંયોગ અતીતપણાને પ્રાપ્ત થયો, છતાં અન્ય મહત્નો બીજા પુરુષ સાથેનો સંબંધ અતીત બન્યો નથી, તેથી એને નિત્ય કહ્યો છે. ૨૨

★

संयोगस्वरूपाभिधित्सयेदं सूत्रं प्रववृते- સંયોગનું સ્વરૂપ કહેવા માટે આ સૂત્ર પ્રવૃત્ત થયું છે-

स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः ॥२३॥

સ્વ (દૃશ્ય) અને સ્વામી (દ્રષ્ટા) બંનેના પોતાના સ્વરૂપની પ્રાપ્તિનો હેતુ સંયોગ છે. ૨૩

ભાષ્ય

पुरुषः स्वामी दृश्येन स्वेन दर्शनार्थं संयुक्तः । तस्मात्संयोगाद् दृश्यस्योपलब्धिर्या स भोगः, या तु द्रष्टुः स्वरूपोपलब्धिः सोऽपवर्गः । दर्शनकार्यावसानः संयोग इति दर्शनं वियोगस्य कारणमुक्तम् । दर्शनमदर्शनस्य प्रतिद्वन्द्वीत्यदर्शनं संयोगनिमित्तमुक्तम् । नात्र दर्शनं मोक्षकारणम्, अदर्शनाभावादेव बन्धाभावः स मोक्ष इति । दर्शनस्य भावे बन्धकारणस्यादर्शनस्य नाश इत्यतो दर्शनज्ञानं कैवल्यकारणमुक्तम् ।

१ - किं चेदमदर्शनं नाम ? किं गुणानामधिकारः ?

२ - आहोस्विद् दृशिरूपस्य स्वामिनो दर्शितविषयस्य प्रधान-चित्तस्यानुत्पादः स्वस्मिन्दृश्ये विद्यमाने दर्शनाभावः ?

३ - किमर्थवत्ता गुणानाम् ?

४ - अथाविद्या स्वचितेन सह निरुद्धा स्वचित्तस्योत्पत्तिबीजम् ?

५ - किं स्थितिसंस्कारक्षये गतिसंस्काराभिव्यक्तिः ? यत्रेदमुक्तं-प्रधानं स्थित्यैव वर्तमानं विकाराकरणादप्रधानं स्यात् तथा गत्यैव वर्तमानं विकारनित्यत्वादप्रधानं स्यात् । उभयथा चास्य प्रवृत्तिः प्रधानव्यवहारं लभते, नान्यथा । कारणान्तरेष्वपि कल्पितेष्वेष समानश्चर्चः ।

६ - दर्शनशक्तिरेवादर्शनमित्येके;, प्रधानस्यात्मख्यापनार्था

प्रवृत्तिरिति श्रुतेः । सर्वबोध्यबोधसमर्थः प्राक्प्रकृतेः पुरुषो न पश्यति, सर्वकार्यकरणसमर्थं दृश्यं तदा न दृश्यत इति ।

૭ - उभयस्याप्यदर्शनं धर्म इत्येके । तत्रेदं दृश्यस्य स्वात्मभूतमपि पुरुषप्रत्ययापेक्षं दर्शनं दृश्यधर्मत्वेन भवति, तथा पुरुषस्यानात्मभूतमपि दृश्यप्रत्ययापेक्षं पुरुषधर्मत्वेनेव दर्शनमवभासते ।

૮ - दर्शनज्ञानमेवादर्शनमिति केचिदभिदधति । इत्येते शास्त्रगता विकल्पाः । तत्र विकल्पबहुत्वमेतत्सर्वपुरुषाणां गुणानां संयोगे साधारण-विषयम् ॥૨૩॥

સ્વામી પુરુષ સ્વ-દૃશ્ય-સાથે દર્શન માટે જોડાય છે. એ સંયોગ (જોડાણ)થી દૃશ્યની ઉપલબ્ધિ ભોગ છે. અને દ્રષ્ટાના સ્વરૂપની ઉપલબ્ધિ મોક્ષ છે. આમ દર્શનરૂપ કાર્ય પૂરું થાય ત્યાં સુધી આ સંયોગ ટકે છે, માટે દર્શનને વિયોગનું કારણ કહ્યું છે. દર્શન અદર્શનનું વિરોધી છે, માટે અદર્શનને સંયોગનું કારણ કહ્યું છે. અહીં દર્શન મોક્ષનું કારણ નથી. અદર્શનના (અજ્ઞાનના) અભાવથી બંધનનો અભાવ થાય છે, એ મોક્ષ છે. દર્શન (જ્ઞાન) અસ્તિત્વમાં આવે ત્યારે બંધનનું કારણ અદર્શન નષ્ટ થાય છે, માટે દર્શનરૂપ જ્ઞાનને કૈવલ્યનું કારણ કહ્યું છે.

આ અદર્શન શું છે ? ૧. શું એ ગુણોનો અધિકાર (કાર્ય) છે ? ૨. અથવા જેનાથી વિષયો દર્શાવવામાં આવે છે, એ દૃશિરૂપ સ્વામીના પ્રધાનરૂપ ચિત્તની અનુત્પત્તિ ? એટલે સ્વ-એવું ચિત્ત કે દૃશ્ય વિદ્યમાન હોય છતાં દર્શન (કે વૃત્તિ)નો અભાવ ? ૩. અથવા ગુણોની અર્થવત્તા કે એમનું પ્રયોજનવાળા હોવું ? ૪. અથવા પોતાના ચિત્તની ઉત્પત્તિના બીજરૂપ, પોતાના ચિત્તસાથે નિરુદ્ધ થયેલી અવિદ્યા ? ૫. અથવા, સ્થિતિ સંસ્કારોનો ક્ષય થતાં ગતિ સંસ્કારોની અભિવ્યક્તિ ? આ વિષે કહ્યું છે : "પ્રધાન જો ફક્ત (પ્રલયની જેમ) સ્થિતિશીલ રહે, તો પરિણામો ન નિપજાવવાથી અપ્રધાન રહે, અને જો સતત ગતિશીલ જ રહે, તો પરિણામો નિત્ય ઉત્પન્ન થવાથી પણ પ્રધાન ન રહે. તેથી એની બંને પ્રકારની વૃત્તિ પ્રધાનના યોગ્ય વ્યવહારનું સંપાદન કરી શકે, બીજી કોઈ રીતે નહીં. બીજા મતોમાં કલ્પેલાં કારણો માટે પણ આ બાબત (વિચાર) સમાન છે. ૬. કેટલાક દર્શનશક્તિને

४ અદર્શન માને છે. કારણ કે શ્રુતિમાં પ્રધાનની પ્રવૃત્તિ પોતાના ખ્યાપન માટે છે, એમ કહ્યું છે. બધા જ્ઞેય પદાર્થોને જાણવાની શક્તિવાળો પુરુષ (પ્રધાનની) પ્રવૃત્તિ પહેલાં એમને જોતો નથી. તેમજ બધાં કાર્ય કરવામાં સમર્થ દૃશ્ય-પ્રધાન, પ્રવૃત્તિ પહેલાં દેખાતું નથી. ૭. કેટલાક અદર્શન બંને (દ્રષ્ટા-દૃશ્ય)નો ધર્મ છે, એમ માને છે. દૃશ્યનું આત્મભૂત દર્શન પણ પુરુષના જ્ઞાનની અપેક્ષા રાખે છે, અને દૃશ્યનો ધર્મ બને છે. અને પુરુષનું આત્મભૂત નથી, છતાં દર્શન દૃશ્યના જ્ઞાનની અપેક્ષા રાખે છે, અને પુરુષનો ધર્મ હોય એવું જણાય છે. ૮. કેટલાક દર્શન જ્ઞાનને જ અદર્શન કહે છે.

આ બધા વિકલ્પો શાસ્ત્રમાં રજૂ થયા છે. આ અનેક વિકલ્પો બધા પુરુષો સાથે ગુણોના સંયોગનું કારણ છે. ૨૩

तत्त्व वैशारदी

तदेवं तादर्थ्ये संयोगकारण उक्ते प्रासङ्गिके प्रधाननित्यत्वे संयोगसामान्य-नित्यत्वे हेतौ चोक्ते संयोगस्य यत्स्वरूपमसाधारणो विशेष इति यावत्तदभिधित्सयेदं सूत्रं प्रववृते-स्वस्वामिशक्त्योः सरूपोपलब्धिहेतुः संयोग इति । यतो दृश्यं तदर्थमतस्तज्जनितमुपकारं भजमानः पुरुषस्तस्य स्वामी भवति । भवति च तद् दृश्यमस्य स्वम् । स चानयोः संयोगः शक्तिमात्रेण व्यवस्थितस्तत्स्वरूपोपलब्धिहेतुः । तदेतद्भाष्यमवद्योतयति-पुरुषः इति । पुरुषः स्वामी योग्यतामात्रेण दृश्येन स्वेन योग्यतयैव दर्शनार्थं संयुक्तः । शेषं सुगमम् । स्यादेतत्-द्रष्टुः स्वरूपोपलब्धि-रपवृज्यतेऽनेनेत्यपवर्ग उक्तः । न च मोक्षः साधनवान् । तथा सत्ययं मोक्षत्वादेव च्यवेतेत्यत आह- दर्शनकार्यावसान इति । दर्शनकार्यावसानो बुद्धिविशेषेण सह पुरुषविशेषस्य संयोग इति दर्शनं वियोगकारणमुक्तम् । कथं पुनर्दर्शनकार्यावसानत्वं संयोगस्येत्यत आह-दर्शनमिति । ततः किमित्यत आह-अदर्शनमिति । अदर्शनमविद्या संयोगनिमित्तमित्युक्तम् । उक्तमर्थं स्पष्टयति-नात्रेति । ननु दर्शनमदर्शनं विरोधि विनिवर्तयतु, बन्धस्य कुतो निवृत्तिरित्यत आह- दर्शनस्येति । बुद्ध्यादिविविक्तस्यात्मनः स्वरूपावस्थानं मोक्ष उक्तो, न तस्य साधनं दर्शनमपि त्वदर्शननिवृत्तिरित्यर्थः ।

असाधारणं संयोगहेतुमदर्शनविशेषं ग्रहीतुमदर्शनमात्रं विकल्पयति-किं चेदमिति । पर्युदासं गृहीत्वाह-किं गुणानामधिकार इति । अधिकारः कार्यारम्भणसामर्थ्यम् । ततो हि संयोगः संसारहेतुरुपजायते ।

प्रसज्यप्रतिषेधं गृहीत्वा द्वितीयं विकल्पमाह-आहोस्विदिति । दर्शितो विषयः

शब्दादिः सत्त्वपुरुषान्यता च येन चित्तेन तस्य तद्विषयस्यानुत्पादः । एतदेव स्फोरयति- स्वस्मिन्दृश्ये शब्दादौ सत्त्वपुरुषान्यतायां चेति । तावदेव प्रधानं विचेष्टते न यावद् द्विविधं दर्शनमभिनिर्वर्तयति । निष्पादितोभयदर्शनं तु विनिवर्तत इति ।

पर्युदास एव तृतीयं विकल्पमाह-किमर्थवत्ता गुणानाम् इति । सत्कार्य-वादसिद्धौ हि भाविनावपि भोगापवर्गार्थावव्यपदेश्यतया स्त इत्यर्थः ।

पर्युदास एव चतुर्थं विकल्पमाह-अथाविद्येति । प्रतिसर्गकाले स्वचित्तेन सह निरुद्धा प्रधानसाम्यमागता वासनारूपेण स्वचित्तोत्पत्तिबीजम् । तेन दर्शनादन्याऽ-विद्यावासनैवादर्शनमुक्ता ।

पयुदास एव पञ्चमं विकल्पमाह-किं स्थितिसंस्कारस्य प्रधानवर्तिनः साम्यपरिणामपरम्परावाहिनः क्षये, गतिर्महदादिविकारारम्भस्तद्धेतुः संस्कारः प्रधानस्य गतिसंस्कारस्तस्याभिव्यक्तिः कार्योन्मुखत्वम् । तदुभयसंस्कारसद्भावे मतान्तरानुमतिमाह- यत्रेदमुक्तमैकान्तिकत्वं व्यासेधद्भिः, प्रधीयते जन्यते विकारजातमनेनेति प्रधानम् । तच्चेत्स्थित्यैव वर्तेत न कदाचिद्गत्या ततो विकाराकरणान्न प्रधीयते तेन किञ्चिदित्यप्रधानं स्यात् । अथ गत्यैव वर्तेत न कदाचिदपि स्थित्या, तत्राह-तथा गत्यैवेति । क्वचित्पाठः 'स्थित्यै गत्यै' इति । तादर्थ्ये चतुर्थी, एवकारश्च द्रष्टव्यः । स्थित्यै चेन्न वर्तेत न क्वचिद्विकारो विनश्येत् । तथा च भावस्य सतो विनाशिनो नोत्पत्तिरपीति विकारत्वादेव च्यवेत । एवं च न प्रधीयतेऽत्र किञ्चिदित्यप्रधानं स्यात् । तदुभयथा स्थित्या गत्या चास्य प्रवृत्तिः प्रधानव्यवहारं लभते नान्यथैकान्ताभ्युपगमे । न केवलं प्रधाने, कारणान्तरेष्वपि परब्रह्मतन्मायापरमाण्वादिषु कल्पितेषु समानश्चर्चो विचारः । तान्यपि हि स्थित्यैव वर्तमानानि विकाराकरणादकारणानि स्युः, गत्यैव वर्तमानानि विकारनित्यत्वादकारणानि स्युरिति च ।

पर्युदास एव षष्ठं विकल्पमाह-दर्शनशक्तिरेवेति । यथा प्रजापतिव्रते नेक्षेतोद्यन्तमादित्यमित्यनीक्षणप्रत्यासन्नः संकल्पो गृह्यत एवमिहापि दर्शननिषेधे तत्प्रत्यासन्ना तन्मूला शक्तिरुच्यते । सा च दर्शनं भोगादिलक्षणं प्रसोतुं द्रष्टारं दृश्येन योजयतीति। अत्रैव श्रुतिमाह-प्रधानस्येति । स्यादेतत्- आत्मख्यापनार्थं प्रधानं प्रवर्तत इति श्रुतिराह, न त्वात्मदर्शनशक्तिः प्रवर्तत इत्यत आह- सर्वबोध्यबोधसमर्थ इति । प्राक्प्रवृत्तेः प्रधानस्य नात्मख्यापनमात्रं प्रवृत्तौ प्रयोजकम्, असामर्थ्ये तदयोगात् । तस्मात्सामर्थ्यं प्रवृत्तेः प्रयोजकमिति श्रुत्यार्थादुक्तमित्यर्थः । दर्शनशक्तिः प्रधानाश्रयेत्यङ्गीकृत्य षष्ठः कल्पः ।

इमामेवोभयाश्रयामास्थाय सप्तमं विकल्पमाह-उभयस्य पुरुषस्य च दृश्यस्य

चादर्शनं दर्शनशक्तिर्धर्म इत्येके । स्यादेतत्- मृष्यामहे दृश्यस्येति, तस्य सर्वशक्त्याश्रयत्वात्, न द्रष्टुरिति पुनर्मृष्यामः । न हि तदाधारा ज्ञानशक्तिः, तत्र ज्ञानस्यासमवायात् । अन्यथा परिणामापत्तिरित्यत आह-तत्रेदमिति । भवतु दृश्यात्मकं, तथापि तस्य जडत्वेन तद्गतशक्तिकार्यं दर्शनमपि जडमिति न शक्यं तद्धर्मत्वेन विज्ञातुम्, जडस्य स्वयमप्रकाशत्वात् । अतो दृशेरात्मनः प्रत्ययं चैतन्यच्छायापत्तिमपेक्ष्य दर्शनं तद्धर्मत्वेन भवति विज्ञायते, विषयेण विषयिण उपलक्षणात् । नन्वेतावतापि दृश्यधर्मत्वमस्य ज्ञानस्य भवति, न तु पुरुषधर्मत्वमपीत्यत आह- तथा पुरुषस्येति । सत्यं पुरुषस्यानात्मभूतमेव तथापि दृश्यबुद्धिसत्त्वस्य यः प्रत्ययश्चैतन्यच्छायापत्तिस्तमपेक्ष्यपुरुषधर्मत्वेनेव, न तु पुरुषधर्मत्वेन । एतदुक्तं भवति- चैतन्यबिम्बोद्ग्राहितया बुद्धिचैतन्ययोरभेदाद् बुद्धिधर्माश्चैतन्यधर्मा इव चकासतीति ।

अष्टमं विकल्पमाह-दर्शनज्ञानमेव शब्दादीनामदर्शनं न तु सत्त्वपुरुषान्यताया इति केचित् । यथा चक्षू रूपे प्रमाणमपि रसादावप्रमाणमुच्यते । एतदुक्तं भवति- सुखाद्याकारशब्दादिज्ञानानि स्वसिद्ध्यनुगुणतया द्रष्टृदृश्यसंयोगमाक्षिपन्तीति । तदेवं विकल्प्य चतुर्थं विकल्पं स्वीकर्तुमितरेषां विकल्पानां सांख्यशास्त्रगतानां सर्वपुरुषसाधारण्येन भोगवैचित्र्याभावप्रसङ्गेन दूषयति- इत्येते शास्त्रगता इति ॥२३॥

આમ પુરુષાર્થને સંયોગનું કારણ કહી, પ્રાસંગિક પ્રધાનની નિત્યતા અને બધા પુરુષો સાથે સામાન્ય સંયોગની નિત્યતાનો હેતુ કહી, સંયોગના સ્વરૂપને કે એની અસાધારણ વિશેષતા કહેવા માટે "स्वस्वामिशक्त्योः"... વગેરે સૂત્ર પ્રવૃત્ત થાય છે. દૃશ્ય પુરુષ માટે છે, તેથી એણે કરેલા ઉપકારનો ભોગ કરનાર પુરુષ એનો સ્વામી કહેવાય છે, અને દૃશ્ય એનું સ્વ (પોતાનું) કહેવાય છે. આ એમનો સંયોગ શક્તિ માત્ર રૂપે રહે છે અને એમના સ્વરૂપની ઉપલબ્ધિનો હેતુ બને છે. "पुरुषः स्वामी..." વગેરેથી ભાષ્યકાર આ વાત સ્પષ્ટ રીતે સમજાવે છે. પુરુષ-સ્વામી-યોગ્યતામાત્રથી સ્વ (પોતાના) દૃશ્ય સાથે યોગ્યતાને કારણે જ દર્શન માટે જોડાય છે. બાકીનું સુગમ છે.

ભલે. દ્રષ્ટાના સ્વરૂપની ઉપલબ્ધિને અપવર્ગ કહી કારણ કે એનાથી દૃશ્યનું વર્જન (ત્યાગ) થાય છે. મોક્ષનું કોઈ સાધન નથી. એવું હોય તો એનું મોક્ષપણું ન રહે, તેથી "दर्शनकार्यावसानः संयोगः" એમ કહ્યું. દર્શનરૂપ કાર્ય સિદ્ધ થાય, ત્યાં સુધી જ બુદ્ધિ વિશેષ સાથે પુરુષ વિશેષનો સંયોગ રહે છે. તેથી દર્શનને વિયોગનું કારણ કહ્યું. દર્શન રૂપ કાર્ય સિદ્ધ થાય ત્યાં સુધી જ સંયોગ રહે છે, એમ શાથી ? એના જવાબમાં "दर्शनम्" વગેરેથી કહ્યું કે દર્શન (જ્ઞાન) અદર્શનનું (અવિવેકરૂપ અજ્ઞાનનું) વિરોધી છે. એથી શું ? એના જવાબમાં

"અદર્શનમ્..." વગેરેથી કહે છે કે અવિવેકરૂપ અદર્શન કે અજ્ઞાન (દ્રષ્ટા-દશ્યના) સંયોગનું નિમિત્ત છે. કહેલા અર્થને "નાત્ર દર્શનં મોક્ષ કારણમ્" વગેરેથી વધારે સ્પષ્ટ કરતાં કહે છે કે અહીં (સાંખ્યયોગશાસ્ત્રમાં) દર્શનને સાક્ષાત્ મોક્ષનું કારણ કહ્યું નથી. પરંતુ વિવેક જ્ઞાનથી અજ્ઞાનરૂપ અવિવેકનો નાશ થતાં બંધનનો નાશ થાય છે, એને જ મોક્ષ કહ્યો છે.

દર્શન અદર્શનનું વિરોધી હોવાથી ભલે એને નિવૃત્ત કરે, પણ એ બંધનની નિવૃત્તિ શી રીતે કરી શકે ? એના જવાબમાં "દર્શનસ્ય ભાવે બંધકારણ-સ્યાદર્શનસ્ય નાશઃ" વગેરેથી કહે છે કે બુદ્ધિ વગેરેથી ભિન્ન આત્માનું સ્વરૂપાવસ્થાન મોક્ષ છે. એનું સાધન દર્શન નહીં પણ અદર્શનની નિવૃત્તિ છે.

"કિં ચેદમ્ અદર્શનમ્ નામ ?" વગેરેથી સંયોગના અસાધારણ કારણરૂપ અદર્શનની વિશેષતા જાણવા માટે એ શું છે, એ વિષે જુદા જુદા વિકલ્પો વિચારે છે. પર્યુદાસ (લાગુ ન પડે એને બાદ કરવાની રીત) દ્વારા "કિં ગુણાનામધિકારઃ ?" થી કહે છે કે શું અદર્શન (અવિદ્યા) ગુણોનો અધિકાર કે કાર્યનો આરંભ કરવાનું સામર્થ્ય છે ? કારણ કે એનાથી (દ્રષ્ટા-દશ્યનો) સંયોગ સંસારનો હેતુ બને છે.

પ્રસજ્યપ્રતિષેધ (પ્રસક્તનો નિષેધ કરવાની રીત)નો આશ્રય કરી "આહોસ્વિત્" વગેરેથી બીજો વિકલ્પ વિચારે છે. જે ચિત્ત શબ્દ વગેરે વિષયો અને સત્ત્વ તેમજ પુરુષની ભિન્નતાના જ્ઞાનને દર્શાવે છે, એ પોતાના વિષયને ઉત્પન્ન ન કરે એ અદર્શન છે ? "સ્વસ્મિન્ દશ્યે" વગેરેથી આ વાતને વધુ સ્પષ્ટ કરતાં કહે છે કે સ્વ એવા દશ્ય - શબ્દાદિ વિષય અને સત્ત્વ-પુરુષના ભેદની વિદ્યમાનતામાં દર્શનનો અભાવ અદર્શન છે ? કારણ કે પ્રધાન ત્યાં સુધી જ કાર્યશીલ રહે છે, જ્યાં સુધી આ બે પ્રકારના દર્શનને સિદ્ધ કરતું નથી. એ બે દર્શનો સિદ્ધ કર્યા પછી એ નિવૃત્ત થાય છે.

પર્યુદાસની રીતે ત્રીજો વિકલ્પ કહે છે, શું ગુણોની અર્થવત્તા અદર્શન છે ? સાંખ્યયોગશાસ્ત્ર સત્કાર્યવાદ સ્વીકારે છે. તેથી ભાવી એવા ભોગ અને મોક્ષ પણ અવ્યપદેશ્યરૂપે અસ્તિત્વ ધરાવે છે, એવો અર્થ છે.

પર્યુદાસ વડે ચોથો વિકલ્પ કહે છે, "અથાવિદ્યા..." વગેરેથી. પ્રલય વખતે પોતાના ચિત્તસાથે નિરુદ્ધ થયેલી કે પ્રધાન સાથે સામ્ય પ્રાપ્ત થયેલી વાસના પોતાના ચિત્તની ઉત્પત્તિનું બીજ છે. દર્શનથી ભિન્ન અવિદ્યાની વાસના જ અદર્શન છે, એમ કેટલાક કહે છે.

પર્યુદાસરીતે પાંચમો વિકલ્પ કહે છે. પ્રધાનમાં રહેલ અને સામ્યરૂપ

પરિણામની પરંપરાને ધારણ કરતો સ્થિતિનો સંસ્કાર ક્ષીણ થતાં, એનો મહત્ વગેરે પરિણામોના આરંભનો હેતુરૂપ ગતિસંસ્કાર અભિવ્યક્ત કે કાર્યોન્મુખ બને એ અદર્શન છે ? "યત્રેદમુક્તમ્" વગેરેથી આ બંને સંસ્કારોના અસ્તિત્વવિષે એકાન્તમતનો નિષેધ કરનારા કેટલાક લોકોનો મત રજૂ કરે છે. સ્થિતિ અને ગતિ બંને આવશ્યક છે. "પ્રધીયતે" એટલે ઉત્પન્ન કરવામાં આવે છે મહત્ વગેરે વિકારો જેનાથી એને "પ્રધાન" કહેવામાં આવે છે. જો એ સ્થિતિરૂપ જ રહે, ક્યારેપણ ગતિશીલ ન બને, તો પરિણામો ઉત્પન્ન થાય નહીં અને કશું જ ઉત્પન્ન કરવામાં ન આવતું હોવાથી એ પ્રધાન ન રહે. તેમજ એ ગતિશીલ જ રહે અને ક્યારેપણ સ્થિતિશીલ ન થાય, તો સદા ગતિશીલ રહેવાથી નિત્યપરિણામી બનીને પ્રધાન ન રહે. ક્યાંક "સ્થિત્યૈ ગત્યૈ" એવો પાઠ છે. ત્યાં તાદર્થ્યમાં ચોથી વિભક્તિ જાણવી. એની સાથે "એવ" કાર જોડવો જોઈએ. સ્થિતિશીલ ન બને તો વિકારો ક્યારે પણ નાશ ન પામે. અને એવું બને તો વિનાશસ્વભાવવાળા ભાવો (પદાર્થો)ની ઉત્પત્તિ જ ન થાય, એટલે એમનું વિકારીપણું નષ્ટ થાય. એ સ્થિતિમાં "ન પ્રધીયતે અત્ર"- અહીં કાંઈ પણ ઉત્પન્ન થતું નથી, એમ "અપ્રધાન" થાય. સ્થિતિ અને ગતિ બંનેથી એની પ્રવૃત્તિ થાય, તો જ એ પ્રધાન તરીકેનો પોતાનો વ્યવહાર ચલાવી શકે, બીજી રીતે નહીં, એટલે કે એકાન્તવાદ સ્વીકારવાથી નહીં.

આ બાબત ફક્ત પ્રધાન માટે જ સાચી નથી. બીજાં પરબ્રહ્મ, એની માયા (શક્તિ) અથવા પરમાણુઓ જેવાં કલ્પિત કારણો વિષે પણ આ ચર્ચા (વિચાર) સમાન છે. તેઓ પણ ફક્ત સ્થિતિશીલ હોય, તો પરિણામો ઉત્પન્ન ન કરવાથી કારણ ન બને. તેમજ ફક્ત ગતિશીલ રહે, તો પણ પરિણામો નિત્ય બનવાથી કારણ ન બને.

"દર્શનશક્તિરેવ" વગેરેથી પર્યુદાસની રીતે છઠ્ઠો વિકલ્પ કહે છે. દર્શન શક્તિ જ અદર્શન છે. દાખલા તરીકે, પ્રજાપતિ વ્રતમાં "ઊગતા સૂર્યને ન જુએ" એ વાક્યથી જોવાની ક્રિયાની નજીક રહેલો સંકલ્પ ગ્રહણ કરવામાં આવે છે, એમ અહીં પણ દર્શનના નિષેધથી, એની નજીક રહેલી, એની મૂળરૂપ શક્તિ ગ્રહણ કરવામાં આવે છે. એ શક્તિ ભોગરૂપ દર્શનનું નિવેદન કરવા માટે દ્રષ્ટાને દૃશ્ય સાથે જોડે છે. આ વિષે "પ્રધાનસ્યાત્મખ્યાપનાર્થાપ્રવૃત્તિઃ" એ શ્રુતિવાક્ય રજૂ કરે છે.

ભલે. પ્રધાન પોતાના ખ્યાપન માટે પ્રવૃત્તિ કરે છે, એમ શ્રુતિ કહે છે, આત્મદર્શનશક્તિ પ્રવૃત્ત થાય છે, એમ નથી કહેતી. આ શંકાના સમાધાન માટે "સર્વબોધ્યબોધસમર્થઃ" વગેરેથી કહે છે કે પ્રધાન ફક્ત પોતાના ખ્યાપન માટે

પ્રવૃત્ત થતું નથી. પણ પ્રધાનની પ્રવૃત્તિ પહેલાં બધા બોધ્ય પદાર્થોના બોધ મા સમર્થ પુરુષ પણ જોતો નથી અને એના પરિણામે બધાં કાર્ય કરવા માટે સમ પ્રધાનરૂપ દૃશ્ય પણ દેખાતું નથી. પ્રધાનમાં પ્રવૃત્તિનું સામર્થ્ય ન હોત, તો આવ પરિસ્થિતિ થાત. એટલે દ્રષ્ટા અને દૃશ્ય બંનેની શક્તિઓ અજ્ઞાત રહેત. તેથ એનું (પ્રધાનનું) સામર્થ્ય પ્રવૃત્તિનું પ્રયોજક છે, એમ શ્રુતિ સૂચવે છે, એવો અ છે. આ છઠ્ઠો વિકલ્પ દર્શનશક્તિ પ્રધાનના આશ્રયે રહે છે, એમ સ્વીકારીને નિશ્ચિત થયો છે.

"ઉભયસ્યાપ્યદર્શનં ધર્મઃ" વગેરેથી અદર્શન બંનેના આશ્રયે રહે છે, એ પક્ષ સ્વીકારીને સાતમો વિકલ્પ કહે છે. બંને એટલે પુરુષ (દ્રષ્ટા)ની અને દૃશ્ય (પ્રધાન)ની દર્શનશક્તિ અદર્શન (અજ્ઞાન) રૂપ ધર્મ છે, એમ કેટલાક લોકો કહે છે.

ભલે. દૃશ્ય બધી શક્તિઓનો આશ્રય હોવાથી, અમે એના વિષે આ વાત સ્વીકારીએ છીએ. દ્રષ્ટા વિષે સ્વીકારતા નથી. કારણ કે એના આશ્રયે એની સાથે સમવાય સંબંધથી જ્ઞાનશક્તિ રહેતી નથી. જો રહે તો દ્રષ્ટા પરિણામી બને. આ વાત "તત્રેદમ્" વગેરેથી કહે છે. જ્ઞાન ભલે દૃશ્યાત્મક-દૃશ્યના આશ્રયે રહેનાર-હોય, છતાં દૃશ્ય જડ હોવાથી, એની શક્તિનું કાર્ય દર્શન પણ જડ છે. તેથી એને (જ્ઞાનને) એના (દૃશ્યના) ધર્મ તરીકે જાણી શકાય નહીં. જડ સ્વયં-પ્રકાશ ન હોઈ શકે. દ્રષ્ટા-આત્મા-ના ચૈતન્યની છાયા એમાં પડે છે, તેથી દર્શન એનો ધર્મ બને છે, અને એ રીતે જણાય પણ છે કારણ કે હંમેશા વિષયથી વિષયી લક્ષિત થતો હોય છે. પરંતુ આનાથી જ્ઞાન દૃશ્યનો ધર્મ છે એમ સિદ્ધ થયું, પુરુષનો પણ એ ધર્મ છે એમ નહીં. આ શંકાના સમાધાન માટે "તથા પુરુષસ્યાનાત્મભૂતમપિ" વગેરેથી કહે છે કે વાત સાચી છે. જ્ઞાન પુરુષનો ધર્મ નથી. છતાં દૃશ્ય-બુદ્ધિસત્ત્વ-માં ચૈતન્યની છાયા પડે છે, એ કારણે એ પુરુષનો ધર્મ કહેવાય છે, સાક્ષાત્ પુરુષનો ધર્મ નહીં. આશય એ છે કે ચૈતન્યના બિંબને પોતાની અંદર ધારણ કરતી હોવાથી બુદ્ધિ અને ચૈતન્ય અભિન્ન જણાય છે, અને તેથી બુદ્ધિના ધર્મો ચૈતન્યના ધર્મો હોય એવું જણાય છે.

"દર્શનજ્ઞાનમેવ..." વગેરેથી આઠમો વિકલ્પ કહે છે. શબ્દ વગેરે (વિષયો)નું જ્ઞાન જ અદર્શન છે, સત્ત્વ અને પુરુષની ભિન્નતાનું અદર્શન નહીં, એમ કેટલાક કહે છે. દાખલા તરીકે, આંખ રૂપમાં પ્રમાણ છે, રસ વગેરેમાં અપ્રમાણ છે. આશય એ છે કે સુખ વગેરેના આકારવાળું શબ્દાદિનું જ્ઞાન, પોતાની સિદ્ધિના ગુણથી દ્રષ્ટા અને દૃશ્યના સંયોગને સૂચવે છે.

"ઇત્યેતે શાસ્ત્રગતાઃ વિકલ્પાઃ" વગેરેથી ચોથા વિકલ્પને સ્વીકારવા માટે સાંખ્યશાસ્ત્રમાં વર્ણવેલા બીજા બધા વિકલ્પો બધા પુરુષો માટે સમાન હોવાથી, ભોગોની ભિન્નતાની સમજૂતી ન આપી શકતા હોવાથી, દોષવાળા ગણીને ત્યજે છે. ૨૩

★

यस्तु प्रत्यक्चेतनस्य स्वबुद्धिसंयोगः- પ્રત્યક્ (આંતર) ચૈતન્યનો પોતાની બુદ્ધિ સાથે જે સંયોગ છે-

तस्य हेतुरविद्या ॥२४॥

એનો હેતુ અવિદ્યા છે. ૨૪

ભાષ્ય

विपर्ययज्ञानवासनेत्यर्थः । विपर्ययज्ञानवासनावासिता च न कार्यनिष्ठां पुरुषख्यातिं बुद्धिः प्राप्नोति, साधिकारा पुनरावर्तते । सा तु पुरुषख्यातिपर्यवसाना कार्यनिष्ठां प्राप्नोति, चरिताधिकारा निवृत्तादर्शना बन्धकारणाभावान्न पुनरावर्तते ।

अत्र कश्चित्षण्डकोपाख्यानेनोद्घाटयति- मुग्धया भार्ययाभिधीयते षण्डकः । आर्यपुत्र, अपत्यवती मे भगिनी किमर्थं नाहमिति । स तामाह- मृतस्तेऽहमपत्यमुत्पादयिष्यामीति । तथेदं विद्यमानं ज्ञानं चित्तनिवृत्तिं न करोति, विनष्टं करिष्यतीति का प्रत्यशा । तत्राचार्यदेशीयो वक्ति-ननु बुद्धिनिवृत्तिरेव मोक्षः, अदर्शनकारणाभावाद् बुद्धिनिवृत्तिः । तच्चादर्शनं बन्धकारणं दर्शनान्निवर्तते । तत्र चित्तनिवृत्तिरेव मोक्षः । किमर्थमस्थान एवास्य मतिविभ्रमः ॥२४॥

અવિદ્યાનો અર્થ વિપર્યય જ્ઞાન (મિથ્યાજ્ઞાન)ની વાસના છે. વિપર્યયજ્ઞાનની વાસનાથી વાસિત (રંગાયેલી) બુદ્ધિ પુરુષખ્યાતિરૂપ પોતાના કર્તવ્યને પૂરું કરતી નથી, અને સાધિકાર હોવાથી પાછી ફરે છે. પુરુષખ્યાતિ ઉત્પન્ન થાય ત્યાં સુધી એનો અંત થતો નથી. પરંતુ પોતાનું કાર્ય સમાપ્ત થતાં એ ચરિતાધિકાર (કૃતકૃત્ય) બનીને નિવૃત્ત થયેલા અજ્ઞાનવાળી, બંધના કારણના અભાવને લીધે ફરીથી પાછી ફરતી નથી.

અહીં કોઈ નાસ્તિક નપુંસકનો દાખલો આપીને આ કૈવલ્ય-સિદ્ધાન્તપર આક્ષેપ કરે છે ભોળી પત્ની નપુંસક પતિને કહે છે "આર્યપુત્ર, મારી બહેન પુત્રવતી છે. હું કેમ નથી ?" એણે પત્નીને કહ્યું : "મર્યા પછી હું તારા પુત્રને ઉત્પન્ન કરીશ" એમ આ વિદ્યમાન જ્ઞાન-ચિત્તની નિવૃત્તિ કરતું નથી. નષ્ટ થઈને કરશે એની શી આશા ?

આ વિષે આચાર્ય હોવાનો ડોળ કરનાર કહે છે : "બુદ્ધિની નિવૃત્તિ મોક્ષ છે. અદર્શનના કારણના અભાવથી બુદ્ધિ નિવૃત્ત થાય છે. બંધનું કારણ અદર્શન દર્શનથી નષ્ટ થાય છે." (પોતાનો મત કહે છે :) "ચિત્ત નિવૃત્તિ જ મોક્ષ છે." શા માટે આને (શંકા કરનારને) અસ્થાને મતિભ્રમ થવો જોઈએ ? ૨૪

तत्त्व वैशारदी

चतुर्थं विकल्पं निर्धारयितुं सूत्रमवतारयति-यस्तु प्रत्यक्चेतनस्य स्वबुद्धिसंयोग इति । प्रतीपमञ्चति प्राप्नोतीति प्रत्यगसाधारणस्तु संयोग एकैकस्य पुरुषस्यैकैकया बुद्ध्या वैचित्र्यहेतुः । सूत्रं पठति-तस्येति । नन्वविद्या विपर्ययज्ञानम्, तस्य भोगापवर्गायोरिव स्वबुद्धिसंयोगो हेतुः । असंयुक्तायां बुद्धौ तदनुत्पत्तेः तत्कथमविद्या संयोगभेदस्य हेतुरित्यत आह- विपर्ययज्ञानवासनेति । सर्गान्तरीयाया अविद्याया: स्वचित्तेन सह निरुद्धाया अपि प्रधानेऽस्ति वासना । तद्वासनावासितं च प्रधानं त्तत्पुरुषसंयोगिनीं तादृशीमेव बुद्धिं सृजति । एवं पूर्वपूर्वसर्गेष्वित्यनादित्वाददोषः । अत एव प्रतिसर्गावस्थायां न पुरुषो मुच्यत इत्याह-विपर्ययज्ञानेति । यदा पुरुषख्यातिः कार्यनिष्ठां प्राप्ता तदा विपर्ययज्ञानवासनाया बन्धकारणस्याभावान्न पुनरावर्तत इत्याह-सा त्विति ।

अत्र कश्चिन्नास्तिकः कैवल्यं षण्डकोपाख्यानेनोपहसति । षण्डकोपाख्यानमाह-मुग्धयेति । किमर्थमित्यर्थशब्दो निमित्तमुपलक्षयति, प्रयोजनस्यापि निमित्तत्वात् । षण्डकोपाख्यानेन साम्यमापादयति-तथेदं विद्यमानं गुणपुरुषान्यताख्यातिज्ञानं चित्तनिवृत्तिं न करोति, परवैराग्येण ज्ञानप्रसादमात्रेण ससंस्कारं निरुद्धं विनष्टं करिष्यतीति का प्रत्याशा। यस्मिन्सत्येव यद्भवति तत्तस्य कार्यं, न तु यस्मिन्नसतीति भावः । अत्रैकदेशिमतेन परिहारमाह-अत्रेति । ईषदपरिसमाप्त आचार्य आचार्यदेशीयः । आचार्यस्तु वायुप्रोक्ते कृतलक्षणः-

आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि ।

स्वयमाचरते यस्मादाचार्यस्तेन चोच्यते ॥ (वायु० ५९।३०)

इति । भोगविवेकख्यातिरूपपरिणतबुद्धिनिवृत्तिरेव मोक्षः, न तु बुद्धिस्वरूपनिवृत्तिः, सा च धर्ममेघान्तविवेकख्यातिप्रतिष्ठाया अनन्तरमेव भवति सत्यपि बुद्धिस्वरूपमात्रावस्थान इत्यर्थः । एतदेव स्फोरयति-अदर्शनस्य बन्धकारणस्याभावाद् बुद्धिनिवृत्तिः । तच्चादर्शनं बन्धकारणं दर्शनान्निवर्तते । दर्शननिवृत्तिस्तु परवैराग्यसाध्या, सत्यपि बुद्धिस्वरूपावस्थाने मोक्ष इति भाव । एकदेशिमतमुपन्यस्य स्वमतमाह-तत्र चित्तनिवृत्तिरेव मोक्षः । ननूक्तं दर्शने निवृत्तेऽचिराच्चित्तत्स्वरूपनिवृत्तिर्भवतीति कथं दर्शनकार्येत्यत आह-किमर्थमस्थाने मतिविभ्रम इति । अयमभिसन्धिः-यदि दर्शनस्य साक्षाच्चित्तनिवृत्तौ कारणभावमङ्गीकुर्वीमहि तत एवभुपालभ्येमहि, किं तु विवेकदर्शनं प्रकर्षकाष्ठां प्राप्तं निरोधसमाधिभावनाप्रकर्षक्रमेण चित्तनिवृत्तिमत्पुरुषस्वरूपावस्थानोपयोगीत्यातिष्ठामहे, तत्कथमुपालभ्येमहीति ॥२४॥

"यस्तु प्रत्यक्चेतनस्य..." વગેરેથી ચોથા વિકલ્પને સત્ય તરીકે સ્વીકારવા સૂત્ર રજૂ કરે છે. પ્રત્યક્ ચેતન એટલે બાહ્યથી વિપરીત આંતરિક ચેતનનો (બધા પુરુષો માટે સમાન ન હોવાથી) અસાધારણ એવો પ્રત્યેક પુરુષનો પોતપોતાની બુદ્ધિ સાથે સંયોગ વિચિત્ર (વિભિન્ન) ભોગાનુભવનો હેતુ છે. "तस्य हेतुरविद्या"એ સૂત્ર છે.

અવિદ્યા એટલે વિપર્યયજ્ઞાન. ભોગ-મોક્ષની જેમ એનો હેતુ સ્વબુદ્ધિસંયોગ છે. કારણ કે આ સંયોગવિના બુદ્ધિમાં વિપર્યયજ્ઞાનરૂપ અવિદ્યા ઉત્પન્ન થઈ શકે નહીં. તેથી આવો સંયોગ અવિદ્યાનો હેતુ જણાય છે. તો અવિદ્યા સંયોગનો હેતુ કેવી રીતે કહેવાય ? આ શંકાના જવાબમાં "विपर्ययज्ञानवासना" (अविद्या इत्यर्थः)- વિપર્યયજ્ઞાનની વાસના અવિદ્યા છે- એમ કહે છે. પહેલાંના સર્ગની અવિદ્યા પોતાના ચિત્ત સાથે પ્રલયવખતે નિરુદ્ધ થયેલી હતી, છતાં એની વાસના પ્રધાનમાં વિદ્યમાન હતી. એ વાસનાથી વાસિત પ્રધાન, તે તે પુરુષના સંયોગમાં રહેતી, પહેલાં જેવી બુદ્ધિ સર્જે છે. આવું પૂર્વપૂર્વના સર્ગોમાં બનતું આવ્યું હોવાથી, આ ક્રમ અનાદિ છે. તેથી ઉક્ત દોષ પેદા થતો નથી. "विपर्ययज्ञानवासनावासिता..." વગેરેથી કહે છે કે આ કારણે પુરુષ મુક્ત થતો નથી. "सा तु पुरुषख्याति पर्यवसाना..." વગેરેથી કહે છે કે પુરુષખ્યાતિરૂપ પોતાનું કાર્ય પૂરું કર્યા પછી, મિથ્યાજ્ઞાનની વાસનારૂપ બંધનના કારણના અભાવે બુદ્ધિ પાછી ફરતી નથી.

આ તબક્કે કોઈ નાસ્તિક નપુંસકના આખ્યાનથી કૈવલ્યની હાંસી ઉડાવે છે. "मुग्धया..." વગેરેથી આખ્યાન રજૂ કરે છે. "किमर्थम्"માં પ્રયોજેલો

અર્થશબ્દ નિમિત્તને લક્ષિત કરાવે છે. પ્રયોજન પણ નિમિત્ત છે. "તથેદ વિદ્યમાનમ્..." વગેરેથી નપુંસકના આખ્યાન સાથે સમાનતા દર્શાવે છે. આ વિદ્યમાન ગુણ અને પુરુષની ભિન્નતાનું જ્ઞાન જો ચિત્તનિવૃત્તિ ન કરતું હોય, તો જ્ઞાનપ્રસાદમાત્રરૂપ પરવૈરાગ્ય સંસ્કારો સાથે નિરુદ્ધ થયેલા ચિત્તનો નાશ કરશે. એવી આશા શી રીતે રખાય ? જેની હયાતિમાં જે થાય એ એનું કાર્ય કહેવાય. એના અભાવમાં નહીં. "અત્ર..." વગેરેથી "આચાર્યદેશીય" એટલે અધૂરા જ્ઞાનવાળા આચાર્યના મતથી શંકાનો પરિહાર કરે છે. વાયુપુરાણમાં આચાર્યનું લક્ષણ કહ્યું છે :- "શાસ્ત્રના અર્થોનો સંચય કરે, એમને આચારમાં સ્થાપે, અને પોતે એમનું આચરણ કરે, એને આચાર્ય કહે છે." (વાયુ પુરાણ, ૫૯.૩૦) ભોગ અને વિવેકખ્યાતિના પરિણામે પરિપક્વ થયેલી બુદ્ધિની પોતાના કાર્યમાંથી નિવૃત્તિ મોક્ષ છે, બુદ્ધિની સ્વરૂપતઃ નિવૃત્તિ નહીં. ધર્મમેઘ સુધીની વિવેકખ્યાતિમાં બુદ્ધિ પ્રતિષ્ઠિત થાય, ત્યાર પછી એની નિવૃત્તિ થાય છે. બુદ્ધિ સ્વરૂપમાત્રથી રહે ત્યારે આવી નિવૃત્તિ થયેલી કહેવાય છે. અને વધુ સ્પષ્ટ કરતાં કહે છે કે બંધનના કારણરૂપ અદર્શનના અભાવથી બુદ્ધિ નિવૃત્ત થાય છે. બંધનનું કારણ અદર્શન દર્શનથી નિવૃત્ત થાય છે. અને દર્શનની નિવૃત્તિ પરવૈરાગ્યથી સિદ્ધ થાય છે. સ્વરૂપમાત્રરૂપે બુદ્ધિ રહે ત્યારે પણ મોક્ષ થાય છે, એવો ભાવ છે.

એકદેશી આચાર્યનો મત કહી, પોતાનો મત પ્રસ્તુત કરે છે : "ચિત્ત નિવૃત્તિ જ મોક્ષ છે." પણ તમે હમણાં જ કહ્યું કે દર્શન નિવૃત્ત થતાં, તરત ચિત્તસ્વરૂપનિવૃત્તિ થાય છે, તો પછી આ નિવૃત્તિ દર્શનનું કાર્ય કેવી રીતે કહેવાય ? આના જવાબમાં "કિમર્થમસ્થાને મત વિભ્રમઃ" કારણ વિના બુદ્ધિમાં ભ્રમ શા માટે ? - વગેરેથી કહે છે એનું તાત્પર્ય એ છે કે જો અમે દર્શન સાક્ષાત્ ચિત્તનિવૃત્તિનું કારણ છે, એમ કહેતા હોઈએ, તો નાસ્તિકના ઠપકાને પાત્ર ઠરીએ, પણ અમે તો કહીએ છીએ કે વિવેકદર્શન નિરોધસમાધિની ભાવનાના પ્રકર્ષથી, છેલ્લી કાષ્ઠા (કક્ષા) સુધી પહોંચીને, ચિત્ત નિવૃત્તિપૂર્વક, પુરુષના સ્વરૂપમાં અવસ્થાનને સિદ્ધ કરે છે. માટે અમે કેવી રીતે ઠપકાપાત્ર ઠરીએ ? (ભાવ એ છે કે સાક્ષાત્ હેતુ વિદ્યમાન રહીને જ કાર્ય ઉત્પન્ન કરી શકે, પણ જે પરંપરયા હેતુ છે, એ વિદ્યમાન ન રહીને પણ કાર્ય ઉત્પન્ન કરે છે.) ૨૪

हेयं दुःखमुक्तम् । हेयकारणं च संयोगाख्यं सनिमित्तमुक्तम् । अतः परं हानं वक्तव्यम्- હેય દુઃખ કહ્યું. હેયકારણ સંયોગને નિમિત્ત સાથે કહ્યો. હવે પછી હાન કહેવાશે-

तदभावात्संयोगाभावो हानं तद्दृशेः कैवल्यम् ॥२५॥

એના (અજ્ઞાનના) અભાવથી (બુદ્ધિ-પુરુષના) સંયોગનો અભાવ હાન છે. એ દૃશિનું કૈવલ્ય છે. ૨૫

ભાષ્ય

तस्यादर्शनस्याभावाद् बुद्धिपुरुषसंयोगाभाव आत्यन्तिको बन्धनोपरम इत्यर्थः । एतद् हानम् । तद्दृशेः कैवल्यं, पुरुषस्यामिश्रीभावः पुनरसंयोगो गुणैरित्यर्थः । दुःखकारणनिवृत्तौ दुःखोपरमो हानम् तदा स्वरूपप्रतिष्ठः पुरुष इत्युक्तम् ॥२५॥

એ અદર્શનના અભાવથી બુદ્ધિ અને પુરુષના સંયોગનો અભાવ બંધનનો આત્યંતિક નાશ છે, એને હાન કહે છે. એ દૃશિનું કૈવલ્ય કે પુરુષનો ગુણોસાથે ફરીથી અસંયોગ-અમિશ્રભાવ છે. દુઃખનું કારણ નિવૃત્ત થતાં દુઃખનો નાશ હાન છે. ત્યારે પુરુષ સ્વરૂપમાં પ્રતિષ્ઠિત થાય છે, એમ કહ્યું. ૨૫

तत्त्व वैशारदी

तदेवं व्यूहद्वयममुक्त्वा तृतीयव्यूहाभिधानाय सूत्रमवतारयति-हेयं दुःखमुक्तमिति। तदभावात्संयोगाभावो हानं तद्दृशेः कैवल्यमिति । सूत्रं व्याचष्टे-तस्येति । अस्ति हि महाप्रलयेऽपि संयोगाभावोऽत उक्तमात्यन्तिक इति । दुःखोपरमो हानमिति पुरुषार्थता दर्शिता । शेषमतिरोहितम् ॥२५॥

આમ બે વ્યૂહો કહીને, "હેયં દુઃખમુક્તમ્" વગેરેથી ત્રીજો વ્યૂહ કહેવા માટે "તદભાવાત્" વગેરે સૂત્ર રજૂ કરે છે. "તસ્યાદર્શનસ્યાભાવાત્" વગેરેથી સૂત્રની વ્યાખ્યા કરે છે. મહાપ્રલયવખતે પણ સંયોગનો અભાવ હોય છે, તેથી "આત્યંતિક" એમ કહ્યું. દુઃખનો નાશ હાન છે, એનાથી પુરુષાર્થતા કહી. બાકીનું સ્પષ્ટ છે. ૨૫

★

अथ हानस्य कः प्राप्त्युपायः - હાનની પ્રાપ્તિનો શો ઉપાય છે ?-

विवेकख्यातिरविप्लवा हानोपायः ॥२६॥

ઉપદ્રવવિનાની વિવેકખ્યાતિ હાનનો ઉપાય છે. ૨૬

ભાષ્ય

सत्त्वपुरुषान्यताप्रत्ययो विवेकख्यातिः, सा त्वनिवृत्तमिथ्याज्ञाना प्लवते । यदा मिथ्याज्ञानं दग्धबीजभावं वन्ध्यप्रसवं संपद्यते तदा विधूतक्लेशरजसः सत्त्वस्य परे वैशारद्ये परस्यां वशीकारसंज्ञायां वर्तमानस्य विवेकप्रत्ययप्रवाहो निर्मलो भवति । सा विवेकख्यातिरविप्लवा हानस्योपायः । ततो मिथ्याज्ञानस्य दग्धबीजभावोपगमः पुनश्चाप्रसव इत्येष मोक्षस्य मार्गो हानस्योपाय इति ॥२६॥

સત્ત્વ અને પુરુષની ભિન્નતાનું જ્ઞાન વિવેકખ્યાતિ છે. એ મિથ્યાજ્ઞાનની નિવૃત્તિ વિના ટકતી નથી. જ્યારે મિથ્યાજ્ઞાન બળેલા બીજ જેવું કે વાંઝિયું થાય, ત્યારે રજોગુણરૂપ ક્લેશ નષ્ટ થતાં, સત્ત્વ (ચિત્ત) પરમ વૈશારદ્યમાં કે વશીકાર નામના પરવૈરાગ્યમાં સ્થિર રહે છે, અને વિવેકજ્ઞાનનો પ્રવાહ નિર્મળ (અને સતત વહેતો) થાય છે. ઉપદ્રવરહિત નિર્મળ વિવેકખ્યાતિ હાનનો ઉપાય છે. ત્યારે મિથ્યાજ્ઞાન બળેલા બીજ જેવું થાય છે. અને ફરીથી અંકુરિત થતું નથી. એ હાનનો ઉપાય કે મોક્ષનો માર્ગ છે. ૨૬

तत्त्व वैशारदी

हानोपायलक्षणं चतुर्थं व्यूहमाख्यातुं सूत्रमवतारयति- अथेति । विवेकख्यातिरविप्लवा हानोपायः । आगमानुमानाभ्यामपि विवेकख्यातिरस्ति । न चासौ व्युत्थानं तत्संस्कारं वा निवर्तयति, तद्वतऽपि तदनुवृत्तेरिति तन्निवृत्त्यर्थमविप्लवेति । विप्लवो मिथ्याज्ञानं तद्रहिता । एतदुक्तं भवति- श्रुतमयेन ज्ञानेन विवेकं गृहीत्वा युक्तिमयेन च व्यवस्थाप्य दीर्घकालनैरन्तर्यसत्कारासेविताया भावनायाः प्रकर्षपर्यन्तं समधिगता साक्षात्कारवती विवेकख्यातिर्निवर्तितसवासनमिथ्याज्ञाना निर्विप्लवा हानोपाय इति । शेषं भाष्यं सुगमम् ॥२६॥

"अथ..." વગેરેથી હાનના ઉપાયરૂપ ચોથો વ્યૂહ સમજાવવા "विवेकख्यातिरविप्लवा" વગેરે સૂત્ર રજૂ કરે છે. આગમ અને અનુમાનથી પણ વિવેકખ્યાતિ ઉત્પન્ન થાય છે, પણ એ વ્યુત્થાન અને એના સંસ્કારોને નિવૃત્ત કરતી નથી. વેદ અને તર્કમાં પારંગત વિદ્વાનોમાં પણ એમની અનુવૃત્તિ જોવા મળે છે. માટે એને નિવૃત્ત કરવા "अविप्लवा"- ઉપદ્રવવિનાની - એમ કહ્યું. વિપ્લવ એટલે મિથ્યાજ્ઞાન, એનાથી રહિત. આશય એ છે કે વેદમય જ્ઞાનથી

વિવેકના સ્વરૂપને સમજીને, યુક્તિમય જ્ઞાનથી એને વ્યવસ્થિત બનાવીને, લાંબા સમય સુધી, નિરંતર, ઉત્સાહપૂર્વક ભાવના (આત્મનિષ્ઠા) સેવવામાં આવે તો એ પ્રકર્ષ સુધી પહોંચી સાક્ષાત્કારરૂપ બને ત્યારે એને વિવેકખ્યાતિ કહેવામાં આવે છે. એ વાસનાઓ સાથે મિથ્યાજ્ઞાનને નિવૃત્ત કરે, ત્યારે વિપ્લવરહિત બને છે. એ હાનનો ઉપાય છે. બાકી સરળ છે. ૨૬

★

तस्य सप्तधा प्रान्तभूमिः प्रज्ञा ॥२७॥

એની (વિવેકખ્યાતિપ્રાપ્ત યોગીની) પ્રજ્ઞા સાત પ્રકારના પ્રકૃષ્ટ અંતવાળી હોય છે. ૨૭

भाष्य

तस्येति प्रत्युदितख्यातेः प्रत्याम्नायः । सप्तधेत्यशुद्ध्यावरणमलापगमाच्चित्तस्य प्रत्ययान्तरानुत्पादे सति सप्तप्रकारैव प्रज्ञा विवेकिनो भवति । तद्यथा-

१. परिज्ञातं हेयं नास्य पुनः परिज्ञेयमस्ति । २. क्षीणा हेयहेतवो न पुनरेतेषां क्षेतव्यमस्ति । ३. साक्षात्कृतं निरोधसमाधिना हानम् । ४. भावितो विवेकख्यातिरूपो हानोपाय इति । एषा चतुष्टयी कार्या विमुक्तिः प्रज्ञायाः । चित्तविमुक्तिस्तु त्रयी । ५. चरिताधिकारा बुद्धिः । गुणा गिरिशिखरकूटच्युता इव ग्रावाणो निरवस्थानाः स्वकारणे प्रलयाभिमुखाः सह तेनास्तं गच्छन्ति । न चैषां प्रविलीनानां पुनरस्त्युत्पादः, प्रयोजनाभावादिति । ७. एतस्यामवस्थायां गुणसंबन्धातीतः स्वरूपमात्रज्योतिरमलः केवली पुरुष इति । एतां सप्तविधां प्रान्तभूमिप्रज्ञामनुपश्यन्पुरुषः कुशल इत्याख्यायते । प्रतिप्रसवेऽपि चित्तस्य मुक्तः कुशल इत्येव भवति, गुणातीतत्वादिति ॥२७॥

તેની એટલે ઉદયપામેલી ખ્યાતિવાળા યોગીની (પ્રજ્ઞા) એવો અર્થ છે. અશુદ્ધિ અને આવરણરૂપ મળોના નાશથી યોગીના ચિત્તમાં અન્યવૃત્તિઓ ઉત્પન્ન થતી નથી. ત્યારે એની પ્રજ્ઞા સાત પ્રકારની હોય છે. જેમકે, ૧. હેય જાણ્યું. હવે ફરીથી કાંઈ જાણવાનું બાકી નથી. ૨. હેયના હેતુઓ ક્ષીણ

થયા. હવે કાંઈ ક્ષીણ કરવાનું શેષ નથી. ૩. નિરોધસમાધિથી હાનનો સાક્ષાત્કાર કર્યો. ૪. વિવેકખ્યાતિરૂપ હાનોપાય સિદ્ધ થયો. પ્રજ્ઞાની આ ચાર પ્રકારની કાર્યાવિમુક્તિ છે. ચિત્તવિમુક્તિ ત્રણ પ્રકારની છે. ૫. બુદ્ધિનો અધિકાર સફળતાપૂર્વક પૂરો થયો. ૬. પર્વતના શિખરપરથી નીચે પડતા પત્થરોની જેમ, અસ્થિર બનેલા ગુણો પોતાના કારણમાં લીન થવા માટે અભિમુખ બનીને, તે (કારણ)ની સાથે અસ્ત થયા છે. નષ્ટ થયેલા ગુણો, પ્રયોજનના અભાવે, ફરીથી ઉત્પન્ન થતા નથી. ૭. આ અવસ્થામાં ગુણોના સંબંધથી પર, સ્વરૂપમાત્ર જ્યોતિવાળો નિર્મળ પુરુષ કેવલી બને છે. આ સાત સ્તરોવાળી પ્રજ્ઞાની પ્રકૃષ્ટ અંતવાળી ભૂમિઓને જોતો પુરુષ કુશળ કહેવાય છે. ગુણાતીત થયેલો હોવાથી, ચિત્તના પ્રલય વખતે પણ કુશળ પુરુષ મુક્ત જ રહે છે. ૨૭

तत्त्व वैशारदी

विवेकख्यातिनिष्ठायाः स्वरूपमाह सूत्रेण-तस्य सप्तधा प्रान्तभूमिःप्रज्ञेत्यनेन। व्याचष्टे-तस्येति प्रत्युदितख्यातेर्वर्तमानख्यातेर्योगिनः प्रत्याम्नायः परामर्श । अशुद्धिरेवावरणं चित्तसत्त्वस्य, तदेव मलं तस्यापगमाच्चित्तस्य प्रत्ययान्तरानुत्पादे तामसराजसव्युत्थानप्रत्ययानुत्पादे निर्विप्लवविवेकख्यातिनिष्ठामापन्नस्य सप्तप्रकारैव प्रज्ञा विवेकिनो भवति । विषयभेदात्प्रज्ञाभेदः । प्रकृष्टोऽन्तो यासां भूमीनामवस्थानां तास्तथोक्ताः । यतः परं नास्ति स प्रकर्षः । प्रान्ता भूमयो यस्यां प्रज्ञाया विवेकख्यातेः सा तथोक्ता।

ता एव सप्तप्रकाराः प्रज्ञाभूमीरुदाहरति-तद्यथेति । तत्र पुरुषप्रयत्ननिष्पाद्यासु चतसृषु भूमिषु प्रथमामुदाहरति-परिज्ञातं हेयमिति । यावत्किल प्राधानिकं तत्सर्वं परिणामतापसंस्कारैर्गुणवृत्तिविरोधाद् दुःखमेवेति हेयम् । तत्परिज्ञातम् । प्रान्ततां दर्शयति-नास्य पुनः किंचिदपरिज्ञातं-परिज्ञेयमस्ति । द्वितीयामाह-क्षीणा इति । प्रान्ततामाह-न पुनरिति । ततीयामाह-साक्षात्कृतमिति । प्रत्यक्षेण निश्चितं मया संप्रज्ञातावस्थायामेव निरोधसमाधिसाध्यं हानम् । न पुनरस्मात् परं निश्चेतव्यमस्तीति शेषः । चतुर्थीमाह-भावितो निष्पादितो विवेकख्यातिरूपो हानोपायः, नास्याः परं भावनीयमस्तीति शेषः। एषा चतुष्टयी कार्या विमुक्तिः समाप्तिः । कार्यतया प्रयत्नव्याप्यता दर्शिता । क्वचित्पाठः कार्यविमुक्तिरिति, कार्यान्तरेण विमुक्तिः प्रज्ञाया इत्यर्थः । प्रयत्ननिष्पाद्यानुनिष्पादनीयामप्रयत्नसाध्यां चित्तविमुक्तिमाह-चित्तविमुक्तिस्तु त्रयीति । प्रथमामाह-चरिताधिकाराः बुद्धिः । कृतभोगापवर्गकार्येत्यर्थः । द्वितीयामाह-गुणा इति । प्रान्ततामाह-

न चैषामिति । तृतीयामाह-एतस्यामवस्थायामिति । एतस्यामवस्थायां जीवन्नेव पुरुषः कुशलो मुक्त इत्युच्यते, चरमदेहत्वादित्याह-एतामिति । अनौपचारिकं मुक्तमाह प्रतिप्रसव इति प्रधानलयेऽपि चित्तस्य मुक्तः कुशल इत्येव भवति गुणातीतत्वादिति ॥२७॥

"तस्य सप्तधा..." વગેરે સૂત્રથી વિવેકખ્યાતિ નિષ્ઠાનું સ્વરૂપ કહે છે. ભાષ્યકાર "तस्येति..." વગેરેથી સૂત્ર સમજાવે છે. પ્રત્યુદિતખ્યાતિ-ઉત્પન્ન થયેલી ખ્યાતિવાળા યોગીનો પ્રત્યામ્નાય એટલે નિર્દેશ કરે છે. અશુદ્ધિ ચિત્તસત્ત્વનું આવરણ છે. એ જ મળ છે. એ દૂર થાય ત્યારે ચિત્તમાં બીજા વિચારો ઉત્પન્ન થતા નથી. એટલે કે રાજસ્-તામસ્-વૃત્તિઓ વિવિધરૂપે ઊઠતી નથી. એવી વિપ્લવ-ઉપદ્રવ-રહિત વિવેકખ્યાતિપ્રાપ્ત યોગીની પ્રજ્ઞા સાત પ્રકારની હોય છે. વિષયભેદથી પ્રજ્ઞાભેદ જણાય છે. એ ભૂમિઓ કે અવસ્થાઓનો અંત ઉત્કૃષ્ટ હોય છે. તેથી એ પ્રાન્તભૂમિ કહેવાય છે. જેનાથી આગળ કાંઈ શ્રેષ્ઠ નથી એને પ્રકર્ષ કહે છે. જે વિવેકખ્યાતિરૂપ પ્રજ્ઞાની પ્રકૃષ્ટ અંતવાળી ભૂમિઓ હોય એને પ્રાન્તભૂમિપ્રજ્ઞા કહે છે.

"तद्यथा..." વગેરેથી એ સાત પ્રકારની પ્રજ્ઞા ભૂમિઓનું વર્ણન કરે છે. "परिज्ञातं हेयम्..." વગેરેથી પુરુષના પ્રયત્નથી સિદ્ધ થતી ચાર ભૂમિઓ પૈકી પહેલીનું વર્ણન કરે છે. જે જે પ્રાધાનિક છે એ બધું પરિણામ, તાપ અને સંસ્કાર દુઃખોથી તેમજ ગુણોની વૃત્તિઓમાં વિરોધ હોવાથી દુઃખરૂપ છે, માટે હેય છે, એ જાણ્યું. એની પ્રાન્તતા દર્શાવે છે કે હવે એને ન જાણેલું, જાણવા યોગ્ય કાંઈ નથી. "क्षीणाः" વગેરેથી બીજી ભૂમિ કહે છે. "न पुनः" વગેરેથી એની પ્રાન્તતા કહે છે. "साक्षात्कृतम्" વગેરેથી ત્રીજી ભૂમિ કહે છે. સંપ્રજ્ઞાત સમાધિમાં પ્રત્યક્ષ જોઈને મેં નિશ્ચય કર્યો કે નિરોધસમાધિથી હાન (દુઃખનાશ) સિદ્ધ થઈ શકે છે. હવે પછી એનાથી શ્રેષ્ઠ કોઈ નિશ્ચય કરવાનો બાકી રહેતો નથી, એટલું ઉમેરવાનું છે. ચોથી ભૂમિ કહે છે. વિવેકખ્યાતિરૂપ હાનનો ઉપાય ભાવિત એટલે સિદ્ધ કર્યો. એનાથી શ્રેષ્ઠ બીજું કાંઈ સિદ્ધ કરવાનું બાકી રહેતું નથી. આમ ચાર પ્રકારની કાર્યા (પુરુષપ્રયત્નસાધ્ય) વિમુક્તિ કહી. કાર્યતા એટલે પ્રયત્ન-વ્યાપ્યતા એમ દર્શાવ્યું. કોઈ ગ્રંથમાં "कार्यविमुक्ति" એવો પાઠ છે. એનો અર્થ અન્ય કાર્યથી પ્રજ્ઞાની વિમુક્તિ એવો થાય.

"चित्तविमुक्तिस्तु त्रयी" વગેરેથી પ્રયત્નસાધ્ય મુક્તિ પછી સિદ્ધ થતી અપ્રયત્નસાધ્ય ચિત્તવિમુક્તિ કહે છે. "चरिताधिकारा बुद्धिः"થી પહેલી વિમુક્તિ કહે છે. જેણે ભોગ-મોક્ષરૂપ કર્તવ્ય પૂરું કર્યું છે, એવી બુદ્ધિ એવો અર્થ છે. "गुणाः..." વગેરેથી બીજી વિમુક્તિ કહે છે. "न चैषाम्" વગેરેથી એની પ્રાન્તતા

કહે છે. "એતસ્યાં અવસ્થાયામ્..." વગેરેથી ત્રીજી કહે છે. આ અવસ્થામાં પુરુષ જીવન્મુક્ત કે કુશળ કહેવાય છે. "એતામ્..." વગેરેથી એનો છેલ્લો દેહ છે એમ કહે છે. "પ્રતિપ્રસવેપિ..." વગેરેથી અનૌપચારિક (વિદેહ) મુક્ત વિષે કહે છે કે પ્રધાનમાં ચિત્તનો લય થાય ત્યારે પણ પુરુષ ગુણાતીત થયેલો હોવાથી મુક્ત કે કુશળ જ રહે છે. ૨૭

★

सिद्धा भवति विवेकख्यातिर्हानोपाय इति । न च सिद्धिरन्तरेण साधनमित्येतदारभ्यते- હાનના ઉપાયરૂપ વિવેકખ્યાતિ સિદ્ધ કરવી પડે છે. અને સિદ્ધિ સાધન વિના પ્રાપ્ત થતી નથી. તેથી આ સૂત્ર આરંભાય છે-

योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः ॥२८॥

યોગનાં અંગોના અનુષ્ઠાનથી અશુદ્ધિનો ક્ષય થતાં વિવેકખ્યાતિપર્યંત (સમ્યક્) જ્ઞાનની તેજોમય અભિવ્યક્તિ થાય છે. ૨૮

भाष्य

योगाङ्गान्यष्टावभिधायिष्यमाणानि । तेषामनुष्ठानात्पञ्चपर्वणो विपर्ययस्याशुद्धिरूपस्य क्षयो नाशः । तत्क्षये सम्यग्ज्ञानस्याभिव्यक्तिः । यथा यथा च साधनान्यनुष्ठीयन्ते तथा तथा तनुत्वमशुद्धिरापद्यते । यथा यथा च क्षीयते तथा तथा क्षयक्रमानुरोधिनी ज्ञानस्यापि दीप्तिर्विवर्धते । सा खल्वेषा विवृद्धिः प्रकर्षमनुभवत्या विवेकख्यातेः आ गुणपुरुषस्वरूपविज्ञानादित्यर्थः । योगाङ्गानुष्ठानमशुद्धेर्वियोगकारणम् यथा परशुश्छेद्यस्य । विवेकख्यातेस्तु प्राप्तिकारणं यथा धर्मः सुखस्य, नान्यथा कारणम् ।

कति चैतानि कारणानि शास्त्रे भवन्ति ? नवैवेत्याह । तद्यथा-

उत्पत्तिस्थित्यभिव्यक्तिविकारप्रत्ययाप्तयः ।
वियोगान्यत्वधृतयः कारणं नवधा स्मृतम् ॥ इति ।

तत्रोत्पत्तिकारणं-मनो भवति विज्ञानस्य । स्थितिकारणं-मनसः पुरुषार्थता, शरीरस्येवाहार इति । अभिव्यक्तिकारणं-यथा रूपस्यालोकस्तथा रूपज्ञानम् । विकारकारणं-मनसो विषयान्तरम्,

यथाग्निः पाक्यस्य । प्रत्ययकारणं- धूमज्ञानमग्निज्ञानस्य । प्राप्तिकारणं- योगाङ्गानुष्ठानं विवेकख्यातेः । वियोगकारणं-तदेवाशुद्धेः । अन्यत्वकारणं- यथा सुवर्णस्य सुवर्णकारः । एकमेकस्य स्त्रीप्रत्ययस्याविद्या मूढत्वे, द्वेषो दुःखत्वे, रागः सुखत्वे, तत्त्वज्ञानं माध्यस्थ्ये । धृतिकारणं शरीरमिन्द्रियाणाम्, तानि च तस्य । महाभूतानि शरीराणाम्, तानि च परस्परं सर्वेषाम् । तैर्यग्यौनमानुषदैवतानि च परस्परार्थत्वादिति । एवं नव कारणानि । तानि च यथासंभवं पदार्थान्तरेष्वपि योज्यानि । योगाङ्गानुष्ठानं तु द्विधैव कारणत्वं लभत इति ॥२८॥

યોગનાં આઠ અંગો આગળ કહેવામાં આવશે. એમના અનુષ્ઠાનથી અશુદ્ધિરૂપ, પાંચ પર્વવાળી વિપર્યય બુદ્ધિનો ક્ષય થાય છે. એનો નાશ થતાં, સમ્યક્ જ્ઞાનની અભિવ્યક્તિ થાય છે. જેમ જેમ સાધનોનું અનુષ્ઠાન કરવામાં આવે, તેમ તેમ અશુદ્ધિ ઓછી થતી જાય છે. અને જેમ જેમ અશુદ્ધિ ઓછી થાય, તેમ તેમ ક્ષયના ક્રમના અનુરોધથી જ્ઞાનની દીપ્તિ વધતી જાય છે. આ વૃદ્ધિ પ્રકર્ષને પ્રાપ્ત થઈને વિવેકખ્યાતિ સુધી પહોંચે છે, એટલે કે ગુણો અને પુરુષના સ્વરૂપના વિજ્ઞાન સુધી પહોંચે છે. જેમ કુહાડી લાકડાનું એમ યોગાંગોનું અનુષ્ઠાન અશુદ્ધિ કાપવાનું કારણ છે. જેમ ધર્મ સુખનું, એમ એ (યોગાંગાનુષ્ઠાન) વિવેકખ્યાતિનું કારણ છે. બીજી કોઈ રીતે એ કારણ બનતું નથી.

શાસ્ત્રમાં કેટલા પ્રકારનાં કારણો કહ્યાં છે ? ફક્ત નવ એમ કહે છે. જેમકે ઉત્પત્તિ, સ્થિતિ, અભિવ્યક્તિ, વિકાર, પ્રત્યય, પ્રાપ્તિ, વિયોગ, અન્યત્વ અને ધૃતિ એમ નવ પ્રકારનાં કારણો હોય છે. મન વિજ્ઞાનનું ઉત્પત્તિકારણ છે. આહાર જેમ શરીરનું સ્થિતિકારણ છે, એમ પુરુષાર્થ મેળવી આપવો એ મનનું સ્થિતિકારણ છે. પ્રકાશ રૂપને આલોક્તિ કરવામાં અને જાણવામાં અભિવ્યક્તિ કારણ છે. અગ્નિ જેમ અન્નનું વિકારકારણ છે, એમ વિષયાન્તર થવું એ મનનું વિકારકારણ છે. ધુમાડાનું જ્ઞાન અગ્નિનું પ્રત્યયકારણ છે. યોગનાં અંગોનું અનુષ્ઠાન વિવેકખ્યાતિનું પ્રાપ્તિકારણ છે. એ જ અશુદ્ધિનું વિયોગકારણ પણ છે. સોની સોનાનું અન્યત્વકારણ છે, એમ એક જ સ્ત્રીજ્ઞાન અવિદ્યાથી મૂઢતાનું, દ્વેષથી દુઃખનું, રાગથી સુખનું.

અને તત્ત્વજ્ઞાનથી મધ્યસ્થતા વગેરેનું અન્યત્વકારણ છે. શરીર ઇન્દ્રિયોનું ધૃતિકારણ અને ઇન્દ્રિયો શરીરનું ધૃતિકારણ છે. પાંચ મહાભૂતો શરીરોનું અને એ પાંચ પરસ્પર એકબીજાનાં ધૃતિકારણ છે. કારણ કે પશુઓ, મનુષ્યો અને દેવો પરસ્પર માટે છે. આમ નવ પ્રકારનાં કારણો છે. એમને યથાસંભવ અન્યપદાર્થોમાં પણ યોજવાં જોઈએ. યોગાંગોનું અનુષ્ઠાન પ્રાપ્તિકારણ અને વિયોગકારણ બંને છે. ૨૮

तत्त्व वैशारदी

तदेवं चतुरो व्यूहानुक्त्वा तन्मध्यपतितस्य हानोपायस्य विवेकख्यातेर्गोदोहनादिवत्प्रागसिद्धेरसिद्धस्य चोपायत्वाभावात्सिद्ध्युपायान्वक्तुमारभत इत्याह- सिद्धेति । तत्राभिधास्यमानानां साधनानां येन प्रकारेण विवेकख्यात्युपायत्वं तद्दर्शयति सूत्रेण- योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः । योगाङ्गानि हि यथायोगं दृष्टादृष्टद्वारेणाशुद्धिं क्षिण्वन्ति । पञ्चपर्वणो विपर्ययस्येत्युपलक्षणं पुण्यापुण्ययोरपि जात्यायुर्भोगहेतुत्वेनाशुद्धिरूपत्वादिति । शेषं सुगमम् । नानाविधस्य कारणभावस्य दर्शनाद्योगाङ्गानुष्ठानस्य कीदृशं कारणत्वमित्यत आह-योगाङ्गानुष्ठानमिति । अशुद्ध्या वियोजयति बुद्धिसत्त्वमित्यशुद्धेर्वियोगकारणम् । दृष्टान्तमाह-यथा परशुरिति । परशुश्छेद्यं वृक्षं मूलेन वियोजयति । अशुद्ध्या वियोजयद् बुद्धिसत्त्वं विवेकख्यातिं प्रापयति । यथा धर्मः सुखम् । तथा योगांगानुष्ठानं विवेकख्यातेः प्राप्तिकारणं नान्येन प्रकारेणेत्याह- विवेकख्यातेस्त्विति । नान्यथेति प्रतिषेधश्रवणात्पृच्छति- कति चैतानीति । उत्तरम् - नवैवेति । तानि दर्शयति कारिकया-तद्यथा उत्पत्तीति ।

अत्रोदाहरणान्याह-तत्रोत्पत्तिकारणमिति । मनो हि विज्ञानमव्यपदेश्यावस्थातोऽपनीय वर्तमानावस्थामापादयदुत्पत्तिकारणं विज्ञानस्य । स्थितिकारणं मनसः पुरुषार्थता । अस्मिताया उत्पन्नं मनस्तावदवतिष्ठते न यावद्द्विविधं पुरुषार्थमभिनिर्वर्तयति । अथ निर्वर्तितपुरुषार्थद्वयं स्थितेरपैति, तस्मात्स्वकारणादुत्पन्नस्य मनसोऽनागतपुरुषार्थता स्थितिकारणम् । दृष्टान्तमाह- शरीरस्येवेति । प्रत्यक्षज्ञाननिमित्तमिन्द्रियद्वारा वा स्वतो वा विषयस्य संस्क्रियाभिव्यक्तिस्तस्यां कारणं यथा रूपस्यालोकः । विकारकारणं मनसो विषयान्तरम् । यथा हि मृकण्डोः समाहितमनसो वल्लकीविपञ्च्यमानपञ्चमस्वरश्रवणसमनन्तरमुन्मीलिताक्षस्य स्वरूपलावण्ययौवनसंपन्नामप्सरसं प्रम्लोचामीक्षमाणस्य समाधिमपहाय तस्यां सक्तं मनो बभूवेति । अत्रैव निदर्शनमाह- यथाग्निः पाक्यस्य तण्डुलादेः कठिनावयवसंनिवेशस्य प्रशिथिलावयवसंयोगलक्षणस्य विकारस्य कारणम् । सत एव विषयस्य प्रत्ययकारणं धूमज्ञानमग्निज्ञानस्येति । ज्ञायत

इति ज्ञानम् । अग्निश्चासौ ज्ञानं चेत्यग्निज्ञानं तस्य । एतदुक्तं भवति- वर्तमानस्यैवाग्नेर्ज्ञेयस्य प्रत्ययकारणतया कारणमिति । प्रप्तिकारणम्-औत्सर्गिकी निरपेक्षाणां कारणानां कार्यक्रिया प्राप्तिः । तस्याः कुतश्चिदपवादोऽप्राप्तिः । यथा निम्नोपसर्पणस्वभावानामपां प्रतिबन्धः सेतुना, तथेहापि बुद्धिसत्त्वस्य सुखप्रकाशशीलस्य स्वाभाविकी सुखविवेकख्यातिजनकता प्राप्तिः । सा कुतश्चिदधर्मात्तमसो वा प्रतिबन्धान्न भवति । धर्माद्योगाङ्गानुष्ठानाद्वा तदपनये तदप्रतिबद्धवृत्ति स्वभावत एव तज्जनकतया तदाप्नोति । यथा वक्ष्यति निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत् (४।३) इति ।

तदेवं विवेकख्यातिलक्षणकार्यापेक्षया प्राप्तिकारणमुक्तम् । अवान्तरकार्यापेक्षया तु तदेव वियोगकारणमित्याह-वियोगकारणमिति । अन्यत्वकारणमाह-अन्यत्वकारणं यथा सुवर्णकारः सुवर्णस्येति । कटककुण्डलकेयूरादिभ्यो भिन्नाभिन्नस्य भेदविवक्षया कटकादिभिन्नस्याभेदविवक्षया कटकाद्यभिन्नस्य सुवर्णस्य कुण्डलादन्यत्वम् । तथा च कटककारी सुवर्णकारः कुण्डलादभिन्नात्सुवर्णादन्यत्कुर्वन्नन्यत्वकारणम् । अग्निरपि पाक्यस्यान्यत्वकारणं यद्यपि, तथापि धर्मिणो धर्मयोः पुलाकत्वतण्डुलत्वयोर्भेदाविवक्षया धर्मयोरुपजनापायेऽपि धर्म्यनुवर्तत इति न तस्यान्यत्वं शक्यं वक्तुमिति विकारमात्र-कारणत्वमुक्तमिति न संकरः । न च संस्थानभेदो धर्मिणोऽन्यत्वकारणमिति व्याख्येयम्, सुवर्णकार इत्यस्यासंगतेः । बाह्यमन्यत्वकारणमुपन्यस्याध्यात्मिकमुदाहरति-एवमेकस्येति । अविद्या कमनीयेयं कन्यकेत्यादिज्ञानम् । सम्मोहयोगात्स एव स्त्रीप्रत्ययो मूढो विषण्णो भवति चैत्रस्य, मैत्रस्य पुण्यवतो बत कलत्ररत्नमेतन्न तु मम भाग्यहीनस्येति। एवं सपत्नीजनस्य तस्यां द्वेषः स्त्रीप्रत्ययस्य दुःखत्वे । एवं मैत्रस्य तस्या भर्तृ रागस्तस्यैव स्त्रीप्रत्ययस्य सुखत्वे । तत्त्वज्ञानं त्वङ्मांसमेदोऽस्थिमज्जासमूहः स्त्रीकायः स्थानबीजादिभिरशुचिरिति विवेकिनां माध्यस्थ्ये वैराग्ये कारणमिति । धृतिकारणं शरीरमिन्द्रियाणां विधारकम् । इन्द्रियाणि च शरीरस्य । सामान्या कारणवृत्तिर्हि प्राणाद्या वायवः पञ्च । तदभावे शरीरपातात् । एवं मांसादिकायाङ्गानामपि परस्परं विधार्यविधारकत्वम् । एवं महाभूतानि पृथिव्यादीनि मनुष्यवरुणसूर्यगन्ध-वहशशिलोकनिवासिनां शरीराणाम् । तानि च परस्परम् । पृथिव्यां हि गन्धरसरूप-स्पर्शशब्दगुणायां पञ्च महाभूतानि परस्परं विधार्यविधारकभावेनावस्थितान्यप्सु चत्वारि तेजसि त्रीणि द्वे च मातरिश्वनीति । तैर्यग्योनमानुषदैवतादीनि च विधार्यविधारक-भावेनावस्थितानि । नन्वाधाराधेयभावरहितानां कुतस्तत्त्वमित्यत आह- परस्परार्थ-त्वादिति। मनुष्यशरीरं हि पशुपक्षिमृगसरीसृपस्थावरशरीरोपयोगेन ध्रियते । एवं व्याघ्रादिशरीरमपि मनुष्यपशुमृगादिशरीरोपयोगेन । एवं पशुमृगादिशरीरमपि

स्थावराद्युपयोगेन । एवं दैवशरीरमपि मनुष्योपहृतच्छागमृगकपिञ्जलमांसाज्य-पुरोडाशसहकारशाखा प्रस्तरादिभिरिज्यमानं तदुपयोगेन । एवं देवतापि वरदान-वृष्ट्यादिभिर्मनुष्यादीनि धारयतीत्यस्ति परस्परार्थत्वमित्यर्थः । शेषं सुगमम् ॥२८॥

ચાર વ્યૂહો કહીને, એમાંથી એક હાનના ઉપાયરૂપ વિવેકખ્યાતિના સ્વરૂપને-ગાય દોહવાની જેમ (ગાયના આંચળમાં દૂધ છે, પણ દોહ્યાવિના ઉપયોગમાં ન લેવાય તેમ) અસિદ્ધ માનીને, તેમજ અસિદ્ધ વસ્તુ ઉપાય ન બની શકે, તેથી સિદ્ધિના ઉપાયોને "सिद्धा भवति" વગેરેથી કહેવાનો આરંભ કરે છે.

કહેવામાં આવનાર સાધનો જે રીતે વિવેકખ્યાતિના ઉપાય બને છે, એ રીત "योगांगानुष्ठानात्" વગેરે સૂત્રથી દર્શાવે છે. યોગનાં અંગો દૃષ્ટ અને અદૃષ્ટ રીતે અશુદ્ધિનો ક્ષય કરે છે. વિપર્યયજ્ઞાન રૂપ અવિદ્યા પાંચ પર્વ (સાંધા)વાળી છે. એમાં પુણ્ય અને પાપનો પણ સમાવેશ થાય છે, કારણ કે તેઓ જન્મ, આયુષ્ય, અને ભોગના કારણ તરીકે અશુદ્ધિરૂપ છે. બાકીનું સરળ છે.

"योगांगानुष्ठानम्" વગેરેથી અનેક પ્રકારનાં કારણોમાંથી યોગનાં અંગોનું અનુષ્ઠાન કયા પ્રકારનું કારણ છે, એ કહે છે. બુદ્ધિસત્ત્વનો અશુદ્ધિથી વિયોગ કરાવે છે. તેથી વિયોગકારણ છે. "यथा परशु..."થી દાખલો આપે છે. કુહાડી કાપી શકાય એવા ઝાડનો મૂળથી વિયોગ કરે છે. અશુદ્ધિનો વિયોગ કરવા સાથે, ધર્મ સુખ તરફ દોરે એમ, એ બુદ્ધિસત્ત્વને વિવેકખ્યાતિ તરફ દોરે છે. "विवेकख्यातेस्तु" વગેરેથી કહે છે કે યોગનાં અંગોનું અનુષ્ઠાન વિવેકખ્યાતિનું પ્રાપ્તિકારણ છે, અન્ય પ્રકારનું નહીં. આવો નિષેધ સાંભળીને, કારણો કેટલા પ્રકારનાં છે, એમ પૂછે છે. નવ જ છે, એવો ઉત્તર આપે છે. "तद्यथा, उत्पत्तिस्थिति" વગેરેથી કારિકાવડે કારણના પ્રકારો કહે છે. પછી એમનાં ઉદાહરણો આપે છે. સૌ પહેલાં ઉત્પત્તિકારણ કહે છે. મન વિજ્ઞાન (બુદ્ધિ)ને અવ્યપદેશ્ય (ભવિષ્યની) અવસ્થામાંથી ખસેડીને વર્તમાન અવસ્થામાં લાવે છે, તેથી એનું ઉત્પત્તિકારણ કહેવાય છે. પુરુષાર્થતા મનનું સ્થિતિકારણ છે. અસ્મિતામાંથી ઉત્પન્ન થઈને મન ત્યાં સુધી રહે છે, જ્યાં સુધી ભોગ-મોક્ષરૂપ બે પુરુષાર્થો સિદ્ધ કરતું નથી. એ બે પુરુષાર્થો સિદ્ધ કર્યા પછી સ્થિતિ છોડી દે છે. આમ પોતાના કારણમાંથી ઉત્પન્ન થયેલા મનનું પુરુષાર્થ સિદ્ધ ન થવો એ સ્થિતિકારણ છે. "शरीरस्येव..." વગેરેથી દાખલો આપે છે. પ્રકાશથી રૂપની જેમ, ઇન્દ્રિયથી કે સ્વતઃ વિષય પ્રત્યક્ષ થતાં, એનું જ્ઞાન થાય એ અભિવ્યક્તિકારણ છે. વિષયાન્તર થવું મનનું વિકારકારણ છે. સમાધિનિષ્ઠ મૃકંડુએ વીણાનો પંચમસ્વર સાંભળ્યો, અને આંખો ખોલી રૂપલાવણ્યયુક્ત પ્રમ્લોચા નામની અપ્સરા જોઈ.

તેથી એની સમાધિ છૂટી ગઈ અને એનું મન એમાં આસક્ત થયું. આ માટે રાંધવા યોગ્ય ચોખા વગેરે માટે અગ્નિનો દાખલો આપે છે. અગ્નિ ચોખાના કઠણ અવયવોને શિથિલ બનાવવાનું વિકારકારણ છે. હયાત વિષયના જ્ઞાનનું કારણ પ્રત્યયકારણ છે. અગ્નિ જણાય એને અગ્નિજ્ઞાન કહે છે. આશય એ છે કે હયાત એવા જ્ઞેય અગ્નિનું પ્રત્યયકારણ ધુમાડામાં છે. પ્રાપ્તિકારણ કહે છે. કારણ સ્વાભાવિક રીતે નિરપેક્ષપણે કાર્ય બને એ પ્રાપ્તિ છે. કોઈવાર, કારણસર એમ ન બને એવા અપવાદોમાં અપ્રાપ્તિ છે. જેમ નીચે વહેવાના સ્વભાવવાળા પાણીને, બંધ બાંધીને રોકવામાં આવે છે. એમ અહીં પણ સુખ અને પ્રકાશ સ્વભાવના બુદ્ધિસત્ત્વની સુખ અને વિવેકખ્યાતિ ઉત્પન્ન કરવી એ સ્વાભાવિક પ્રાપ્તિ છે. પણ કોઈવાર અધર્મથી અથવા તમોગુણના પ્રતિબંધથી એમ બનતું નથી. ધર્મથી કે યોગનાં અંગોના અનુષ્ઠાનથી એ પ્રતિબંધ દૂર કરવામાં આવતાં, પોતાની સાહજિક પ્રવૃત્તિ આડે આવતાં વિઘ્નો દૂર થતાં, એમને (સુખ અને વિવેકને) ઉત્પન્ન કરે એ એની પ્રાપ્તિ કહેવાય. આ વાત આગળ કહેવામાં આવશે :- "પ્રકૃતિઓમાં નિમિત્ત અપ્રયોજક છે. પ્રતિબંધ તૂટતાં પ્રકૃતિ, ખેડૂતની જેમ, સહજભાવે પોતાનું કાર્ય કરે છે," (યોગસૂત્ર, ૪.૩) વિવેકખ્યાતિરૂપ કાર્યની અપેક્ષાએ (યોગને) પ્રાપ્તિકારણ કહ્યું. અવાન્તર (ગૌણ) કાર્યની અપેક્ષાએ "વિયોગકારણમ્" વગેરેથી એ જ (યોગ) અશુદ્ધિનું વિયોગકારણ પણ બને છે, એમ કહ્યું. "અન્યત્વકારણમ્" વગેરેથી અન્યત્વકારણ વર્ણવે છે. કંગન, કુંડલ, અને કેયૂર (બાજુબંધ) વગેરે આભૂષણોથી સોનું ભિન્ન અને અભિન્ન છે. ભેદ અને અભેદ કહેવાની ઇચ્છા મુજબ થાય છે. આમ સોનું કુંડળથી અન્ય છે. સોની કુંડળથી અભિન્ન સોના વડે અન્ય આકાર (કંગન) બનાવે છે. તેથી સોની સોનાનું અન્યત્વકારણ છે.

અગ્નિ રાંધવામાં આવતા પદાર્થોમાં અન્યત્વનું કારણ છે, છતાં અગાઉ એને વિકારકારણ કહ્યું, કારણ કે ત્યાં રાંધેલા અને કાચા ચોખાનો ભેદ એક ધર્મીના ધર્મો તરીકે કહેવાની ઇચ્છા નથી. એ બંને ધર્મો ઉત્પન્ન અને નષ્ટ થાય છે, છતાં ધર્મી એક જ રહે છે. તેથી એનું અન્યત્વ કહી શકાતું નથી. આ કારણે અગ્નિને વિકારકારણ કહ્યું. આમ બંને દાખલાઓ જુદા છે. વળી ધર્મીમાં થતો આકારભેદ અન્યત્વકારણ નથી. નહીં તો સોનીનું ગ્રહણ અસંગત થશે.

બહારના પદાર્થોમાં અન્યત્વકારણ કહીને, "એવમેકસ્ય સ્ત્રીપ્રત્યયસ્ય" વગેરેથી આધ્યાત્મિક અન્યત્વકારણ કહે છે. આ કન્યા કમનીય છે, વગેરે જ્ઞાન અવિદ્યા છે. સંમોહને લીધે ચૈત્રમાં એ સ્ત્રીજ્ઞાન મૂઢતા કે વિષાદનું કારણ છે. એ વિચારે છે કે પુણ્યવાન મૈત્રની એ રત્નજેવી પત્ની છે, ભાગ્યહીન એવા મારી

નહીં. સપત્ની માટે એ સ્ત્રીજ્ઞાન દ્વેષનું કારણ છે. એના પતિ મૈત્ર માટે, એ રાગવાળો હોવાથી, સુખનું કારણ છે. સ્ત્રીશરીર ચામડી, માંસ, હાડકાં અને મજ્જાનો સમૂહ છે, તેમજ સ્થાન, બીજ વગેરેને કારણે અપવિત્ર છે. એવા તત્ત્વજ્ઞાનવાળા વિવેકી પુરુષ માટે એ જ સ્ત્રીજ્ઞાન મધ્યસ્થતા (વૈરાગ્ય)નું કારણ છે.

શરીર ઇન્દ્રિયોને ધારણ કરતું હોવાથી એનું ધૃતિકારણ છે. ઇન્દ્રિયો શરીરનું ધૃતિકારણ છે. પ્રાણ વગેરે પાંચ વાયુઓ કરણોમાં સમાનપણે રહી શરીરને ધારણ કરે છે. એ ન હોય તો શરીર નષ્ટ થાય છે. માંસ વગેરે શરીરનાં દ્રવ્યો પરસ્પર વિધાર્ય-વિધારક ભાવે રહે છે, પૃથ્વી વગેરે પાંચ મહાભૂતો, મનુષ્યો તેમજ વરુણ, સૂર્ય, વાયુ, ચંદ્ર વગેરે લોકોમાં વસતા શરીરધારીઓનું ધૃતિકારણ છે. એ પાંચ મહાભૂતો પરસ્પરનું ધૃતિકારણ છે. ગંધ, રૂપ, રસ, સ્પર્શ, અને શબ્દ ગુણવાળી પૃથ્વીમાં મહાભૂતો પરસ્પર વિધાર્ય-વિધારક ભાવે રહે છે. જળમાં ચાર, તેજમાં ત્રણ, વાયુમાં બે ભૂતો વિધાર્યવિધારકભાવે રહે છે. પશુઓ, મનુષ્યો અને દેવો વગેરે વિધાર્ય-વિધારક ભાવે રહે છે. આ બધામાં આધાર-આધેય-ભાવ નથી, તો વિધાર્યવિધારક કેવી રીતે કહી શકાય ? એના જવાબમાં "પરસ્પરાર્થત્વાત્" - એક બીજા માટે છે- એમ કહે છે. મનુષ્ય શરીર પશુ, પક્ષી, મૃગ, સર્પ અને સ્થાવરોનાં શરીરોથી ધારણ કરાય છે. એમ વાઘ વગેરે શરીરો મનુષ્ય, પશુ, મૃગ વગેરેના શરીરોના ઉપયોગથી ધારણ કરાય છે. પશુ, મૃગ વગેરે શરીરો સ્થાવર (ઘાસ) વગેરેના ઉપયોગથી અને દેવશરીર મનુષ્યોએ યજ્ઞમાં નૈવેદ્ય તરીકે અર્પેલાં બકરી, મૃગ, કપિંજલ વગેરેના માંસ, ઘી, પુરોડાશ, આંબાની ડાળની સમિધાઓ વગેરેથી ધારણ કરાય છે. દેવો પણ વરદાન, વર્ષા વગેરે વડે મનુષ્ય વગેરેને ધારણ કરે છે. આ રીતે એ બધાં એકબીજાને ઉપયોગી છે, એવો અર્થ છે. બાકીનું સરળ છે. ૨૮

★

तत्र योगाङ्गान्यवधार्यन्ते- યોગનાં અંગોનો નિર્ણય કરવામાં આવે છે-

यमनियमासनप्राणायामप्रत्याहारधारणाध्यान-
समाधयोऽष्टावङ्गानि ॥२९॥

યમ, નિયમ, આસન, પ્રાણાયામ, પ્રત્યાહાર, ધારણા, ધ્યાન અને સમાધિ (યોગનાં) આઠ અંગો છે. ૨૯

भाष्य

यथाक्रममेषामनुष्ठानं स्वरूपं च वक्ष्यामः ॥२९॥

ક્રમ પ્રમાણે એમનું સ્વરૂપ અને અનુષ્ઠાન કહેવામાં આવશે. ૨૯

तत्त्व वैशारदी

संप्रति न्यूनाधिकसंख्याव्यवच्छेदार्थं योगाङ्गान्यवधारयति-तत्र योगाङ्गान्यवधार्यन्त इति । यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि । अभ्यासवैराग्यश्रद्धावीर्यादयोऽपि यथायोगमेतेष्वेव स्वरूपतो नान्तरीयकतयान्तर्भावयितव्याः ॥२९॥

"तत्र योगांगानि.." વગેરેથી ઓછી કે વધારે સંખ્યા નથી, એમ દર્શાવવા માટે યોગનાં અંગોનું નિર્ધારણ કરે છે. "यमनियम..." વગેરે સૂત્ર છે. અભ્યાસ, વૈરાગ્ય, શ્રદ્ધા, ઉત્સાહ વગેરેનો પણ યથાયોગ્ય રીતે આ આઠમાં સ્વરૂપથી અંતર્ભાવ થાય છે, એમ જાણવું જોઈએ. ૨૯

★

तत्र- એમાં : (એ પૈકી)-

अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः ॥३०॥

અહિંસા, સત્ય, અસ્તેય, બ્રહ્મચર્ય અને અપરિગ્રહ યમો છે. ૩૦

भाष्य

तत्राहिंसा सर्वथा सर्वदा सर्वभूतानामनभिद्रोहः, उत्तरे च यमनियमास्तन्मूलास्तत्सिद्धिपरतयैव तत्प्रतिपादनाय प्रतिपाद्यन्ते, तदवदातरूपकरणायैवोपादीयन्ते । तथा चोक्तम्- स खल्वयं ब्राह्मणो यथा यथा व्रतानि बहूनि समादित्सते तथा तथा प्रमादकृतेभ्यो हिंसानिदानेभ्यो निवर्तमानस्तामेवावदातरूपामहिंसा करोति ।

सत्यं यथार्थे वाङ्मनसे । यथा दृष्टं यथानुमितं यथा श्रुतं तथा वाङ्मनश्चेति । परत्रं स्वबोधसंक्रान्तये वागुक्ता सा यदि न वञ्चिता भ्रान्ता वा प्रतिपत्तिवन्ध्या वा भवेदिति । एषा सर्वभूतोपकारार्थं प्रवृत्ता न भूतोपघाताय । यदि चैवमप्यभिधीयमाना भूतोपघातपरैव स्यान्न सत्यं भवेत्पापमेव भवेत् । तेन पुण्याभासेन पुण्यप्रतिरूपकेण कष्टं तमः प्राप्नुयात् । तस्मात्परीक्ष्य सर्वभूतहितं सत्यं ब्रूयात् ।

स्तेयमशास्त्रपूर्वकं द्रव्याणां परतः स्वीकरणम्, तत्प्रतिषेधः

पुनरस्पृहारूपमस्तेयमिति । ब्रह्मचर्यं गुप्तेन्द्रियस्योपस्थस्य संयमः । विषया-णामर्जनरक्षणक्षयसङ्गहिंसादोषदर्शनादस्वीकरणमपरिग्रह इत्येते यमाः ॥३०॥

અહિંસા એટલે સર્વદા, સર્વ રીતે, સર્વ પ્રાણીઓનો અદ્રોહ. ત્યાર પછીના યમનિયમ અહિંસામૂલક છે. એની સિદ્ધિ માટે અને એના પ્રતિપાદન માટે એમનું નિરૂપણ કરવામાં આવે છે. અહિંસાના સ્વરૂપને વધુ શુદ્ધ બનાવવા માટે જ એમનો સ્વીકાર કરવામાં આવે છે. આ વિષે કહ્યું છે : "ખરેખર, બ્રાહ્મણ જેમ જેમ ઘણાં વ્રતો ધારણ કરે છે, તેમ તેમ પ્રમાદથી થતી હિંસાનાં કારણોથી નિવૃત્ત થઈને અહિંસાને વિશુદ્ધ સ્વરૂપની બનાવે છે."

સત્ય એટલે યથાર્થ વાણી અને મન. જેવું જોયું, વિચાર્યું, સાંભળ્યું હોય, એને અનુરૂપ મન અને વાણી રહે એ સત્ય છે. અન્યમાં પોતાના બોધને સંક્રાન્ત કરવા માટે વાણી પ્રયોજાય છે. તેથી એ છલવાળી, ભ્રાન્ત કે જ્ઞાન ઉત્પન્ન ન કરે એવી ન હોય, એનું ધ્યાન રાખીને બોલવું જોઈએ. કારણ કે વાણી બધાં પ્રાણીઓનો ઉપકાર કરવા માટે પ્રયોજાય છે, એમને હણવા માટે નહીં. આ રીતે પ્રયોજાતી વાણી પણ પ્રાણીઓનું અહિત કરનારી હોય, તો એ સત્ય નહીં પાપ જ છે. પુણ્ય જેવા જણાતા એ પુણ્યાભાસથી કષ્ટદાયક અંધકાર જ પ્રાપ્ત થાય છે. માટે પરીક્ષા કરીને, બધાં પ્રાણી માટે હિતકર હોય એવું જ સત્ય બોલવું જોઈએ.

સ્તેય (ચોરી) એટલે અશાસ્ત્રીય રીતે બીજા પાસેથી વસ્તુઓનો સ્વીકાર. એનાથી બચવા માટે વસ્તુઓની સ્પૃહા ન હોવી અસ્તેય છે. બ્રહ્મચર્ય એટલે ગુપ્ત, ઉપસ્થ ઇન્દ્રિયનો સંયમ. વિષયોની (વસ્તુઓની) પ્રાપ્તિ, રક્ષણ, ક્ષય, આસક્તિ, હિંસા વગેરે દોષો વિચારીને, એમનો અસ્વીકાર કરવો અપરિગ્રહ છે. આ બધા યમો છે. ૩૦

तत्त्व वैशारदी

यमनियमाद्यङ्गान्युद्दिश्य यमनिर्देशकं सूत्रमवतारयति-तत्रेति । अहिंसासत्या-स्तेयब्रह्मचर्यापरिग्रहा यमाः । योगाङ्गमहिंसामाह-सर्वथेति । ईदृशीमहिंसां स्तौति - उत्तरे चेति । तन्मूला इति । अहिंसामपरिपाल्य कृता अप्यकृतकल्पा निष्फलत्वा-

दित्यर्थः । तत्सिद्धिपरतयैवानुष्ठानम् । अहिंसा चेन्मूलमुत्तरेषां कथं तेऽहिंसासिद्धिपरा इत्यत आह-तत्प्रतिपादनायेति । सिद्धिर्ज्ञानोत्पत्तिरित्यर्थः । स्यादेतत्-अहिंसाज्ञानार्था यद्युत्तरे कृतं तैरन्यत एव तदवगमादित्यत आह-तदवदातेति । यद्युत्तरे नानुष्ठीयेरन्नहिंसा मलिना स्यादसत्यादिभिरित्यर्थः । अत्रैवागमिकानां संमतिमाह-तथा चेति । सुगमम् ।

सत्यलक्षणमाह-यथार्थे वाङ्मनसे इति । यथाशब्दं साकाङ्क्षं पूरयति यथा दृष्टमिति । प्रतिसबन्धिनं तथाशब्दं प्रतिक्षिपति-तथा वाङ्मनश्च विवक्षायां कर्तव्याया-मिति । अन्यथा तु न सत्यम् । एतत्सोपपत्तिकमाह-परत्र पुरुषे स्वबोधसंक्रान्तये स्वबोधसदृशबोधजननाय वागुक्तोच्चारता । अतः सा यदि न वञ्चिता वञ्चिका यथा द्रोणाचार्येण स्वतनयाश्वत्थाममरणमा 'युष्मन्सत्यधनाश्वत्थामा हत' इति पृष्टस्य युधिष्ठिरस्य प्रतिवचनं हस्तिनमभिसंधाय 'सत्यं हतोऽश्वत्थामेति' । तदिदमुक्तस्योत्तरं न युधिष्ठिरस्य स्वबोधं संक्रामयति । स्वबोधो ह्यस्य हस्तिहननविषय इन्द्रियजन्मा । न चासौ संक्रान्तः किं त्वन्य एव तस्य तनयवधबोधो जात इति । भ्रान्ता वा भ्रान्तिजा । भ्रान्तिश्च विवक्षासमये वा ज्ञेयार्थावधारणसमये वा । प्रतिपत्त्या वन्ध्या प्रतिपत्तिवन्ध्या । यथार्यान्प्रति म्लेच्छभाषा प्रतिपत्तिवन्ध्या, निष्प्रयोजना वा स्यादिति यथानपेक्षिताभिधाना वाक् । तत्र हि परत्र स्वबोधस्य संक्रान्तिरप्यसंक्रान्तिरेव निष्प्रयोजनत्वादिति । एवंलक्षणमपि सत्यं परापकारफलं सत्याभासं न तु सत्यमित्याह-एषेति । तद्यथा सत्यतपसस्तस्करैः सार्थगमनं पृष्टस्य सार्थगमनाभिधानमिति । अभिधीयमानोच्चार्यमाणा । शेषं सुगमम् ।

अभावस्य भावाधीननिरूपणतया स्तेयलक्षणमाह-स्तेयमशास्त्रपूर्वकमिति । विशेषेण सामान्यं लक्ष्यत इत्यर्थः । मानसव्यापारपूर्वकत्वाद्वाचनिककायिकव्यापारयोः प्राधान्यान्मनोव्यापार उक्तोऽस्पृहारूपमिति । ब्रह्मचर्यस्वरूपमाह-गुप्तेति । संयतोपस्थोऽपि हि स्त्रीप्रेक्षणतदालापकन्दर्पायतनतदङ्गस्पर्शनसक्तो न ब्रह्मचर्यवानिति । तन्निरासायोक्तं गुप्तेन्द्रियस्येति । इन्द्रियान्तराण्यपि तत्र लोलुपानि रक्षणीयानीति । अपरिग्रहस्वरूपमाह-विषयाणामिति । तत्र सङ्गदोष उक्तो 'भोगाभ्यासमनुविवर्धन्ते रागाः कौशलानि चेन्द्रियाणामि'ति (२।१५ भाष्य), हिंसालक्षणश्च दोषो 'नानुपहत्य भूतान्युपभोगः संभवती'ति (२।१५ भाष्य) । अशास्त्रीयाणामयत्नोपनतानामपि विषयाणां निन्दितप्रति-ग्रहादिरूपार्जनदोषदर्शनाच्छास्त्रीयाणामप्युपार्जितानां च रक्षणादिदोषदर्शनादस्वीकरण-मपरिग्रहः ॥३०॥

યમ, નિયમ વગેરે યોગનાં અંગોને ઉદ્દેશીને, યમનો નિર્દેશ કરતાં "અહિંસાસત્ય" વગેરે સૂત્ર પ્રસ્તુત કરે છે. "સર્વથા.." વગેરેથી યોગની અંગભૂત

અહિંસા વર્ણવે છે. "ઉત્તરે ચ" વગેરેથી અહિંસાની પ્રશંસા કરે છે. "તન્મૂલા.."થી કહે છે કે અહિંસા વ્રત પાળ્યા વિના બીજાં વ્રતો પાળ્યાં હોય, તો પણ ન પાળ્યા બરાબર છે, કારણ કે એ બધાં નિષ્ફળ થાય છે. એની સિદ્ધિ માટે અન્ય વ્રતોનું અનુષ્ઠાન થવું જોઈએ. અહિંસામૂલક એના પછીનાં બધાં વ્રતો હોય તો, અહિંસાને સિદ્ધ કરનારાં કેવી રીતે કહેવાય ? એના જવાબમાં "તત્પ્રતિપાદનાય" એમ કહે છે- બીજાં વ્રતો અહિંસાને શુદ્ધ અને પુષ્ટ કરવા માટે આચરવામાં આવે છે. સિદ્ધિ એટલે જ્ઞાનની ઉત્પત્તિ.

ભલે. પણ અહિંસાના જ્ઞાન માટે જ પછીનાં વ્રતો હોય, તો એના જ્ઞાનથી એ બધાંનું જ્ઞાન થશે, પછી એ બધાંનું જ્ઞાન મેળળવાની શી જરૂર ? એના જવાબમાં "તદવદાતરૂપકરણાય" વગેરેથી કહે છે કે બીજાં વ્રતો પાળવામાં ન આવે તો અસત્ય વગેરેથી અહિંસા મલિન બને. એની શુદ્ધિ માટે એમનું આચરણ કરવું જોઈએ. "તથા ચ.." વગેરેથી આગમના અનુયાયીઓની આ વિષે સંમતિ દર્શાવે છે, એ સુગમ છે.

"યથાર્થે વાઙ્મનસે"થી સત્યનું લક્ષણ કહે છે. "યથા" શબ્દ એનાથી સંબંધિત "તથા"ને સૂચિત કરે છે. કહેવાની ઇચ્છા હોય, ત્યારે વાણી અને મન જોયેલી કે સાંભળેલી વાત સાથે અનુરૂપ હોવાં જોઈએ. આ બાબત યુક્તિથી સમજાવતાં કહે છે કે અન્યમાં પોતાના જેવા બોધને સંક્રાન્ત કરવા માટે વાણી પ્રયોજાય છે, માટે એ છલયુક્ત ન હોવી જોઈએ. દાખલા તરીકે દ્રોણાચાર્યે પોતાના પુત્ર અશ્વત્થામાના મરણ વિષેઃ "હે આયુષ્માન્ સત્યધન (યુધિષ્ઠિર), શું અશ્વત્થામા હણાયો ?" એમ પૂછ્યું, ત્યારે યુધિષ્ઠિરે હાથીને મનમાં રાખીને જવાબ આપ્યો : "સાચી વાત છે. અશ્વત્થામા હણાયો છે." આ જવાબ યુધિષ્ઠિરના બોધને સંક્રાન્ત કરતો નથી. હાથીના મરણનું જ્ઞાન એને ઇન્દ્રિયથી થયું હતું. એ જ્ઞાન સંક્રાન્ત ન થયું, પણ એનાથી ભિન્ન એમના પુત્રના વધનું જ્ઞાન સંક્રાન્ત થયું. ભ્રાન્ત એટલે ભ્રાન્તિથી જન્મેલું જ્ઞાન. ભ્રાન્તિ જ્ઞેય પદાર્થના નિશ્ચય વખતે થાય, અથવા એને કહેતી વખતે થાય. પ્રતિપત્તિવંધ્યા એટલે જ્ઞાન ઉત્પન્ન ન કરે એવી. દાખલા તરીકે, આર્યો પ્રત્યે મ્લેચ્છભાષા પ્રતિપત્તિવંધ્યા કહેવાય. પ્રયોજન વગરની એટલે ન પૂછેલી વાત કહેતી વાણી. એમાં બીજાને પોતાના બોધનું જ્ઞાન થાય, તો પણ ન થયા બરાબર છે. કારણ કે એ પ્રયોજન વિનાની છે. "એષા સર્વભૂતોપકારાર્થં પ્રવૃત્તા..." વગેરેથી કહે છે કે આવા લક્ષણવાળું સત્ય પણ અન્યને હાનિ કરે એવા ફળવાળું હોય, તો સત્યનો આભાસ છે, સત્ય નથી. દાખલા તરીકે ચોરોએ સત્યતપસ્ (સાચું બોલવાનું વ્રત લેનાર) મુનિને વ્યાપારીઓના સાર્થવાહ વિષે પૂછ્યું, ત્યારે એમણે સાચી વાત કહી, એ સત્યાભાસ કહેવાય.

કહેવાતી એટલે ઉચ્ચારાતી. બાકીનું સરળ છે.

"સ્તેયમ્ અશાસ્ત્રપૂર્વકમ્" વગેરેથી અભાવનું નિરૂપણ ભાવને આધીન હોવાથી (અસ્તેય સમજાવવા માટે પહેલાં) સ્તેયનું લક્ષણ કહે છે. વિશેષથી સામાન્ય લક્ષિત થાય છે, એવો અર્થ છે. "અસ્પૃહારૂપમ્"થી શરીર અને વાણીનો વ્યાપાર મનોવ્યાપાર પર આશ્રિત હોવાથી, મુખ્યત્વે અસ્પૃહારૂપ મનનો વ્યાપાર કહ્યો.

"ગુપ્તેન્દ્રિય" વગેરેથી બ્રહ્મચર્યનું લક્ષણ કહે છે. ઉપસ્થ ઇન્દ્રિય સંયમમાં રાખી હોય, પણ સ્ત્રીને જોવી, એની સાથે વાત કરવી, કામસ્થાન વગેરે અંગોને સ્પર્શ કરવો વગેરેમાં આસક્ત પુરુષ બ્રહ્મચર્યવાળો નથી. એ બધાનો સંયમ પણ કરવો જોઈએ, એમ સૂચવવા માટે "ગુપ્ત" શબ્દ પ્રયોજ્યો. ગુપ્ત રીતે કાર્ય કરતી બધી ઇન્દ્રિયોનો સંયમ બ્રહ્મચર્ય છે, એમ કહ્યું. એ રીતે લોલુપ એવી બધી ઇન્દ્રિયોનું પણ રક્ષણ કરવું જોઈએ, એ "ગુપ્ત" શબ્દનો ભાવ છે.

"વિષયાણામર્જનરક્ષણ" વગેરેથી અપરિગ્રહનું સ્વરૂપ કહે છે. અગાઉ ૨.૧૫માં સંગદોષ વર્ણવતાં કહ્યું હતું કે ભોગાભ્યાસથી રાગ અને ઇન્દ્રિયોની કુશળતા વધે છે, અને પ્રાણીઓની હિંસા કર્યા વિના ઉપભોગ સંભવતો નથી. એમાં હિંસારૂપી દોષ પણ દર્શાવ્યો હતો. અશાસ્ત્રીય અને યત્ન વિના મળી આવેલા વિષયોનો પરિગ્રહ નિંદનીય છે, એમ અર્જનનો દોષ જોઈને, શાસ્ત્રીય રીતે મેળવેલા વિષયોમાં એમના રક્ષણ વગેરે માટે થતા દોષો જોઈને, એમનો પણ અસ્વીકાર કરવો એને અપરિગ્રહ કહે છે. ૩૦

★

તે તુ- એ બધા પણ-

जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम् ॥३१॥

જાતિ, દેશ, કાળ, અને પરિસ્થિતિની મર્યાદા વિના સાર્વભૌમ (બધા દેશકાળમાં અને સ્થિતિઓમાં પાળવાના હોઈ) મહાવ્રત છે. ૩૧

ભાષ્ય

तत्राहिंसा जात्यवच्छिन्ना-मत्स्यवधकस्य मत्स्येष्वेव नान्यत्र हिंसा । सैव देशावच्छिन्ना-न तीर्थे हनिष्यामीति । सैव कालावच्छिन्ना-न चतुर्दश्यां न पुण्येऽहनि हनिष्यामीति । सैव त्रिभिरुपरतस्य समयावच्छिन्नादेव ब्राह्मणार्थे नान्यथा हनिष्यामीति । यथा च क्षत्रियाणां युद्ध एव हिंसा नान्यत्रेति । एभिर्जातिदेशकालसमयैरनवच्छिन्ना अहिंसादयः सर्वथैव

परिपालनीयाः । सर्वभूमिषु सर्वविषयेषु सर्वथैवाविदितव्यभिचाराः सार्वभौमा महाव्रत-मित्युच्यन्ते ॥३१॥

જાતિથી મર્યાદિત અહિંસા એટલે માછીમારની માછલાં પૂરતી હિંસા, બીજે નહીં. દેશથી મર્યાદિત એટલે તીર્થસ્થાનમાં હિંસા ન કરવી. કાળથી મર્યાદિત એટલે ચૌદશ કે બીજા પવિત્ર દિવસોએ હિંસા ન કરવી એવો નિશ્ચય. એ ત્રણે હિંસાઓ ત્યાગનારની સમય કે પરિસ્થિતિની મર્યાદિત અહિંસા એટલે દેવો કે બ્રાહ્મણો સિવાય બીજા કોઈ માટે હિંસા કરીશ નહીં એવો નિશ્ચય. ક્ષત્રિયોની અહિંસા એટલે યુદ્ધમાં જ મર્યાદિત હિંસા, અન્યત્ર નહીં. આ રીતે જાતિ, દેશ, કાળ અને સમયથી મર્યાદિત નહીં એવાં અહિંસા વગેરે વ્રતો સર્વથા, સર્વદા પાળવાં જોઈએ. બધા દેશો અને વિષયોમાં કોઈપણ પ્રકારના અપવાદ વિના આ વ્રતો પાળવાનાં હોઈ સાર્વભૌમ મહાવ્રતો કહેવાય છે. ૩૧

तत्त्व वैशारदी

सामान्यत उक्ताः । यादृशाः पुनर्योगिनामुपादेयास्तादृशान्वक्तुं सूत्रमवतारयति-ते त्विति । जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम् । सर्वासु जात्यादिलक्षणासु भूमिषु विदिताः सार्वभौमाः । अहिंसादय इति । अन्यत्राप्यवच्छेद ऊहनीयः । सुगमं भाष्यम् ॥३१॥

(અહિંસા વગેરે વ્રતો) સામાન્ય પણે કહ્યાં. યોગીઓ માટે ઉપાદેય (સ્વીકાર્ય) ના સ્વરૂપને કહેવા માટે "ते तु"થી "जातिदेशकाल" વગેરે સૂત્ર પ્રસ્તુત કરે છે. જાતિ વગેરે લક્ષણોવાળી બધી ભૂમિઓમાં પાળવાનાં હોવાથી સાર્વભૌમ અહિંસા વગેરે વ્રતો યોગીએ પાળવાં, એમ કહ્યું. આનાથી બીજાં સત્ય, અસ્તેય વગેરે વ્રતોમાં પણ મર્યાદાનું અનુમાન કરવું જોઈએ. ભાષ્ય સરળ છે. ૩૧

★

शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ॥३२॥

પવિત્રતા, સંતોષ, તપ, સ્વાધ્યાય અને ઈશ્વરપ્રણિધાન નિયમો છે.

भाष्य

तत्र शौचं मृज्जलादिजनितं मेध्याभ्यवहरणादि च बाह्यम् । आभ्यन्तरं चित्तमलानामाक्षालनम् । संतोषः संनिहितसाधनादधिक-

स्यानुपादित्सा । तपो द्वन्द्वसहनम् । द्वन्द्वश्च जिघत्सापिपासे शीतोष्णे स्थानासने काष्ठमौनाकारमौने च । व्रतानि चैषां यथायोगं कृच्छ्रचान्दायणसान्तपनादीनि । स्वाध्यायो मोक्षशास्त्राणामध्ययनं प्रणवजपो वा । ईश्वरप्रणिधानं तस्मिन् परमगुरौ सर्वकर्मार्पणम् ।

शय्यासनस्थोऽथ पथि व्रजन्वा स्वस्थः परिक्षीणवितर्कजालः ।
संसारबीजक्षयमीक्षमाणः स्यान्नित्यमुक्तोऽमृतभोगभागी ॥

यत्रेदमुक्तं-ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च (१।२९) इति ॥३२॥

શૌચ એટલે માટી, પાણીથી થયેલી શુદ્ધિ અને પવિત્ર આહાર વગેરે. આ બાહ્ય છે. ચિત્તના મળો દૂર કરવા એ આંતરિક શૌચ છે. સંતોષ એટલે પોતાની પાસે હોય, એથી અધિક સાધનો મેળવવાની અનિચ્છા. તપ એટલે દ્વન્દ્વો સહેવાં. ભૂખ-તરસ, ઠંડી-ગરમી, ઊઠવું-બેસવું, અને કાષ્ઠમૌન-આકારમૌન દ્વન્દ્વો છે. વ્રતો એટલે આવશ્યકતા મુજબ કૃચ્છ્રચાંદ્રાયણ, સાંતપન વગેરે કરવાં. સ્વાધ્યાય એટલે મોક્ષશાસ્ત્રનું અધ્યયન અથવા પ્રણવનો જપ. ઈશ્વર પ્રણિધાન એટલે એ પરમગુરુને બધાં કર્મોનું સમર્પણ. આ વિષયમાં ગાથા છે :- "શય્યામાં કે આસનપર બેઠેલો, માર્ગમાં ચાલતો સાધક સ્વસ્થ, વિતર્કજાળથી મુક્ત થયેલો અને સંસારના બીજ (રૂપ વાસનાઓ)ના ક્ષયની રાહ જોતો, અમૃતભોગમાં ભાગીદાર અને નિત્યમુક્ત કહેવાય છે." વળી કહ્યું છે : "આનાથી (ઈશ્વરપ્રણિધાનથી) પ્રત્યક્ (આંતર) ચૈતન્યરૂપ આત્માની પ્રાપ્તિ અને અંતરાયોનો અભાવ થાય છે." (૧.૨૯) ૩૨

तत्त्व वैशारदी

शौचादिनियमानाचष्टे-शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः । व्याचष्टे-शौचमिति । आदिशब्देन गोमयादयो गृह्यन्ते । गोमूत्रयावकादि मेध्यम् । तस्याभ्यवहरणादि । आदिशब्दाद् ग्रासपरिमाणसंख्यानियमादयो ग्राह्याः । मेध्याभ्यवहरणादिजनितमिति वक्तव्ये मेध्याभ्यवहरणादि चेत्युक्तं कार्ये कारणोपचारात् । चित्तमला मदमानासूयादयः । तदपनयो मनःशौचम् । प्राणयात्रामात्रहेतोरभ्यधिकस्यानुपादित्सा सन्तोषः । प्रागेव स्वीकरणपरित्यागादिति विशेषः । काष्ठमौनमिङ्गितेनापि स्वाभिप्राया-प्रकाशनम् । अवचनमात्रमाकारमौनम् । परिक्षीणवितर्कजाल इति । वितर्को वक्ष्यमाणः

संशयविपर्ययौ चेति । एतावता शुद्धोऽभिसंधिरुक्तः । एते च यमनियमा विष्णुपुराण उक्ताः-

ब्रह्मचर्यमहिंसां च सत्यास्तेयापरिग्रहान् ।
सेवेत योगी निष्कामो योग्यतां स्वमनोनयन् ॥३६॥

स्वाध्यायशौचसंतोषतपांसि नियतात्मवान् ।
कुर्वीत ब्रह्मणि तथा परस्मिन्प्रवणं मनः ॥३७॥

एते यमाः सनियमाः पञ्च पञ्च प्रकीर्तिताः ।
विशिष्टफलदाः काम्या निष्कामाणां विमुक्तिदाः ॥३८॥

(६।७।३६-३८) इति ॥३२॥

"શૌચસંતોષ" વગેરે સૂત્રથી પવિત્રતા વગેરે નિયમો કહે છે "तत्र शौचम्" વગેરેથી ભાષ્યકાર સૂત્ર સમજાવે છે. આદિ શબ્દથી ગોમય વગેરે સમજવાનાં છે. ગોમૂત્ર, યવાગૂ (જવની રાબ) વગેરે મેધ્ય, (પવિત્ર) આહાર છે. "એનું ભોજન વગેરે"માં પ્રયોજેલો વગેરે શબ્દ કોળિયાનું માપ, સંખ્યા, નિયમ વગેરે સૂચવે છે. "પવિત્ર આહાર વગેરેથી થતી પવિત્રતા" એમ કહેવાને બદલે, ફક્ત "પવિત્ર આહાર વગેરે" કહ્યું એમાં કારણમાં કાર્યનો ઉપચાર (વ્યવહાર) છે. મદ, માન, અસૂયા વગેરે ચિત્તના મળ છે. એમને દૂર કરવા એ મનની પવિત્રતા છે. પ્રાણયાત્રામાત્ર (ફક્ત જીવન ટકી રહે એટલાં જ) સાધનોથી વધારે મેળવવાની ઇચ્છાનો અભાવ સંતોષ છે. વસ્તુઓનો સ્વીકાર કે ત્યાગ કરતાં પહેલાં આવો સંતોષ હોવો જોઈએ, એ એની વિશેષતા છે. કાષ્ઠમૌન એટલે ઇશારાથી પણ પોતાનો અભિપ્રાય પ્રગટ ન કરવો. અને કાંઈ બોલવું નહીં એ આકારમૌન છે. "परिक्षीणवितर्कजालः" વિતર્ક એટલે આગળ કહેવાશે એ સંશય, વિપર્યય વગેરે. આનાથી શુદ્ધ મનઃસ્થિતિ કહી. આ યમનિયમો વિષ્ણુપુરાણમાં આ પ્રમાણે કહ્યા છે: "બ્રહ્મચર્ય, અહિંસા, સત્ય, અસ્તેય, અપરિગ્રહનું યોગીએ નિષ્કામભાવે સેવન કરવું, જેથી એનું મન પાત્રતા કેળવે. સ્વાધ્યાય, શૌચ, સંતોષ અને તપ સંયત આત્માવાળા યોગીએ સેવવાં જોઈએ. અને મનને સતત પરબ્રહ્મમાં જોડવાનો અભ્યાસ કરવો જોઈએ. આ પાંચ પાંચ યમનિયમ કહ્યા. એ કામનાવાળાને વિશિષ્ટ ફળ આપનારા અને નિષ્કામ યોગીને મોક્ષ આપનારા છે. (વિષ્ણુપુરાણ ૬, ૭, ૩૬-૩૮) ૩૨.

★

एतेषां यमनियमानाम्- આ યમ નિયમોનો-

वितर्कबाधने प्रतिपक्षभावनम् ॥३३॥

વિતર્કથી બાધ થાય, તો વિરોધી ભાવના કરવી. ૩૩

भाष्य

यदास्य ब्राह्मणस्य हिंसादयो वितर्का जायेरन्हनिष्याम्यहमपकारिणमनृतमपि वक्ष्यामि, द्रव्यमप्यस्य स्वीकरिष्यामि, दारेषु चास्य व्यवायी भविष्यामि, परिग्रहेषु चास्य स्वामी भविष्यामीति । एवमुन्मार्गप्रवणवितर्कज्वरेणातिदीप्तेन बाध्यमानस्तत्प्रतिपक्षान्भावयेत्- 'घोरेषु संसाराङ्गारेषु पच्यमानेन मया शरणमुपागतः सर्वभूताभयप्रदानेन योगधर्मः । स खल्वहं त्यक्त्वा वितर्कान्पुनस्तानाददानस्तुल्यः श्ववृत्तेने'ति भावयेत् । यथा श्वा वान्तावलेही तथा त्यक्तस्य पुनराददान इत्येवमादि सूत्रान्तरेष्वपि योज्यम् ॥३३॥

જ્યારે બ્રાહ્મણને હિંસા વગેરેના વિચારો આવે : "મારી હાનિ કરનારને મારી નાખીશ. જૂઠું પણ બોલીશ, એનું ધન લઈ લઈશ, એની પત્ની સાથે વ્યભિચાર કરીશ, એની વસ્તુઓનો માલિક બનીશ". આમ અવળે માર્ગે દોરનારા વિચારોરૂપ તીવ્ર જવરથી પીડાતો હોય, ત્યારે એમના વિરોધી વિચારોની ભાવના કરે. "સંસારના ભયંકર અંગારાઓમાં શેકાઈ રહેલા મેં બધાં પ્રાણીઓને અભયદાનપૂર્વક યોગધર્મનું શરણ સ્વીકાર્યું છે. એનો ત્યાગ કરીને હવે જો હું આવા વિચારોનો ફરીથી સ્વીકાર કરું, તો હું કૂતરા જેવો ગણાઉં." જેમ કૂતરો પોતે ઊલટી કરેલું ચાટે, એમ ત્યાગેલાનો ફરીથી સ્વીકાર કરનાર ગણાય છે. આવું બીજાં સૂત્રોમાં પણ યોજવું. ૩૩

तत्त्व वैशारदी

'श्रेयांसि बहुविघ्नानि' इत्येषामपवादसंभवे तत्प्रतीकारोपदेशपरं सूत्रमवतारयति-एतेषां यमनियमानामिति । सूत्रं-वितर्कबाधने प्रतिपक्षभावनम् । भाष्ये नास्ति तिरोहितमिव किञ्चन ॥३३॥

સારા કામમાં ઘણાં વિઘ્નો હોય છે, એમ યોગમાર્ગમાં પણ અપવાદોની શક્યતા છે. તેથી એમનો પ્રતિકાર શી રીતે કરવો, એનો ઉપદેશ કરતું સૂત્ર "એતેષાં યમનિયમાનામ્" કહીને "વિતર્કબાધને પ્રતિપક્ષ ભાવનમ્" પ્રસ્તુત કરે

છે. ભાષ્ય સ્પષ્ટ છે. ૩૩

★

वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफलाइति प्रतिपक्षभावनम् ॥३४॥

"હિંસા વગેરે વિતર્કો (સંકલ્પો અને કાર્યો) કરેલા, કરાવેલા, અનુમોદન કરેલા, લોભ, ક્રોધ, મોહપૂર્વક, મૃદુ, મધ્યમ કે તીવ્ર ભાવે સેવેલા અનંત દુઃખ અને અજ્ઞાનરૂપ ફળ આપનારા છે, " એમ પ્રતિપક્ષ (વિરોધી) ભાવના કરવી. ૩૪

भाष्य

तत्र हिंसा तावत्-कृता कारितानुमोदितेति त्रिधा । एकैका पुनस्त्रिधा लोभेन मांसचर्मार्थेन, क्रोधेनापकृतमनेनेति, मोहेन धर्मो मे भविष्यतीति लोभक्रोधमोहाः । पुनस्त्रिविधा मृदुमध्याधिमात्रा इति । एवं सप्तविंशतिर्भेदा भवन्ति हिंसायाः । मृदुमध्याधिमात्राः पुनस्त्रिविधाः मृदुमृदुर्मध्यमृदुस्तीव्रमृदुरिति । तथा मृदुमध्यो मध्यमध्यस्तीव्रमध्य इति । तथा मृदुतीव्रो मध्यतीव्रोऽधिमात्रतीव्र इति । एवमेकाशीतिभेदा हिंसा भवति । सा पुनर्नियमविकल्पसमुच्चयभेदादसंख्येया प्राणभृद्भेदस्यापरिसंख्येयत्वादिति । एमनृतादिष्यपि योज्यम् ।

ते खल्वमी वितर्का दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम्, दुःखमज्ञानं चानन्तं फलं येषामिति प्रतिपक्षभावनम् । तथा च हिंसकस्तावत्प्रथमं वध्यस्य वीर्यमाक्षिपति, ततश्च शस्त्रादिनिपातेन दुःखयति, ततो जीवितादपि मोचयति । ततो वीर्याक्षेपादस्य चेतनाचेतनमुपकरणं क्षीणवीर्यं भवति, दुःखोत्पादान्नरकतिर्यक्प्रेतादिषु दुःखमनुभवति, जीवितव्यपरोपणात्प्रतिक्षणं च जीवितात्यये वर्तमानो मरणमिच्छन्नपि दुःखविपाकस्य नियतविपाकवेदनीयत्वात्कथञ्चिद्देवोच्छ्वसिति । यदि च कथञ्चित्पुण्यावापगता हिंसा भवेत्तत्र सुखप्राप्तौ भवेदल्पायुरिति । एवमनृतादिष्वपि योज्यं यथासंभवम् । एवं वितर्काणां

चामुमेवानुगतं विपाकमनिष्टं भावयन् न वितर्केषु मनः प्रणिदधीत ॥३४॥

હિંસા પોતે કરેલી, બીજા પાસે કરાવેલી અને અનુમોદિત કરેલી, એમ ત્રણ પ્રકારની છે. એમાંથી પ્રત્યેક ફરીથી, માંસ કે ચામડીના લોભથી, આણે મારું નુકસાન કર્યું છે, એમ ક્રોધથી, અને (યજ્ઞમાં હિંસા કરીશ તો) મને ધર્મનો લાભ થશે, એમ મોહથી કરેલી એમ ત્રણ પ્રકારની છે. વળી, લોભ, ક્રોધ અને મોહ (મૃદુ, મધ્યમ અને તીવ્ર) એમ ત્રણ પ્રકારના છે. આમ હિંસાના સત્તાવીસ ભેદો છે. મૃદુ, મધ્યમ અને તીવ્ર પણ ત્રણ ત્રણ પ્રકારના છે :- મૃદુમૃદુ, મધ્યમમૃદુ, અને તીવ્રમૃદુ. તેમજ મૃદુમધ્યમ, મધ્યમમધ્યમ, અને તીવ્રમધ્યમ. તેમજ મૃદુતીવ્ર, મધ્યમતીવ્ર અને તીવ્રતીવ્ર. આમ હિંસાના એક્યાશી ભેદો છે. એ પણ પ્રાણધારી જીવો અસંખ્ય હોવાથી, નિયમ, વિકલ્પ અને સમુચ્ચયના ભેદોથી અસંખ્ય ભેદોવાળી છે. (માછલાંની જ હિંસા કરીશ એ નિયમ, માછલાં અથવા કરચલામાંથી એક ને જ મારીશ એ વિકલ્પ અને બધાં પ્રાણીઓને મારીશ એ સમુચ્ચય છે). આમ અસત્ય વગેરે વિષે પણ યોજવું.

આ બધા વિતર્કો અનંત દુઃખ અને અજ્ઞાન ફળવાળા છે, એમ વિચારવું, એ પ્રતિપક્ષ ભાવના છે. દુઃખ અને અજ્ઞાનનો કદી અંત ન આવે એવા ફળવાળાં આ પાપો છે, એ પ્રતિપક્ષ (વિરોધી) વિચાર છે.

હિંસા કરનાર વધ્ય પ્રાણીના બળને દબાવી દે છે, પછી શસ્ત્રવગેરેનો પ્રયોગ કરી એને દુઃખી કરે છે, પછી એનો જીવનથી વિયોગ કરે છે. આ પાપકર્મના ફળરૂપે વધ્ય પ્રાણીના બળને દબાવી દીધું હોવાથી, હિંસા કરનારનાં ચેતન અને અચેતન ઉપકરણો શક્તિહીન થાય છે. એને દુઃખ આપ્યું હતું, તેથી નરકમાં, પશુ કે પ્રેતયોનિમાં દુઃખ અનુભવે છે. અને એના જીવનનો વિયોગ કર્યો હતો, તેથી જીવનનો અંત થાય, એવી પીડા ભોગવતો હોવા છતાં, અને મરણની ઇચ્છા કરતો હોવા છતાં, કર્મવિપાક રૂપ દુઃખ નિશ્ચિત્તરૂપે ફળનો અનુભવ કરાવનાર હોવાથી, ગમે તેમ શ્વાસ લે છે. (મરી શકતો નથી). જો હિંસા પુણ્યકર્મસાથે ભળેલી હોય, તો સુખ પ્રાપ્ત થાય ખરું, પણ એ અલ્પજીવી હોય છે. આમ અસત્ય વગેરેના વિષયમાં પણ યથા-સંભવ યોજના સમજવી જોઈએ. વિતર્કોનું

આવું, પાછળ પાછળ વહી આવતું ફળ હોય છે, એવું વિચારીને વિતર્કોમાં મનનું પ્રણિધાન ન કરવું. ૩૪

तत्त्व वैशारदी

तत्र वितर्काणां स्वरूपप्रकारकारणधर्मफलभेदान्प्रतिपक्षभावनाविषयान्प्रतिपक्षभावनास्वरूपाभिधित्सया सूत्रेणाह-वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम् । व्याचष्टे-तत्र हिंसेति । प्राणभृत्भेदस्यापरिसंख्येयत्वान्नियमविकल्पसमुच्चयाः संभविनो हिंसादिषु । तत्राधर्मतस्तमःसमुद्रेके सति चतुर्विधविपर्ययलक्षणस्याज्ञानस्याप्युदय इत्यज्ञानफलत्वमप्येतेषामिति ।

दुःखाज्ञानन्तफलत्वमेव हि प्रतिपक्षभावनं तद्वशादेभ्यो निवृत्तेरिति तदेव प्रतिपक्षभावनं स्फोरयति-वध्यस्य । पश्चादेर्वीर्यं प्रयत्नं कायव्यापारहेतुं प्रथममाक्षिपति यूपनियोजनेन । तेन हि पशोरप्रागल्भ्यं भवति । शेषमतिस्फुटम् ॥३४॥

"वितर्का हिंसादयः" વગેરે સૂત્રથી વિતર્કોના પ્રતિપક્ષો (સદ્ વિચારો)ની ભાવનાના વિષયો અને સ્વરૂપને કહેવા માટે વિતર્કોના પ્રકારો, કારણો, ધર્મો અને ફળોના ભેદો દર્શાવે છે. "तत्र हिंसा तावत्..." વગેરેથી ભાષ્યકાર સૂત્ર સમજાવે છે. પ્રાણધારી જીવોના ભેદો અસંખ્ય હોવાથી, હિંસા વગેરે પાપોમાં નિયમ, વિકલ્પ અને સમુચ્ચયનો સંભવ છે. અધર્મ તમોગુણને વધુ ગાઢ બનાવે છે, પછી એમાંથી ચાર પ્રકારના વિપર્યયજ્ઞાનરૂપ અવિદ્યાનો ઉદય થાય છે. આમ હિંસા વગેરે પાપકર્મોનું ફળ અજ્ઞાન પણ છે.

પાપ દુઃખ અને અજ્ઞાનરૂપ અનંત ફળ આપનાર છે, એમ વિચારવું એ જ પ્રતિપક્ષ ભાવના (દુષ્ટ વિચારોના વિરોધી સદ્વિચારમાં મનને સ્થિર કરવાનો અભ્યાસ) છે. કારણ કે એનાથી મનુષ્ય પાપકર્મથી નિવૃત્ત થાય છે. "वध्यस्य" વગેરેથી એને વધુ સ્પષ્ટ કરે છે. પશુ વગેરેનું બળ એટલે એના શરીરનો બંધનમાંથી છૂટવાનો પ્રયત્ન. એને સૌ પહેલાં યૂપ (યજ્ઞના સ્તંભ) સાથે બાંધીને દબાવી દેવામાં આવે છે. આનાથી પશુની બધી હોશિયારી નષ્ટ થાય છે. બાકીનું અત્યંત સ્પષ્ટ છે. ૩૪

★

प्रतिपक्षभावनाहेतोर्हेया वितर्का यदास्य स्युरप्रसवधर्माणस्तदा तत्कृतमैश्वर्यं योगिनः सिद्धिसूचकं भवति । तद्यथा- પ્રતિપક્ષભાવનાના અભ્યાસથી ત્યજવાયોગ્ય વિતર્કો અપ્રસવધર્મવાળા (ફળ ઉત્પન્ન કરવાની શક્તિ વિનાના) બને છે. ત્યારે

એનાથી ઉત્પન્ન થયેલું ઐશ્વર્ય યોગીની સિદ્ધિ સૂચવે છે. દાખલા તરીકે -

अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः ॥३५॥

અહિંસા પ્રતિષ્ઠિત (સિદ્ધ) થતાં એ (યોગી)ની પાસે પ્રાણીઓ વૈર ત્યાગે છે. ૩૫

ભાષ્ય

सर्वप्राणिनां भवति ॥३५॥

બધાં પ્રાણીઓ વૈર ત્યાગે છે. ૩૫

तत्त्व वैशारदी

उक्ता यमनियमाः । तदपवादकानां च वितर्काणां प्रतिपक्षभावनातो हानिरुक्ता । संप्रत्यप्रत्यूहं यमनियमाभ्यासात् तत्तत्सिद्धिपरिज्ञानसूचकानि चिह्नान्युपन्यस्यति यत्परिज्ञानाद्योगी तत्र तत्र कृतकृत्यः कर्तव्येषु प्रवर्तत इत्याह- यदेति । अहिंसाप्रतिष्ठायां तत्संनिधौ वैरत्यागः । शाश्वतिकविरोधा अप्यश्वमहिषमूषकमार्जाराहिनकुलादयोऽपि भगवतः प्रतिष्ठिताहिंसस्य संनिधानात्तच्चित्तानुकारिणो वैरं परित्यजन्तीति ॥३५॥

યમનિયમો કહ્યા. એમાં વિઘ્ન કરનારા વિતર્કોનો પ્રતિપક્ષ ભાવનાથી નાશ કહ્યો. "यदास्य..." વગેરેથી હવે નિર્વિઘ્ને યમનિયમોના અનુષ્ઠાનથી તે તે સિદ્ધિના જ્ઞાનને સૂચવતાં ચિન્હો વર્ણવે છે. આના પૂરા જ્ઞાનથી યોગી સર્વત્ર સફળ થઈને પોતાના કર્તવ્યમાં જોડાય છે.

નિત્ય વિરોધી અશ્વ-મહિષ, બિલાડી-ઉંદર, સાપ-નોળિયો વગેરે પણ અહિંસામાં પ્રતિષ્ઠિત થયેલા ભગવાનના સાન્નિધ્યમાં, એના (યોગીના) ચિત્તનું અનુસરણ કરીને વૈર ત્યજે છે. ૩૫

★

सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम् ॥३६॥

સત્ય પ્રતિષ્ઠિત થતાં, ક્રિયાનું ફળ આપનાર બને છે. ૩૬

ભાષ્ય

धार्मिको भूया इति भवति धार्मिकः । स्वर्गं प्राप्नुहीति स्वर्गं प्राप्नोति । अमोघास्य वाग्भवति ॥३६॥

ધાર્મિક બન (એમ યોગી કહે) તો ધાર્મિક બને છે. સ્વર્ગ મેળવ,

એટલે સ્વર્ગમાં જાય છે. આની (યોગીની) વાણી અમોઘ (સદા સફળ) થાય છે. ૩૬

तत्त्व वैशारदी

सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम् । क्रियासाध्यौ धर्माधर्मौ क्रिया । तत्फलं च स्वर्गनरकादि । ते एवाश्रयतीत्याश्रयः । तस्य भावस्तत्त्वम् । तदस्य भगवतो वाचा भवतीति । क्रियाश्रयत्वमाह-धार्मिक इति । फलाश्रयत्वमाह- स्वर्गमिति । अमोघाऽप्रतिहता ॥३६॥

ધર્મ અને અધર્મ ક્રિયાથી સિદ્ધ થાય છે, માટે ક્રિયા કહેવાય છે. એમનું ફળ સ્વર્ગ, નરક વગેરે છે. એ જેને આધારે રહે એ આશ્રય કહેવાય. એનો ભાવ આશ્રયત્વ છે. એ આ ભગવાનની વાણીથી થાય છે. "धार्मिको भूयाः" વગેરેથી ક્રિયાશ્રયત્વ કહે છે. "स्वर्गं प्राप्नुहि..." વગેરેથી ફલાશ્રયત્વ કહે છે. અમોઘ એટલે અપ્રતિહત. ૩૬

★

अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम् ॥३७॥

અસ્તેયની પ્રતિષ્ઠા થતાં બધાં રત્નો આવી મળે છે. ૩૭

भाष्य

सर्वदिक्स्थान्यस्योपतिष्ठन्ते रत्नानि ॥३७॥

બધી દિશાઓ અને સ્થાનોમાંથી રત્નો એને મળે છે. ૩૭

तत्त्व वैशारदी

अत्येयप्रतिष्ठायां सर्वरत्नोपस्थानम् । सुबोधम् ॥३७॥

અસ્તેય સિદ્ધ થતાં બધાં રત્નો મળે છે. સરળ છે. ૩૭

★

ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः ॥३८॥

બ્રહ્મચર્ય સિદ્ધ થતાં દિવ્યશક્તિ પ્રાપ્ત થાય છે. ૩૮

भाष्य

यस्य लाभादप्रतिघान्गुणानुत्कर्षयति, सिद्धश्च विनेयेषु ज्ञानमाधातुं समर्थो भवतीति ॥३८॥

શક્તિ પ્રાપ્ત થતાં, ક્યાંય નિષ્ફળ ન થાય એવા ગુણોનો ઉત્કર્ષ સાધે છે, અને સ્વયં સિદ્ધ બની શિષ્યોમાં જ્ઞાન સંક્રાન્ત કરવા માટે સમર્થ બને છે. ૩૮

तत्त्व वैशारदी

ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः । वीर्यं सामर्थ्यं यस्य लाभादप्रतिघातप्रतीघाता-न्गुणानणिमादीनुत्कर्षयत्युपचिनोति । सिद्धश्च तारादिभिरष्टाभिः सिद्धिभिरूहाद्य-परनामभिरुपेतो विनेयेषु शिष्येषु ज्ञानं योगतदङ्गविषयमाघातुं समर्थो भवतीति ॥३८॥

વીર્ય એટલે સામર્થ્ય; જેની પ્રાપ્તિથી અણિમા વગેરે ક્યાંય ન રોકાતા ગુણો-સિદ્ધિઓ-મેળવે છે. સિદ્ધ બનીને ઊહ વગેરે નામોવાળી, તારા વગેરે આઠ સિદ્ધિઓ મેળવીને શિષ્યોમાં યોગ અને એનાં અંગો વિષેનું જ્ઞાન સંક્રાન્ત કરવાનું સામર્થ્ય પ્રાપ્ત કરે છે. ૩૮

★

अपरिग्रहस्थैर्ये जन्मकथन्तासंबोधः ॥३९॥

અપરિગ્રહ સ્થિર થતાં જન્મ શા કારણે થાય છે એનો સ્પષ્ટ બોધ થાય છે. ૩૯

भाष्य

अस्य भवति । कोऽहमासं, कथमहमासं, किंस्विदिदं, कथंस्विदिदं, के वा भविष्यामः, कथं वा भविष्याम इत्येवमस्य पूर्वान्तपरान्तमध्ये-ष्वात्मभावजिज्ञासा स्वरूपेणोपावर्तते । एता यमस्थैर्ये सिद्धयः ॥३९॥

અપરિગ્રહ સ્થિર થાય ત્યારે આને (યોગીને) હું કોણ હતો ? કેવી સ્થિતિમાં હતો ? આ (શરીર) શું છે ? કેવી રીતે એ થયું ? (ભવિષ્યમાં) શું થઈશ ? કેવી રીતે થઈશ ? એ બધું આત્માના પૂર્વના (પહેલાંના) અને છેવટના અંતનું અને મધ્યનું જ્ઞાન મેળવવાની ઇચ્છા થાય છે, અને એ બધું સ્વરૂપતઃ એની સમક્ષ પ્રગટ થાય છે. આ યમોની સ્થિરતા થતાં મળતી સિદ્ધિઓ છે. ૩૯

तत्त्व वैशारदी

अपरिग्रहस्थैर्ये जन्मकथन्तासंबोधः । निकायाविशिष्टैर्देहेन्द्रियादिभिः संबन्धो

जन्म । तस्य कथन्ता किंप्रकारता । तस्यां संबोधः साक्षात्कारः । सप्रकारातीन्द्रियशान्तोदिताव्यपदेश्यजन्मपरिज्ञानमिति यावत् । अतीतं जिज्ञासते—कोऽहमासमिति । तस्यैव प्रकारभेदमुत्पादे स्थितौ च जिज्ञासते-कथमहमासमिति । वर्तमानस्य जन्मनः स्वरूपं जिज्ञासते-किंस्विदिति । शरीरं भौतिकं किं भूतानां समूहमात्रं वाहास्वित्तेभ्योऽन्यदिति । अत्रापि कथंस्विदित्यनुषञ्जनीयम् । क्वचित्तु पठ्यत एव । अनागतं जिज्ञासते-के वा भविष्याम इति । अत्रापि कथंस्विदित्यनुषङ्गः । एवमस्येति । पूर्वान्तोऽतीतः कालः परान्तो भविष्यन्मध्यो वर्तमानस्तेष्वात्मनो भावः शरीरादिसम्बन्धस्तस्मिञ् जिज्ञासा ततश्च ज्ञानम् । यो हि यदिच्छति स तत्करोतीति न्यायात् ॥३९॥

દેહ, ઇન્દ્રિયો વગેરેના સંઘાત સાથે સંબંધ થવો જન્મ છે. એની કથંતા એટલે એ શી રીતે બન્યું ? એનો સંબોધ એટલે સાક્ષાત્કાર. અતીન્દ્રિય એવા ભૂતકાળ, વર્તમાનકાળ અને ભવિષ્યકાળના જન્મોનું, એમના પ્રકારો સાથે, જ્ઞાન થાય છે. "કોહમાસમ્ ?" થી અતીતની જિજ્ઞાસાને લીધે પૂછે છે. "કથમહમાસમ્ ?"થી એના ઉત્પત્તિ અને સ્થિતિના પ્રકારોની જિજ્ઞાસા કરે છે. "કિંસ્વિત્ ?" થી વર્તમાન જન્મના સ્વરૂપને જાણવા ઇચ્છે છે. ભૌતિક શરીર ભૂતોનો સમૂહમાત્ર છે કે એનાથી ભિન્ન છે ? અહીં પણ "કથમ્ ?" કેવી રીતે - જોડવું જોઈએ. કોઈક ગ્રંથોમાં એનો પાઠ મળે પણ છે. "કે વા ભવિષ્યામઃ ?"થી અનાગતવિષે જાણવા માગે છે. અહીં પણ "કથં સ્વિત્" જોડવું જોઈએ.

આમ યોગીને પૂર્વનો અંત એટલે ભૂતકાળ, પર અંત એટલે ભવિષ્યકાળ અને મધ્ય એટલે વર્તમાનકાળ, એ બધા કાળોમાં પોતાનો ભાવ એટલે શરીર વગેરે સાથે સંબંધ, એ વિષે જિજ્ઞાસા અને પછી જ્ઞાન થાય છે. યોગી જે જે ઇચ્છે, એ અવશ્ય મેળવે એવો નિયમ છે. ૩૯

★

नियमेषु वक्ष्यामः - નિયમોની સિદ્ધિઓ કહેવાશે -

शौचात्स्वाङ्गजुगुप्सा परैरसंसर्गः ॥४०॥

શૌચથી પોતાના શરીર પ્રત્યે ઘૃણા અને બીજાં શરીરોનો અસંસર્ગ થાય છે. ૪૦

भाष्य

स्वाङ्गे जुगुप्सायां शौचमारभमाणः कायावद्यदर्शी कायानभिष्वङ्गी यतिर्भवति । किं च परैरसंसर्गः कायस्वभावावलोकी स्वमपि कायं

जिहासुर्मृज्जलादिभिराक्षालयन्नपि कायशुद्धिमपश्यन्कथं परकायैरत्यन्तमेवाप्रयतैः संसृज्येत ॥४०॥

પોતાના શરીર પ્રત્યે ઘૃણા થતાં એને પવિત્ર કરવાનો યત્ન આરંભે છે. છતાં શરીર સ્વભાવે જ અપવિત્ર છે એમ જાણી, એમાં આસક્તિ વિનાનો યતિ બને છે. વળી બીજાઓ સાથે અસંસર્ગ થાય છે. શરીરના સ્વભાવનું તટસ્થપણે અવલોકન કરતો યોગી, પોતાના શરીરને ત્યજવા ઇચ્છે છે, કારણ કે માટી-પાણી વગેરેથી એને ધોવા છતાં એની શુદ્ધિ જોતો નથી, તો પછી અસંયમી એવા બીજાઓના શરીરનો સંસર્ગ કેવી રીતે કરે ? ૪૦

तत्त्व वैशारदी

शौचात्स्वाङ्गजुगुप्सा परैरसंसर्गः । अनेन बाह्यशौचसिद्धिसूचकं कथितम् ॥४०॥

શૌચથી પોતાના અંગ તરફ જુગુપ્સા અને બીજાઓ સાથે અસંસર્ગ થાય છે. આનાથી બાહ્ય શૌચથી થતી સિદ્ધિ સૂચવી. ૪૦

★

किं च- વળી-

सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च ॥४१॥

અન્તઃકરણની શુદ્ધિ, મનની સૌમ્યતા, એકાગ્રતા, ઇન્દ્રિયજય અને આત્મદર્શનની યોગ્યતા પ્રાપ્ત થાય છે. ૪૧

भाष्य

भवन्तीति वाक्यशेषः । शुचेः सत्त्वशुद्धिस्ततः सौमनस्यं तत एकाग्र्यं तत इन्द्रियजयस्ततश्चात्मदर्शनयोग्यत्वं बुद्धिसत्त्वस्य भवतीत्येतच्छौचस्थैर्यादधिगम्यत इति ॥४१॥

સૂત્રમાં "થાય છે" એ વાક્યાંશ જોડવો જોઈએ. શૌચથી સત્ત્વશુદ્ધિ, એનાથી મનની પ્રસન્નતા, એનાથી એકાગ્રતા, એનાથી ઇન્દ્રિયજય અને એનાથી બુદ્ધિસત્ત્વમાં આત્મદર્શનની યોગ્યતા મેળવાય છે. આટલું શૌચની સ્થિરતાથી પ્રાપ્ત થાય છે. ૪૧

तत्त्व वैशारदी

आन्तरशौचसिद्धिसूचकमाह-किं चेति । सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रिय-जयात्मदर्शनयोग्यत्वानि च । चित्तमलानामाक्षालने चित्तसत्त्वममलं प्रादुर्भवति, वैमल्यात्सौमनस्यं स्वच्छता, स्वच्छं तदेकाग्रं, ततो मनस्तन्त्राणामिन्द्रियाणां तज्जयाज्जयस्तत आत्मदर्शनयोग्यत्वं बुद्धिसत्त्वस्य भवतीति ॥४१॥

"किं च" વગેરેથી આંતરિક પવિત્રતાથી મળતી સિદ્ધિ સૂચવે છે. ચિત્તના મળો ધોવાતાં, ચિત્તસત્ત્વ શુદ્ધ થાય છે. શુદ્ધિથી પ્રસન્નતા. પ્રસન્ન મન એકાગ્ર રહે છે. પછી મનના તાબામાં રહેલી ઇન્દ્રિયો જિતાય છે. મનના સંયમનું આ ફળ છે. પછી બુદ્ધિસત્ત્વ આત્મસાક્ષાત્કારની યોગ્યતાવાળું બને છે. ૪૧

★

सन्तोषादनुत्तमः सुखलाभः ॥४२॥

સંતોષથી સર્વોત્તમ સુખનો લાભ થાય છે. ૪૨

भाष्य

तथा चोक्तम्-

यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥ इति ॥४२॥
(शान्ति० १७४।४६; १७७।५१)

આ વિષે કહ્યું છે : "લોકમાં જે કામસુખ છે, અને સ્વર્ગમાં જે મહાન્ સુખ છે. એ તૃષ્ણાના ક્ષયથી થતા સુખની સોળમી કળા જેટલું પણ નથી." (મહાભારત, શાંતિપર્વ, ૧૭૪. ૪૬, ૧૭૭.૫૧) ૪૨

तत्त्व वैशारदी

संतोषादनुत्तमः सुखलाभः । न विद्यतेऽस्मादुत्तम इत्यनुत्तमः । यथा चोक्तं ययातिना पूरौ यौवनमर्पयता-

या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यताम् ।
तां तृष्णां संत्यजन्प्राज्ञः सुखेनैवाभिपूर्यते ॥ (विष्णुपु. ४।१०।१२)इति ।

तदेतद्दर्शयति-यच्च कामसुखं लोक इत्यादिना ॥४२॥

જેનાથી વધારે ઉત્તમ નથી એ અનુત્તમ કહેવાય. યયાતિએ પોતાના પુત્ર પૂરુને યૌવન પાછું આપતાં કહ્યું હતું : "જે દુર્બુદ્ધિવાળા લોકોથી કષ્ટથી

ત્યજાય એવી છે, અને જે વૃદ્ધ થતા લોકોમાં પણ જીર્ણ થતી નથી, એ તૃષ્ણાને ત્યજીને પ્રાજ્ઞ મનુષ્ય સુખથી ભરાઈ જાય છે." (વિષ્ણુપુરાણ, ૪.૧૦.૧૨). આ હકીકત "યચ્ચ કામસુખં લોકે..." વગેરેથી કહે છે. ૪૨

★

कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः ॥४३॥

તપથી અશુદ્ધિનો ક્ષય થતાં શરીર અને ઇન્દ્રિયોની સિદ્ધિ પ્રાપ્ત થાય છે. ૪૩

ભાષ્ય

निर्वर्त्यमानमेव तपो हिनस्त्यशुद्ध्यावरणमलम् । तदावरणमलापगमात्कायसिद्धिरणिमाद्या । तथेन्द्रियसिद्धिर्दूराच्छ्रवणदर्शनाद्येति ॥४३॥

તપશ્ચર્યા કરવાથી અશુદ્ધિનો નાશ થતાં આવરણરૂપ મળો નાશ પામે છે. આવરણ મળો દૂર થતાં અણિમા વગેરે શરીરની અને દૂરશ્રવણ, દૂરદર્શન વગેરે ઇન્દ્રિયોની સિદ્ધિઓ પ્રાપ્ત થાય છે. ૪૩

तत्त्व वैशारदी

तपःसिद्धिसूचकमाह-कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः । अशुद्धिलक्षणमावरणं तामसमधर्मादि । अणिमाद्या महिमा लघिमा प्राप्तिश्च । सुगमम् ॥४३॥

"કાયેન્દ્રિયસિદ્ધિઃ" વગેરે સૂત્રથી તપની સિદ્ધિ સૂચવે છે. અધર્મ વગેરે તામસ ગુણો અશુદ્ધિરૂપ આવરણ છે. અણિમા વગેરે એટલે મહિમા, લઘિમા અને પ્રાપ્તિ. સરળ છે. ૪૩

★

स्वाध्यायादिष्टदेवतासंप्रयोगः ॥४४॥

સ્વાધ્યાયથી ઇષ્ટ દેવતાનો સાક્ષાત્કાર થાય છે. ૪૪

ભાષ્ય

देवा ऋषयः सिद्धाश्च स्वाध्यायशीलस्य दर्शनं गच्छन्ति कार्ये चास्य वर्तन्त इति ॥४४॥

દેવો, મહર્ષિઓ, અને સિદ્ધપુરુષો સ્વાધ્યાયશીલને દર્શન આપે છે, અને એના કાર્યમાં મદદ કરે છે. ૪૪

तत्त्व वैशारदी

स्वाध्यायसिद्धिसूचकमाह-स्वाध्यायादिष्टदेवतासंप्रयोगः । सुगमम् ॥४४॥

"स्वाध्यायात्..." વગેરે સૂત્રથી તપની સિદ્ધિ સૂચવે છે. સરળ છે. ૪૪

★

समाधिसिद्धिरीश्वरप्रणिधानात् ॥४५॥

ઈશ્વરપ્રણિધાનથી સમાધિ સિદ્ધ થાય છે. ૪૫

भाष्य

ईश्वरार्पितसर्वभावस्य समाधिसिद्धिर्यया सर्वमीप्सितमवितथं जानाति देशान्तरे देहान्तरे कालान्तरे च । ततोऽस्य प्रज्ञा यथाभूतं प्रजानातीति ॥४५॥

પોતાનું સર્વસ્વ ઈશ્વરને અર્પણ કરવાથી સમાધિ સિદ્ધ થાય છે, જેનાથી જાણવા ઇચ્છેલું બધું યથાર્થ રીતે જાણી શકાય છે, ભલે એ બધું અન્ય દેશમાં, દેહમાં કે કાળમાં હોય. ત્યારે એની પ્રજ્ઞા પદાર્થો ખરેખર છે એવા જાણે છે. ૪૫

तत्त्व वैशारदी

समाधिसिद्धिरीश्वरप्रणिधानात् । न च वाच्यमीश्वरप्रणिधानादेव चेत्संप्रज्ञातस्य समाधेरङ्गिनः सिद्धिः कृतं सप्तभिरङ्गैरिति । ईश्वरप्रणिधानसिद्धौ दृष्टादृष्टावान्तरव्यापारेण तेषामुपयोगात् । संप्रज्ञातसिद्धौ च संयोगपृथक्त्वेन दघ्न इव क्रत्वर्थता पुरुषार्थता च। न चेवमनन्तरङ्गता धारणाध्यानसमाधीनां संप्रज्ञातसिद्धौ । संप्रज्ञातसमानगोचरतयाङ्गान्तरेभ्योऽतद्गोचरेभ्योऽस्यान्तरङ्गत्वप्रतीतेः । ईश्वरप्रणिधानमपि हीश्वरगोचरं न संप्रज्ञेयगोचरमिति बहिरङ्गमिति सर्वमवदातम् । प्रजानातीति प्रज्ञापदव्युत्पत्तिर्दर्शिता ॥४५॥

ઈશ્વરપ્રણિધાનથી અંગી (મુખ્ય) સંપ્રજ્ઞાત સમાધિથી થતી બધી સિદ્ધિઓ મળતી હોય તો યોગનાં સાત અંગોનું અનુષ્ઠાન શા માટે કરવું ? એમ ન વિચારવું જોઈએ. કારણ કે દેખાય અને ન દેખાય એવા અવાન્તર (ગૌણ) વ્યાપારવડે દહીં જેમ માણસ માટે અને યજ્ઞ માટે ઉપયોગી બને એમ એ બધાં ઈશ્વરપ્રણિધાનમાં ઉપયોગી છે. આનાથી સંપ્રજ્ઞાત સમાધિમાં ધારણા, ધ્યાન અને સમાધિની અંતરંગતા નષ્ટ થતી નથી. સંપ્રજ્ઞાત આ દાખલામાં બીજાં અંગોની જેમ (ઈશ્વરપ્રણિધાનમાં) કારણરૂપ બને છે. એની અંતરંગતા, બીજાં અંગો જે એની

તરફ પ્રત્યક્ષ રીતે ઢળેલાં નથી, એમની અપેક્ષાએ, જણાય છે. ઈશ્વરપ્રણિધાનમાં ઈશ્વર જ સીધો વિષય છે, સંપ્રજ્ઞાત સમાધિનો નહીં. (સૂત્રકાર ૨.૧માં ઈશ્વર પ્રણિધાનને ક્રિયાયોગનું અને ૨.૩૨માં નિયમોમાંનું એક બહિરંગ સાધન કહે છે. અને ૧.૨૩, ૨.૪૫માં સમાધિનું અંતરંગ સાધન કહે છે. સાધકને આ વિષે ગૂંચવણ ન થાય એ માટે વાચસ્પતિ મિશ્ર સ્પષ્ટતા કરે છે કે ઈશ્વર પ્રણિધાન સીધે સીધું નહીં, પણ યોગનાં સાત અંગોનું સફળ અનુષ્ઠાન કર્યા પછી જ સિદ્ધ થાય છે. પ્રારંભમાં એ સાધન છે, પણ અંતમાં સાધ્ય જણાય છે. ભગવાન શ્રી રમણ મહર્ષિ કહેતા કે બિનશરતી શરણાગતિ પછી, ઈશ્વરથી ભિન્ન, ભોગ કે મોક્ષ ઇચ્છતો વૈયક્તિક જીવ રહેવો ન જોઈએ.) આમ આ (ઈશ્વર પ્રણિધાન) બહિરંગ સાધન છે, એમ બધું સ્પષ્ટ છે. "પ્રજાનાતિ" પ્રજ્ઞા શબ્દની વ્યુત્પત્તિ દર્શાવે છે. ૪૫

★

उक्ताः सहसिद्धिभिर्यमनियमाः । आसनादीनि वक्ष्यामः ॥ तत्र- સિદ્ધિઓ સાથે યમ, નિયમ કહ્યા. હવે આસન વગેરે કહીશું. એમાં-

स्थिरसुखमासनम् ॥४६॥

સ્થિરતા અને સુખ ઉત્પન્ન કરે એ આસન છે. ૪૬

ભાષ્ય

तद्यथा पद्मासनं वीरासनं भद्रासनं स्वस्तिकं दण्डासनं सोपाश्रयं पर्यङ्कं क्रौञ्चनिषदनं हस्तिनिषदनमुष्ट्रनिषदनं समसंस्थानं स्थिरसुखं यथासुखं चेत्येवमादीनि ॥४६॥

પદ્માસન, વીરાસન, ભદ્રાસન, સ્વસ્તિક, દંડાસન, સોપાશ્રય, પર્યંકાસન, ક્રૌંચનિષદન, હસ્તિનિષદન, ઉષ્ટ્રનિષદન, સમસંસ્થાન, સ્થિરસુખ, યથાસુખ વગેરે. ૪૬

तत्त्व वैशारदी

उत्तरसूत्रमवतारयति-उक्ताः सह सिद्धिभिर्यमनियमाः । आसनादीनि वक्ष्याम इति । तत्र स्थिरसुखमासनम् । स्थिरं निश्चलं यत्सुखं सुखावहं तदासनमिति सूत्रार्थः । आस्यतेऽत्र आस्ते वानेनेत्यासनम् । तस्य प्रभेदानाह- तद्यथेति । पद्मासनं प्रसिद्धम् । स्थितस्यैकतरः पादो भून्यस्त एकतरश्चाकुञ्चितजानोरुपरि न्यस्त इत्येतद्वीरासनम् । पादतले वृषणसमीपे संपुटीकृत्य तस्योपरि पाणिकच्छपिकां कुर्यात्तद्भद्रासनम् । सव्यमाकुञ्चितं चरणं दक्षिणजङ्घोर्वन्तरे निक्षिपेत्, दक्षिणं चाकुञ्चितं चरणं वामजङ्घोर्वन्तरे निक्षिपेत्, एतत्स्वस्तिकम् । उपविश्य श्लिष्टाङ्गुलिकौ श्लिष्टगुल्फौ भूमिश्लिष्टजङ्घोरुपादौ प्रसार्य

दण्डासनमभ्यसेत् । योगपट्टकयोगात्सोपाश्रयम् । जानुप्रसारितबाहोः शयनं पर्यङ्कः । कौञ्चनिषदनादानि क्रौञ्चादीनां निषण्णानां संस्थानदर्शनात्प्रत्येतव्यानि । पार्ष्णिपादाग्राभ्यां द्वयोराकुञ्चितयोरन्योन्यसंपीडनं समसंस्थानम् । येन संस्थानेनावस्थितस्य स्थैर्यं सुखं च सिध्यति तदासनं स्थिरसुखम् । तदेतत्तत्र भगवतः सूत्रकारस्य संमतम् । तस्य विवरणं यथासुखं चेति ॥४६॥

"ઉક્તાઃ સહ સિદ્ધિભિર્યમનિયમાઃ" વગેરેથી આગળનું સૂત્ર પ્રસ્તુત કરે છે. "તત્ર - સ્થિરસુખમાસનમ્" સૂત્ર છે. સ્થિર એટલે નિશ્ચલ અને સુખ ઉત્પન્ન કરે એ આસન છે, એવો સૂત્રનો અર્થ છે. આસન શબ્દની વ્યુત્પત્તિ "આસ્યતે અત્ર" અથવા "આસ્તે અનેન" જેની ઉપર કે જેના વડે બેસાય એ આસન છે. "તદ્યથા"થી એના ભેદો કહે છે. પદ્માસન પ્રસિદ્ધ છે. એક પગ ભૂમિપર મૂકી, બીજા વાળેલા ઢીંચણપર બેસવું એ વીરાસન છે. વાળેલો ડાબોપગ જમણી જાંઘ અને સાથળ વચ્ચે રહે અને વાળેલો જમણો પગ ડાબી જાંઘ અને સાથળ વચ્ચે રહે એ સ્વસ્તિકાસન છે. બેસીને બંને પગની આંગળીઓ અને પાનીઓ સામસામે અડકેલી રાખી, જાંઘ અને સાથળ જમીનને અડકેલાં રાખી દંડાસનનો અભ્યાસ કરવો. યોગપટ્ટક નામના લાકડાના સાધનના આશ્રયે બેસવું સોપાશ્રય આસન છે. ઢીંચણોપર હાથ ફેલાવીને સૂવું પર્યંકાસન છે. ક્રૌંચ (સારસ), હાથી, ઊંટ બેઠેલાં હોય, એમના શરીરની સ્થિતિ જોઈને, તે તે આસનો જાણવાં જોઈએ. પાની અને પગના અગ્રભાગોને, બંને પગવાળીને, દબાવવા સમસંસ્થાન છે. જે રીતે બેસવાથી સુખ થાય અને સ્થિરતા સધાય એ સ્થિરસુખ છે, એવો ભગવાન સૂત્રકાર પતંજલિનો મત છે. "યથાસુખમ્" એનું વિવરણ છે. ૪૬

★

प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम् ॥४७॥

પ્રયત્નની શિથિલતા અને અનંતમાં ચિત્તની સમાપત્તિથી આસન સિદ્ધ થાય છે. ૪૭

ભાષ્ય

भवतीति वाक्यशेषः । प्रयत्नोपरमात्सिध्यत्यासनं येन नाङ्गमेजयो भवति । अनन्ते वा समापन्नं चित्तमासनं निर्वर्तयतीति ॥४७॥

"ભવતિ" થાય છે- એ વાક્યાંશ જોડવો જોઈએ. પ્રયત્ન શાન્ત થતાં આસન સિદ્ધ થાય છે, જેનાથી શરીરમાં કંપન થતું નથી. અથવા અનંતમાં સમાપન્ન થયેલું ચિત્ત આસન સિદ્ધ કરે છે. ૪૭

तत्त्व वैशारदी

आसनस्वरूपमुक्त्वा तत्साधनमाह-प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम्। सांसिद्धिको हि प्रयत्नः शरीरसाधको न योगाङ्गस्योपदेष्टव्यासनस्य कारणम्। तस्य तत्कारणत्व उपदेशवैयर्थ्यात्स्वरसत एव तत्सिद्धेः। तस्मादुपदेष्टव्यस्यासनस्यायमसाधको विरोधी च स्वाभाविकः प्रयत्नः। तस्य च यादृच्छिकासनहेतुतयासननियमोपहन्तृत्वात्। तस्मादुपदिष्टनियमासनमभ्यस्यता स्वाभाविकप्रयत्नशैथिल्यात्मा प्रयत्न आस्थेयो नान्यथोपदिष्टमासनं सिध्यतीति स्वाभाविकप्रयत्नशैथिल्यमासनसिद्धिहेतुः। अनन्ते वा नागनायके स्थिरतरफणासहस्रविधृतविश्वंभरामण्डले समापन्नं चित्तमासनं निर्वर्तयतीति ॥४७॥

"प्रयत्नशैथिल्य" વગેરેથી, જેનું સ્વરૂપ અગાઉ કહ્યું, એ આસનનું સાધન કહે છે. શરીરને ધારણ કરવા માટે સ્વાભાવિક રીતે જે પ્રયત્ન કરવો પડે છે, એ ઉપદેશ કરવામાં આવતા આસનનું કારણ નથી: કારણ કે એ સ્વભાવસિદ્ધ હોય, તો એને એના કારણ તરીકે ઉપદેશવું વ્યર્થ બને. તેથી સ્વાભાવિક પ્રયત્ન ઉપદેશાતા આસનનો વિરોધી અને અસાધક છે. મન ફાવે એમ બેસવામાં હેતુરૂપ હોવાથી, એ આસનના નિયમનો નાશ કરનાર છે. તેથી જેના નિયમો ઉપદેશવામાં આવે છે, એ આસનોનો અભ્યાસ કરવા ઇચ્છતા સાધકે સ્વાભાવિક પ્રયત્નને શિથિલ કરવાનો યત્ન કરવો જોઈએ, બીજી રીતે યોગાસન સિદ્ધ થતું નથી. આમ સ્વાભાવિક પ્રયત્નની શિથિલતા આસન સિદ્ધિનો હેતુ છે. અથવા અત્યંત સ્થિર હજાર ફેણોપર પૃથ્વીમંડળને ધારણ કરનાર નાગરાજ અનંતમાં એકાગ્ર થયેલું ચિત્ત આસન સિદ્ધ કરે છે. ૪૭

ततो द्वन्द्वानभिघातः ॥४८॥

એનાથી દ્વન્દ્વો પીડા કરતાં નથી. ૪૮

भाष्य

शीतोष्णादिभिर्द्वन्द्वैरासनजयान्नाभिभूयते ॥४८॥

ઠંડી, ગરમી વગેરે દ્વન્દ્વોથી આસન જીતનાર યોગી પીડિત થતો નથી.૪૮

तत्त्व वैशारदी

आसनविजयसूचकमाह-ततो द्वाद्वानभिघातः। निगदव्याख्यातं भाष्यम्। आसनमप्युक्तं विष्णुपुराणे-

एवं भद्रासनादीनां समास्थाय गुणैर्युतम् (६।७।३९) इति ॥४८॥

આસનવિજયના સૂચકને કહે છે, કે એનાથી દ્વન્દ્વો પીડા કરતાં નથી. ભાષ્ય સ્પષ્ટ છે.

વિષ્ણુપુરાણ ૬.૭.૩૯માં પણ "ભદ્રાસન વગેરેના ગુણોવાળા આસનનો આશ્રય કરીને યોગાભ્યાસ કરવો જોઈએ." એવો ઉલ્લેખ છે. ૪૮

★

तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः ॥४९॥

આસન સિદ્ધ થયા પછી શ્વાસોચ્છ્વાસની ગતિનો વિચ્છેદ પ્રાણાયામ છે. ૪૯

भाष्य

सत्यासनजये बाह्यस्य वायोराचमनं श्वासः । कौष्ठ्यस्य वायोर्निःसारणं प्रश्वासः । तयोर्गतिविच्छेद उभयाभावः प्राणायामः ॥४९॥

આસન જીત્યા પછી બહારના વાયુના આચમનરૂપ શ્વાસ અને કોઠાના વાયુના બહાર નીકળવારૂપ પ્રશ્વાસની ગતિનો વિચ્છેદ- બંનેનો અભાવ થવો- પ્રાણાયામ છે.

तत्त्व वैशारदी

आसनानन्तरं तत्पूर्वकतां प्राणायामस्य दर्शयंस्तल्लक्षणमाह-तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः । रेचकपूरककुम्भकेष्वस्ति श्वासप्रश्वासयोर्गतिविच्छेदः इति प्राणायामसामान्यलक्षणमेतदिति । तथा हि- यत्र बाह्यो वायुराचम्यान्तर्धार्यते पूरके तत्रास्ति श्वासप्रश्वासयोर्गतिविच्छेदः । यत्रापि कोष्ठ्यो वायुर्विरेच्य बहिर्धार्यते रेचके तत्रास्ति श्वासप्रश्वासयोर्गतिविच्छेदः । एवं कुम्भकेऽपीति । तदेतद्भाष्येणोच्यते- सत्यासनजय इति ॥४९॥

"तस्मिन् सति" વગેરે સૂત્રથી આસન પછી, એટલે પ્રાણાયામ પહેલાં આસનજય થવો જરૂરી છે, એમ દર્શાવતાં એનું લક્ષણ કહે છે. રેચક, પૂરક અને કુંભકમાં શ્વાસોચ્છવાસની ગતિ અટકે છે, એ પ્રાણાયામનું સામાન્ય લક્ષણ છે. પૂરક વખતે બહારના વાયુને અંદર લઈ, ધારણ કરવો પડે છે, તેથી એમાં એની ગતિ અટકે છે, તેમજ રેચક વખતે કોઠાના વાયુને બહાર કાઢીને રોકવો પડે છે, એમાં પણ એની ગતિ અટકે છે. કુંભકમાં પણ એમ જ બને છે. "सत्यासनजये" વગેરે ભાષ્યથી ભાષ્યકાર આ વાત સ્પષ્ટ કરે છે. ૪૯

★

स तु - એ પણ -

बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिः
परिदृष्टो दीर्घसूक्ष्मः ॥५०॥

બાહ્યવૃત્તિ, આભ્યન્તરવૃત્તિ અને સ્તંભવૃત્તિ (એમ ત્રણ પ્રકારનો પ્રાણાયામ) દેશ, કાળ અને સંખ્યાથી પરીક્ષિત થતો, લાંબો અને સૂક્ષ્મ બને છે. ૫૦

ભાષ્ય

यत्र प्रश्वासपूर्वको गत्यभावः स बाह्यः । यत्र श्वासपूर्वको गत्यभावः स आभ्यन्तरः । तृतीयः स्तम्भवृत्तिर्यत्रोभयाभावः सकृत्प्रयत्नाद्भवति । यथा तप्ते न्यस्तमुपले जलं सर्वतः संकोचमापद्यते तथा द्वयोर्युगपद्गत्यभाव इति । त्रयोऽप्येते देशेन परिदृष्टा इयानस्य विषयो देश इति । कालेन परिदृष्टाः क्षणानामियत्तावधारणेनावच्छिन्ना इत्यर्थः । संख्याभिः परिदृष्टा एतावद्भिः श्वासप्रश्वासैः प्रथम उद्घातस्तद्वन्निगृहीतस्यै-तावद्भिर्द्वितीय उद्घात एवं तृतीयः एवं मृदुरेवं मध्य एवं तीव्र इति संख्यापरिदृष्टः । स खल्वयमेवमभ्यस्तो दीर्घसूक्ष्मः ॥५०॥

ઉચ્છ્વાસપૂર્વક (સ્વાભાવિક) ગતિનો અભાવ બાહ્ય, શ્વાસપૂર્વક ગતિનો અભાવ આભ્યંતર અને એક પ્રયત્નથી બંનેનો અભાવ ત્રીજો સ્તંભવૃત્તિ પ્રાણાયામ છે. જેમ તપી ગયેલા પત્થર પર પાણીનું ટીપું પડતાં, બધી તરફથી સંકુચિત થાય છે, એમ બંનેની ગતિનો એકીસાથે અભાવ થાય છે. એ ત્રણ દેશથી પરીક્ષિત થઈ શકે છે કે આટલા પ્રદેશ સુધી પહોંચે છે. કાળથી પણ આટલી ક્ષણો સુધી રોકાયો એવી મર્યાદા નક્કી કરીને પરીક્ષિત થઈ શકે છે, તેમજ અમુક સંખ્યાથી શ્વાસોચ્છ્વાસનો પહેલો ઉદ્‌ઘાત, એને જીત્યા પછી નિશ્ચિત સંખ્યાનો બીજો ઉદ્‌ઘાત અને એ મુજબ ત્રીજો ઉદ્‌ઘાત પણ જાણવો. વધારે કે ઓછી સંખ્યાને કારણે મૃદુ, મધ્ય અને તીવ્ર એવા એના ભેદો થાય છે. આ રીતે નિયમિત અભ્યાસ કરતાં ક્રમશઃ લાંબો અને સૂક્ષ્મ બને છે. ૫૦

तत्त्व वैशारदी

प्राणायामविशेषत्रयलक्षणपरं सूत्रमवतारयति-स त्विति । बाह्याभ्यन्तर-स्तम्भवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः । वृत्तिशब्दः प्रत्येकं संबध्यते । रेचकमाह-यत्र प्रश्वासेति । पूरकमाह-यत्र श्वासेति । कुम्भकमाह-तृतीय इति । तदेव स्फुटयति-

यत्रोभयोः श्वासप्रश्वासयोः सकृदेव विधारकात्प्रयत्नादभावो भवति न पुनः पूर्ववदापूरणप्रयनौघविधारकप्रयत्नो नापि रेचकप्रयत्नौघविधारकप्रयत्नोऽपेक्ष्यते । किं तु यथा तप्त उपले निहितं जलं परिशुष्यत्सर्वतः संकोचमापद्यत एवमयमपि मारुतो वहनशीलो बलवद्विधारकप्रयत्ननिरुद्धक्रियः शरीर एव सूक्ष्मीभूतोऽवतिष्ठते न तु पूरयति येन पूरकः । न तु रेचयति येन रेचक इति । इयानस्य देशो विषयः प्रादेश-वितस्तिहस्तादिपरिमितो, निवातप्रदेश ईषीकातूलादिक्रियानुमितो बाह्यः । एवमान्तरो-ऽप्यापादतलमामस्तकं पिपीलिकास्पर्शसदृशेनानुमितः स्पर्शेन । निमेषक्रियावच्छिन्नस्य कालस्य चतुर्थो भागः क्षणः । तेषामियत्तावधारणेनावच्छिन्नः । स्वजानुमण्डलं पाणिना त्रिःपरामृश्यच्छेटिकावच्छिन्नः कालो मात्रा । ताभिः षटत्रिंशन्मात्राभिः परिमितः प्रथम उद्घातो मृदुः । स एव द्विगुणीकृतो द्वितीयो मध्यः । स एव त्रिगुणीकृतस्तृतीयस्तीव्रः । तमिमं संख्यापरिदृष्टं प्राणायाममाह-संख्याभिरिति । स्वस्थस्य हि पुंसः श्वासप्रश्वासक्रियावच्छिन्नेन कालेन यथोक्तच्छेटिकाकालः समानः प्रथमोद्घातकर्मतां नीत उद्घातो विजितो वशीकृतो निगृहीतः । क्षणानामियत्ताकालो विवक्षितः, श्वासप्रश्वासप्रचयोपपन्ना तु संख्येति कथंचिद्भेदः । स त्वल्वयं प्रत्यहमभ्यस्तो दिवसपक्षमासादिक्रमेण देशकालप्रचय व्यापितया दीर्घः । परमनैपुण्यसमधिगमनीयतया च सूक्ष्मो न तु मन्दतया ॥५०॥

"सं तु"थी त्रण विशेष प्रकारना प्राणायामोनां लक्षण कहेवा माटे "बाह्याभ्यन्तरवृत्ति..." वगेरे सूत्र प्रस्तुत करे छे. वृत्ति शब्द बाह्य वगेरे बधा शब्दो साथे जोडाय छे. "यत्र प्रश्वास" वगेरेथी रेचक कहे छे. "यत्र श्वास..." वगेरेथी पूरक कहे छे. "तृतीयः स्तम्भवृत्तिः" वगेरेथी कुंभक कहे छे. एने ज स्पष्ट करतां कहे छे के जेमां श्वास अने प्रश्वास बंनेनो एक ज प्रयत्नथी अभाव थाय, पहेलांनी जेम पूरवानो अने धारण करवानो तेमज बहार काढीने धारण करवानो प्रयत्न अपेक्षित न होय, पण तपी गयेला पत्थर पर पडेला पाणीनी जेम बधी तरफथी संकुचित थईने स्थिर थाय एने स्तंभवृत्ति कहे छे. आ स्तंभवृत्तिमां वहन (गति)शील पंवन बळवान प्रयत्नथी धारण थईने शरीरमां सूक्ष्म बनीने स्थिर रहे छे. अंदर पूरवामां आवतो न होवाथी ए पूरक नथी, अने बहार काढवामां आवतो न होवाथी रेचक नथी.

देशथी परीक्षित प्राणायाममां आटलो एनो प्रदेश छे, एटले आंगळ, वेंत के हाथ जेटला प्रदेश सुधी पहोंचे छे, एवी एनी परीक्षा, पवन विनाना स्थानमां बेसीने રૂ, ईषिका वगेरेनी क्रिया(चलन)थी अनुमान वडे जाणवामां आवे छे. आ बाह्य छे. ए रीते अंदर पण पगथी माथासुधी कीडीओना स्पर्श जेवा अनुभवथी अनुमान वडे जाणी शकाय छे. निमेष के आंख मींचवानी क्रियामां

લાગતા સમયનો ચોથો ભોગ ક્ષણ છે. કેટલી ક્ષણો વાયુ રોકાયો એના નિર્ણય વડે કાળથી પરીક્ષિત પ્રાણાયામ થાય છે. પોતાના ઢીંચણને હાથથી ત્રણવાર સ્પર્શીને ચપટી વગાડવા જેટલો સમય માત્રા કહેવાય છે. એવી છત્રીસ માત્રાઓથી માપેલો પહેલો મૃદુ ઉદ્‌ઘાત, એનાથી બેગણો બીજો મધ્ય ઉદ્‌ઘાત અને ત્રણ ગણો ત્રીજો તીવ્ર ઉદ્‌ઘાત કહેવાય છે.

"સંખ્યાભિઃ" વગેરેથી સંખ્યાથી માપેલા પ્રાણાયામને વર્ણવે છે. સ્વસ્થ મનુષ્યને શ્વાસ-પ્રશ્વાસમાં જેટલો સમય લાગે, એ અગાઉ કહ્યા પ્રમાણે ચપટી વગાડવામાં લાગતા સમય જેટલો હોય છે. પહેલો ઉદ્‌ઘાત સફળતાપૂર્વક પૂરો કરીને, એને જીતીને કે વશમાં કરીને પ્રાણાયામ થાય એ નિગૃહીત છે. ક્ષણો વડે આટલો સમય વાયુ રોકાયો અને સંખ્યા વડે કેટલીવાર શ્વાસપ્રશ્વાસ લીધા એની ગણતરી થાય છે, એમ એ બેમાં થોડો ફેર છે. આ રીતે દરરોજ અભ્યાસ કરતાં દિવસ, પખવાડિયું મહિનો વગેરે ક્રમથી દેશ અને કાળની દૃષ્ટિએ વધારે વ્યાપક બનીને દીર્ઘ કે લાંબો બને છે. અત્યંત નિપુણતાથી એની ગતિ જાણી શકાય એવી હોવાથી એને સૂક્ષ્મ પણ કહે છે, મંદતાના કારણે નહીં. ૫૦

★

बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः ॥५१॥

બાહ્ય અને આભ્યન્તર વિષયવિનાનો ચોથો (કુંભક) છે. ૫૧

ભાષ્ય

देशकालसंख्याभिर्बाह्यविषयपरिदृष्ट आक्षिप्तः । तथाभ्यन्तरविषयपरिदृष्ट आक्षिप्तः । उभयथा दीर्घसूक्ष्मः । तत्पूर्वको भूमिजयात्क्रमेणोभयोर्गत्यभावश्चतुर्थः प्राणायामः । तृतीयस्तु विषयानालोचितो गत्यभावः सकृदारब्ध एव, देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः । चतुर्थस्तु श्वासप्रश्वासयोर्विषयावधारणात्क्रमेण भूमिजयादुभयाक्षेपपूर्वको गत्यभावश्चतुर्थः प्राणायाम इत्ययं विशेषः ॥५१॥

દેશ, કાળ અને સંખ્યા વડે બહારના પ્રદેશવાળા રેચકને જીત્યા પછી, એના વિના, તેમજ આભ્યંતર પ્રદેશવાળા પૂરકને પણ એ રીતે જીત્યા પછી, એના વિના થતો પ્રાણાયામ કુંભક છે. બંને રીતે એ લાંબો અને સૂક્ષ્મ બને છે. એના અભ્યાસથી ક્રમે ક્રમે ભૂમિકાઓના જયથી, એ બંનેની ગતિના અભાવવાળો ચોથો કુંભક પ્રાણાયામ છે. ત્રીજા પ્રાણાયામમાં વિષયનો વિચાર કર્યા વિના એક જ પ્રયત્નથી દેશ, કાળ અને સંખ્યાથી પરીક્ષિત થઈને લાંબો

સૂક્ષ્મ બને છે. જ્યારે ચોથામાં શ્વાસ-પ્રશ્વાસના પ્રદેશનો નિશ્ચય કરીને ક્રમે ક્રમે ભૂમિજયથી બંને (પૂરક રેચક) વિનાનો ગતિનો અભાવ થાય છે, એ એની વિશેષતા છે. ૫૧

तत्त्व वैशारदी

एवं त्रयो विशेषा लक्षिताः । चतुर्थं लक्षयति-बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः । व्याचष्टे-देशकालसंख्याभिरिति । आक्षिप्तोऽभ्यासवशीकृताद्रूपादवरोपितः । सोऽपि दीर्घसूक्ष्मः । एवं ततपूर्वको बाह्याभ्यन्तरविषयप्राणायामो देशकालसंख्यादर्शनपूर्वकः । न चासौ चतुर्थस्तृतीय इव सकृत्प्रयत्नादह्नायजायते । किं त्वभ्यस्यमानस्तां तामवस्थामापन्नस्तत्तदवस्थाविजयानुक्रमेण भवतीत्याह-भूमिजयादिति । ननूभयोर्गत्यभावः स्तम्भवृत्तावप्यस्तीति कोऽस्मादस्य विशेष इत्यत आह-तृतीय इति । अनालोचनपूर्वः सकृत्प्रयत्ननिर्वर्तितस्तृतीयः । चतुर्थस्त्वालोचनपूर्वो बहुप्रयत्ननिर्वर्तनीय इति विशेषः । तयोः पूरकरेचकयोर्विषयोऽनालोचितोऽयं तु देशकालसंख्याभिरालोचित इत्यर्थः ॥५१॥

આમ ત્રણ પ્રાણાયામ કહ્યા. હવે "બાહ્યાભ્યંતર..." વગેરેથી ચોથો વર્ણવે છે. "દેશકાલસંખ્યાભિઃ" વગેરેથી ભાષ્યકાર સૂત્ર સમજાવે છે. આક્ષિપ્ત એટલે અભ્યાસથી વશ કરેલા સ્વરૂપવાળો કે પ્રયત્નની અપેક્ષા વિનાનો. એ પણ લાંબો અને સૂક્ષ્મ હોય છે. "તત્પૂર્વક" એટલે બહાર અને અંદરના પ્રદેશવાળા, અને દેશકાળ સંખ્યાને લક્ષમાં રાખીને થતા પ્રાણાયામપૂર્વક. આ ચોથો પ્રાણાયામ ત્રીજાની જેમ એકવારના પ્રયત્નથી ઝપાટાબંધ થતો નથી. પરંતુ અભ્યાસ કરતાં કરતાં, તે તે અવસ્થાઓ પ્રાપ્ત કરી, એમનો વિજય કરી, ક્રમે ક્રમે થાય છે, એમ "ભૂમિજયાત્" વગેરેથી કહે છે.

સ્તંભવૃત્તિમાં બંને (રેચક પૂરક)નો અભાવ થાય છે, પછી એ બેમાં (ત્રીજા અને ચોથામાં) વિશેષતા શું છે ? "તૃતીયસ્તુ" વગેરેથી જવાબ આપતાં કહે છે કે ત્રીજો પ્રાણાયામ આલોચના વિના, એક જ વખતના પ્રયત્નથી થાય છે. અને ચોથો (દેશકાળની) આલોચનાપૂર્વક, ઘણા પ્રયત્ન પછી સિદ્ધ થાય છે. એ એની વિશેષતા છે. પૂરક, રેચકના પ્રદેશના વિચાર વિનાનો ત્રીજો અને દેશ, કાળ, સંખ્યાથી આલોચિત ચોથો છે, એવો અર્થ છે. ૫૧

ततः क्षीयते प्रकाशावरणम् ॥५२॥

એનાથી (પ્રાણાયામથી) પ્રકાશ (જ્ઞાન)નું આવરણ ક્ષીણ થાય છે. ૫૨

भाष्य

प्राणायामानभ्यस्यतोऽस्य योगिनः क्षीयते विवेकज्ञानावरणीयं कर्म ।

यत्तदाचक्षते-महामोहमयेनेन्द्रजालेन प्रकाशशीलं सत्त्वमावृत्य तदेवाकार्ये नियुङ्क्त इति । तदस्य प्रकाशावरणं कर्म संसारनिबन्धनं प्राणायामाभ्यासाद् दुर्बलं भवति प्रतिक्षणं च क्षीयते । तथा चोक्तम्- तपो न परं प्राणायामात्ततो विशुद्धिर्मलानां दीप्तिश्च ज्ञानस्येति ॥५२॥

પ્રાણાયામોનો અભ્યાસ કરનાર યોગીનું વિવેકજ્ઞાનને આવરણ કરતું કર્મ ક્ષીણ થાય છે. આ વિષે કહ્યું છે :- "મહામોહમય ઇન્દ્રજાળથી પ્રકાશશીલ સત્ત્વનું આવરણ કરીને, એને અકાર્યમાં જોડે છે" આવું એનું પ્રકાશને આવરણ કરતું કર્મ, જે એના સંસારબંધનનું કારણ છે, એ પ્રાણાયામના અભ્યાસથી નબળું બને છે અને પ્રતિક્ષણ ક્ષીણ થતું જાય છે. વળી કહ્યું છે :- "પ્રાણાયામથી શ્રેષ્ઠ કોઈ તપ નથી. એનાથી મળોની વિશુદ્ધિ અને જ્ઞાનની દીપ્તિ થાય છે. ૫૨

तत्त्व वैशारदी

प्राणायामस्यावान्तरप्रयोजनमाह-ततः क्षीयते प्रकाशावरणम् । आव्रियतेऽनेन बुद्धिसत्त्वप्रकाश इत्यावरणं क्लेशः पाप्मा च । व्याचष्टे-प्राणायामानिति । ज्ञायतेऽनेनेति ज्ञानं बुद्धिसत्त्वप्रकाशः । विवेकस्य ज्ञानं विवेकज्ञानम् । विवेकज्ञानमावृणोतीति विवेकज्ञानावरणीयम् । भव्यगेयप्रवचनीयादीनां (अष्टाध्यायी ३।४।६८) कर्तरिनिपातनस्य प्रदर्शनार्थत्वात्कोपनीयरञ्जनीयवदत्रापि कर्तरि कृत्यप्रत्ययः । कर्मशब्देन तज्जन्यमपुण्यं तत्कारणं च क्लेशं लक्षयति । अत्रैवागमिनामनुमतिमाह-यत्तदाचक्षत इति । महामोहो रागः । तदविनिर्भागवर्तिन्यविद्यापि तद्ग्रहणेन गृह्यते । अकार्यमधर्मः । ननु प्राणायाम एव चेत्पाप्मानं क्षिणोति कृतं तर्हि तपसेत्यत आह-दुर्बलं भवतीति । न तु सर्वथा क्षीयते । अतस्तत्प्रक्षयाय तपोऽपेक्ष्यत इति । अत्राप्यागमिनामनुमतिमाह-तथा चोक्तमिति । मनुरप्याह-प्राणायामैर्दहेद्दोषान् (६।७२) इति । प्राणायामस्य योगाङ्गता विष्णुपुराण उक्ता-

प्राणाख्यमनिलं वश्यमभ्यासात्कुरुते तु यः ।
प्राणायामः स विज्ञेयः सबीजोऽबीज एव च ॥
परस्परेणाभिभवं प्राणापानौ यदानिलौ ।
कुरुतस्तद्विधानेन तृतीयं संयमात्तयोः ॥६।७।४०-४१) इति ॥५२॥

"ततः क्षीयते प्रकाशावरणम्" સૂત્રથી પ્રાણાયામનું ગૌણ પ્રયોજન કહે છે. બુદ્ધિસત્ત્વના પ્રકાશને ઢાંકે એને આવરણ, ક્લેશ કે પાપ કહે છે. "प्राणायामानभ्यस्यतः..." વગેરેથી ભાષ્યકાર સૂત્રની વ્યાખ્યા કરે છે. જેનાથી વસ્તુ જણાય એને જ્ઞાન કે બુદ્ધિસત્ત્વનો પ્રકાશ કહે છે. વિવેકનું જ્ઞાન આવૃત કરે એને વિવેકજ્ઞાનવરણીય (કર્મ) કહે છે. "भव्यगेयप्रवचनीय..." (અષ્ટાધ્યાયી.

૩.૪.૬૮) સૂત્ર પ્રમાણે કર્તામાં નિપાત થતો દર્શાવાય છે, તેથી કોપનીય, રંજનીયની જેમ અહીં પણ કર્તામાં કૃત્ય પ્રત્યય થયો છે.

કર્મ શબ્દથી કર્મથી ઉત્પન્ન થતાં પાપ અને એના કારણરૂપ ક્લેશો લક્ષિત કરે છે. "યત્તદાચક્ષતે.." વગેરેથી આગમાનુયાયીઓની સંમતિ દર્શાવે છે. મહામોહ એટલે રાગ. એમાં અવિભક્તપણે રહેલી અવિદ્યાનું પણ એનાથી ગ્રહણ થાય છે. અકાર્ય એટલે અધર્મ. પણ પ્રાણાયામથી જ પાપો ક્ષીણ થતાં હોય તો તપ શા કામનું ? એના જવાબમાં "દુર્બલં ભવતિ"-નબળું બને છે - પૂરેપૂરું નષ્ટ થતું નથી, એમ કહે છે. તેથી એના ક્ષય માટે તપ અપેક્ષિત છે. "તથા ચોક્તમ્"થી આ વિષે પણ આગમાનુયાયીઓની સંમતિ દર્શાવે છે. મનુએ પણ કહ્યું છે :- "પ્રાણાયામોથી દોષોને બાળી નાખે" (મનુસ્મૃતિ, ૬.૭૨).

વિષ્ણુપુરાણ (૬.૭.૪૦-૪૧)માં પ્રાણાયામને યોગનું અંગ કહ્યું છે :- "જે પ્રક્રિયા વાયુને અભ્યાસથી વશમાં કરે છે, એને પ્રાણાયામ જાણવો. એ સબીજ અને નિર્બીજ હોય છે. જ્યારે પ્રાણ અને અપાન એ બે વાયુઓ એક બીજાને દબાવીને જે રીતે જીતે, એ બે પ્રકારો, અને એ બંને જેમાં જીતી લેવાય એ ત્રીજો પ્રકાર છે." ૫૨

★

किं च - અને-

धारणासु च योग्यता मनसः ॥५३॥

ધારણાઓમાં મનની યોગ્યતા કેળવાય છે. ૫૩

ભાષ્ય

प्राणायामाभ्यासादेव । प्रच्छर्दनविधारणाभ्यां वा प्राणस्य (१।३४) इति वचनात् ॥५३॥

પ્રાણાયામના અભ્યાસથી જ (ધારણા સધાય છે). કારણ કે સૂત્ર ૧.૩૪માં "પ્રાણના રેચન અને વિધારણથી (મન સ્થિર થાય છે) એમ કહ્યું છે. ૫૩

तत्त्व वैशारदी

किं च - धारणासु च योग्यता मनसः । प्राणायामो हि मनः स्थिरीकुर्वन्धारणासु योग्यं करोति ॥५३॥

પ્રાણાયામ મનને સ્થિર બનાવીને ધારણા માટે યોગ્ય બનાવે છે. ૫૩

★

अथ कः प्रत्याहारः ? પ્રત્યાહાર શું છે ?

स्वविषयासंप्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः ॥५४॥

પોતાના વિષયો સાથે સંયોગ ન થતાં, ચિત્તના સ્વરૂપનું જાણે કે અનુકરણ કરે, એ ઇન્દ્રિયોનો પ્રત્યાહાર છે. ૫૪

भाष्य

स्वविषयसंप्रयोगाभावे चित्तस्वरूपानुकार इवेति चित्तनिरोधे चित्तवन्निरुद्धानीन्द्रियाणि नेतरेन्द्रियजयवदुपायान्तरमपेक्षन्ते । यथा मधुकरराजं मक्षिका उत्पतन्तमनूत्पतन्ति निविशमानमनुनिवेशन्ते तथेन्द्रियाणि चित्तनिरोधे निरुद्धानीत्येष प्रत्याहारः ॥५४॥

પોતાના વિષયો સાથે સંયોગના અભાવે, ચિત્તના સ્વરૂપનું જાણે કે અનુકરણ થાય, એટલે કે ચિત્ત-નિરોધ થતાં, ચિત્તની જેમ ઇન્દ્રિયોનો પણ નિરોધ થાય અને એમના જય માટે બીજા ઉપાયની અપેક્ષા ન રહે એ પ્રત્યાહાર છે. જેમ મધમાખીઓ પોતાના રાજાના ઊડવા સાથે ઊડી જાય અને એના બેસવા સાથે બેસે, એમ ઇન્દ્રિયો ચિત્તનિરોધથી નિરુદ્ધ થઈ જાય છે, એ પ્રત્યાહાર છે. ૫૪

तत्त्व वैशारदी

तदेवं यमादिभिः संस्कृतः संयमाय प्रत्याहारमारभते । तस्य लक्षणसूत्रमवतारयितुं पृच्छति-अथेति । स्वविषयासंप्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः । चित्तमपि हि मोहनीयरञ्जनीयकोपनीयैः शब्दादिभिर्विषयैर्न संप्रयुज्यते, तदसंप्रयोगाच्चक्षुरादीन्यपि न संप्रयुज्यन्त इति सोऽयमिन्द्रियाणां चित्तस्वरूपानुकारः । यत्पुनस्तत्त्वं चित्तमभिनिविशते न तदिन्द्रियाणां बाह्यविषयविषयाणामनुकारोऽपि । अत उक्तमनुकार इवेति । स्वविषयासंप्रयोगस्य साधारणस्य धर्मस्य चित्तानुकारनिमित्तत्वं सप्तम्या दर्शयति-स्वेति । अनुकारं विवृणोति-चित्तनिरोध इति । द्वयोर्निरोधहेतुश्च प्रयत्नस्तुल्य इति सादृश्यम् । अत्रैव दृष्टान्तमाह-यथा मधुकरराजमिति । दार्ष्टान्तिके योजयति- तथेति । अत्रापि विष्णुपुराणवाक्यम्-

शब्दादिष्वनुषक्तानि निगृह्याक्षाणि योगवित् ।
कुर्याच्चित्तानुकारीणि प्रत्याहारपरायणः ॥ (६।७।४३)

तस्य प्रयोजनं तत्रैव दर्शितम्-

वश्यता परमा तेन जायते निश्चलात्मनाम् ।
इन्द्रियाणामवश्यैस्तैर्न योगी योगसाधकः ॥ (६।७।४४) इति ॥५४॥

આમ યમ વગેરેથી સંસ્કાર પામેલો યોગી સંયમની સિદ્ધિ માટે પ્રત્યાહાર આરંભે છે. એના લક્ષણને વર્ણવતું સૂત્ર રજૂ કરવા માટે "अथ कः प्रत्याहारः ?" એમ પ્રશ્ન પૂછે છે. "स्वविषयासंप्रयोगे..." વગેરે સૂત્ર છે. ચિત્ત મોહ, રાગ અને ક્રોધ ઉત્પન્ન કરે એવા શબ્દ વગેરે વિષયો સાથે જોડાતું નથી. એના એ અસંયોગથી આંખ વગેરે ઇન્દ્રિયો પણ એમની સાથે ન જોડાય, એ ઇન્દ્રિયોનો ચિત્તના સ્વરૂપ સાથે અનુકાર (અનુકરણ) છે. પરંતુ જે તત્ત્વમાં ચિત્ત પ્રવેશે છે, એમાં, બાહ્ય વિષયોમાં જ પ્રવર્તતી ઇન્દ્રિયો, ચિત્તનું અનુકરણ કરીને પ્રવેશી શકતી નથી. તેથી "इव" જાણે કે અનુકરણ કરે છે એમ કહ્યું. "स्वविषय" વગેરેથી પોતાના વિષય સાથે અસંયોગરૂપ સાધારણ ધર્મનું, ચિત્તનું અનુકરણ નિમિત્ત છે, એમ સપ્તમી વિભક્તિના પ્રયોગથી દર્શાવ્યું. "चित्तनिरोध..." વગેરેથી અનુકરણનું વિવરણ આપે છે. બંનેના નિરોધના હેતુરૂપ પ્રયત્ન એકસરખો છે, એ સમાનતા છે. "यथा मधुकरराजम्..." વગેરેથી દૃષ્ટાન્ત આપે છે. "तथा..." વગેરેથી સમજાવવા ઇચ્છેલા વિષયમાં યોજે છે. આ વિષે વિષ્ણુપુરાણનું વચન છે :- "યોગના સ્વરૂપને જાણનાર શબ્દ વગેરે વિષયોમાં આસક્ત બનેલી ઇન્દ્રિયોનો નિગ્રહ કરી, ચિત્તનું અનુકરણ કરતી બનાવવાનો પ્રત્યાહારનો અભ્યાસ સતત કરે." (વિષ્ણુપુરાણ ૬.૭.૪૩)

એનું પ્રયોજન પણ ત્યાં દર્શાવ્યું છે :- "એનાથી ઇન્દ્રિયો પૂર્ણપણે વશ થાય છે. ઇન્દ્રિયો વશમાં ન હોય, એવો યોગી યોગસાધક નથી." (વિષ્ણુપુરાણ, ૬.૭.૪૪). ૫૪

★

ततः परमा वश्यतेन्द्रियाणाम् ॥५५॥

એનાથી ઇન્દ્રિયો પૂર્ણપણે વશ થાય છે. ૫૫

ભાષ્ય

शब्दादिष्वव्यसनमिन्द्रियजय इति केचित् । सक्तिर्व्यसनं व्यस्यत्येनं श्रेयस इति । अविरुद्धा प्रतिपत्तिर्न्याय्या । शब्दादिसंप्रयोगः स्वेच्छ्येत्यन्ये । रागद्वेषाभावे सुखदुःखशून्यं शब्दादिज्ञानमिन्द्रियजय इति केचित् । चित्तैकाग्र्यादप्रतिपत्तिरेवेति जैगीषव्यः । ततश्च परमा त्वियं वश्यता यच्चित्तनिरोधे निरुद्धानीन्द्रियाणि नेतरेन्द्रियजयवत्प्रयत्नकृतमुपायान्तरमपेक्षन्ते योगिन इति ॥५५॥

શબ્દ વગેરેનું વ્યસન ન હોવું ઇન્દ્રિયજય છે, એમ કેટલાક લોકો કહે છે. સક્તિ એટલે વ્યસન, કારણ કે એ મનુષ્યને શ્રેયથી "વ્યસ્યતિ" દૂર લઈ જાય છે. માટે (શ્રુતિ વગેરેથી) અવિરુદ્ધ અને ન્યાયસંગત શબ્દાદિ સેવવા જોઈએ, એમ કેટલાક કહે છે.

સ્વેચ્છાથી શબ્દ વગેરે વિષયો સેવવાની શક્તિ (ઇન્દ્રિયજય) છે, એમ બીજા કેટલાક કહે છે. રાગદ્વેષ અને સુખદુઃખ વિના શબ્દ વગેરેનું જ્ઞાન થાય એ ઇન્દ્રિયજય છે એમ કેટલાક લોકો કહે છે. જૈગિષવ્ય ઋષિના મત પ્રમાણે ચિત્ત એકાગ્ર બનતાં ઇન્દ્રિયોની અપ્રવૃત્તિ ઇન્દ્રિયજય છે. આનાથી પૂર્ણ વશ્યતા થાય છે. કારણ કે ચિત્તના નિરોધથી ઇન્દ્રિયો પણ નિરુદ્ધ થાય છે, અને ઇન્દ્રિયજય માટે પ્રયત્નપૂર્વક બીજા ઉપાયોની અપેક્ષા યોગીઓને રહેતી નથી. ૫૫

इति श्रीपातञ्जले सांख्यप्रवचने योगशास्त्रे श्रीमद्व्यासभाष्ये द्वितीयः साधनपादः ॥२॥

આમ શ્રી પતંજલિના યોગશાસ્ત્ર પર શ્રીમદ્ વ્યાસ રચિત સાંખ્ય પ્રવચન ભાષ્યમાં બીજો સાધનપાદ સમાપ્ત થયો. ૨

तत्त्व वैशारदी

अस्यानुवादकं सूत्रम्- ततः परमा वश्यतेन्द्रियाणाम् । ननु सन्ति किमन्या अपरमा इन्द्रियाणां वश्यता या अपेक्ष्य परमेयमुच्यते । अद्धा ता दर्शयति- शब्दादिष्विति । एतदेव विवृणोति-सक्ती रागो व्यसनम् । कया व्युपत्त्या ? व्यस्यति क्षिपति निरस्यत्येनं श्रेयस इति । तदभावोऽव्यसनं वश्यता । अपरामपि वश्यतामाह-अविरुद्धेति । श्रुत्याद्यविरुद्धशब्दादिसेवनं तद्विरुद्धेष्वप्रवृत्तिः । सैव न्याय्या, न्यायादनपेता यतः अपरामपि वश्यतामाह-शब्दादिसंप्रयोग इति । शब्दादिष्विन्द्रियाणां संप्रयोगः स्वेच्छया भोग्येषु स खल्वयं स्वतन्त्रो न भोग्यतन्त्र इत्यर्थः । अपरामपि वश्यतामाह-रागद्वेषाभावे सुखदुःखशून्यं माध्यस्थ्येन शब्दादिज्ञानमित्येके । सूत्रकाराभिमतां वश्यतां परमर्षिसंमतामाह-चित्तस्यैकाग्र्यात्सहेन्द्रियैरप्रवृत्तिरेव शब्दादिष्विति जैगीषव्यः । अस्याः परमतामाह-परमा त्विति । तुशब्दो वश्यतान्तरेभ्यो विशिनष्टि । वश्यतान्तराणि हि विषयाशीविषसंप्रयोगशालितया क्लेशविषसंपर्कशङ्कां नापक्रामन्ति । न हि विषविद्या-वित्प्रकृष्टोऽपि वशीकृतभुजंगमो भुजंगममङ्के निधाय स्वपिति विश्रब्धः । इयं तु वश्यता विदूरीकृतनिखिलविषयव्यतिषङ्गा निराशङ्कतया परमेत्युच्यते । नेतरेन्द्रियजयवदिति । यथा यतमानसंज्ञायामेकेन्द्रिजयेऽपीन्द्रियान्तरजयाय प्रयत्नान्तरम-पेक्ष्यन्ते, न चैवं चित्तनिरोधे बाह्येन्द्रियनिरोधाय प्रयत्नान्तरापेक्षेत्यर्थः ॥५५॥

"ततः परमा वश्यता ईन्द्रियाणाम्" સૂત્ર અગાઉ કહેલી વાતનો અનુવાદ કરે છે. શું બીજી ઇન્દ્રિયોની અપરમા વશ્યતા પણ છે, જેની અપેક્ષાએ આને "પરમા વશ્યતા" કહેવામાં આવે છે ? હા. "शब्दादिषु" વગેરેથી એમને કહે છે. "સક્તિ" કે રાગ એટલે વ્યસન વગેરેથી એનું વિવરણ કરે છે. કેવી વ્યુત્પત્તિથી ? "વ્યસ્યતિ, ક્ષિપતિ નિરસ્યતિ એનં શ્રેયસઃ ઇતિ" યોગીને શ્રેયથી દૂર ફેંકે છે, માટે એને "સક્તિ" કહે છે. એનો અભાવ અવ્યસન છે, એ જ વશ્યતા છે.

"अविरुद्धा प्रतिपत्तिः" વગેરેથી બીજી વશ્યતા કહે છે. વેદથી અવિરુદ્ધ શબ્દ વગેરેનું સેવન એટલે વેદવિરુદ્ધ પ્રવૃત્તિનો અભાવ. એ ન્યાયસંગત છે, કારણ કે યુક્તિવિરુદ્ધ નથી. "शब्दादिसंप्रयोगः स्वेच्छया" વગેરેથી અન્ય વશ્યતા કહે છે. શબ્દ વગેરે સાથે સ્વેચ્છાપૂર્વક ઇન્દ્રિયોનો સંયોગ. આનાથી માણસ ભોગ્ય વિષે સ્વતંત્ર રહે છે, એના વશમાં થતો નથી, એવો અર્થ છે. વળી બીજી વશ્યતા કહે છે :- રાગદ્વેષવગરનું સુખદુઃખ રહિત, તટસ્થ એવું શબ્દાદિનું જ્ઞાન, એમ કેટલાક કહે છે.

પરમ ઋષિ જૈગિષવ્યને સંમત અને સૂત્રકારને પણ અભિમત એવી વશ્યતા કહે છે - ચિત્તની એકાગ્રતાને લીધે ઇન્દ્રિયો સાથે ચિત્તની શબ્દાદિમાં અપ્રવૃત્તિ પરમા વશ્યતા છે. "પરમાણુ" વગેરેથી એની ઉત્કૃષ્ટતા દર્શાવે છે. "तु" શબ્દથી બીજી વશ્યતાઓ કરતાં આની વિશેષતા બતાવે છે.

બીજી વશ્યતાઓ વિષયરૂપ સર્પના વિષ સાથે સંયોગવાળી હોવાથી વિષજન્ય ક્લેશ સાથે સંપર્કની શંકા દૂર કરતી નથી. વિષવિદ્યાનો ઉત્કૃષ્ટ વિશેષજ્ઞ પણ, સર્પને વશમાં કરીને, ખોળામાં રાખીને વિશ્વાસપૂર્વક સૂઈ જતો નથી. આ છેલ્લી વશ્યતા બધા પ્રકારના વિષના સંપર્ક વગરની અને નિઃશંક બનાવનાર હોવાથી "પરમા" કહેવાય છે. જેમ યતમાન વૈરાગ્યમાં એક ઇન્દ્રિયપર વિજય પ્રાપ્ત કર્યા પછી, બીજી ઇન્દ્રિયોના વિજય માટે, પ્રયત્નની અપેક્ષા રહે છે, એવી અપેક્ષા ચિત્ત નિરોધ થતાં બહાર ભટકતી બધી ઇન્દ્રિયોના નિરોધ માટે અન્ય પ્રયત્નની અપેક્ષા રહેતી નથી, એવો અર્થ છે. ૫૫

क्रियायोगं जगौ क्लेशान्विपाकान्कर्मणामिह ।
तद्दुःखत्वं तथा व्यूहान्पादे योगस्य पञ्चकम् ।इति ॥

"ક્રિયાયોગ, ક્લેશો, કર્મવિપાક, એનાં દુઃખો અને યોગના વ્યૂહો એમ પાંચ બાબતો આ પાદમાં કહી"

इति श्री वाचस्पतिमिश्रविरचितायां पातञ्जलयोगसूत्रभाष्यव्याख्यायां तत्त्व वैशारद्यां द्वितीयः साधनपादः ॥२॥

આમ પાતંજલયોગસૂત્રભાષ્ય પર શ્રી વાચસ્પતિ મિશ્રવિરચિત તત્ત્વ વૈશારદીમાં બીજો સાધનપાદ સમાપ્ત થયો. ૨

★★★

ત્રીજો વિભૂતિપાદ

●

उक्तानि पञ्च बहिरङ्गाणि साधनानि । धारणा वक्तव्या । પાંચ બહિરંગ સાધનો કહ્યાં. ધારણા કહેવી જોઈએ-

देशबन्धश्चित्तस्य धारणा ॥१॥

એક સ્થાનમાં ચિત્તની સ્થિરતા ધારણા છે. ૧

भाष्य

नाभिचक्रे, हृदयपुण्डरीके, मूर्ध्नि ज्योतिषि, नासिकाग्रे, जिह्वाग्र इत्येवमादिषु देशेषु बाह्ये वा विषये चित्तस्य वृत्तिमात्रेण बन्ध इति धारणा ॥१॥

નાભિચક્ર, હૃદયકમળ, મૂર્ધાની જ્યોતિ, નાસિકાનો અગ્રભાગ, જીભનો અગ્રભાગ વગેરે સ્થાનોમાં અથવા બહારના કોઈ પદાર્થપર ચિત્તને વૃત્તિમાત્રથી સ્થિર કરવું ધારણા છે. ૧

तत्त्व वैशारदी

प्रथमद्वितीयपादाभ्यां समाधिस्तत्साधनं चोक्तम् । तृतीयपादे तत्प्रवृत्त्यनुगुणाः श्रद्धोत्पादहेतवो विभूतयो वक्तव्याः । ताश्च संयमसाध्याः । संयमश्च धारणा-ध्यानसमाधिसमुदाय इति विभूतिसाधनतया, पञ्चभ्यश्च योगाङ्गेभ्यो बहिरंगेभ्यो-ऽस्याङ्गत्रयस्यान्तरङ्गतया विशेषज्ञापनार्थमत्र त्रयस्योपन्यासः । तत्रापि च धारणा-ध्यानसमाधीनां कार्यकारणभावेन नियतपौर्वापर्यत्वात्तदनुरोधेनोपन्यासक्रम इति प्रथमं धारणा लक्षणीयेत्याह-उक्तानीति । देशबन्धश्चित्तस्य धारणा । बन्धः संबन्धः । आध्यात्मिकदेशमाह-नाभिचक्र इति । आदिशब्देन ताल्वादयो ग्राह्याः । बाह्यदेशमाह-बाह्य इति । बाह्ये च न स्वरूपेण चित्तस्य संबन्धः संभवतीत्युक्तं वृत्तिमात्रेण ज्ञानमात्रेणेत्यर्थः । अत्रापि पुराणम्-

प्राणायामेन पवनं प्रत्याहारेण चेन्द्रियम् ।
वशीकृत्य ततः कुर्याच्चित्तस्थानं शुभाश्रये ॥ (विष्णु पु. ६।७।४५)

शुभाश्रया बाह्या हिरण्यगर्भवासवप्रजापतिप्रभृतयः । इदं च तत्रोक्तम्-

मूर्तं भगवतो रूपं सर्वोपाश्रयनिस्पृहम् ।
एषा वै धारणा ज्ञेया यच्चित्तं तत्र धार्यते ॥७७॥

तच्च मूर्तं हरे रूपं यद्विचिन्त्यं नराधिप ।
तच्छ्रूयतामनाधारा धारणा नोपपद्यते ॥७८॥

प्रसन्नवदनं चारुपद्मपत्रनिभेक्षणम् ।
सुकपोलं सुविस्तीर्णललाटफलकोज्ज्वलम् ॥७९॥

समकर्णान्तविन्यस्तचारुकुण्डलभूषणम् ।
कम्बुग्रीवं सुविस्तीर्णश्रीवत्साङ्कितवक्षसम् ॥८०॥

वलीविभङ्गिना मग्ननाभिना चोदरेण च ।
प्रलम्बाष्टभुजं विष्णुमथ वापि चतुर्भुजम् ॥८१॥

समस्थितोरुजङ्घं च स्वस्तिकाङ्घ्रिकराम्बुजम् ।
चिन्तयेद्ब्रह्मभूतं तं पीतनिर्मलवाससम् ॥८२॥

किरीटचारुकेयूरकटकादिविभूषितम् ।
शार्ङ्गचक्रगदाखड्गशङ्खाक्षवलयान्वितम् ॥८३॥

चिन्तयेत्तन्मयो योगी समाधायात्ममानसम् ।
तावद्यावद् दृढीभूता तत्रैव नृप धारणा ॥८४॥

एतदातिष्ठतोऽन्यद्वा स्वेच्छया कर्म कुर्वतः ।
नापयाति यदा चित्तं सिद्धां मन्येत तां तदा ॥८५॥
(विष्णु पु. ६।७।७७-८५) इति ॥१॥

પહેલા અને બીજા પાદમાં સમાધિ અને એનાં સાધનો કહ્યાં. આ ત્રીજા પાદમાં યોગના અભ્યાસને અનુરૂપ શ્રદ્ધા ઉત્પન્ન થાય, એ માટે વિભૂતિઓ કહેવી જોઈએ. વિભૂતિઓ સંયમથી સિદ્ધ થાય છે. ધારણા, ધ્યાન અને સમાધિના સમુદાયને સંયમ કહે છે. વિભૂતિનું સાધન હોવાના કારણે, પાંચ બહિરંગ યોગાંગોની અપેક્ષાએ આ ત્રણ અંતરંગ છે, એવી એમની વિશેષતા પણ દર્શાવવા અહીં એમની રજૂઆત કરવામાં આવે છે.

ધારણા, ધ્યાન અને સમાધિમાં કાર્યકારણભાવ અને નિશ્ચિત પૂર્વાપર ક્રમ હોવાના કારણે, એ ક્રમ પ્રમાણે રજૂઆતનો ક્રમ પણ થાય, માટે "ઉક્તાનિ બહિરંગાણિ..." વગેરેથી સૌ પ્રથમ ધારણાનું લક્ષણ કહે છે. ધારણા એટલે ચિત્તનો સ્થાન સાથે બંધ એટલે સંબંધ. "નાભિચક્રે" વગેરેથી આધ્યાત્મિક સ્થાનો કહે છે.

આદિ શબ્દથી તાળવું વગેરે ગ્રહણ કરવાં જોઈએ. "બાહ્યે..." વગેરેથી બહારનાં સ્થાન કહે છે. બહારના પદાર્થોમાં ચિત્તનો સ્વરૂપથી સંબંધ સંભવિત ન હોવાથી વૃત્તિમાત્ર કે જ્ઞાનમાત્રથી ચિત્ત સ્થિર કરવું, એવો અર્થ છે. આ વિષે પુરાણ કહે છે "પ્રાણાયામથી પવનને, પ્રત્યાહારથી ઇન્દ્રિયોને વશમાં કરી, ચિત્તને શુભ આશ્રયમાં સ્થિર કરવું." (વિ.પુ. ૬.૭.૪૫).

હિરણ્યગર્ભ, ઇન્દ્ર, પ્રજાપતિ વગેરે બાહ્ય શુભાશ્રયો છે. આ વિષે પણ પુરાણ વચન છે :- "બીજા બધા આશ્રયોની સ્પૃહા રાખ્યા વિના ચિત્તને ભગવાનના સાકાર સ્વરૂપમાં ધારણાથી સ્થિર કરવું. હે નરાધિપ, શ્રી હરિના ચિંતન કરવા યોગ્ય સ્વરૂપને સાંભળો. કારણ કે આધારવિના ધારણા શક્ય નથી. પ્રસન્ન મુખવાળા, સુંદર કમળપત્ર જેવાં નેત્રવાળા, સુચારુ ગાલવાળા, વિસ્તૃત લલાટને કારણે ઉજ્જ્વળ જણાતા, સમાન આકારના કાનોમાં ઉત્તમ કુંડળોવાળા, શંખ જેવી ગ્રીવાવાળા, વિશાળ શ્રીવત્સલાંછિત વક્ષસ્થળવાળા, નિમ્ન્નાભિ અને વલિયુક્ત ઉદરવાળા, લાંબા આઠ અથવા ચાર હાથવાળા, એકસરખી સાથળ અને જાંઘવાળા, ચરણો પર કમળ જેવા હાથ રાખીને સ્વસ્તિકાસનમાં બેઠેલા, શુદ્ધ પીળા વસ્ત્રવાળા, કિરીટ, કેયૂર, કંગન વગેરે અલંકારોથી વિભૂષિત, તેમજ હાથોમાં શાર્ઙ્ગ, ચક્ર, ગદા, ખડ્ગ, શંખ અને અક્ષમાળા ધારણ કરતા, બ્રહ્મસ્વરૂપ ભગવાન વિષ્ણુનું, પોતાના મનને સમાહિત અને તન્મય બનાવીને, યોગીએ ત્યાં સુધી ચિંતન કરવું જોઈએ, જ્યાં સુધી એમાં ધારણા દૃઢ ન થાય. આમ ધ્યાન કરતાં અથવા સ્વેચ્છાથી બીજું કાર્ય કરતાં પણ યોગીનું ચિત્ત બીજે ન જાય, ત્યારે ધારણા સ્થિર થઈ છે, એમ જાણવું જોઈએ. (વિ.પુ.૬.૭.૭૭-૮૫) ૧.

★

तत्र प्रत्ययैकतानता ध्यानम् ॥२॥

એમાં વૃત્તિની એકાગ્રતા ધ્યાન છે. ૨

ભાષ્ય

तस्मिन्देशे ध्येयालम्बनस्य प्रत्ययस्यैकतानता सदृशः प्रवाहः प्रत्ययान्तरेणापरामृष्टो ध्यानम् ॥२॥

ધ્યેયના અવલંબનરૂપ એ સ્થાનમાં વૃત્તિની એકતાનતા, એટલે અન્ય વૃત્તિઓના સંબંધ વિના, એકસરખો પ્રવાહ, ધ્યાન છે. ૨

तत्त्व वैशारदी

धारणासाध्यं ध्यानं लक्षयति-तत्र प्रत्ययैकतानता ध्यानम् । एकतानतैकाग्रता। सुगमं भाष्यम् । अत्रापि पुराणम्-

तद्रूपप्रत्ययैकाग्र्यसंततिश्चान्यनिःस्पृहा ।
तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप । (विष्णु पु. ६।७।८६) इति ॥२॥

"तत्र प्रत्ययैकतानता ध्यानम्"थी धारणा वडे सिद्ध थता ध्याननुं लक्षण कहे छे. એકતાનતા એટલે એકાગ્રતા. આ વિષે પણ પુરાણ વચન છે :- "હે રાજા, એ સ્વરૂપ તરફ, બીજી બાબતોની સ્પૃહા વિના, વૃત્તિઓનો એકસરખો પ્રવાહ ધ્યાન છે. એને પહેલાં છ અંગોથી સિદ્ધ કરવામાં આવે છે. ૨

★

तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ॥३॥

એ ધ્યાન જ માત્ર ધ્યેય પદાર્થને પ્રકાશિત કરે, અને ધ્યાનરૂપ પોતાના સ્વરૂપથી જાણે કે શૂન્ય બને એ સમાધિ છે. ૩

भाष्य

ध्यानमेव ध्येयाकारनिर्भासं प्रत्ययात्मकेन स्वरूपेण शून्यमिव यदा भवति ध्येयस्वभावावेशात्तदा समाधिरित्युच्यते ॥३॥

ધ્યાન જ જ્યારે ધ્યેય આકારને પ્રગટ કરે અને ધ્યેયના સ્વભાવના આવેશને લીધે, પોતાના સ્વરૂપથી જાણે કે શૂન્ય બને, ત્યારે એને સમાધિ કહે છે. ૩

तत्त्व वैशारदी

ध्यानसाध्यं समाधिं लक्षयति-तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः । व्याचष्टे-ध्यानमेवेति । ध्येयाकारनिर्भासमिति ध्येयाकारस्यैव निर्भासो न ध्यानाकारस्येति। अत एवाह-शून्यमिति । ननु शून्यं चेत्कथं ध्येयं प्रकाशेतेत्यत आह-इवेति । अत्रैव हेतुमाह-ध्येयस्वभावावेशादिति । अत्रापि पुराणम्-

तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् ।
मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते ॥ विष्णु पु. ६।७।९०)

इति । ध्येयाद्ध्यानस्य भेदः कल्पना, तद्धीनमित्यर्थः । अष्टाङ्गयोगमुक्त्वा-

खाण्डिक्याय केशिध्वज उपसंजहार-

क्षेत्रज्ञः करणी ज्ञानं करणं तदचेतनम् ।
निष्पाद्य मुक्तिकार्यं वै कृतकृत्यं निवर्तते ॥ विष्णु पु. ६।७।९२) इति ॥३॥

"तदेवार्थमात्रनिर्भासं..." વગેરે સૂત્રથી ધ્યાનથી સિદ્ધ થતી સમાધિનું લક્ષણ કહે છે. "ध्यानमेव..." વગેરેથી ભાષ્યકાર સૂત્ર સમજાવે છે. "ध्येयकारनिर्भासम्"... વગેરેથી કહે છે કે ફક્ત ધ્યેયનો આકાર જ પ્રકાશિત કરે, ધ્યાનનો આકાર નહીં. તેથી "शून्यमिव", જાણે કે શૂન્ય હોય એવો—એમ કહે છે.

જો શૂન્ય હોય તો પ્રકાશિત કેવી રીતે કરે ? એ માટે "ઈવ"નો પ્રયોગ કરે છે. એનો હેતુ જણાવતાં કહે છે કે ધ્યેયના સ્વભાવના આવેશને લીધે આવું બને છે. આ વિષયમાં પણ પુરાણ છે : "કલ્પના વિના એના જ સ્વરૂપનું ગ્રહણ, જે મન વડે ધ્યાનથી સિદ્ધ થાય છે, એ સમાધિ કહેવાય છે." (વિ.પુ. ૬.૭.૯૦)

ધ્યેયથી ધ્યાનનો ભેદ કલ્પના છે, એ વિનાનું, એવો અર્થ છે. કેશિધ્વજે ખાંડિક્યને અષ્ટાંગયોગનો ઉપદેશ કરીને, એના ઉપસંહારમાં કહ્યું : "ક્ષેત્રજ્ઞ કરણી (સાધનનો પ્રયોગ કરનાર) છે. જ્ઞાન કરણ છે, જે અચેતન છે, અને મુક્તિરૂપ કાર્યને ઉત્પન્ન કરીને, કૃતકૃત્ય બનતાં નિવૃત્ત થાય છે." (વિ.પુ. ૬.૭.૯૨). ૩.

★

त्रयमेकत्र संयमः ॥४॥

એ ત્રણ એક વિષયમાં થાય એ સંયમ છે. ૪

ભાષ્ય

तदेतद्धारणाध्यानसमाधित्रयमेकत्र संयमः । एकविषयाणि त्रीणि साधनानि संयम इत्युच्यते । तदस्य त्रयस्य तान्त्रिकी परिभाषा संयम इति ॥४॥

એ ત્રણ એટલે ધારણા, ધ્યાન અને સમાધિ એક વિષય પર સધાય એ સંયમ છે. એકવિષયક ત્રણ સાધનોને સંયમ કહે છે. એ ત્રણની તાંત્રિક પરિભાષા સંયમ છે. ૪

तत्त्व वैशारदी

धारणा ध्यानं समाधिरित्येतत्त्रयस्य तत्र तत्र नियुज्यमानस्य प्रातिस्विक-संज्ञोच्चारणे गौरवं स्यादिति लाघवार्थं परिभाषासूत्रमवतारयति-त्रयमेकत्र संयम इति।

व्याचष्टे-एकविषयाणीति । वाचकत्वशङ्कामपनयति-तदस्येति । तन्त्र्यते व्युत्पाद्यते योगो येन शास्त्रेण तत्तन्त्रम् । तद्भवा तान्त्रिकी । संयमप्रदेशाः परिणामत्रयसंयमात् (३।१६) इत्येवमादयः ॥४॥

ધારણા, ધ્યાન અને સમાધિ એ ત્રણનો (એકી સાથે) તે તે જગાએ પ્રયોગ કરવો હોય, ત્યારે એમને પોતપોતાના નામથી ઉચ્ચારવામાં ગૌરવ થાય. તેથી લાઘવ માટે "त्रयमेकत्र संयमः" એવું પરિભાષા સૂત્ર પ્રસ્તુત કરે છે. "એકવિષયાણિ..." વગેરેથી સૂત્ર સમજાવે છે. "तदस्य..." વગેરેથી સંયમ શબ્દની વાચકત્વ શંકા દૂર કરે છે (કે એ વાચક નહીં, પારિભાષિક સંજ્ઞા છે). "तंत्र्यते व्युत्पाद्यते योगः" જેનાથી યોગનું નિરૂપણ કરવામાં આવે છે, એ શાસ્ત્ર તંત્ર કહેવાય. એને માટે બનાવેલી "तांत्रिकी" કહેવાય. આગળ "परिणामत्रयसंयमात्, ૩.૧૬માં કહેવાનારા સંયમના પ્રદેશો કે વિષયો છે. ૪

★

तज्जयात्प्रज्ञालोकः ॥५॥

એના (સંયમના) જયથી પ્રજ્ઞાનો પ્રકાશ થાય છે. ૫

भाष्य

तस्य संयमस्य जयात्समाधिप्रज्ञाया भवत्यालोको, यथा यथा संयमः स्थिरपदो भवति तथा तथा समाधिप्रज्ञा विशारदीभवति ॥५॥

એ સંયમના જયથી સમાધિ-પ્રજ્ઞાનો પ્રકાશ થાય છે. જેમ જેમ સંયમ સ્થિર થાય છે, એમ એમ સમાધિપ્રજ્ઞા વધુને વધુ સ્પષ્ટ થાય છે. ૫

तत्त्व वैशारदी

संयमविजयस्याभ्याससाधनस्य फलमाह-तज्जयात्प्रज्ञालोकः । प्रत्ययान्तरानभिभूतस्य निर्मलप्रवाहेऽवस्थानमालोकः प्रज्ञायाः । सुगमं भाष्यम् ॥५॥

"तज्जयात्प्रज्ञालोकः" સૂત્રથી સંયમવિજયરૂપ સાધનના અભ્યાસનું ફળ કહે છે. બીજી વૃત્તિઓ વડે દબાયા વિના નિર્મળ પ્રવાહરૂપ સ્થિતિ પ્રજ્ઞાનો પ્રકાશ છે. ભાષ્ય સરળ છે. ૫

★

तस्य भूमिषु विनियोगः ॥६॥

એનો (સંયમનો) (સવિતર્ક વગેરે) ભૂમિઓમાં વિનિયોગ કરવામાં આવે છે.

भाष्य

तस्य संयमस्य जितभूमेर्यानन्तरा भूमिस्तत्र विनियोगः । न ह्यजिताधरभूमिरनन्तरभूमिं विलङ्घ्य प्रान्तभूमिषु संयमं लभते । तदभावाच्च कुतस्तस्य प्रज्ञालोकः ! ईश्वरप्रसादाज्जितोत्तरभूमिकस्य च नाधरभूमिषु परचित्तज्ञानादिषु संयमो युक्तः । कस्मात् ? तदर्थस्यान्यत एत्रावगतत्वात् । भूमेरस्या इयमनन्तरा भूमिरित्यत्र योग एवोपाध्यायः । कथम् ? एवं ह्युक्तम् -

योगेन योगो ज्ञातव्यो योगो योगात्प्रवर्तते ।
योऽप्रमत्तस्तु योगेन स योगे रमते चिरम् ॥ इति ॥६॥

એ સંયમનો જીતેલી ભૂમિઓથી આગળની ભૂમિમાં વિનિયોગ કરવો જોઈએ. શરૂઆતની ભૂમિઓ જીત્યા વિના, આગળની ભૂમિ ઓળંગીને, અંતિમ ભૂમિઓમાં સંયમ કરી શકાતો નથી. અને એ વિના એને પ્રજ્ઞા-પ્રકાશ ક્યાંથી મળે ? ઈશ્વરના અનુગ્રહથી આગળની ભૂમિ જીતી હોય એવા યોગીએ બીજાના ચિત્તનું જ્ઞાન વગેરે નીચેની ભૂમિઓમાં સંયમ કરવો યોગ્ય નથી. કેમ ? કારણ કે એ જ્ઞાન બીજી રીતે મળી ગયું છે. આ ભૂમિ પછી આ ભૂમિ આવે છે, એ વિષે યોગ જ શિક્ષક છે. કેવી રીતે ? કારણ કે એવું કહ્યું છે :- "યોગવડે યોગ જાણવો જોઈએ, યોગથી યોગ વધે છે. જે પ્રમાદરહિત બની યોગ સેવે છે, એ લાંબા સમય સુધી યોગમાં આનંદ પ્રાપ્ત કરે છે." ૬

तत्त्व वैशारदी

क्व पुनर्विनियुक्तस्य संयमस्य फलमेतदित्यत आह- तस्य भूमिषु विनियोगः। भूमिं विशेषयति भाष्यकारः-तस्येति । जिताया भूमेर्यानन्तरा भूमिरवस्थाऽजिता तत्र विनियोगः । स्थूलविषये सवितर्के समाधौ वशीकृते संयमेन संयमस्याविजिते निर्वितर्के विनियोगः । तस्मिन्नपि वशीकृते सविचारे विनियोगः । एवं निर्विचारे विनियोग

इत्यर्थः । अत एव स्थूलविषय समापत्तिसिद्धौ सत्यां पुराणे तत्तदायुधभूषणापनयेन सूक्ष्मविषयः समाधिरवतारितः-

ततः शङ्खगदाचक्रशार्ङ्गादिरहितं बुधः ।
चिन्तयेद्भगवद्रूपं प्रशान्तं साक्षसूत्रकम् ॥८६॥

यदा च धारणा तस्मिन्नवस्थानवती ततः ।
किरीटकेयूरमुखैर्भूषणै रहितं स्मरेत् ॥८७॥

तदेकावयवं देवं सोऽहं चेति पुनर्बुधः ।
कुर्यात्ततो ह्यहमिति प्रणिधानपरो भवेत् ॥८८॥

(विष्णु पु. ६।७।८६-८८)

कस्मात्पुनरधरां भूमिं विजित्योत्तरां विजयते विपर्ययः कस्मान्न भवतीत्याह-न ह्यजिताधरभूमिरिति । न हि शिलाह्रदादङ्गां प्रति प्रस्थितोऽप्राप्य मेघवां गङ्गां प्राप्नोति । ईश्वरप्रसादाज्जितोत्तरभूमिकस्य चेति । कस्मात् ? तदर्थस्योत्तरभूमिविजयस्य प्रत्यासन्नस्यान्यत एवेश्वरप्राणिधानादेवावगतत्वात् । निष्पादितक्रियं कर्मण्यविशेषाधायिनः साधनस्यासाधनन्यायातिपातादिति । स्यादेतत्-आगमतः सामान्यतोऽवगतानामप्यवान्तरभूमिभेदानां कुतः पौर्वापर्यावगतिरित्यत आह- भूमेरस्या इति । जितः पूर्वो योग उत्तरस्य योगस्य ज्ञानप्रवृत्त्यधिगमहेतुः । अवस्थैवावस्थावानित्यभिप्रेत्यैतद् द्रष्टव्यम् ॥६॥

ક્યાં પ્રયોજેલા સંયમનું અ ફળ છે ? એના જવાબમાં એનો ભૂમિઓમાં વિનિયોગ કરવો, એમ કહે છે. "तस्य..." વગેરેથી ભાષ્યકાર ભૂમિની વિશેષતા દર્શાવે છે. જીતેલી ભૂમિ પછી આવતી, ન જીતેલી ભૂમિ કે અવસ્થામાં વિનિયોગ કરવો જોઈએ. સ્થૂલ વિષયવાળા સવિતર્ક સમાધિને સંયમથી વશ કરી, સંયમથી ન જિતાયેલા નિર્વિતર્ક સમાધિમાં વિનિયોગ કરવો. એને પણ વશ કરીને પછી સવિચારમાં વિનિયોગ કરવો, આમ નિર્વિચારમાં પણ કરવો. આ કારણે સ્થૂલવિષયક સમાપત્તિ સિદ્ધ થતાં પુરાણમાં તે આયુધ અને ભૂષણને દૂર કરીને સૂક્ષ્મ વિષયમાં સમાપત્તિ સાધવાનો ઉપદેશ કરવામાં આવે છે :- "પછી ભગવાનનું શંખ, ગદા, ચક્ર, શાર્ઙ્ગ વગેરે વિનાનું શાન્ત અને ફક્ત અક્ષમાળાવાળું સ્વરૂપ ચિંતવવું. જ્યારે એમાં ધારણ સ્થિર થાય, ત્યાર પછી કિરીટ, કેયૂર વગેરે અલંકારો વિનાનું સ્વરૂપ ચિંતવે. પછી એ એક અવયવવાળા દેવને "એ હું છું" એમ, અને પછી ફક્ત "હું-હું" રૂપે પ્રણિધાનનો અભ્યાસ કરે." (વિ.પુ. ૬.૭.૮૬-૮૮)

પહેલાંની ભૂમિ જીતીને, પછીની ભૂમિ જીતે એમ શા માટે કહ્યું ? એથી

ઊલટું કેમ ન થાય ? એના જવાબમાં "ન હ્યજિતાધરભૂમિ..." વગેરેથી કહે છે કે શિલાહ્રદથી ગંગા જવા માટે નીકળેલો માણસ મેઘવન ગયા વિના ગંગા પહોંચતો નથી. ઈશ્વરના અનુગ્રહથી આગળની ભૂમિ જિતાય, તો પહેલાંની ભૂમિ માટે સંયમ કરવો યોગ્ય નથી, એમ શાથી કહ્યું ? કારણ કે આગળની ભૂમિ બીજી રીતે કે ઈશ્વરકૃપાથી જિતાઈ છે. સાધ્ય મેળવી લીધા પછી, એમાં બીજી કોઈ વિશેષતા ન ઉમેરનાર સાધન અપનાવવું, સાધનાના ન્યાયની દૃષ્ટિએ નિરર્થક છે.

ભલે. પણ આગમથી સામાન્યપણે ક્રમિક, ભિન્ન ભૂમિઓ વિષે જાણ્યા પછી, એક પછી એક ભૂમિઓ જીતવી જોઈએ એવું શાથી ? "ભૂમેરસ્યાઃ" વગેરેથી આ પ્રશ્નનો જવાબ આપે છે. જીતેલી યોગભૂમિ આગળની ભૂમિના જ્ઞાન માટે, પ્રવૃત્તિ માટે અને પ્રાપ્તિ માટે હેતુ છે. અવસ્થા અને અવસ્થાયુક્ત યોગીમાં ભેદ નથી, એવા અભિપ્રાયથી આમ કહેવામાં આવ્યું છે. એમ સમજવું જોઈએ. ૬

★

त्रयमन्तरङ्गं पूर्वेभ्यः ॥७॥

આ ત્રણ, પૂર્વનાં સાધનો કરતાં અંતરંગ છે. ૭

ભાષ્ય

तदेतद्धारणाध्यानसमाधित्रयमन्तरङ्गं संप्रज्ञातस्य समाधेः पूर्वेभ्यो यमादिभ्यः पञ्चभ्यः साधनेभ्य इति ॥७॥

ધારણા, ધ્યાન અને સમાધિ એ ત્રણ સાધનો, પહેલાંના યમ વગેરે પાંચ સાધનો કરતાં, સંપ્રજ્ઞાત સમાધિ માટે અંતરંગ છે. ૭

तत्त्व वैशारदी

कस्मात्पुनर्योगाङ्गत्वाविशेषेऽपि संयमस्य तत्र तत्र विनियोगो नेतरेषां पञ्चानामित्यत आह-त्रयमन्तरङ्गं पूर्वेभ्यः । तदिदं साधनत्रयं साध्यसमान-विषयत्वेनान्तरङ्गम् । न त्वेवं यमादयः, तस्मात्ते बहिरङ्गा इत्यर्थः ॥७॥

યોગનાં અંગ તરીકે બધાં સાધન સમાન હોવા છતાં, સંયમનો જ જે તે ભૂમિમાં વિનિયોગ કરવો, અને અન્ય પાંચ અંગોનો નહીં, એનું શું કારણ ? આના જવાબમાં "त्रयमन्तरंगं पूर्वेभ्यः" એમ કહે છે. આ ત્રણ સાધનો સાધ્ય સાથે સમાન વિષયવાળાં હોવાથી અંતરંગ છે. યમ વગેરે એવાં નથી. તેથી એ બહિરંગ છે, એવો અર્થ છે. ૭

★

तदपि बहिरङ्गं निर्बीजस्य ॥८॥

એ (સંયમ) પણ નિર્બીજ સમાધિનું બહિરંગ છે. ૮

भाष्य

तदप्यन्तरङ्गं साधनत्रयं निर्बीजस्य योगस्य बहिरङ्गं भवति । कस्मात् ? तदभावे भावादिति ॥८॥

એ ત્રણ અંતરંગ સાધનો પણ નિર્બીજ યોગનું બહિરંગ છે. કેમ ? કારણ કે એમના અભાવમાં એ ઉત્પન્ન થાય છે. ૮

तत्त्व वैशारदी

साधनत्रयस्य संप्रज्ञात एवान्तरङ्गत्वं न त्वसंप्रज्ञाते । तस्य निर्बीजतया तैः सह समानविषयत्वाभावात्तेषु चिरनिरुद्धेषु संप्रज्ञातपरमकाष्ठापरनामज्ञानप्रसादरूप-परवैराग्यानन्तरमुत्पादाच्चेत्याह- तदपि बहिरङ्गं निर्बीजस्य । समानविषयत्वमन्तरङ्गत्व-प्रयोजकमिह न तु तदनन्तरभावस्तस्य बहिरङ्गेश्वरप्रणिधानवर्तितया सव्यभिचारत्वादिति स्थिते सव्यभिचारमप्यन्तरङ्गलक्षणं तदनन्तरभावित्वमस्य नास्ति । तस्माद्दूरापेतान्तरङ्गता संयमस्यासंप्रज्ञाते इति दर्शयितुं तदभावे भावादित्युक्तम् ॥८॥

ત્રણ સાધનો સંપ્રજ્ઞાતનાં જ અંતરંગ છે, અસંપ્રજ્ઞાતનાં નહીં. કારણ કે અસંપ્રજ્ઞાત નિર્બીજ હોવાથી, એમની સાથે સમાનવિષયવાળો નથી. માટે લાંબા સમય સુધી એ ત્રણ નિરુદ્ધ રહે અને સંપ્રજ્ઞાત સમાધિ પરાકાષ્ઠા સ્વરૂપ જ્ઞાનપ્રસાદ કે પરવૈરાગ્યને પ્રાપ્ત કરે, ત્યાર પછી જ એ ઉત્પન્ન થાય છે. આ વાત "तदपि बहिरंगं निर्बीजस्य" સૂત્રથી કહી છે. સમાનવિષયવાળા હોવું એ અંતરંગપણાનો હેતુ છે. અહીં તો એમના પછી થાય એવો કારણને લાગુ પડતો ક્રમ-નિયમ પણ નથી. સંયમ પણ ઈશ્વરપ્રણિધાન રૂપ બહિરંગમાં સમાવિષ્ટ થતો હોવાથી, એ બંને એકસરખા છે. આમ મિશ્રિત એવું અંતરંગનું લક્ષણ- એટલે કે એના પછી નિર્બીજ સમાધિ થાય એવું લક્ષણ-પણ આમાં નથી. તેથી નિર્બીજ સમાધિ માટે સંયમ ઘણે દૂર હોવાથી એ એનું અંતરંગ સાધન બની શકે એમ નથી, એવું દર્શાવવા એના અભાવમાં એ ઉત્પન્ન થાય છે, એમ કહ્યું. ૮

★

अथ निरोधचित्तक्षणेषु चलं गुणवृत्तमिति कीदृशस्तदा चित्तपरिणामः- ગુણચક્ર ગતિશીલ છે. તો નિરુદ્ધ ચિત્તની ક્ષણોમાં ચિત્તનું કેવું પરિણામ થાય છે ?-

व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ
निरोधक्षणचित्तान्वयो निरोधपरिणामः ॥९॥

વ્યુત્થાન સંસ્કારોનો અભિભવ અને નિરોધ સંસ્કારોનો પ્રાદુર્ભાવ, અને નિરોધની ક્ષણોમાં ચિત્તનો અન્વય (સંબંધ) નિરોધ પરિણામ છે. ૯

ભાષ્ય

व्युत्थानसंस्काराश्चित्तधर्मा न ते प्रत्ययात्मका इति प्रत्ययनिरोधे न निरुद्धाः । निरोधसंस्कारा अपि चित्तधर्माः । तयोरभिभवप्रादुर्भावौ । व्युत्थानसंस्कारा ह्रीयन्ते, निरोधसंस्कारा आधीयन्ते । निरोधक्षणं चित्तमन्वेति । तदेकस्य चित्तस्य प्रतिक्षणमिदं संस्कारान्यथात्वं निरोधपरिणामः । तदा संस्कारशेषं चित्तमिति निरोधसमाधौ (१।१८) व्याख्यातम् ॥९॥

વ્યુત્થાન સંસ્કારો ચિત્તના ધર્મો છે. એ પ્રત્યયાત્મક (વૃત્તિ રૂપ) નથી. તેથી વૃત્તિઓનો નિરોધ થવા છતાં, એમનો નિરોધ થતો નથી. નિરોધ સંસ્કારો પણ ચિત્તના ધર્મો છે. એ બેનો અભિભવ (દબાવું) અને પ્રાદુર્ભાવ (ઉત્પન્ન થવું) નિરોધક્ષણોમાં થાય છે. એટલે કે વ્યુત્થાન સંસ્કારોનો હ્રાસ અને નિરોધ સંસ્કારોનું આધાન (વૃદ્ધિ) થાય છે. નિરોધક્ષણો દરમ્યાન ચિત્ત અનુગત રહે છે. એક ચિત્તમાં આમ પ્રતિક્ષણ સંસ્કારોનું જુદાપણું નિરોધ પરિણામ છે. ત્યારે ચિત્ત સંસ્કારશેષ હોય છે, એમ નિરોધસમાધિની ચર્ચા વખતે ૧.૧૮ સ્પષ્ટ કર્યું છે. ૯

तत्त्व वैशारदी

परिणामत्रयसंयमाद् (३।१६) इत्यत्रोपयोक्ष्यमाणपरिणामत्रयं प्रतिपिपादयिषुर्निर्बीजप्रसङ्गेन पृच्छति-अथेति । व्युत्थानसंप्रज्ञातयोश्चित्तस्य स्फुटतरपरिणामभेदप्रचयानुभवान्न प्रश्नावतारः । निरोधे तु नानुभूयते परिणामः, न चाननुभूयमानो नास्ति, चित्तस्य त्रिगुणतया चलत्वेन गुणानां क्षणमप्यपरिणामस्यासंभवादित्यर्थः । प्रश्नोत्तरं सूत्रम्-व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः । असंप्रज्ञातं समाधिमपेक्ष्य संप्रज्ञातो व्युत्थानम् । निरुध्यतेऽनेनेति

निरोधो ज्ञानप्रसादः परं वैराग्यम् । तयोर्व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ । तत्र व्युत्थानसंस्कारस्याभिभवो निरोधसंस्कारस्याविर्भावश्चित्तस्य धर्मिणो निरोधक्षणस्य निरोधावसरस्य द्वयोरवस्थयोरन्वयः । न हि चित्तं धर्मि संप्रज्ञातावस्थायाम-संप्रज्ञातावस्थायां च संस्काराभिभवप्रादुर्भावयोः स्वरूपेण भिद्यत इति । ननु यथोत्तरे क्लेशा अविद्यामूला अविद्यानिवृत्तौ निवर्तन्त इति न तन्निवृत्तौ पृथक्प्रयत्नान्तरमास्थीयते। एवं व्युत्थानप्रत्ययमूलाः संस्कारा व्युत्थाननिवृत्तावेव निवर्तन्त इति तन्निवृत्तौ न निरोधसंस्कारोऽपेक्षितव्य इत्यत आह-व्युत्थानसंस्कारा इति । न कारणमात्रनिवृत्तिः कार्यनिवृत्तिहेतुः । मा भूत्कुविन्दनिवृत्तावपि पटस्य निवृत्तिः । अपि तु यत्कारणात्मकं यत्कार्यं तत्कारणनिवृत्तौ तत्कार्यनिवृत्तिः । उत्तरे च क्लेशा अविद्यात्मान इत्युक्तम् । अतस्तन्निवृत्तौ तेषां निवृत्तिरुपपन्ना । न त्वेवं प्रत्ययात्मानः संस्काराः, चिरनिरुद्धे प्रत्यये संप्रति स्मरणदर्शनात् । तस्मात्प्रत्ययनिवृत्तावपि तन्निवृत्तौ निरोधसंस्कारप्रचय एवोपासनीय इत्यर्थः । सुगममन्यत् ॥९॥

"परिणामत्रयसंयमात्..." ૩.૧૬ વગેરે આગામી સૂત્રોમાં ઉપયોગમાં આવનારાં ત્રણ પરિણામોનું પ્રતિપાદન કરવાની ઇચ્છાથી "अथ..." વગેરેથી પ્રશ્ન કરે છે (કે નિરોધક્ષણોમાં ચિત્તપરિણામ કેવું હોય છે ?). વ્યુત્થાન અને સંપ્રજ્ઞાત સમાધિ દરમ્યાન ચિત્તમાં થતાં પરિણામ સ્પષ્ટપણે અનુભવાય છે, તેથી ત્યાં આવો પ્રશ્ન થતો નથી. પણ નિરોધસમાધિ દરમ્યાન ચિત્ત-પરિણામ અનુભવાતું નથી. અનુભવાતું નથી માટે નથી એમ નથી. કારણ કે ચિત્ત ત્રિગુણાત્મક હોવાથી ચંચળ છે, તેથી ગુણો ક્ષણ માટે પણ અપરિણામી રહી શકતા નથી, એવો અર્થ છે.

પ્રશ્નના ઉત્તરરૂપ "व्युत्थाननिरोधसंस्कारयोः..." વગેરે સૂત્ર છે. અસંપ્રજ્ઞાત સમાધિની અપેક્ષાએ સંપ્રજ્ઞાત વ્યુત્થાન છે. "निरुध्यते अनेन" એવા વિગ્રહથી નિરોધ જ્ઞાનપ્રસાદ એટલે પરવૈરાગ્ય છે. એ બે વ્યુત્થાન અને નિરોધના સંસ્કારોનો અભિભવ અને પ્રાદુર્ભાવ એટલે વ્યુત્થાન સંસ્કારોનો હ્રાસ અને નિરોધ સંસ્કારોનો આવિર્ભાવ. આ બે ધર્મોવાળા ધર્મી ચિત્તનો નિરોધની ક્ષણો દરમ્યાન અન્વય (સંબંધ) રહે છે. ધર્મી ચિત્ત સંપ્રજ્ઞાત અને અસંપ્રજ્ઞાત અવસ્થામાં-જ્યારે સંસ્કારોનો અભિભવ અને પ્રાદુર્ભાવ થાય છે ત્યારે-સ્વરૂપથી ભિન્ન બનતું નથી.

પણ અવિદ્યા પછીના અસ્મિતા વગેરે ક્લેશો અવિદ્યામૂલક હોવાથી, અવિદ્યા નિવૃત્ત થતાં, નિવૃત્ત થાય છે, અને એમની નિવૃત્તિ માટે બીજા પ્રયત્નનો આશ્રય કરવો પડતો નથી, એમ વ્યુત્થાન પ્રત્યયમૂલક સંસ્કારો વ્યુત્થાન નિવૃત્ત થતાં જ નિવૃત્ત થવા જોઈએ, એમની નિવૃત્તિ માટે નિરોધ સંસ્કારની અપેક્ષા ન હોવી જોઈએ. આ શંકાના સમાધાન માટે "व्युत्थान संस्काराः..." વગેરેથી કહે છે

કે કારણ માત્રની નિવૃત્તિ કાર્યની નિવૃત્તિનો હેતુ નથી. વણકર નિવૃત્ત થતાં વસ્ત્ર નિવૃત્ત થતું નથી. પરંતુ જે ઉપાદાન કારણથી કાર્ય ઉત્પન્ન થાય છે, એની નિવૃત્તિ થતાં કાર્ય નિવૃત્ત થાય છે. અવિદ્યા પછીના અસ્મિતા વગેરે ક્લેશોનું ઉપાદાન અવિદ્યા છે એમ અગાઉ સ્પષ્ટ કહ્યું છે. તેથી એની નિવૃત્તિથી એમની નિવૃત્તિ યોગ્ય છે. પરંતુ સંસ્કારોનું ઉપાદાન વૃત્તિઓ નથી. કારણ કે વૃત્તિ લાંબા સમય સુધી નિરુદ્ધ રહે છતાં પાછી એ વર્તમાનમાં સ્મૃતિરૂપે જોવા મળે છે. માટે વૃત્તિઓ નિરુદ્ધ થાય, તો પણ નિરોધ સંસ્કારોનો પ્રચય (સંચય) અભ્યાસ વડે અવશ્ય વધારવો જોઈએ, એવો અર્થ છે. બાકીનું સુગમ છે. ૯

★

तस्य प्रशान्तवाहिता संस्कारात् ॥१०॥

એની (ચિત્તની) પ્રશાન્તવાહિતા (નિરોધ) સંસ્કારથી થાય છે. ૧૦

ભાષ્ય

निरोधसंस्काराद् निरोधसंस्काराभ्यासपाटवापेक्षा प्रशान्तवाहिता चित्तस्य भवति । तत्संस्कारमान्द्ये व्युत्थानधर्मिणा संस्कारेण निरोधधर्मः संस्कारोऽभिभूयत इति ॥१०॥

નિરોધસંસ્કારથી એટલે કે નિરોધસંસ્કાર માટે થતા અભ્યાસની પટુતા (પક્વતા)થી ચિત્તની પ્રશાન્તવાહિતા સિદ્ધ થાય છે. એ સંસ્કારો જો મંદ હોય, તો વ્યુત્થાન ધર્મવાળા સંસ્કારથી નિરોધ ધર્મ દબાઈ જાય છે.૧૦

तत्त्व वैशारदी

सर्वथा व्युत्थानसंस्काराभिभवे तु बलवता निरोधसंस्कारेण चित्तस्य कीदृशः परिणाम इत्यत आह-तस्य प्रशान्तवाहिता संस्कारात् । व्युत्थानसंस्कारमलरहितनिरोध-संस्कारपरम्परामात्रवाहिता प्रशान्तवाहिता । कस्मात्पुनः संस्कारपाटवमपेक्षते न तु संस्कारमात्रमित्यत आह-तत्संस्कारमान्द्य इति । तदिति निरोधं परामृशति । ये तु नाभिभूयत इति पठन्ति ते तदा व्युत्थानं परामृशन्ति ॥१०॥

બળવાન નિરોધ સંસ્કારોથી વ્યુત્થાનના સંસ્કારો પૂરેપૂરા દબાઈ જાય, ત્યારે ચિત્તનું કેવું પરિણામ થાય છે ? એના જવાબમાં "तस्य प्रशान्तवाहिता संस्कारात्" એમ કહે છે. વ્યુત્થાન સંસ્કારોના મળ વિનાના, ફક્ત નિરોધના સંસ્કારોની પરંપરા વહે, એને ચિત્તની પ્રશાન્તવાહિતા કહે છે. આ માટે નિરોધ

સંસ્કારોની પક્વતા શા માટે અપેક્ષિત છે ? ફક્ત નિરોધસંસ્કારથી કામ ન ચાલે ? એના જવાબમાં "तत्संस्कारमांद्ये..." વગેરેથી કહે છે કે નિરોધ સંસ્કારો મંદ પડે તો વ્યુત્થાનના સંસ્કારો એમને દબાવી દે છે. "तत्"થી નિરોધનો નિર્દેશ કરે છે. જે લોકો "नाभिभूयते" એવો પાઠ સ્વીકારે છે, એ तत्થી વ્યુત્થાનનો નિર્દેશ સમજે છે.૧૦

★

सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः ॥११॥

ચિત્તની વ્યગ્રતા અને એકાગ્રતાનો ક્ષય અને ઉદય સમાધિપરિણામ છે. ૧૧

ભાષ્ય

सर्वार्थता चित्तधर्मः । एकाग्रतापि चित्तधर्मः । सर्वार्थतायाः क्षयस्तिरोभाव इत्यर्थः । एकाग्रताया उदय आविर्भाव इत्यर्थः । तयोर्धर्मित्वेनानुगतं चित्तम् । तदिदं चित्तमपायोपजनयोः स्वात्मभूतयोर्धर्मयोरनुगतं समाधीयते स चित्तस्य समाधिपरिणामः ॥११॥

સર્વાર્થતા ચિત્તનો ધર્મ છે. એકાગ્રતા પણ ચિત્તનો ધર્મ છે. સર્વાર્થતાનો ક્ષય એટલે તિરોભાવ એવો અર્થ છે. એકાગ્રતાનો ઉદય એટલે આવિર્ભાવ એવો અર્થ છે. એ બંને ધર્મોના ધર્મી તરીકે ચિત્ત અનુગત રહે છે. પોતાના સ્વરૂપભૂત ક્ષય અને ઉદયરૂપ ધર્મોમાં અનુગત ચિત્ત સમાહિત બને, એ એનું સમાધિપરિણામ છે. ૧૧

तत्त्व वैशारदी

संप्रज्ञातसमाधिपरिणामावस्थां चित्तस्य दर्शयति-सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः । विक्षिप्तता सर्वार्थता । सत्र विनश्यतीति क्षयस्तिरोभावः । नासदुत्पद्यत इत्युदय आविर्भावः । आत्मभूतयोः सर्वार्थतैकाग्रतयोर्धर्मयोर्यावपायोपजनौ सर्वार्थताया अपाय एकाग्रताया उपजनस्तयोरनुगतं चित्तं समाधीयते पूर्वापरीभूतसाध्यमानसमाधिविशेषणं भवतीति ॥११॥

"सर्वार्थता..." વગેરેથી ચિત્તની संप्रज्ञातसमाधि परिणामની અવસ્થા દર્શાવે છે. સર્વાર્થતા એટલે વિક્ષિપ્તતા. सत्નો નાશ ન હોવાથી ક્ષય એટલે તિરોભાવ. असत्ની ઉત્પત્તિ ન હોવાથી ઉદય એટલે આવિર્ભાવ સમજવો જોઈએ. પોતાના

આત્મભૂત સર્વાર્થતા અને એકાગ્રતારૂપ ધર્મોનો ક્ષય અને ઉદય- એટલે કે સર્વાર્થતાનો ક્ષય અને એકાગ્રતાનો ઉદય- એ બંનેમાં અનુગત ચિત્ત સમાહિત બને છે. આ રીતે પૂર્વાપરના ક્રમથી સિદ્ધ કરવામાં આવતા સમાધિરૂપ વિશેષવાળું ચિત્ત બને છે. ૧૧

★

ततः पुनः शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यै-
काग्रतापरिणामः ॥१२॥

તેનાથી વારંવાર શાન્ત અને ઉદિત પ્રત્યયો એકસરખા બને એ ચિત્તનું એકાગ્રતાપરિણામ છે. ૧૨.

ભાષ્ય

समाहितचित्तस्य पूर्वप्रत्ययः शान्त उत्तरस्तत्सदृश उदितः । समाधिचित्तमुभयोरनुगतं पुनस्तथैवासमाधिभ्रेषादिति । स खल्वयं धर्मिणश्चित्तस्यैकाग्रतापरिणामः ॥१२॥

સમાહિત ચિત્તની પહેલી વૃત્તિ શાન્ત હોય છે. પછીની પણ એના જેવી ઉદય પામે છે. સમાહિત ચિત્ત એ બંનેમાં અનુગત રહે છે. સમાધિ છૂટે નહીં, ત્યાં સુધી ચિત્ત આ રીતે એકાગ્ર રહે છે. એ ધર્મી ચિત્તનું એકાગ્રતાપરિણામ છે. ૧૨

तत्त्व वैशारदी

ततः पुनः शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः । ततः पुनः समाधेः पूर्वापरीभूताया अवस्थायाः निष्पत्तौ सत्यां शान्तोदितावतीतवर्तमानौ, तुल्यौ च तौ प्रत्ययौ चेति तुल्यप्रत्ययौ । एकाग्रतायां तु द्वयोः सादृश्यम् । समाहितचित्तस्येति समाधिनिष्पत्तिर्दर्शिता, तथैवैकाग्रमेव । अवधिमाह-आ समाधिभ्रेषाद् भ्रंशादिति ॥१२॥

"ततः पुनः" એટલે ત્યારે પછી-સમાધિની પ્રથમ અને પછીની અવસ્થાઓની ઉત્પત્તિ થતાં-શાન્ત એટલે અતીત અને ઉદિત એટલે વર્તમાન બંને પ્રત્યયો એકસરખા હોય છે, એમ કહીને એકાગ્રતામાં એ બંને સમાન હોય છે, એમ જણાવ્યું. સમાહિત ચિત્તવાળા યોગીને સમાધિપ્રાપ્તિ દર્શાવી. એનું ચિત્ત એકાગ્ર જ રહે છે. એનો અવધિ દર્શાવતાં કહ્યું કે સમાધિ છૂટે નહીં ત્યાં સુધી. ૧૨

★

एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः ॥१३॥

આનાથી ભૂતો અને ઇન્દ્રિયોમાં ધર્મ, લક્ષણ અને અવસ્થારૂપ પરિણામો કહ્યાં. ૧૩

भाष्य

एतेन पूर्वोक्तेन चित्तपरिणामेन धर्मलक्षणावस्थारूपेण भूतेन्द्रियेषु धर्मपरिणामो लक्षणपरिणामोऽवस्थापरिणामश्चोक्तो वेदितव्यः । तत्र व्युत्थाननिरोधयोर्धर्मयोरभिभवप्रादुर्भावौ धर्मिणि धर्मपरिणामः । लक्षणपरिणामश्चनिरोधस्त्रिलक्षणस्त्रिभिरध्वभिर्युक्तः । स खल्वनागतलक्षणमध्वानं प्रथमं हित्वा धर्मत्वमनतिक्रान्तो वर्तमानलक्षणं प्रतिपन्नो यत्रास्य स्वरूपेणाभिव्यक्तिः । एषोऽस्य द्वितीयोऽध्वा । न चातीतानागताभ्यां लक्षणाभ्यां वियुक्तः ।

तथा व्युत्थानं विलक्षणं त्रिभिरध्वभिर्युक्तं वर्तमानं लक्षणं हित्वा धर्मत्वमनतिक्रान्तमतीतलक्षणं प्रतिपन्नम् । एषोऽस्य तृतीयोऽध्वा । न चानागतवर्तमानाभ्यां लक्षणाभ्यां वियुक्तम् । एवं पुनर्व्युत्थानमुपसंपद्यमानमनागतं लक्षणं हित्वा धर्मत्वमनतिक्रान्तं वर्तमानं लक्षणं प्रतिपन्नम् । यत्रास्य स्वरूपाभिव्यक्तौ सत्यां व्यापारः । एषोऽस्य द्वितीयोऽध्वा । न चातीतानागताभ्यां लक्षणाभ्यां वियुक्तमिति । एवं पुनर्निरोधं एवं पुनर्व्युत्थानमिति ।

तथावस्थापरिणामः । तत्र निरोधक्षणेषु निरोधसंस्कारा बलवन्तो भवन्ति दुर्बला व्युत्थानसंस्कारा इति । एष धर्माणामवस्थापरिणामः । तत्र धर्मिणो धर्मैः परिणामो धर्माणां लक्षणैः परिणामो लक्षणानामप्यवस्थाभिः परिणाम इति । एवं धर्मलक्षणावस्थापरिणामैः शून्यं न क्षणमपि गुणवृत्तमवतिष्ठते । चलं च गुणवृत्तम् । गुणस्वाभाव्यं तु प्रवृत्तिकारणमुक्तं गुणानामिति । (भा० द्र० २।१८, १५) एतेन भूतेन्द्रियेषु धर्मधर्मिभेदात्त्रिविधः परिणामो वेदितव्यः ।

परमार्थतस्त्वेक एव परिणामः । धर्मिस्वरूपमात्रो हि धर्मो धर्मिविक्रियैवैषा धर्मद्वारा प्रपञ्च्यत इति । तत्र धर्मस्य धर्मिणि

वर्तमानस्यैवाध्वस्वतीतानागतवर्तमानेषु भावान्यथात्वं भवति, न तु द्रव्यान्यथात्वम् । यथा सुवर्णभाजनस्य भित्त्वान्यथा क्रियमाणस्य भावान्यथात्वं भवति न सुवर्णान्यथात्वमिति ।

अपर आह-धर्मानभ्यधिको धर्मी पूर्वतत्त्वानतिक्रमात् । पूर्वापरावस्था भेदमनुपतितः कौटस्थ्येनैव परिवर्तेत यद्यन्वयी स्यादिति ।

अयमदोषः । कस्मात् ? एकान्तानभ्युपगमात् । तदेतत्त्रैलोक्यं व्यक्तेरपैति । कस्मात् ? नित्यत्वप्रतिषेधात् । अपेतमप्यस्ति । विनाश-प्रतिषेधात् । संसर्गाच्चास्य सौक्ष्म्यं सौक्ष्म्याच्चानुपलब्धिरिति ।

लक्षणपरिणामो धर्मोऽध्वसु वर्तमानोऽतीतोऽतीतलक्षण-युक्तोऽनागतवर्तमानाभ्यां लक्षणाभ्यामवियुक्तः । तथानागतोऽनागतलक्षण-युक्तो वर्तमानातीताभ्यां लक्षणाभ्यामवियुक्तः । तथा वर्तमानो वर्तमानलक्षणयुक्तोऽतीतानागताभ्यां लक्षणाभ्यामवियुक्त इति । यथा पुरुष एकस्यां स्त्रियां रक्तो न शेषासु विरक्तो भवतीति ।

अत्र लक्षणपरिणामे सर्वस्य सर्वलक्षणयोगादध्वसंकरः प्राप्नोतीति परैर्दोषश्चोद्यत इति । तस्य परिहारः- धर्माणां धर्मत्वमप्रसाध्यम् । सति च धर्मत्वे लक्षणभेदोऽपि वाच्यो, न वर्तमानसमय एवास्य धर्मत्वम् । एवं हि न चित्तं रागधर्मकं स्यात्क्रोधकाले रागस्यासमुदाचारादिति ।

किञ्च, त्रयाणां लक्षणानां युगपदेकस्यां व्यक्तौ नास्ति संभवः । क्रमेण तु स्वव्यञ्जकाञ्जनस्य भावो भवेदिति । उक्तं च-रूपातिशया वृत्त्यतिशयाश्च परस्परेण विरुध्यन्ते, सामान्यानि त्वतिशयैः सह प्रवर्तन्ते । तस्मादसंकरः । यथा रागस्यैव क्वचित्समुदाचार इति न तदानीमन्यत्राभावः, किं तु केवलं सामान्येन समन्वागत इत्यस्ति तदा तत्र तस्य भावः तथा लक्षणस्येति ।

न धर्मी त्र्यध्वा । धर्मास्तु त्र्यध्वानः । ते लक्षिता अलक्षिताश्च तां तामवस्थां प्राप्नुवन्तोऽन्यत्वेन प्रतिनिर्दिश्यन्तेऽवस्थान्तरतो नाद्रव्यान्तरतः । यथैका रेखा शतस्थाने शतं दशस्थाने दशैका चैकस्थाने, यथा चैकत्वेऽपि स्त्री माता चोच्यते दुहिता च स्वसा चेति ।

अवस्थापरिणामे कौटस्थ्यप्रसङ्गदोषः कैश्चिदुक्तः । कथम् ? अध्वनो व्यापारेण व्यवहितत्वात् । यदा धर्मः स्वव्यापारं न करोति तदानागतो, यदा करोति तदा वर्तमानो, यदा कृत्वा निवृत्तस्तदातीत इत्येवं धर्मधर्मिणोर्लक्षणानामवस्थानां च कौटस्थ्यं प्राप्नोतीति परैर्दोष उच्यते ।

नासौ दोषः । कस्मात् ? गुणिनित्यत्वेऽपि गुणानां विमर्दवैचित्र्यात् । यथा संस्थानमादिमद्धर्ममात्रं शब्दादीनां विनाश्यविनाशिनामेवं लिङ्गमादिमद् धर्ममात्रं सत्त्वादीनां गुणानां विनाश्यविनाशिनाम्, तस्मिन्विकारसंज्ञेति ।

तत्रेदमुदाहरणं मृद्धर्मी पिण्डाकाराद्धर्माद्धर्मान्तरमुपसंपद्यमानो धर्मतः परिणमते घटाकार इति । घटाकारोऽनागतं लक्षणं हित्वा वर्तमानलक्षणं प्रतिपद्यत इति लक्षणतः परिणमते । घटो नवपुराणतां प्रतिक्षणमनुभवन्नवस्थापरिणामं प्रतिपद्यत इति । धर्मिणोऽपि धर्मान्तरमवस्था, धर्मस्यापि लक्षणान्तरमवस्थेत्येक एव द्रव्यपरिणामो भेदेनोपदर्शित इति । एवं पदार्थान्तरेष्वपि योज्यमिति । त एते धर्मलक्षणावस्थापरिणामा धर्मिस्वरूपमनतिक्रान्ता इत्येक एव परिणामः सर्वानमून्विशेषानभिप्लवते । अथ कोऽयं परिणामः ? अवस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ धर्मान्तरोत्पत्तिः परिणामः ॥१३॥

અગાઉ (સૂત્ર ૯, ૧૦, ૧૧માં) ચિત્તનાં ધર્મ, લક્ષણ અને અવસ્થારૂપ પરિણામો કહ્યાં, એનાથી ભૂતો અને ઇન્દ્રિયોનાં ધર્મપરિણામ, લક્ષણપરિણામ અને અવસ્થાપરિણામ કહેવાઈ ગયેલાં જાણવાં.

ધર્મી ચિત્તમાં વ્યુત્થાન અને નિરોધ એ બે ધર્મોનો અભિભવ અને પ્રાદુર્ભાવ ધર્મપરિણામ છે. નિરોધ ધર્મ ત્રણ અધ્વો(કાળો)થી યુક્ત થાય કે ત્રણ લક્ષણોવાળો બને એ લક્ષણપરિણામ છે. એ અનાગત (ભવિષ્યકાળ) લક્ષણરૂપ પહેલા અધ્વને છોડીને, પોતાનું ધર્મપણું ત્યાગ્યા વિના, પોતાના સ્વરૂપે અભિવ્યક્ત થાય, એ એનો વર્તમાનલક્ષણ બીજો અધ્વ (માર્ગ) છે. વર્તમાનમાં પણ એ અતીત અને અનાગતનાં લક્ષણો વિનાનો હોતો નથી. અને ત્રણ લક્ષણોવાળું વ્યુત્થાન, ત્રણ અધ્વોથી યુક્ત હોય છે. એ વર્તમાન લક્ષણ છોડીને, પોતાનું ધર્મપણું ત્યાગ્યા વિના, અતીત (ભૂતકાળરૂપ) લક્ષણને પ્રાપ્ત થાય, એ ચિત્તનો ત્રીજો અધ્વ (માર્ગ) છે. ત્યારે પણ એ અનાગત

અને વર્તમાનરૂપ લક્ષણો વિનાનું હોતું નથી. એ રીતે જ્યારે વ્યુત્થાન પ્રગટ થતું હોય, ત્યારે અનાગત લક્ષણ છોડીને, ધર્મપણું ત્યાગ્યા વિના, વર્તમાન લક્ષણ પ્રાપ્ત કરીને પોતાના સ્વરૂપે પ્રગટ થઈ પોતાનું કાર્ય કરે છે. એ એનો બીજો અધ્વ છે, જેમાં એ અતીત અને અનાગત લક્ષણો વિનાનું હોતું નથી. આમ વારંવારને નિરોધ અને વ્યુત્થાન થયા કરે છે.

અને હવે અવસ્થા પરિણામ કહેવામાં આવે છે. નિરોધની ક્ષણોમાં નિરોધના સંસ્કાર બળવાન બને અને વ્યુત્થાનના સંસ્કારો નબળા બને, એ આ ધર્મોનું અવસ્થા પરિણામ છે.

આમ ધર્મી ધર્મોરૂપે પરિણમે છે, ધર્મો લક્ષણોરૂપે પરિણમે છે અને લક્ષણો અવસ્થારૂપે પરિણમે છે. આ રીતના ધર્મ, લક્ષણ અને અવસ્થારૂપ પરિણામો વિના ગુણવૃત્ત (ગુણોનું ચક્ર) એક ક્ષણ માટે પણ સ્થિર રહેતું નથી. અને ગુણવૃત્ત ચલ (સતત ગતિશીલ) છે (એ આ શાસ્ત્રનો મૂળભૂત સિદ્ધાન્ત છે). ગુણોનું પ્રવૃત્તિકારણ એમનો સ્વભાવ જ છે. (જુઓ, ૨.૧૫, ૧૮). આનાથી ભૂતો અને ઇન્દ્રિયોમાં ધર્મી અને ધર્મના ભેદોમાં ત્રણ પ્રકારનું પરિણામ જાણવું જોઈએ.

હકીકતમાં પરિણામ એક છે. કારણ કે ધર્મો ધર્મીનું સ્વરૂપમાત્ર છે. માટે ધર્મીનાં પરિણામો ધર્મો દ્વારા ચર્ચવામાં આવે છે. ધર્મીમાં રહેતા ધર્મો ભૂત, ભવિષ્ય અને વર્તમાન કાળોમાં ભાવરૂપ ફેરફાર પામે છે, દ્રવ્ય (ધર્મી)માં કોઈ ફેરફાર થતો નથી. દાખલા તરીકે સોનાના પાત્રને ભાંગીને બીજા આકારોમાં ઢાળવામાં આવે, તો ભાવો (આકારો)માં ફેરફાર થાય છે, સોનામાં કોઈ ફેરફાર થતો નથી.

બીજો (એકાન્તમતાગ્રહી બૌદ્ધ) કહે છે કે ધર્મોથી અધિક (ભિન્ન) કોઈ ધર્મી નથી, કારણ કે એ ધર્મોના તત્ત્વનું અતિક્રમણ કરતો નથી. ધર્મોમાં અનુગત કોઈ ધર્મી હોય તો પૂર્વાપર અવસ્થાઓના ભેદોમાં અપરિવર્તનશીલ જ રહે. આના જવાબમાં કહે છે કે આ દોષ નથી. કેમ ? કારણ કે અમે એકાન્ત મત સ્વીકારતા નથી. આ ત્રૈલોક્ય વ્યક્તિ (આકાર)થી રહિત બને છે. (વર્તમાન વ્યક્ત દશામાંથી અવ્યક્ત અવસ્થામાં લય પામે છે). કેમ ? કારણ કે એમાં નિત્યપણાનો નિષેધ કરવામાં આવે છે. વ્યક્તિથી

રહિત બન્યા પછી પણ એ હોય છે, કારણ કે વિનાશનો પણ નિષેધ કરવામાં આવે છે. (હોય તો દેખાતું કેમ નથી ?) સંસર્ગથી સૂક્ષ્મતા અને સૂક્ષ્મતાને લીધે અનુપલબ્ધિ થાય છે. (તેથી દેખાતું નથી. વ્યક્ત ત્રૈલોક્ય પોતાનાં કારણોના સંસર્ગમાં આવતાં સૂક્ષ્મતા પ્રાપ્ત કરે છે, તેથી દેખાતું નથી).

ધર્મનું લક્ષણપરિણામ એટલે એનું ત્રણે અધ્વો (કાળો)માં અસ્તિત્વ હોવું. અતીતલક્ષણ યુક્ત ભૂતકાળનો ધર્મ વર્તમાન અને ભવિષ્યનાં લક્ષણો વિનાનો હોતો નથી. એમ, ભવિષ્ય લક્ષણયુક્ત અનાગત ધર્મ, વર્તમાન અને અતીતનાં લક્ષણો વિનાનો હોતો નથી. એ રીતે વર્તમાન લક્ષણયુક્ત વર્તમાનધર્મ ભૂતકાળ અને ભવિષ્યકાળનાં લક્ષણો વિનાનો હોતો નથી. કોઈ પુરુષ એક સ્ત્રીમાં આસક્ત હોય, ત્યારે પણ અન્ય સ્ત્રીઓમાં વિરક્ત હોતો નથી.

છતાં દરેક અક્ષર શબ્દનો આત્મા અને બધા અર્થો કહેવાની શક્તિથી યુક્ત છે. સહકારી બીજા અક્ષરો સાથે મળીને, જાણે કે સર્વ અર્થો કહી શકે એવી શક્તિવાળો બને છે. પ્રથમ અક્ષર બીજા સાથે અને બીજો પ્રથમ સાથે, એમ વિશેષ પ્રકારના ક્રમમાં ગોઠવાઈને, અનેક અક્ષરો, અર્થને પ્રગટ કરનારા સંકેતથી યુક્ત બનીને વિશેષ અર્થ પ્રગટ કરે છે. આમ તેઓ બધા અર્થો કહેવાની શક્તિવાળા છે, છતાં ગકાર, ઔકાર અને વિસર્ગ રૂપે "गौः" સ્વરૂપવાળા બનીને ગળામાં લટકતી ચામડી વગેરે વાળા અર્થને પ્રગટ કરે છે.

આમ અર્થના સંકેતથી યુક્ત અને વિશેષ ક્રમમાં ઉચ્ચારાતા ધ્વનિઓ એક એકમ બનીને, બુદ્ધિમાં એક અર્થ પ્રગટ કરે છે, એને વાચક શબ્દ કહેવામાં આવે છે, જે વિશેષ વાચ્ય અર્થને કહેવાનો સંકેત ધરાવે છે. આ રીતે એક શબ્દ એક બુદ્ધિનો વિષય છે, એક (માનસિક) પ્રયત્ન (પ્રક્રિયા)થી ઉત્પન્ન થાય છે, એમાં વિભાગો કે અક્ષરોનો ક્રમ નથી, અને છેલ્લા ઉચ્ચારેલા અક્ષરના વ્યાપારથી બુદ્ધિમાં એક વિચાર ઉત્પન્ન કરે છે. કહેનાર પોતાના વિચારને અન્યમાં સંક્રાન્ત કરવા ઇચ્છે, ત્યારે એ વર્ણરૂપ શબ્દ વડે પોતાના ભાવને વ્યક્ત કરે છે, અને અન્ય વ્યક્તિ એને સાંભળે છે. આમ કહેનાર

અને સાંભળનાર લોકો અનાદિકાળથી ચાલ્યા આવતા વાણીના વ્યવહારની વાસનાથી વાસિત બુદ્ધિવાળા હોઈ જાણે કે એ પરમાર્થ સત્ય હોય એમ માને છે. સંકેત-બુદ્ધિથી શબ્દોના વિભાગ કરવામાં આવે છે. આટલી સંખ્યામાં, આવા પ્રકારનો અક્ષરોનો મેળ એક અર્થ કહે છે, એવું સંકેતનું સ્વરૂપ હોય છે. આ સંકેત શબ્દ અને શબ્દાર્થના પરસ્પર અધ્યાસના સ્વરૂપનો અને સ્મૃતિરૂપ હોય છે. જે આ શબ્દ છે, એ જ અર્થ છે, અને જે આ અર્થ છે, એ જ શબ્દ છે, એમ પરસ્પરના અધ્યાસરૂપવાળો સંકેત હોય છે. આમ શબ્દ, અર્થ અને જ્ઞાનના પરસ્પર અધ્યાસને કારણે, ગૌઃ એટલે શબ્દ, ગૌઃ એટલે અર્થ અને ગૌઃ એટલે જ્ઞાન, એમ ત્રણે મિશ્રિત થાય છે. એ ત્રણના વિભાગને જે યથાર્થપણે જાણે છે એ સર્વજ્ઞ છે.

બધા શબ્દોમાં પૂરા વાક્યને વ્યક્ત કરવાની શક્તિ છે. "વૃક્ષ" એમ બોલતાં "છે" સૂચવાય છે, કારણ કે પદાર્થ અસ્તિત્વવિનાનો હોઈ શકે નહીં. એ રીતે ક્રિયા સાધનવિનાની હોતી નથી. તેથી "પચતિ" (રાંધે છે) એમ કહેતાં, રાંધવાનાં બધાં સાધનો સૂચવાય છે. ચૈત્રરૂપ કર્તા, અગ્નિરૂપ કરણ અને ચોખારૂપ કર્મનું કથન અર્થની સ્પષ્ટતા માટે કરવામાં આવે છે. વાક્યાર્થ પ્રગટ કરવા માટે શબ્દરચના કરવામાં આવે છે. દાખલા તરીકે "શ્રોત્રિયઃ" એટલે વેદપાઠ કરનાર બ્રાહ્મણ અને "જીવતિ" એટલે પ્રાણ ધારણ કરનાર મનુષ્ય.

અગાઉ જણાવ્યા પ્રમાણે શબ્દ વાક્યાર્થ પ્રગટ કરતો હોવાથી, એને છૂટો પાડીને વ્યાકરણની દૃષ્ટિએ એ કારકવાચક છે કે ક્રિયાવાચક, એનું વિશ્લેષણ કરવું જરૂરી બને છે. નહીં તો "ભવતિ", "અશ્વઃ" "અજાપયઃ" વગેરેમાં કયો શબ્દ કારકવાચક અને ક્રિયાવાચક છે, એનો નિર્ણય, નામ અને આખ્યાત (સંજ્ઞા અને ક્રિયાપદ)નાં રૂપોમાં દેખીતી સમાનતા હોવાના કારણે, થઈ શકતો નથી.

એ શબ્દ, અર્થ અને જ્ઞાનનો વિભાગ (યોગીએ જાણવો જોઈએ). જેમકે "શ્વેતતે પ્રાસાદઃ" (મહેલ સફેદ જણાય છે) પ્રયોગમાં શ્વેત શબ્દ ક્રિયાવાચક છે. અને "શ્વેતઃ પ્રાસાદઃ" (સફેદ મહેલ) પ્રયોગમાં શ્વેત શબ્દ સંજ્ઞા(કારક)વાચક છે. આમ શ્વેત શબ્દ સ્વરૂપે ક્રિયા અને કારક બંને અર્થોનો

વાચક છે, અને જ્ઞાનને પણ વ્યક્ત કરે છે. કેવી રીતે ? એ આ જ છે, એવા સંબંધને કારણે સંકેત અને જ્ઞાન એકાકાર જણાય છે. આમ જે શ્વેત પદાર્થ છે, એ શબ્દનું અને જ્ઞાનનું આલંબન છે. પદાર્થ પોતાની અવસ્થાઓમાં ફેરફાર પામે છે, તેથી શબ્દ કે જ્ઞાન સાથે રહેતો નથી. આવો શબ્દ અને આવું જ્ઞાન સાથે રહેતાં નથી. આ કારણે શબ્દ જુદો છે, અર્થ જુદો છે, અને જ્ઞાન જુદું છે, એમ સમજવું એ એમનો વિભાગ છે. એમના આવા વિભાગપર સંયમ કરવાથી બધાં પ્રાણીઓના અવાજનું જ્ઞાન થાય છે. (અવાજોથી તેઓ શું કહે છે, એ સમજાય છે.) ૧૭

तत्त्व वैशारदी

अयमपरः संयमस्य विषय उपक्षिप्यते-शब्दार्थप्रत्ययानामितरेतराध्यासात्संकर-स्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानम् । अत्र वाचकं शब्दमाचिख्यासुः प्रथमं तावद्वाग्व्यापारविषयमाह-तत्रेति । वाग्वागिन्द्रयं वर्णव्यञ्जकमष्टस्थानम् । यथाह-

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥ (पाणिनीय शिक्षा १३)

इति । सा वाग्वर्णेष्वेव यथालोकप्रतीतिसिद्धेष्वर्थवती न वाचक इत्यर्थः । श्रोत्रव्यापारविषयं निरूपयति-श्रोत्रं पुनर्ध्वनेरुदानस्य वागिन्द्रियाभिघातिनो यः परिणतिभेदो वर्णात्मा तेनाकारेण परिणततन्मात्रविषयं न तु वाचकविषयमित्यर्थः । यथा लोकप्रतीतिसिद्धेभ्यो वर्णेभ्यो वाचकं भिनत्ति-पदं पुनर्वाचकं नादानुसंहारबुद्धि-निर्ग्राह्यं यथाप्रतीतिसिद्धान्नादान्वर्णान्प्रत्येकं गृहीत्वानुपश्चाद्या संहरत्येकत्वमापादयति गौरित्येतदेकं पदमिति तया पदं गृह्यते । यद्यपि प्राच्योऽपि बुद्धयो वर्णाकारं पदमेव प्रत्येकं गोचरयन्ति, तथापि न विशदं प्रथते । चरमे तु विज्ञाने तदतिविशदमिति नादानुसंहार-बुद्धिनिर्ग्राह्यमुक्तम् ।

यस्तु वैजात्यादेकपदानुभवमविज्ञाय वर्णानेव वाचकानातिष्ठते तं प्रत्याह-वर्णा इति । ते खल्वमी वर्णाः प्रत्येकं वाच्यविषयां धियमादधीरन्नागदन्तका इव शिक्ष्यावलम्बनं, संहता वा ग्रावाण इव पिठरधारणम् । न तावत्प्रथमः कल्पः । एकस्मादर्थप्रतीतेरनुत्पत्तेः । उत्पत्तौ वा द्वितीयादीनामनुच्चारणप्रसङ्गः । निष्पादितक्रिये कर्मणि विशेषानाधायिनः साधनस्य साधनन्यायातिपातात् । तस्माद् द्वितीयः परिशिष्यते । संभवति हि ग्राव्णां संहतानां पिठरधारणमेकसमयभावित्वात् । वर्णानां तु यौगपद्यासंभवः । अतः परस्परमनुग्राह्यानुग्राहकत्वायोगात्संभूयापि नार्थधियमादधते ।

ते पदरूपमेकमसंस्पृशन्तस्तादात्म्येनात एवानुपस्थापयन्त आविर्भूतास्तिरोभूता अयःशलाकाकल्पाः प्रत्येकमपदस्वरूपा उच्यन्ते ।

यदि पुनः पदमेकं तादात्म्येन स्पृशेयुर्वर्णास्ततो नोक्तदोषप्रसङ्ग इत्याह- वर्णः पुनरेकैकः पदात्मा सर्वाभिधानशक्तिप्रचितः सर्वाभिरभिधानशक्तिभिर्निचितः । गोगणगौरनगेत्यादिषु हि गकारो गोत्वाद्यर्थाभिधायिषु दृष्ट इति तत्तदभिधानशक्तिः । एवं सोमशोचिरित्यादिष्वीश्वराद्यर्थाभिधायिषु पदेष्वोवर्णो दृष्ट इति सोऽपि तत्तदभिधानशक्तिः । एवं सर्वत्रोहनीयम् । च चैकैको वर्णो गकारादिः सहकारि यद्वर्णान्तरमोकारादि तदेव प्रतियोगि प्रतिसम्बन्धि यस्य स तथोक्तः । तस्य भावस्तत्त्वं तस्माद्वैश्वरूप्यं नानात्वमिवापन्नो न तु नानात्वमापन्नः । तस्य तत्त्वादेव पूर्वो वर्णो गकार उत्तरेणौकारेण गणादिपदेभ्यो व्यावर्त्योत्तरश्चौकारो गकारेण शोचिरादिपदेभ्यो व्यावर्त्य विशेषे गोत्ववाचके गोपदस्फोटेऽवस्थापितोऽनुसंहारबुद्धौ । अयमभिसंधिः- अर्थप्रत्ययो हि वर्णैर्नियतक्रमतया परस्परमसंभवद्भिरशक्यः कर्तुम् । न च संस्कारद्वारेणाग्नेयादीनामिव परमापूर्वे वा स्वर्गे वा जनयितव्येऽनियतक्रमाणामपि साहित्यमर्थबुद्ध्युपजनने वर्णानामिति सांप्रतम्; विकल्पासहत्वात् । स खल्वयं वर्णानुभवजन्यः संस्कारः स्मृतिप्रसवहेतुरन्यो वाग्नेयादिजन्य इवापूर्वाभिधानः; न तावदनन्तरः । कल्पनागौरवापत्तेः । स एव तावददृष्टपूर्वः कल्पनीयः । तस्य च क्रमवद्भिर्वर्णानुभवैरेकस्य जन्यत्वं न संभवतीति तज्जातीयानेकावान्तरसंस्कारकल्पनेति गौरवम् । न चैष ज्ञापकहेत्वङ्गमज्ञातस्तदङ्गतामनुभवतीति । न खलु संबन्धोऽर्थप्रत्याय- नाङ्गमज्ञातोऽङ्गतामुपैति । स्मृतिफलप्रसवानुमितस्तु संस्कारः स्वकारणानुभवविषयनियतो न विषयान्तरे प्रत्ययमाधातुमुत्सहते; अन्यथा यत्किञ्चिदेवैकैकमनुभूय सर्वः सर्वं जानीयादिति । न च प्रत्येकवर्णानुभवजनितसंस्कारपिण्डलब्धजन्मस्मृतिदर्पणसमारोहिणो वर्णाः समधिगतसहभावा वाचका इति सांप्रतम् । क्रमाक्रमविपरीतक्रमानुभूतानां तत्राविशेषेणार्थधीजननप्रसङ्गात् । न चैतत्स्मरणज्ञानं पूर्वानुभववर्तिनीं परापरतां गोचरयितुमर्हति । तस्माद्वर्णेभ्योऽसंभवन्नर्थप्रत्यय एकपदानुभवमेव स्वनिमित्त- मुपकल्पयति। न चैष पदेऽपि प्रसङ्गः । तद्धि प्रत्येकमेव प्रयत्नभेदभिन्ना ध्वनयो व्यञ्जयन्तः परस्परविसदृशतत्तत्पदव्यञ्जकध्वनिभिस्तुल्यस्थानकरणनिष्पन्नाः सदृशा सन्तोऽन्योन्यविसदृशैः पदैः पदमेकं सदृशमापादयन्तः प्रतियोगिभेदेन तत्तत्सादृश्यानां भेदात्तदुपधानादेकमप्यनवयवमपि सावयवमिवानेकात्मकमिवावभासयन्ति । यथा नियतवर्णपरिमाणसंस्थानं मुखमेकमपि मणिकृपाणदर्पणादयो विभिन्नवर्णपरिमाण- संस्थानमनेकमादर्शयन्ति न परमार्थतः । सादृश्योपधानभेदकल्पिता भागा एव निर्भागस्य पदस्य वर्णाः । तेन तद्बुद्धिर्वर्णात्मना पदभेदे स्फोटमभेदमेव निर्भागमेव सभेदमिव

सभागमिवालम्बते । अतो गोपदस्फोटभेदस्यैकस्य गकारभागो गौरादिपदस्फोटसादृश्येन न निर्धारयति, स्वभागिणमित्योकारेण विशिष्टो निर्धारयति । एवमोकारोऽपि भागः शोचिरादिपदसदृशतया न शक्तो निर्धारयितुं स्वभागिनं गोपदस्फोटमिति गकारेण विशिष्टो निर्धारयति । असहभाविनामपि च संस्कारद्वारेणास्ति सहभाव इति विशेषणविशेष्यभावोपपत्तिः । न च भिन्नविषयत्वं संस्कारयोर्भागद्वयविषययोरनुभवयोस्तजन्मनोश्च संस्कारयोरेकपदविषयत्वात् । केवलभागानुभवेन पदमव्यक्तमनुभूयते । अनुसंहारधिया तु भागानुभवयोनिसंस्कारलब्धजन्मना व्यक्तमिति विशेषः । अव्यक्तानुभवाश्च प्राज्ञः संस्काराधानक्रमेण व्यक्तमनुभवमादधाना दृष्टा यथा दूराद्वनस्पतौ हस्तिप्रत्यया अव्यक्ता व्यक्तवनस्पतिप्रत्ययहेतवः । न चेयं विधा वर्णानामर्थप्रत्यायने संभविनी । नो खलु वर्णाः प्रत्येकमव्यक्तमर्थप्रत्ययमादधत्यन्ते व्यक्तमिति शक्यं वक्तुम् । प्रत्यक्षज्ञान एव नियमाद्व्यक्ताव्यक्तत्वस्य । वर्णाधेयस्त्वर्थप्रत्ययो न प्रत्यक्षः । तदेष वर्णेभ्यो जायमानः स्फुट एव जायेत न वा जायेत न त्वस्फुटः । स्फोटस्य तु ध्वनिव्यङ्ग्यस्य प्रत्यक्षस्य सतः स्फुटास्फुटत्वे कल्प्येते इत्यसमानम् । एवं प्रत्येकवर्णानुभवजनितसंस्कारसहितश्रोत्रलब्धजन्मन्यनुसंहारबुद्धौ संहता वर्णा एकपदस्फोटभावमापन्नाः प्रयत्नविशेषव्यङ्ग्यतया प्रयत्नविशेषस्य च नियतक्रमापेक्षतया क्रमस्यान्यत्वे तदभिव्यञ्जकप्रयत्नविशेषाभावेन तदभिव्यक्त्यभावप्रसङ्गात्क्रमानुरोधिनोऽर्थसंकेतेनावच्छिन्नाः, संकेतावच्छेदमेव लौकिकं सभागपदविषयं दर्शयन्ति, इयन्तो द्वित्रास्त्रिचतुराः पञ्चषा वा एते सर्वाभिधानशक्तिपरिवृता गकारौकारविसर्जनीयाः सास्नादिमन्तमर्थमवद्योतयन्तीति ।

तत्किमिदानीं संकेतानुसारेण वर्णानामेव वाचकत्वम् । तथा च न पदं नाम किञ्चिदेकमित्यत आह-तदेतेषामिति । ध्वनिनिमित्तः क्रमो ध्वनिक्रमः । उपसंहृतो ध्वनिक्रमो येषु ते तथोक्ताः । बुद्ध्या निर्भास्यते प्रकाश्यते इति बुद्धिनिर्भासः । संकेतावच्छिन्नाः स्थूलदर्शिलोकाशयानुरोधेन गकारौकारविसर्जनीया इत्युक्तम् । गकारादीनामपि तद्भागतया तादात्म्येन वाचकत्वात् । प्रतीत्यनुसारतस्त्वेकमेव पदं वाचकमित्यर्थः । एतदेव स्पष्टयति-तदेकं पदं लोकबुद्ध्या प्रतीयत इति सम्बन्धः । कस्मादेकमित्यत आह-एकबुद्धिविषयम् । गौरित्येकं पदमित्येकाकाराया बुद्धेर्विषयो यतस्तस्मादेकम् । तस्य व्यञ्जकमाह-एकप्रयत्नाक्षिप्तमिति । रस इतिपदव्यञ्जकात्प्रयत्नाद्विलक्षणः सर इतिपदव्यञ्जकः प्रयत्नः । स चोपक्रमतः सर इति पदव्यक्तिलक्षणफलावच्छिन्नः पूर्वापरीभूत एकः तदाक्षिप्तं भागानां सादृश्योपधानभेदकल्पितानां परमार्थसतामभावादभागम् । अत एव पूर्वापरीभूतभागाभावादक्रमम् । ननु वर्णाः पूर्वापरीभूतास्ते चास्य भागा इति कथमक्रममभागं चेत्यत आह-अवर्णमिति ।

न ह्यस्य वर्णाः भागाः, किं तु सादृश्योपधानभेदात्पदमेव तेन तेनाकारेणापरमार्थसता प्रथते । न हि मणिकृपाणदर्पणादिवर्तीनि मुखानि मुखस्य परमार्थसतोऽवयवा इति। बौद्धमनुसंहारबुद्धौ विदितमन्त्यवर्णप्रत्ययस्य व्यापारः संस्कारः पूर्ववर्णानुभव-जनितसंस्कारसहितः । तेनोपस्थापितं विषयीकृतम् । वर्णानुभवतत्संस्काराणां च पदविषयत्वमुपपादितमधस्तात् । स्यादेतत्-अभागमक्रममवर्णं चेत्पदतत्त्वं कस्मादेवंविधं कदाचिन्न प्रथते न हि लाक्षारसावसेकोपधानापादितारुणभावः स्फटिकमणिस्तदपगमे स्वच्छधवलो नानुभूयते । तस्मात्पारमार्थिका एव वर्णा इत्यत आह-परत्रेति । प्रति-पिपादयिषया वर्णैरेवाभिधीयमानैरुच्चार्यमाणैः श्रूयमाणैश्च श्रोतृभिरनादिर्योऽयं वाग्व्यवहारो विभक्तवर्णपदनिबन्धनस्तज्जनिता वासना साप्यनादिरेव । तदनुविद्धया तद्वासितया लोकबुद्ध्या विभक्तवर्णरचितपदावगाहिन्या सिद्धवत्परमार्थवत्संप्रतिपत्त्या संवादेन वृद्धानां पदं प्रतीयते । एतदुक्तं भवति – अस्ति कश्चिदुपाधिर्य उपधेयेन संयुज्यते वियुज्यते च । यथा लाक्षादिः । तत्र तद्वियोगे स्फटिकः स्वाभाविकेन स्वच्छधवलेन रूपेण प्रकाशत इति युज्यते । पदप्रत्ययस्य तु प्रयत्नभेदोपनीतध्वनिभेदादन्यतोऽनुत्पादात्तस्य च तदा सादृश्यदोषदूषिततया वर्णात्मनैव प्रत्ययजनकत्वमिति कुतो निरुपाधिनः पदस्य प्रथा । यथाहुः-

ध्वनयः सदृशात्मानो विपर्यासस्य हेतवः ।
उपलम्भ्रकमेतेषां विपर्यासस्य कारणम् ॥

उपायत्वाच्च नियतः पददर्शितदर्शिनाम् ।
ज्ञानस्यैव च बाधेयं लोके ध्रुवमुपप्लवः ॥

इति । यतः पदात्मा विभक्तवर्णरूषितः प्रकाशतेतः स्थूलदर्शी लोको वर्णानेव पदमभिमन्यमानस्तानेव प्रकारभेदभाजोऽर्थभेदे संकेतयतीत्याह-तस्येति । तस्य पदस्याजानत एकस्यापि संकेतबुद्धितः स्थूलदर्शिलोकहिताय वर्णात्मना विभागः । विभागमाह-एतावतां न न्यूनानामधिकानां वा, एवंजातीयको नैरन्तर्यक्रमविशेषोऽनुसंहार एकबुद्ध्युपग्रह एतस्यार्थस्य गोत्वादेर्वाचक इति । ननु यद्येतस्यार्थस्यायं शब्दो वाचक इति संकेतो, हन्त भोः शब्दार्थयोर्नेतरेतराध्यासस्तर्हीत्यत आह- संकेतस्त्विति । स्मृतावात्मा स्वरूपं यस्य स तथोक्तः । न हि कृत इत्येव संकेतोऽर्थमवधारयत्यपि तु स्मर्यमाणः । एतदुक्तं भवति- अभिन्नाकार एव संकेते कथञ्चिद्भेदं परिकल्प्य षष्ठी प्रयुक्तेति । य एषां प्रविभागज्ञः स तत्र संयमे भवति सर्ववित्सर्वभूतरुतज्ञ इति ।

तदेवं कल्पितवर्णभागमेकमनवयवं पदं व्युत्पाद्य कल्पितपदविभागं वाक्यमेकमनवयवं व्युत्पादयितुमाह – सर्वपदेषु चास्ति वाक्यशक्तिरिति ।

अयमभिसंधिः-परप्रत्यायनाय शब्दः प्रयुज्यते । तत्र तदेव च परं प्रति प्रतिपादयितव्यं यत्तैः प्रतिपित्सितम् । तदेव तैः प्रतिपित्सितं यदुपादानादिगोचरः । न च पदार्थमात्रं तद्गोचरः किं तु वाक्यार्थ इति वाक्यार्थपरा एव सर्वे शब्दाः । तेन स एव तेषामर्थः । अतो यत्रापि केवलस्य पदस्य प्रयोगस्तत्रापि पदान्तरेण सहैकीकृत्य ततोऽर्थो गम्यते, न तु केवलात् । कस्मात् ? तन्मात्रस्यासमर्थ्यात् । तथा च वाक्यमेव तत्र तत्र वाचकं न तु पदानि । तद्भागतया तु तेषामप्यस्ति वाक्यार्थवाचकशक्तिः पदार्थ इव पदभागतया वर्णानाम् । तेन यथा वर्ण एकैकः सर्वपदार्थाभिधानशक्तिप्रचित एवं पदमप्येकैकं सर्ववाक्यार्थाभिधानशक्तिप्रचितम् । तदिदमुक्तम्—सर्वपदेषु चास्ति वाक्यशक्तिः । वृक्ष इत्युक्तेऽस्तीति गम्यते । आध्याहृतास्तिपदसहितं वृक्ष इति पदं वाक्यार्थे वर्तत इति तद्भागत्वाद्वृक्षपदं तत्र वर्तत इत्यर्थः । कस्मात्पुनरस्तीति गम्यत इत्यत आह — न सत्तां पदार्थो व्यभिचरतीति । लोक एव हि पदानामर्थावधारणोपायः । स च केवलं पदार्थमस्त्यर्थेनाभिसमस्य सर्वत्र वाक्यार्थीकरोति । सोऽयमव्यभिचारः सत्तया पदार्थस्य । अत एव शब्दवृत्तिविदां व्यवहारोऽयं यत्रान्यत्क्रियापदं नास्ति तत्रास्तिर्भवन्तीपरः प्रयोक्तव्य इति ।

क्रियाभेदाव्यभिचारि प्रातिपदिकमुक्त्वा क्रियाभेदं कारकाव्यभिचारिणं दर्शयति—तथा च पचतीत्युक्त इति । पचतीत्युक्ते हि कारकमात्रस्य तदन्वययोग्यस्यावगमादन्यव्यावृत्तिपरस्तद्भेदानामनुवादः । तदेवं भेद एव वाक्यार्थ इति । तथानपेक्षमपि पदं वाक्यार्थे वर्तमानं दृश्यत इति सुतरामस्ति वाक्यशक्तिः पदानामित्याह-दृष्टं चेति । न चैतावतापि श्रोत्रियादिपदस्य स्वतन्त्रस्यैवंविधार्थप्रत्यायनं न यावदस्त्यादिभिरभिसमासोऽस्य भवति । तथा चास्यापि वाक्यावयवत्वात्कल्पितत्वमेवेति भावः । स्यादेतत्-पदानामेव चेद्वाक्यशक्तिः कृतं तर्हि वाक्येन । तेभ्य एव तदर्थावसायादित्यत आह — तत्र वाक्य इति । उक्तमेतन्न केवलात्पदात्पदार्थः प्रतिपित्सितः प्रतीयते न यावदेतत्पदान्तरेणाभिसमस्यत इति । तथा वाक्यात्पदान्यपोद्धृत्य कल्पितानि वाक्यार्थाच्चापोदधृत्य तदेकदेशं कारकं क्रियां वा तत्पदं प्रकृत्यादिविभागकल्पनया व्याकरणीयमन्वाख्येयम् । किमर्थं पुनरेतावता क्लेशेनान्वाख्यायत इत्यत आह—अन्यथेति। घटो भवति, भवति भिक्षां देहि, भवति तिष्ठतीति नामाख्यातयोश्च साम्यात् । एवमश्वस्त्वमश्वो यातीति । एवमजापयः पिब, अजापयः शत्रूनिति । नामाख्यात-सारूप्यादनिर्ज्ञातं नामत्वेनाख्यातत्वेन वान्वाख्यानाभावे निष्कृष्याज्ञातं कथं क्रियायां कारके वा व्याक्रियेत । तस्माद्वाक्यात्पदान्यपोद्धृत्य व्याख्यातव्यानि । न त्वन्वाख्यानादेव परमार्थिको विभागः पदानामिति ।

तदेवं शब्दरूपं व्युत्पाद्य शब्दार्थप्रत्ययानां संकेतापादितसंकराणाम-

संकरमख्यातुमुपक्रमते-तेषां शब्दार्थप्रत्ययानां प्रविभागः । तद्यथा श्वेतते प्रासाद इति क्रियार्थः शब्दः । स्फुटतरो ह्यत्र पूर्वापरीभूतायाः क्रियायाः साध्यरूपायाः सिद्धरूपः क्रियार्थः श्वेतत इति भिन्नः शब्दः । यत्रापि शब्दार्थयोः सिद्धरूपत्वं तत्राप्यर्थादस्तिशब्दस्य भेद इत्याह — श्वेतः प्रासाद इति कारकार्थः शब्द इति । अभिहितत्वाच्च कारकविभक्तेरभावः । अर्थं विभजते-क्रियाकारकात्मा तदर्थ इति । तयोः शब्दयोरर्थः क्रियात्मा कारकात्मा च । प्रत्ययं विभजते-प्रत्ययश्चेति । च शब्देन तदर्थ इत्येतत्पदमत्रानुकृष्यते । तदत्रान्यपदार्थप्रधानं संबाध्यते । स एव क्रियाकारकात्मार्थो यस्य स तथोक्तः । नन्वभेदेन प्रतीतेः शब्दार्थप्रत्ययानां संकरात्कुतः प्रविभाग इत्याशयवान्पृच्छति—कस्मादिति । उत्तरमाह—सोऽयमित्यभिसंबन्धादिति । संकेतोपाधिरेवैकाकारप्रत्ययो न तु तात्त्विक इत्यर्थः । संकेतस्य निमित्तता दर्शिता संकेत इति सप्तम्या ।

परमार्थमाह—यस्तु श्वेतोऽर्थ इति । अवस्था नवपुराणत्वादयः । सहगतः संकीर्णः । एवं च प्रविभागसंयमाद्योगिनः सर्वेषां भूतानां पशुमृगसरीसृपवयः प्रभृतीनां यानि रुतानि तत्राप्यव्यक्तं पदं तदर्थस्तत्प्रत्ययश्चेति । तदिह मनुष्यवचनावाच्यप्रत्ययेषु कृतः संयमः समानजातीयतया तेष्वपि कृत एवेति तेषां रुतं तदर्थभेद तत्प्रत्ययं च योगी जानातीति सिद्धम् ॥१७॥

"शब्दार्थ प्रत्ययानाम्" વગેરે સૂત્રથી સંયમનો નવો વિષય પ્રસ્તુત કરે છે. "तत्र वाग्वर्णेषु.." વગેરેથી વાચક શબ્દનું લક્ષણ કહેવાની ઇચ્છાથી પહેલાં વાણી-વ્યવહાર વિષે કહે છે. વર્ણો વ્યક્ત કરતી વાગિન્દ્રિય આઠ સ્થાનોમાં રહે છે : "છાતી, કંઠ, મસ્તક, જીહ્વામૂળ, દાંત, નાસિકા, હોઠ, તાલુ એ અક્ષરોનાં અભિવ્યક્તિસ્થાનો છે." (પાણિનીયશિક્ષા, ૧૩). વાણી લોકપ્રસિદ્ધ વર્ણોમાં અર્થવાળી છે, વાચક શબ્દમાં નહીં, એવો અર્થ છે.

કાનના વ્યાપારનો વિષય કહે છે. ઉદાનવાયુ વાગિન્દ્રિયનાં સ્થાનોમાં આઘાત કરે, એના પરિણામે ઉચ્ચારાતા-ઉત્પન્ન થતા-વર્ણોના આત્મા જેવા ધ્વનિના આકારે પરિણમતી તન્માત્રા જેનો વિષય છે, એ શ્રોત્રેન્દ્રિય છે. એ વાચકને પોતાનો વિષય બનાવતી નથી. "पदं पुनः" વગેરેથી લોકપ્રસિદ્ધ વર્ણોથી વાચકશબ્દનો ભેદ દર્શાવે છે. કાનથી ગ્રહણ કરેલા પ્રત્યેક ધ્વનિને ગ્રહણ કર્યા પછી એમાં એકત્વ લાવીને गौः એવો એક શબ્દ બુદ્ધિ ગ્રહણ કરે છે. જોકે શરૂઆતની બુદ્ધિઓ પણ વર્ણના આકારવાળા પ્રત્યેક પદને વિષય બનાવે છે, છતાં એમાં સ્પષ્ટતા હોતી નથી. છેલ્લા વર્ણના જ્ઞાનથી શબ્દ અત્યંત સ્પષ્ટપણે ગ્રહણ કરાય છે, તેથી ધ્વનિઓના સંગઠિત સ્વરૂપને ગ્રહીત કરતી બુદ્ધિ વડે શબ્દ ગ્રહણ કરવા યોગ્ય છે, એમ કહ્યું.

"વર્ણાઃ એકસમયાસંભવિત્વાત્.." વગેરેથી જે લોકો (વર્ણો) ભિન્ન જાતિના હોવાના કારણે, એક પદનો અનુભવ જાણતા નથી, અને તેથી વર્ણોને જ વાચક તરીકે સ્વીકારે છે, એમના પ્રત્યે કહે છે કે વર્ણો વાચક નથી. આ બધા વર્ણો ખીંટીપર લટકાવેલા છીંકાની જેમ અથવા પત્થરો ભેગા મળીને મંચરૂપ બનીને બાજઠને ધારણ કરે એમ વાચ્ય વસ્તુ વિષયક બુદ્ધિને ધારણ કરે છે ? પહેલો વિકલ્પ સ્વીકારી શકાય એવો નથી, કારણ કે એક વર્ણથી અર્થની પ્રતીતિ થઈ શકે નહીં. કદાચ થાય તો બીજા વર્ણોના ઉચ્ચારણની આવશ્યકતા રહે નહીં. કાર્યસિદ્ધ થયા પછી એમાં વિશેષતા ન ઉમેરનાર સાધન બિનજરૂરી બને છે. માટે બીજો વિકલ્પ બાકી રહે છે. એકઠા થયેલા પત્થરો એકી વખતે સાથે રહી શકતા હોવાથી બાજઠ ધારણ કરી શકે, પણ વર્ણો એકી સાથે રહી શકતા નથી. તેથી પરસ્પર સહકાર કરી શકે એવા ન હોવાથી, ભેગા મળીને પણ અર્થબુદ્ધિ ધારણ કરી શકે નહીં. તાદાત્મ્યથી એક શબ્દરૂપને સ્પર્શતા ન હોવાથી શબ્દરૂપને ઉપસ્થિત કરી શકતા નથી, અને આવિર્ભાવ, તિરોભાવ પામતા, લોઢાના જુદા જુદા સળિયા જેવા પ્રત્યેક શબ્દરૂપ બનતા નથી.

પરંતુ, જો વર્ણો તાદાત્મ્યભાવથી એક પદને સ્પર્શતા હોય તો આવો દોષ આવે નહીં, એમ "વર્ણ પુનઃ એકૈકઃ પદાત્મા" વગેરેથી કહે છે. એકેએક અક્ષર શબ્દનો આત્મારૂપ બનીને, બધા અર્થો કહેવાની શક્તિવાળો ગાય, ગણ, ગૌર, નગ વગેરે શબ્દોમાં ગકાર તે તે અર્થ કહે છે. માટે એવી અભિધાન શક્તિવાળો છે. તેમજ સોમ, શોચિ વગેરે ઈશ્વર વગેરે અર્થવાળા શબ્દોમાં રહેલો ઓકાર પણ તે તે પદાર્થ કહેવાની શક્તિ ધરાવે છે. આમ બધે સમજવું જોઈએ.

ગકાર વગેરે પ્રત્યેક અક્ષર બીજા સહકારી ઔકાર વગેરે સાથે મળીને વૈશ્વરૂપ્ય કે વિવિધરૂપોવાળો જાણે કે બનતો હોય એમ જણાય છે, ખરેખર નાનાત્વને પ્રાપ્ત થતો નથી. પૂર્વ વર્ણ ગકાર પોતાના તાત્ત્વિક રૂપે, પછીના ઔકાર સાથે મળીને "ગણ" વગેરેથી ભિન્ન, તેમજ પછીના ઔકાર અને પહેલાંના ગકાર સાથે મળીને "શોચિ" વગેરેથી ભિન્ન બનીને, ગાયપણાને કહેતા ગૌઃ શબ્દરૂપ સ્ફોટ, (વર્ણોનું સંગઠન કરતી) બુદ્ધિમાં સ્ફુટ-સ્પષ્ટ-અર્થ પ્રગટ કરનાર તરીકે પ્રતિષ્ઠિત થાય છે.

આશય એ છે કે નિશ્ચિત ક્રમમાં રહેલા વર્ણો એકી સાથે એક સમયે અસ્તિત્વમાં આવી શકતા ન હોવાથી, પદાર્થનું જ્ઞાન કરાવી શકે નહીં. વળી, અગ્નિ (યજ્ઞ) કાર્ય વડે ઉત્પન્ન થતા સંસ્કારોરૂપ અપૂર્વ જેમ સ્વર્ગરૂપ ફળ ઉત્પન્ન કરવા માટે એકઠું થાય, એમ નિયત ક્રમમાં ન રહેલા વર્ણો પણ પદાર્થરૂપ બુદ્ધિને

ઉત્પન્ન કરવા માટે સમર્થ બનતા નથી. કારણ કે આ વિષયમાં વિકલ્પ અસ્વીકાર્ય છે. વર્ણના અનુભવથી પેદા થતો, સ્મૃતિ ઉત્પન્ન કરનારો સંસ્કાર, તરત જ ઉત્પન્ન થાય છે, અને અગ્નિહોત્ર વગેરેથી પેદા થયેલો અપૂર્વ નામનો સંસ્કાર તરત ઉત્પન્ન ન થતો હોવાથી- એ બે જુદા છે. આમાં કલ્પનાગૌરવ દોષ આવે છે. પહેલાં ન જોયેલાની (સંસ્કારની) કલ્પના કરવી પડે. ક્રમવાળા ઘણા વર્ણોના અનુભવથી એક (સંસ્કાર)ની ઉત્પત્તિ અસંભવિત હોવાથી, એની જાતિના અનેક અવાન્તર (ગૌણ) સંસ્કારો કલ્પવા પડે એ ગૌરવ છે. એ અજ્ઞાત રહીને જ્ઞાપક હેતુના અંગપણાને પ્રાપ્ત થાય નહીં. સ્મૃતિરૂપ ફળ ઉત્પન્ન થવાથી, અનુમાનવડે જાણેલો સંસ્કાર, પોતાના કારણરૂપ અનુભવના વિષય પૂરતો મર્યાદિત હોવાથી, અન્ય વિષયનું જ્ઞાન ઉત્પન્ન કરવા માટે સમર્થ બને નહીં. જો બને તો બધા મનુષ્યો ઘણા સંસ્કારોમાંના એકને અનુભવીને બધું જાણી શકે. વળી, પ્રત્યેક વર્ણના અનુભવથી ઉત્પન્ન થયેલ સંસ્કારોના પિંડથી ઉત્પન્ન થયેલ સ્મૃતિરૂપ દર્પણમાં આરોહણ કરીને, સહભાવ પ્રાપ્ત કરીને વર્ણો વાચક બનશે, એમ માનવું અયોગ્ય છે. કારણ કે એનાથી ક્રમથી, ક્રમવિના અને વિપરીત ક્રમથી, એમ કોઈ વિશેષતા વિના (સંસ્કારો) અર્થબુદ્ધિ ઉત્પન્ન કરે છે એવો પ્રસંગ ઉપસ્થિત થશે. વળી આવું સ્મૃતિજ્ઞાન પૂર્વના અનુભવમાં પૂર્વાપરતા જણાવવા સમર્થ નથી. તેથી વર્ણોથી પદાર્થજ્ઞાન થવું અસંભવ હોવાથી, પોતાના નિમિત્ત તરીકે એક એક શબ્દનો અનુભવ જ એને ઉત્પન્ન કરી શકે એ એક માર્ગ ખુલ્લો રહે છે. શબ્દના વિષયમાં વર્ણો જેવા દોષનો પ્રસંગ નથી. કારણ કે વિભિન્ન પ્રયત્નોના ભેદથી ઉત્પન્ન થતા ધ્વનિઓ શબ્દને પ્રગટ કરે છે. પરસ્પર અસમાન અને સમાન સ્થાન અને કરણથી ઉત્પન્ન થતા ધ્વનિઓ જાણે કે સમાન હોય એ રીતે તે તે શબ્દને વ્યક્ત કરતા, પ્રતિયોગી ભેદથી, તે તે સમાનતાઓના ભેદથી, એક, અવયવવિનાના છતાં અવયવોવાળા જણાતા, અનેક ધ્વનિરૂપ શબ્દને પ્રકાશિત કરે છે. જેમ નિશ્ચિત રંગ, માપ અને આકારના એક મુખને પણ મણિ, તલવાર, અને દર્પણમાં પડતાં પ્રતિબિમ્બો જુદા રંગનું, જુદા માપનું, અને જુદા આકારનું હોય એમ દર્શાવે છે. સમાન ઉપાધિભેદથી કલ્પિત ભાગો જ ભાગવગરના શબ્દમાં વર્ણોરૂપે જણાય છે. તેથી વર્ણોની દૃષ્ટિએ શબ્દમાં ભેદ જણાતો હોવા છતાં, એના વિષેની બુદ્ધિ, ભેદવગરના અને ભાગોવગરના પદ સ્ફોટને, ભેદવાળો અને વિભાગોવાળો હોય એમ દર્શાવે છે. તેથી "ગૌઃ" શબ્દ સ્ફોટના ભાગરૂપ ગકાર, "ગૌર" વગેરે પદસ્ફોટની સમાનતાવાળો બનતો નથી, પણ પોતાના સહકારી ઓકારથી વિશિષ્ટ જ નિશ્ચિત થાય છે. એ રીતે ઓકાર પણ "શોચિ" શબ્દના ભાગરૂપ ઓકારની સમાનતાવાળો હોવા છતાં, એના ભાગરૂપે નિશ્ચિત થતો નથી, પણ ગકારથી વિશિષ્ટ એવા ગોપદસ્ફોટના ભાગરૂપે નિશ્ચિત થાય છે. સહભાવી

ન હોય એવાઓનો પણ સહભાવ સંસ્કારવડે થતો હોવાથી વિશેષણ-વિશેષ્યભાવ પણ યોગ્ય સિદ્ધ થાય છે. બે ભાગના વિષયવાળા સંસ્કારોત્પિન્ન વિષયવાળા બનતા નથી, કારણ કે અનુભવો અને એનાથી ઉત્પન્ન થયેલા સંસ્કારો એક શબ્દને વિષય કરે છે. ફક્ત ભાગોના અનુભવથી શબ્દ અવ્યક્ત હોય એવો જણાય છે. પણ ભાગોના અનુભવ થી ઉત્પન્ન થયેલા સંસ્કારોના સંગઠિત સ્વરૂપને બુદ્ધિ એકરૂપે ગ્રહણ કરે ત્યારે શબ્દ વ્યક્તરૂપવાળો બને છે, એટલી વિશેષતા છે. પહેલાંના અવ્યક્ત અનુભવો ક્રમશઃ સંસ્કારો ઉત્પન્ન કરીને વ્યક્ત અનુભવ પ્રગટ કરતા જોવામાં આવે છે, જેમ દૂરથી હાથી જેવું દેખાતું અવ્યક્ત ઝાડ, એ અવ્યક્ત સંસ્કારને કારણે જ પાછળથી વૃક્ષના જ્ઞાનને ઉત્પન્ન કરે છે. આવી પ્રક્રિયા વર્ણો પદાર્થજ્ઞાન કરાવે એમાં સંભવિત નથી. વર્ણો પ્રત્યેકરૂપે અવ્યક્ત પદાર્થજ્ઞાન ઉત્પન્ન કરીને, છેવટે એને વ્યક્ત જ્ઞાન બનાવે છે એમ કહી શકાય નહીં. વ્યક્તપણું અને અવ્યક્તપણું પ્રત્યક્ષ જ્ઞાનમાં જ થાય એવો નિયમ છે. વર્ણોથી ઉત્પન્ન થતું પદાર્થજ્ઞાન પ્રત્યક્ષ નથી. તેથી વર્ણોથી પદાર્થ જ્ઞાન થાય તો સ્પષ્ટ જ થાય અથવા ન થાય, અસ્પષ્ટ ન થાય. ધ્વનિથી વ્યક્ત થતો પદસ્ફોટ તો પ્રત્યક્ષ છે, તેથી એમાં સ્પષ્ટતા અને અસ્પષ્ટતા કલ્પી શકાય છે, એમ એ બે અસમાન છે.

આમ પ્રત્યેક વર્ણના અનુભવથી ઉત્પન્ન થયેલ સંસ્કાર સાથે, સાંભળવાના કારણે ઉત્પન્ન થયેલી સંગઠિત બુદ્ધિમાં એકઠા થયેલા વર્ણો એક પદસ્ફોટ સ્વરૂપને પ્રાપ્ત થઈને પદાર્થજ્ઞાન પ્રગટ કરે છે. આ સ્ફોટ વિશેષ પ્રકારના પ્રયત્નથી વ્યક્ત થાય છે. અને વિશેષ પ્રયત્ન નિશ્ચિત ક્રમની અપેક્ષા રાખે છે. તેથી ક્રમ બદલાઈ જાય તો એને વ્યક્ત કરનાર વિશેષ પ્રયત્નનો અભાવ થાય, અને તેથી અભિવ્યક્તિનો અભાવ થાય, આવો પ્રસંગ ઉપસ્થિત થાય. માટે વર્ણો નિશ્ચિત ક્રમના અનુરોધથી અને અર્થસંકેતશક્તિયુક્ત બનીને, સંકેત પ્રમાણે જ લૌકિક વિભાગોવાળા પદસ્ફોટને પ્રગટ કરે છે. આટલી સંખ્યાવાળા વર્ણો એટલે કે બે, ત્રણ, ચાર, પાંચ વર્ણો, સર્વ પદાર્થોને કહેવાની શક્તિથી સંપન્ન એવા ગકાર, ઔકાર અને વિસર્ગ, ગળામાં લટકતી ચામડી, આંચળ વગેરે વાળા પ્રાણીરૂપ અર્થને પ્રગટ કરે છે.

તો સંકેત અનુસાર વર્ણો જ વાચક છે. શબ્દ નામનો કોઈ એક વાચક નથી ? આના જવાબમાં "તદેતેષામ્..." વગેરેથી કહે છે કે ધ્વનિક્રમનો જેમાં ઉપસંહાર થાય છે, એવી બુદ્ધિમાં પ્રગટ થતો એકરૂપ જણાતો શબ્દ વાચક છે. ધ્વનિનિમિત્તથી થતો ક્રમ ધ્વનિક્રમ છે. એ ધ્વનિક્રમનો જેમાં ઉપસંહાર થાય છે, એવી બુદ્ધિ વડે પ્રકાશિત થતા સંકેત શક્તિવાળા, સ્થૂલદર્શી લોકો સમજી શકે એ માટે, ગકાર, ઔકાર અને વિસર્ગ ગાય એવા અર્થને પ્રગટ કરે છે. કારણ કે

ગકાર વગેરે પણ શબ્દના ભાગ તરીકે, તાદાત્મ્યને લીધે વાચક બને છે. પરંતુ પ્રતીતિ અનુસાર એક શબ્દ જ વાચક છે. "તદેકં પદમ્" વગેરેથી આજ વાત સ્પષ્ટ કરતાં કહે છે કે લોકબુદ્ધિ અનુસાર એક પદ વાચક જણાય છે. એક કેમ ? "એકબુદ્ધિવિષયમ્" ગાય એવો એક શબ્દ એક આકારવાળી બુદ્ધિનો વિષય બને છે, માટે એક છે. "એક પ્રયત્નાક્ષિપ્તમ્"થી એનો વ્યંજક કહે છે. "રસ" પદના વ્યંજક પ્રયત્નથી જુદો "સર" પદનો વ્યંજક પ્રયત્ન હોય છે. એ પ્રયત્ન શરૂઆતથી "સર" એવા એકમવાળા પદને પ્રગટ કરવાના ફળરૂપ પૂર્વાપર મળીને એક છે. એનાથી આક્ષિપ્ત સમાન ઉપાધિ ભેદથી કલ્પિત, હકીકતમાં અસ્તિત્વ ન ધરાવતા ભાગોને કારણે પદ ભાગવિનાનું છે. અને પૂર્વાપર ભાગોના અભાવે, ક્રમ વિનાનું છે.

પણ વર્ણો એના પૂર્વાપર ભાગો છે, તો પદ ક્રમ અને ભાગ વિનાનું કેવી રીતે કહેવાય ? જવાબમાં "અવર્ણમ્" વગેરેથી કહે છે કે વર્ણો શબ્દના ભાગ નથી, પણ સાદશ્યની ઉપાધિના ભેદથી તે તે સાચી રીતે હાજર રહેતા આકારોથી પદ જ પ્રગટ થાય છે. મણિ, કૃપાણ અને દર્પણમાં જણાતાં મુખો, સાચી હયાતિવાળા મુખના અવયવો બનતા નથી. વર્ણોને એકાકારે સંગઠિત કરતી બુદ્ધિમાં પૂર્વના વર્ણોના અનુભવથી ઉત્પન્ન થયેલા સંસ્કારો સાથે અન્તિમ વર્ણના જ્ઞાનના વ્યાપારથી થયેલો સંસ્કાર પદને ઉપસ્થિત કરે છે. વર્ણોનો અનુભવ અને એના સંસ્કારો પદવિષયક છે, એ વાત આગળ સ્પષ્ટ કરી છે.

ભલે. પણ પદ ભાગ, ક્રમ અને વર્ણ વિનાનું હોય, તો ક્યારે પણ એવું જણાતું કેમ નથી ? સ્ફટિક લાખના રસની ઉપાધિથી લાલ જણાય, પણ એને દૂર કરતાં એ પહેલાંના જેવો સ્વચ્છ ન જણાય એમ બનતું નથી. માટે વર્ણો સાચી રીતે હયાત છે. આના જવાબમાં "પરત્ર..." વગેરેથી કહે છે કે બીજાને જ્ઞાન આપવા માટે ઉચ્ચારાતી અને સાંભળનારાઓ વડે સંભળાતી વાણીનો અનાદિકાળથી ચાલ્યો આવતો વ્યવહાર વિભક્ત એવા વર્ણો અને શબ્દોના આશ્રયે થાય છે, અને એનાથી ઉત્પન્ન થયેલી વાસના પણ અનાદિ છે. એ વાસનાથી વાસિત લોકબુદ્ધિ વડે વડીલોના સંવાદોથી વિભક્ત વર્ણોવડે રચાયેલા શબ્દોવાળી વાણી જાણે કે પરમાર્થ સત્યની જેમ સિદ્ધ હોય એવી જણાય છે, આશય એ છે કે લાખ વગેરેની જેમ ઉપાધિ ઉપહિતપદાર્થ સાથે જોડાય છે, અને છૂટો પડે છે. એના વિયોગથી સ્ફટિક મણિ પોતાના સ્વાભાવિક સ્વચ્છ, સફેદ રૂપમાં પ્રકાશે એ યોગ્ય છે. પણ શબ્દજ્ઞાન તો પ્રયત્ન ભેદથી થયેલા ધ્વનિભેદથી અન્ય રીતે ઉત્પન્ન થાય એવું નથી, તેથી સાદશ્યના દોષથી દૂષિત વર્ણોરૂપે જ શાબ્દજ્ઞાન ઉત્પન્ન થતું હોવાથી, ઉપાધિ વગરના શબ્દની હયાતિ કેવી રીતે સંભવે ? કહ્યું છે :-

"એકસરખા સ્વરૂપવાળા ધ્વનિઓ વિપર્યાસ (વિપરીત સમજ) ના હેતુ છે. એમને સત્ય તરીકે સ્વીકારવા એ વિપર્યાસનું કારણ છે. શબ્દસ્વરૂપના તત્ત્વને જાણનારા કહે છે કે શબ્દ પોતાની ઉત્પત્તિના ઉપાય (કારણ) રૂપ ધ્વનિઓ સાથે સંકળાયેલો છે. જ્ઞાનના માર્ગમાં આ બાધા (વિઘ્ન) છે, જે લોકમાં ઉપદ્રવ કરનારી છે."

શબ્દનો આત્મા (શબ્દસ્ફોટતત્ત્વ) જુદા જુદા વર્ણોથી રંગાઈને પ્રગટ થાય છે. તેથી સ્થૂલદર્શી લોકો વર્ણોને શબ્દ માને છે, અને એમના જુદા જુદા પ્રકારો (સંયોજનો)ને વિભિન્ન અર્થો પ્રગટ કરનાર તરીકે સંકતેવાળા બનાવે છે, એવું "तस्य संकेतबुद्धितः प्रविभागः" થી કહે છે. પદતત્ત્વને ન જાણતા સ્થૂલદર્શી લોકોના હિત માટે, એક પદનું વર્ણોરૂપે વિભાજન કરે છે. "એતાવતામ્" વગેરેથી વિભાગસ્વરૂપ વિષે કહે છે કે આટલા, આનાથી વધારે કે ઓછા નહીં, વર્ણોનો નિરંતર વિશેષ પ્રકારનો ક્રમ એકબુદ્ધિવડે ગ્રહણ કરાય છે, અને ગાય વગેરે અર્થોને કહે છે.

જો આ અર્થનો આ શબ્દ વાચક છે, એમ નિશ્ચિત સંકેત હોય, તો શબ્દ અને અર્થનો પરસ્પર અધ્યાસ નથી. આના જવાબમાં "संकेतस्तु" વગેરેથી કહે છે કે સંકેત સ્મૃતિરૂપ છે. સંકેત નિશ્ચિત કરવામાત્રથી અર્થ પ્રગટ કરતો નથી, પણ સ્મરણ કર્યા પછી અર્થ કહે છે. આશય એ છે કે અભિન્ન આકારવાળા સંકેતમાં, ગમે તેમ, ભેદ કલ્પીને છઠ્ઠી વિભક્તિ પ્રયોજી છે. જે યોગી એમના વિભાગને જાણીને એમાં સંયમ કરે છે, એ સર્વજ્ઞ-સર્વ પ્રાણીઓના અવાજને પરખનાર-બને છે.

આમ એક અને નિરવયવ છતાં વર્ણોના કલ્પિતભેદવાળા શબ્દની ચર્ચા કરીને, એક અને નિરવયવ છતાં કલ્પિત પદવિભાગવાળા વાક્ય (સ્ફોટ) વિષે "सर्वपदेषु चास्ति वाक्यशक्तिः" વગેરેથી ચર્ચા કરે છે. આશય એ છે કે બીજાને જ્ઞાન આપવા માટે શબ્દ પ્રયોજાય છે. અને બીજા જે જાણવા માગે એનું જ પ્રતિપાદન કરાય છે. તેઓ એ જ જાણવા માગે કે જેનું ઉપાદાન વગેરેથી જ્ઞાન થઈ શકે. એકલા શબ્દથી આ કાર્ય થઈ ન શકે, પણ વાક્યથી થઈ શકે છે, માટે બધા શબ્દો વાક્યાર્થપરક છે. તેથી વાક્યાર્થ જ શબ્દાર્થ છે. આ કારણે જ્યાં ફક્ત એક શબ્દનો પ્રયોગ થતો હોય, ત્યાં પણ બીજા શબ્દોના સહકારથી એકીભાવ સિદ્ધ થયા પછી અર્થનું જ્ઞાન થાય છે, એક શબ્દમાત્રથી નહીં. કેમ ? કારણ કે શબ્દનું એવું સામર્થ્ય નથી. વાક્ય બધે વાચક હોય છે, શબ્દો નહીં. પણ જેમ વર્ણો શબ્દના ભાગ તરીકે વાચક ગણાય છે, એમ વાક્યના ભાગ તરીકે શબ્દોમાં પણ વાક્યાર્થ

કહેવાની શક્તિ હોય છે. તેથી એક એક વર્ણ જેમ બધા શબ્દો કહેવાની શક્તિવાળો હોય છે. એમ એક એક શબ્દ પણ બધાં વાક્યોના અર્થને કહેવાની શક્તિથી ખચિત હોય છે. "સર્વપદેષુ ચાસ્તિ વાક્યશક્તિઃ"થી આ જ વાત કહી છે. "વૃક્ષ" એમ કહેતાં "છે" એમ સૂચવાય છે. અધ્યાહારથી પ્રાપ્ત "અસ્તિ" - છે- શબ્દ સાથે "વૃક્ષ" શબ્દ વાક્યાર્થમાં પ્રવર્તે છે કે વાક્યના ભાગ તરીકે આવે છે. "છે"નું સૂચન શાથી થાય છે ? એના જવાબમાં "ન સત્તાં પદાર્થો વ્યભિચરતિ"થી કહે છે કે પદાર્થ સત્તા વગરનો હોઈ શકે નહીં.

લોક (વ્યવહાર) જ શબ્દોના અર્થ નક્કી કરવાનો ઉપાય છે. એ એકલા શબ્દના અર્થને છે એવા અર્થ સાથે સમાસ કરીને (જોડીને) એને વાક્યાર્થ બનાવી દે છે. વસ્તુ અને સત્તાનો આ 'સહભાવ" છે. તેથી શબ્દતત્ત્વવિશેષજ્ઞોનો આવો વ્યવહાર છે કે જ્યાં અન્ય ક્રિયાપદ ન હોય ત્યાં "અસ્તિ", "ભવન્તિ" વગેરે સત્તાવાચક ક્રિયાપદ પ્રયોજવું.

પ્રત્યેક શબ્દ ક્રિયા સહભાવી છે, એમ કહીને, પ્રત્યેક ક્રિયા કારક સહભાવી છે, એમ "તથા ચ પચતીત્યુક્તે..." વગેરેથી કહે છે. "પચતિ"- રાંધે છે- કહેવાથી એની સાથે અન્વય થઈ શકે એવાં બધાં કારકોનું સૂચન થાય છે, તેથી બિનજરૂરી કારકો બાદ કરવા માટે બીજા શબ્દો પ્રયોજી વાક્ય બનાવવામાં આવે છે. આમ ભેદ જ વાક્યાર્થ છે. બિનજરૂરી પદ પણ વાક્યાર્થમાં રહેલું જોવા મળે છે. તેથી "દૃષ્ટં ચ વાક્યાર્થે પદરચનમ્" વગેરેથી કહે છે કે શબ્દોમાં અવશ્ય વાક્યશક્તિ રહેલી છે. આમ છતાં, શ્રોત્રિય વગેરે શબ્દ સ્વતંત્રપણે અર્થજ્ઞાન કરાવતા નથી, જ્યાં સુધી "અસ્તિ" વગેરે પદો સાથે એમનો સમાસ ન થાય. એ પણ વાક્યનો અવયવ હોવાથી કલ્પિત છે, એવો ભાવ છે.

ભલે. પણ શબ્દોમાં જ વાક્યશક્તિ હોય, તો વાક્યની શી જરૂર છે ? કારણ કે શબ્દથી જ વાક્યાર્થજ્ઞાન થઈ શકે. એના જવાબમાં "તત્ર વાક્યે પદપદાર્થાભિવ્યક્તિઃ" વગેરેથી કહે છે કે અગાઉ જણાવ્યું એમ બીજા સાથે જોડાયાવિના એકલા શબ્દથી જાણવા ઇચ્છેલા પદાર્થનું જ્ઞાન થતું નથી. માટે વાક્યમાંથી કલ્પિત પદોને છૂટાં પાડીને, વાક્યના એકદેશ જેવો શબ્દ કારકવાચક કે ક્રિયાવાચક છે, એ એના પ્રકૃતિ-પ્રત્યયનો વિભાગ કરીને વ્યાકરણની રીતે સમજવું જોઈએ. શા માટે આટલું કષ્ટ ઉઠાવીને એ રીતે સમજવું જોઈએ ? એના જવાબમાં "અન્યથા ભવતિ અશ્વઃ અજાપયઃ" વગેરેથી કહે છે કે "ઘટઃ ભવતિ" "ભવતિ ભિક્ષાં દેહિ", "ભવતિ તિષ્ઠતિ" વગેરેમાં નામ અને આખ્યાત (સંજ્ઞા અને ક્રિયાપદ)માં સમાનતા હોવાથી અર્થમાં ગૂંચવણ થશે. એ રીતે "ત્વં અશ્વઃ" (તેં શ્વાસ લીધો) અને "અશ્વઃ યાતિ" (ઘોડો જાય છે) તેમજ "અજાપયઃ પિબ"

(બકરીનું દૂધ પી), અને "अजापयः शत्रून्" (શત્રુઓને જીત) વગેરેમાં નામ અને આખ્યાતનાં રૂપોમાં સામ્ય હોવાથી, વ્યાકરણની રીતે અન્વાખ્યાન ન કર્યું હોય તો નામ-સંજ્ઞા છે કે આખ્યાત-ક્રિયાપદ છે એ સમજી ન શકવાથી વાક્યમાં એનો કારક તરીકે કે ક્રિયાપદ તરીકે ઉપયોગ કેવી રીતે કરી શકાય ? માટે વાક્યમાંથી પદ છૂટાં પાડીને વ્યાખ્યા કરવી જોઈએ. વ્યાખ્યા માટે છૂટાં પાડવામાત્રથી પદોનો વિભાગ સાચો બની જતો નથી. આમ શબ્દસ્વરૂપની ચર્ચા કરીને, સંકેતને લીધે મિશ્રિત બનેલા શબ્દ, વસ્તુ અને જ્ઞાનને અમિશ્રિત ભાવે સમજાવવા માટે "तेषां शब्दार्थ-प्रत्ययानां प्रविभागः" વગેરેથી કહે છે કે "श्वेतते प्रासादः"માં श्वेतते ક્રિયાપદ છે. અહીં પૂર્વાપર એવી ક્રિયા જે સાધ્યરૂપ છે, એને માટે સિદ્ધરૂપ "श्वेतते" એ ભિન્ન ક્રિયાપદ છે. જ્યાં શબ્દ અને અર્થ સિદ્ધરૂપ હોય, ત્યાં પણ શબ્દનો ભેદ હોય છે. માટે "श्वेतः प्रासादः ईति कारकार्थ :" વગેરેથી કહે છે કે "સફેદ મહેલ"માં એ શબ્દ કારક માટે વપરાયો છે. અભિહિત હોવાથી કારકવિભક્તિનો અભાવ છે. અર્થનો વિભાગ કરતાં કહે છે કે એનો અર્થ ક્રિયાકારકરૂપ છે. એ બે શબ્દ અને અર્થનો આત્મા ક્રિયાત્મા અને કારકાત્મા છે. "प्रत्ययश्च"થી પ્રત્યય (જ્ઞાન)નું વિભાજન કરે છે. "च" શબ્દથી "तदर्थ" પદ આગળથી આકર્ષવામાં આવે છે. તેથી અન્યપદાર્થપ્રધાનતા બાધિત થાય છે. એ જ ક્રિયા અને કારકનો આત્મા અર્થ છે જેનો એવો પદાર્થ, એવી સ્પષ્ટતા થાય છે.

શબ્દ, વસ્તુ અને જ્ઞાનના મિશ્રણથી એ ત્રણે અભિન્ન જણાય છે, તો એમનો વિભાગ કેવી રીતે થઈ શકે ? એવી આશંકાથી "कस्मात्" એમ પ્રશ્ન પૂછે છે. જવાબમાં "सोयमित्यभिसंबंधात्" વગેરેથી કહે છે કે સંકેતના સંબંધથી તે આ જ છે એવું એકાકાર જ્ઞાન થાય છે. સંકેતરૂપ ઉપાધિ જ એકાકાર જ્ઞાન છે, એ તાત્ત્વિક નથી. સંકેત શબ્દમાં સાતમીના પ્રયોગથી એનું નિમિત્તપણું દર્શાવ્યું.

"यस्तु श्वेतोर्थः..." વગેરેથી પરમાર્થ-તાત્ત્વિક-વાત કહે છે. નવીન, પ્રાચીન વગેરે અવસ્થાઓ છે. શબ્દ અને જ્ઞાનના આલંબનરૂપે રહેલો શ્વેત પદાર્થ પોતાની નવી-જૂની અવસ્થાઓમાં વિકાર પામે છે, અને એ શબ્દસાથે કે જ્ઞાનસાથે રહેતો નથી, એટલે કે મિશ્રિત થતો નથી. આવા એ ત્રણેના વિભાગમાં સંયમ કરવાથી યોગીને પશુ, મૃગ, સાપ વગેરે બધાં પ્રાણીઓના અવાજો- એમાં પણ અસ્પષ્ટ શબ્દ, અર્થ અને જ્ઞાન હોય છે- એ બધાનું જ્ઞાન થાય છે. મનુષ્યોનાં વચન, વાચ્ય અને જ્ઞાનમાં કરેલો સંયમ, સમાનજાતિવાળાં પ્રાણીઓનાં વચન, વાચ્ય, જ્ઞાનમાં પણ કર્યો ગણાય, તેથી એના અર્થભેદ અને જ્ઞાનભેદને યોગી જાણી શકે છે, એમ સિદ્ધ થયું. ૧૭

★

संस्कारसाक्षात्करणात्पूर्वजातिज्ञानम् ॥१८॥

સંસ્કારોનો સાક્ષાત્કાર કરવાથી પૂર્વજન્મનું જ્ઞાન થાય છે. ૧૮

ભાષ્ય

द्वये खल्वमी संस्काराः स्मृतिक्लेशहेतवो वासनारूपा, विपाकहेतवो धर्माधर्मरूपाः । ते पूर्वभवाभिसंस्कृताः परिणामचेष्टानिरोधशक्ति-जीवनधर्मवदपरिदृष्टाश्चित्तधर्माः । तेषु संयमः संस्कारसाक्षातक्रियायै समर्थः । न च देशकालनिमित्तानुभवैर्विना तेषामस्ति साक्षात्करणं, तदित्थं संस्कारसाक्षात्करणात्पूर्वजातिज्ञानमुत्पद्यते योगिनः । परत्राप्येवमेव संस्कारसाक्षात्करणात्परजातिसंवेदनम् ।

अत्रेदमाख्यानं श्रूयते-भगवतो जैगीषव्यस्य संस्कार-साक्षात्करणाद्दशसु महासर्गेषु जन्मपरिणामक्रममनुपश्यतो विवेकजं ज्ञानं प्रादुरभवत् । अथ भगवानावट्यस्तनुधरस्तमुवाच-दशसु महासर्गेषु भव्यत्वादनभिभूतबुद्धिसत्त्वेन त्वया नरकतिर्यग्गर्भसंभवं दुःखं संपश्यता देवमनुष्येषु पुनःपुनरुत्पद्यमानेन सुखदुःखयोः किमधिकमुपलब्धमिति ? भगवन्तमावट्यं जैगीषव्य उवाच-दशसु महासर्गेषु भव्यत्वादनभिभूत-बुद्धिसत्त्वेन मया नरकतिर्यग्भवं दुःखं संपश्यता देवमनुष्येषु पुनः-पुनरुत्पद्यमानेन यत्किञ्चिदनुभूतं तत्सर्वं दुःखमेव प्रत्यवैमि । भगवानावट्य उवाच-यदिदमायुष्मतः प्रधानवशित्वमनुत्तमं च सन्तोषसुखं किमिदमपि दुःखपक्षे निक्षिप्तमिति ? भगवाञ्जैगीषव्य उवाच-विषयसुखापेक्षयैवेदमनुत्तमं सन्तोषसुखमुक्तम्, कैवल्यसुखापेक्षया दुःखमेव । बुद्धिसत्त्वस्यायं धर्मस्त्रिगुणाः, त्रिगुणश्च प्रत्ययो हेयपक्षे न्यस्त इति । दुःखस्वरूपस्तृष्णा-तन्तुः, तृष्णादुःखसंतापापगमात्तु प्रसन्नमबाधं सर्वानुकूलं सुखमिदमुक्तमिति ॥१८॥

સંસ્કારો બે પ્રકારના છે : સ્મૃતિ અને ક્લેશના હેતુરૂપ તેમજ કર્મ વિપાકના હેતુ ધર્માધર્મરૂપ. તેઓ પૂર્વજન્મમાં પોતાના કારણોથી ઉત્પન્ન થયેલા અને પરિણામ, ચેષ્ટા, નિરોધ, શક્તિ અને જીવનની જેમ અપરિદૃષ્ટ ચિત્તધર્મો છે. એમાં સંયમ સંસ્કારોનો સાક્ષાત્કાર કરાવવામાં સમર્થ છે. અને

દેશ, કાળ તેમજ નિમિત્તના અનુભવ (જ્ઞાન) વિના એમનો સાક્ષાત્કાર થાય નહીં. તેથી યોગીને દેશ, કાળ વગેરે સાથે સંસ્કારોના સાક્ષાત્કારથી પૂર્વ-જન્મનું જ્ઞાન થાય છે. અન્યના સંસ્કારો પર સંયમ કરવાથી એના પૂર્વજન્મનું જ્ઞાન પણ થાય છે.

આ વિષયમાં એક આખ્યાન સાંભળવામાં આવે છે. ભગવાન્ જૈગિષવ્ય ઋષિને સંસ્કારસાક્ષાત્કારથી દસ મહાસર્ગોમાં જન્મોના પરિણામક્રમને જોતાં વિવેકજન્ય જ્ઞાન ઉત્પન્ન થયું. એક (યોગથી દિવ્ય) શરીરધારી ભગવાન આવટ્યે એમને પૂછ્યું : "દસ મહાસર્ગોમાં ભવ્યપણાને કારણે અજ્ઞાનથી ન ઘેરાયેલા બુદ્ધિસત્ત્વથી આપે નરક અને પશુશરીરોથી ઉત્પન્ન થયેલાં દુઃખ જોયાં છે, અને દેવ, મનુષ્ય રૂપોમાં વારંવાર ઉત્પન્ન થયા હોવાથી સુખ પણ જોયાં છે. તો સુખદુઃખ એ બેમાંથી વધારે કયું પ્રાપ્ત થયું ?" ભગવાન આવટ્યને જૈગિષવ્યે કહ્યું "દસ મહાસર્ગોમાં હાજર રહેવાના કારણે અને અજ્ઞાનથી ન ઘેરાયેલા બુદ્ધિસત્ત્વને લીધે મેં નરક અને તિર્યક્ યોનિઓનાં દુઃખ જોયાં છે, અને દેવો તેમજ મનુષ્યોમાં વારંવાર ઉત્પન્ન થઈને જે કાંઈ અનુભવ્યું છે, એ બધું દુઃખ જ છે, એમ માનું છું." ભગવાન આવટ્યે ફરીથી પૂછ્યું : "આપનું હાલનું પ્રકૃતિને વશમાં રાખવાનું સામર્થ્ય અને સર્વોત્તમ સંતોષ સુખ છે, એને પણ આપ દુઃખના પક્ષમાં ગણો છો ?" ભગવાન જૈગિષવ્યે જવાબ આપ્યો : "વિષયસુખોની તુલનામાં જ આ સંતોષ-સુખને અનુત્તમ કહ્યું છે. પણ કૈવલ્યસુખની અપેક્ષાએ એ દુઃખ જ છે. બુદ્ધિસત્ત્વનો આ ધર્મ ત્રિગુણાત્મક છે, અને ત્રિગુણાત્મક અનુભવો હેય (ત્યાજ્ય) પક્ષમાં રહેલા છે. તૃષ્ણાતંતુ દુઃખરૂપ છે. તૃષ્ણાજન્ય દુઃખો અને સંતાપો દૂર થતાં પ્રાપ્ત થતું પ્રસન્ન, નિર્બાધ, સૌને અનુકૂળ કૈવલ્ય સુખ કહ્યું છે. ૧૮

तत्त्व वैशारदी

संस्कारसाक्षात्करणात्पूर्वजातिज्ञानम् । ज्ञानजा हि संस्काराः स्मृतेर्हेतवः । अविद्यादिसंस्कारा अविद्यादीनां क्लेशानां हेतवः । विपाको जात्यायुर्भोगरूपः । तस्य हेतवो धर्माधर्मरूपाः । पूर्वेषु भवेष्यभिसंस्कृता निष्पादिताः स्वकारणैर्यथासंस्कृतं व्यञ्जनं कृतमिति गम्यते । परिणामचेष्टानिरोधशक्तिजीवनान्येव धर्माश्चित्तस्य, तद्वदपरिदृष्टाश्चित्तधर्माः । तेषु श्रुतेष्वनुमितेषु सपरिकरेषु संयमः संस्काराणां द्वयेषां

साक्षात्क्रियायै समर्थः । अस्तु तत्र संयमात्तत्साक्षात्कारः, पूर्वजातिसाक्षात्कारस्तु कुत इत्यत आह- न च देशेति । निमित्तं पूर्वशरीरमिन्द्रियादि च । सानुबन्धसंस्कारसाक्षात्कार एव नान्तरीयकतया जात्यादिसाक्षात्कारमाक्षिपतीत्यर्थः । स्वसंस्कारसंयमं परकीयेष्वति-दिशति परत्राप्येवमिति ।

अत्र श्रद्धोत्पादेहेतुमनुभवत आवट्यस्य जैगीषव्येण संवादमुपन्यस्यति अत्रेदमाख्यानं श्रूयत इति । महाकल्पो महासर्गः । तनुधर इति निर्माणकायसंपदुक्ता। भव्यः शोभनो विगलितरजस्तमोमल इत्यर्थः । प्रधानवशित्वमैश्वर्यम् । तेन हि प्रधानं विक्षोभ्य यस्मै यादृशीं कायेन्द्रियसंपदं दित्सति तस्मै तादृशीं दत्ते । स्वकीयानि च कायेन्द्रियसहस्राणि निर्मायान्तरिक्षे दिवि भुवि च यथेच्छं विहरतीति । संतोषो हि तृष्णाक्षयो बुद्धिसत्त्वस्य प्रशान्तता धर्मः ॥१८॥

જ્ઞાનથી ઉત્પન્ન થયેલા સંસ્કારો સ્મૃતિના હેતુ છે. અવિદ્યા વગેરેના સંસ્કારો અવિદ્યાદિ ક્લેશોના હેતુ છે. વિપાક એટલે, જન્મ, આયુષ્ય અને ભોગ. ધર્માધર્મ એના હેતુ છે. પૂર્વજન્મમાં ઉત્પન્ન થયેલા એટલે પોતાનાં કારણોથી સંસ્કારોને અનુરૂપ પ્રગટ થયા હશે એમ જાણી શકાય છે. પરિણામ, ચેષ્ટા, નિરોધ, શક્તિ અને જીવનની જેમ એ પણ ચિત્તના ન દેખાય એવા ધર્મો છે. સાંભળેલા, અનુમાનથી જાણેલા, અને પોતાનાં કારણોવાળા સંસ્કારોમાં કરેલો સંયમ, આ બંને પ્રકારના સંસ્કારોનો સાક્ષાત્કાર કરાવવા માટે સમર્થ છે.

ભલે. એમાં સંયમ કરવાથી એનો સાક્ષાત્કાર તો થઈ શકે, પણ પૂર્વ જન્મનો સાક્ષાત્કાર કેવી રીતે થઈ શકે ? જવાબમાં "ન ચ દેશકાલ" વગેરેથી કહે છે કે પહેલાંનું શરીર અને ઇન્દ્રિયો નિમિત્ત છે. સંબંધિત નિમિત્તો સાથે સંસ્કારોનો સાક્ષાત્કાર, કશા વ્યવધાનવિના જન્મ વગેરેના સાક્ષાત્કારને સૂચવે છે. "પરત્રાપ્યેવમેવ.." વગેરેથી સંસ્કારોપર સંયમને અન્યમાં તબદીલ કરે છે.

"અત્રેદમાખ્યાનં શ્રૂયતે" વગેરેથી આ વિષે શ્રદ્ધા ઉત્પન્ન કરવા માટે સ્વાનુભવથી જાણનાર જૈગિષવ્ય સાથે આવટ્ય મુનિનો સંવાદ રજૂ કરે છે. મહાસર્ગ એટલે મહાકલ્પ. તનુધરથી યોગવડે નિર્માણકાય ઉત્પન્ન કરવાનું ઐશ્વર્ય કહ્યું. ભવ્ય એટલે શુભ, રજસ્, તમસ્ વિનાનું બુદ્ધિસત્ત્વ એવો અર્થ છે. પ્રધાનવશિત્વ ઐશ્વર્ય છે. એનાથી પ્રકૃતિમાં ક્ષોભ ઉત્પન્ન કરી, જેને જે પ્રકારની શરીરેન્દ્રિય સંપત્તિ આપવા ઇચ્છે, એને આપી શકે છે. પોતે હજારો શરીરો, ઇન્દ્રિયોનું નિર્માણ કરીને, દ્યુલોકમાં અને પૃથ્વીપર યથેચ્છ વિહરી શકે છે. સંતોષ એટલે તૃષ્ણાક્ષયથી ઉત્પન્ન થતો બુદ્ધિસત્ત્વનો શાંતિરૂપ ધર્મ. ૧૮

★

प्रत्ययस्य परचित्तज्ञानम् ॥१९॥

પ્રત્યય (જ્ઞાન) પર સંયમ કરવાથી અન્યના ચિત્તનું જ્ઞાન થાય છે. ૧૯

ભાષ્ય

प्रत्यये संयमात्प्रत्ययस्य साक्षात्करणात्ततः परचित्तज्ञानम् ॥१९॥

પ્રત્યયપરના સંયમથી પ્રત્યયનો સાક્ષાત્કાર થતાં, એનાથી બીજાના ચિત્તનું જ્ઞાન થાય છે. ૧૯

तत्त्व वैशारदी

प्रत्ययस्य परचित्तज्ञानम् । परप्रत्ययस्य चित्तमात्रस्य साक्षात्करणादिति ॥१९॥

અન્યના પ્રત્યય કે ચિત્તમાત્રના સાક્ષાત્કારથી એનું જ્ઞાન થાય છે. ૧૯

★

न च तत्सालम्बनं तस्याविषयीभूतत्वात् ॥२०॥

એ જ્ઞાન સાલંબન નથી, કારણ કે એ એનો વિષય નથી. ૨૦

ભાષ્ય

रक्तं प्रत्ययं जानात्यमुष्मिन्नालम्बने रक्तमिति न जानाति । परप्रत्ययस्य यदालम्बनं तद्योगिचित्तेन नालम्बनीकृतम् । परप्रत्ययमात्रं तु योगिचित्तस्यालम्बनीभूतमिति ॥२०॥

અન્યનો પ્રત્યય રાગવાળો છે એમ જાણે છે, અમુક આલંબનમાં રાગવાળો છે, એમ જાણતો નથી. અન્યના પ્રત્યયનું જે આલંબન છે, એ યોગીના ચિત્તનું આલંબન નથી. અન્યનો પ્રત્યયમાત્ર યોગીના ચિત્તનું આલંબન બને છે. ૨૦

तत्त्व वैशारदी

यथा संस्कारसाक्षात्कारस्तदनुबन्धपूर्वजन्मसाक्षात्कारमाक्षिपत्येवं परचित्त-साक्षात्कारोऽपि तदालम्बनसाक्षात्कारमाक्षिपेदिति प्राप्त आह- न च तत्सालम्बनं तस्याविषयीभूतत्वात् । सानुबन्धसंस्कारविषयोऽसौ संयमः । अयं तु परचित्तमात्रविषय इत्यभिप्रायः ॥२०॥

સંસ્કારના સાક્ષાત્કારથી એનાથી સંબંધિત પૂર્વજન્મનો સાક્ષાત્કાર પણ થાય છે, એમ બીજાના ચિત્તના સાક્ષાત્કારથી એના આલંબનનો સાક્ષાત્કાર થતો હશે, એવી આશંકાથી કહે છે : પરચિતજ્ઞાન આલંબન સાથે થતું નથી, કારણ કે એ એનો વિષય નથી. સંયમ સંબંધિત બાબતોના સંસ્કારને વિષય બનાવે છે. આ તો ફક્ત પરચિત્ત વિષયક છે, એવો અભિપ્રાય છે. ૨૦

★

कायरूपसंयमात्तद्ग्राह्यशक्तिस्तम्भे चक्षुःप्रकाशा-संप्रयोगेऽन्तर्धानम् ॥२१॥

શરીરના રૂપપર સંયમ કરવાથી, રૂપની ગ્રાહ્યશક્તિ રોકાતાં, આંખ અને પ્રકાશનો સંયોગ ન થતાં અન્તર્ધાન સિદ્ધ થાય છે. ૨૧

ભાષ્ય

कायस्य रूपे संयमाद् रूपस्य या ग्राह्याशक्तिस्तां प्रतिष्टम्भाति । ग्राह्यशक्ति स्तम्भे सति चक्षुःप्रकाशासंप्रयोगेऽन्तर्धानमुत्पद्यते योगिनः । एतेन शब्दाद्यन्तर्धानमुक्तं वेदितव्यम् ॥२१॥

શરીરના રૂપમાં સંયમ કરવાથી રૂપની ગ્રાહ્યશક્તિ રોકાય છે. ગ્રાહ્ય શક્તિ રોકાતાં, આંખ અને પ્રકાશના સંયોગનો અભાવ થતાં યોગી અન્તર્ધાન (અદૃશ્ય) થાય છે. આનાથી શબ્દનું અંતર્ધાન પણ કહેવાઈ ગયેલું જાણવું જોઈએ. ૨૧

तत्ववैशारदी

कायरूपसंयमात्तद्ग्राह्यशक्तिस्तम्भे चक्षुःप्रकाशासंप्रयोगेऽन्तर्धानम् । पञ्चात्मकः कायः । स च रूपवत्तया चाक्षुषो भवति । रूपेण हि कायश्च तद्रूपं च चक्षुर्ग्रहणकर्मशक्तिमनुभवति । तत्र यदा रूपे संयमविशेषो योगिना क्रियते तदा रूपस्य ग्राह्यशक्ती रूपवत्कायप्रत्यक्षताहेतुः स्तम्भ्यते । तस्माद् ग्राह्यशक्तिस्तम्भे सत्य-न्तर्धानं योगिनः । ततः परकीयचक्षुर्जनितेन प्रकाशेन ज्ञानेनासंप्रयोगः चक्षुर्ज्ञानाविषयत्वं योगिनः कायस्येति यावत् । तस्मिन्कर्तव्येऽन्तर्धानं कारणमित्यर्थः । एतेनेति । कायशब्दस्पर्शरसगन्धसंयमात्तद्ग्राह्यशक्तिस्तम्भे श्रोत्रत्वग्रसनघ्राणप्रकाशासंप्रयोगे तदन्तर्धानमिति सूत्रमूहनीयम् ॥२१॥

શરીર પંચાત્મક છે, અને રૂપવાળું હોવાથી ચક્ષુનો વિષય છે. રૂપને

કારણે ચક્ષુ શરીર અને એના રૂપને ગ્રહણ કરવાની શક્તિ અનુભવે છે. એ રૂપમાં યોગી જ્યારે સંયમ કરે છે, ત્યારે રૂપવાળા શરીરને પ્રત્યક્ષ થવામાં હેતુભૂત રૂપની ગ્રાહ્યશક્તિ રોકાય છે. એ રોકાતાં યોગી અદૃશ્ય બને છે. અન્યની આંખમાંથી ઉત્પન્ન થયેલા પ્રકાશરૂપ જ્ઞાનથી સંયોગ થતો નથી. તેથી યોગીનું શરીર ચાક્ષુષ જ્ઞાનનો અવિષય બને છે. એમ થવામાં અંતર્ધાન કારણરૂપ છે. "એતેન" વગેરેથી શરીરની જેમ, શબ્દ, સ્પર્શ, રસ અને ગંધ પર સંયમ કરવાથી, એમની ગ્રાહ્યશક્તિ રોકાતાં, કાન, ત્વચા, જિહ્વા અને નાકના પ્રકાશરૂપ જ્ઞાનનો સંયોગ ન થતાં, એ પણ અન્તર્ધાન થાય છે, એવું પણ સૂત્રથી સૂચિત થયું એમ જાણવું. ૨૧

★

सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरान्त-
ज्ञानमरिष्टेभ्यो वा ॥२२॥

સોપક્રમ અને નિરુપક્રમ કર્મ પર સંયમ કરવાથી કે અરિષ્ટોથી અપરાન્ત (મૃત્યુકાળ)નું જ્ઞાન થાય છે. ૨૨

ભાષ્ય

आयुर्विपाकं कर्म द्विविधम्-सोपक्रमं निरुपक्रमं च । तत्र यथार्द्रं वस्त्रं वितानितं लघीयसा कालेन शुच्येत्तथा सोपक्रमम् । यथा च तदेव संपिण्डितं चिरेण संशुष्येदेवं निरुपक्रमम् । यथा वाग्निः शुष्के कक्षे मुक्तो वातेन समन्ततो युक्तः क्षेपीयसा कालेन दहेत्तथा सोपक्रमम् । यथा वा स एवाग्निस्तृणराशौ क्रमशोऽवयवेषु न्यस्तश्चिरेण दहेत्तथा निरुपक्रमम् । तदैकभविकमायुष्करं कर्म द्विविधम्-सोपक्रमं निरुपक्रमं च । तत्संयमादपरान्तस्य प्रायणस्य ज्ञानम् ।

अरिष्टेभ्यो वेति । त्रिविधमरिष्टमाध्यात्मिकमाधिभौतिकमाधिदैविकं च । तत्राध्यात्मिकं घोषं स्वदेहे पिहितकर्णो न शृणोति, ज्योतिर्वा नेत्रेऽवष्टब्धे न पश्यति । तथाधिभौतिकं यमपुरुषान्पश्यति पितृनतीतानकस्मात्पश्यति । तथाधिदैविकं स्वर्गमकस्मात्सिद्धान्वा पश्यति, विपरीतं वा सर्वमिति । अनेन वा जानात्यपरान्तमुपस्थितमिति ॥२२॥

આયુષ્યરૂપ ફળ આપતું કર્મ સોપક્રમ અને નિરૂપક્રમ એમ બે પ્રકારનું છે. સોપક્રમ કર્મ ફેલાયેલા ભીના વસ્ત્ર જેવું છે, જે થોડા વખતમાં

સુકાય છે. અને નિરુપક્રમ કર્મ એ જ સંકેલેલા ભીના વસ્ત્ર જેવું છે, જેને સુકાતાં વાર લાગે છે. અથવા સૂકા ઘાસની ગંજીમાં મૂકેલો, ચોતરફ પવન સાથે જોડાયેલો અગ્નિ જલ્દી બાળે, અને એ જ અગ્નિ ઘાસની છૂટી છવાઈ સળીઓમાં મૂકેલો હોય તો ઘણા વખત પછી બાળે એવું સોપક્રમ અને નિરુપક્રમ કર્મ છે. એવું એક ભવિક આયુષ્ય નક્કી કરતું કર્મ સોપક્રમ અને નિરુપક્રમ એમ બે પ્રકારનું છે. એમાં સંયમ કરવાથી અપર અન્ત કે પ્રયાણ (મૃત્યુકાળ)નું જ્ઞાન થાય છે.

અથવા અરિષ્ટોથી એવું જ્ઞાન થાય છે. અરિષ્ટ ત્રણ પ્રકારનું છે. આધ્યાત્મિક, આધિભૌતિક અને આધિદૈવિક. એમાં કાનબંધ કરીને પોતાના શરીરમાં ઘોષ ન સાંભળે, અથવા આંખો બંધ કરીને જ્યોતિ ન જુએ, એ આધ્યાત્મિક અરિષ્ટ છે. યમદૂતોને જુએ અથવા અતીત પિતૃઓને અકસ્માત્ જુએ, એ આધિભૌતિક અરિષ્ટ છે. અથવા અકસ્માત્ સ્વર્ગ કે સિદ્ધ પુરુષોને જુએ કે બધું ઊલટું જુએ, એ આધિદૈવિક અરિષ્ટ છે. આ રીતે પોતાના અપર અન્તકાળ(મૃત્યુ)ને આવેલો જાણે છે. ૨૨

तत्त्व वैशारदी

सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरान्तज्ञानमरिष्टेभ्यो वा । आयुर्विपाकं च कर्म द्विविधं सोपक्रमं निरुपक्रमं च । यत्खल्वैकभविकं कर्म जात्यायुर्भोगहेतुस्तदायुर्विपाकम् । तच्च किञ्चित्कालानपेक्षमेव भोगदानाय प्रस्थितं दत्तबहुभोगमल्पावशिष्टफलं प्रवृत्तव्यापारं केवलं तत्फलस्य सहसा भोक्तुमेकेन शरीरेणाशक्यत्वाद् विलम्बते तदिदं सोपक्रमम् । उपक्रमो व्यापारस्तत्सहितमित्यर्थः । तदेव तु दत्तस्तोकफलं तत्कालमपेक्ष्य फलदानाय व्याप्रियमाणं कादाचित्कमन्दव्यापारं निरुपक्रमम् । एतदेव निदर्शनाभ्यां विशदयति - तत्र यथेति । अत्रैवातिवैशद्याय निदर्शनान्तरं दर्शयति-यथा वाग्निरिति । परान्तं महाप्रलयमपेक्ष्यापरान्तो मरणम् । तस्मिन्कर्मणि धर्माधर्मयोः संयमादपरान्तज्ञानम् । ततश्च योगी सोपक्रममात्मनः कर्म विज्ञाय बहून्कायान्निर्माय सहसा फलं भुक्त्वा स्वेच्छया म्रियते ।

प्रासङ्गिकमाह-अरिष्टेभ्यो वा । अरिवत्त्रासयन्तीत्यरिष्टानि त्रिविधानि मरणचिह्नानि । विपरीतं वा सर्वं माहेन्द्रजालादिव्यतिरेकेण ग्रामनगरादि स्वर्गमभिमन्यते, मनुष्यलोकमेव देवलोकमिति ॥२२॥

આયુષ્યરૂપ ફળ આપનારું કર્મ સોપક્રમ અને નિરૂપક્રમ એમ બે પ્રકારનું

છે. જે એકભવિક કર્મ જન્મ, આયુષ્ય અને ભોગનો હેતુ છે, એને આયુષ્યફળવાળું કહે છે. કાળની અપેક્ષા વગર ફળ આપવા માંડ્યું હોય, ઘણો ભોગ આપી દીધો હોય અને શેષ ફળ અલ્પ હોય, એટલે કે જેણે પોતાનો વ્યાપાર શરૂ કરી દીધો હોય, અને ફળ એક શરીરથી જલ્દી ભોગવવું શક્ય ન હોવાથી વિલંબિત થતું હોય, એ કર્મ સોપક્રમ છે. ઉપક્રમ એટલે વ્યાપાર (કાર્ય), એની સાથે રહેલું એવો અર્થ છે. અને જેણે અલ્પ ફળ આપ્યું હોય, તેમજ લાંબા સમયની અપેક્ષાએ ફળ આપવા માટે પ્રવૃત્ત થયું હોય, એટલે કે ક્યારેક ક્યારેક અને મંદ વ્યાપારવાળું હોય એ કર્મ નિરુપક્રમ છે. આ વાત "तत्र यथा" વગેરેથી ભીનું વસ્ત્ર જલ્દી કે ધીમે સુકાય, અને વધુ સ્પષ્ટતા માટે "यथा वाग्निः...' વગેરેથી અગ્નિ ઘાસને જલ્દી કે ધીમે બાળે, એ બે દાખલાઓ આપીને સમજાવે છે. પરાન્ત એટલે પ્રલય. એની અપેક્ષાએ મૃત્યુ અપરાન્તકાળ છે. એને જાણવા માટે યોગી ધર્માધર્મમાં સંયમ કરે છે. યોગી પોતાનાં સોપક્રમ કર્મ જાણીને, ઘણાં શરીરોનું નિર્માણ કરીને, એકી સાથે ફળ ભોગવીને, સ્વેચ્છાથી મરે છે.

પ્રસંગવશાત્ "अरिष्टेभ्यो वा.." વગેરેથી અરિષ્ટો-મરણચિન્હો વિષે કહે છે. અરિ-શત્રુ-ની જેમ ત્રાસ આપનાર હોવાથી અરિષ્ટ કહેવાય છે. એ અરિષ્ટો ત્રણ પ્રકારનાં છે. બધું વિપરીત જુએ એટલે જાદુની અસરથી ગામ-નગર વગેરેને સ્વર્ગ માને, કે મનુષ્ય લોકને દેવલોક માને. ૨૨

★

मैत्र्यादिषु बलानि ॥२३॥

મૈત્રી વગેરેમાં સંયમ કરીને યોગી મૈત્રી વગેરેનું બળ મેળવે છે. ૨૩

ભાષ્ય

मैत्री-करुणा मुदितेति तिस्रो भावनाः । तत्र भूतेषु सुखितेषु मैत्रीं भावयित्वा मैत्रीबलं लभते । दुःखितेषु करुणां भावयित्वा करुणाबलं लभते । पुण्यशीलेषु मुदितां भावयित्वा मुदिताबलं लभते । भावनातः समाधिर्यः स संयमः, ततो बलान्यवन्ध्यवीर्याणि जायन्ते । पापशीलेषूपेक्षा न तु भावना । ततश्च तस्यां नास्ति समाधिरित्यतो न बलमुपेक्षातः, तत्र संयमाभावादिति ॥२३॥

મૈત્રી, કરુણા અને મુદિતા એ ત્રણ ભાવનાઓ છે. સુખી પ્રાણીઓ પ્રત્યે મિત્રતાની ભાવના કેળવીને મૈત્રીબળ મેળવે છે. દુઃખી જીવો પ્રત્યે કરુણાની ભાવના કેળવીને કરુણાબળ મેળવે છે. પુણ્યશીલોને જોઈને આનંદિત થવાથી આનંદનું બળ મળે છે. ભાવનાના બળે સમાધિ થાય એ સંયમ છે. એનાથી એ બળો સફળ થાય છે. પાપીઓ પ્રત્યેની ઉપેક્ષા ભાવના નથી. તેથી એમાં સમાધિ થતો ન હોવાથી ઉપેક્ષાનું બળ ઉત્પન્ન થતું નથી, કારણ કે એમાં સંયમ થઈ શકતો નથી. ૨૩

तत्त्व वैशारदी

मैत्र्यादिषु बलानि । मैत्र्यादिषु संयमान्मैत्र्यादिबलान्यस्य भवन्ति । तत्र मैत्रीभावनातो बलं येन जीवलोकं सुखाकरोति । ततः सर्वहितो भवति । एवं करुणाबलात्प्राणिनो दुःखाद् दुःखहेतोर्वा समुद्धरति । एवं मुदिताबलाज्जीवलोकस्य माध्यस्थ्यमाधत्ते । वक्ष्यमाणौपयिकं भावनाकारणत्वं समाधेराह-भावनातः समाधिर्यः स संयमः । यद्यपि धारणाध्यानसमाधित्रयमेव संयमो न समाधिमात्रं तथापि समाध्यनन्तरं कार्योत्पादात्समाधेः प्राधान्यात्तत्र संयम उपचरितः । क्वचिद्भावना समाधिरिति पाठः । तत्र भावनासमाधी समूहस्य संयमस्यावयवौ हेतू भवतः । वीर्यं प्रयत्नः । तेन मैत्र्यादिबलवतः पुंसः सुखितादिषु परेषां कर्तव्येषु प्रयत्नोऽबन्ध्यो भवतीति । उपेक्षौदासीन्यम् । न तत्र भावना नापि सुखितादिवद्भाव्यं किञ्चिदस्तीति ॥२३॥

મૈત્રી વગેરેમાં સંયમ કરવાથી યોગીને મૈત્રી વગેરેનાં બળ પ્રાપ્ત થાય છે. મૈત્રી ભાવનાથી મળેલા બળથી જીવલોકને સુખ આપે છે. એનાથી સૌનું હિત કરનાર બને છે. એ રીતે કરુણા બળ વડે પ્રાણીઓનો દુઃખોથી કે દુઃખના હેતુઓથી ઉદ્ધાર કરે છે. મુદિતા બળથી જીવલોકમાં મધ્યસ્થતા કરે છે. આગળ કહેવામાં આવનાર વિષયમાં ઉપયોગી હોવાથી ભાવનાથી સમાધિ પણ થાય છે, એમ કહે છે. ભાવનાથી થતા સમાધિને સંયમ કહે છે. જો કે ફક્ત સમાધિને નહીં પણ ધારણા, ધ્યાન અને સમાધિ એ ત્રણને સંયમ કહે છે, છતાં સમાધિ પછી કાર્યરૂપ ફળ ઉત્પન્ન થાય છે, માટે સમાધિ મુખ્ય હોવાથી, ગૌણ દૃષ્ટિએ સમાધિને સંયમ કહે છે. કોઈ ગ્રંથમાં "ભાવના સમાધિઃ" એવો પાઠ છે. એનો અર્થ ભાવના અને સમાધિ રૂપ સમૂહભૂત સંયમના અવયવો હેતુ બને છે, એવો છે.

વીર્ય એટલે પ્રયત્ન. મૈત્રી વગેરેના બળવાળા પુરુષનો અન્યને સુખી-શાન્ત બનાવવાનો પ્રયત્ન સફળ થાય છે. ઉપેક્ષા એટલે ઉદાસીનતા. એની ભાવના

કરી શકાતી નથી, અને બીજાને સુખી કરવા જેવું કાંઈ કરવાનું હોતું નથી. ૨૩

★

बलेषु हस्तिबलादीनि ॥२४॥

(હાથી વગેરેના) બળોમાં સંયમ કરવાથી એમનાં બળ પ્રાપ્ત થાય છે. ૨૪

ભાષ્ય

हस्तिबले संयमाद् हस्तिबलो भवति । वैनतेयबले संयमाद्वैनतेयबलो भवति । वायुबले संयमाद्वायुबलो भवतीत्येवमादि ॥२४॥

હાથીના બળ પર સંયમ કરવાથી હાથી જેવો બળવાન થાય છે. વૈનતેય (ગરુડ)ના બળ પર સંયમ કરવાથી ગરુડ જેવા બળવાળો બને છે. વાયુના બળમાં સંયમ કરવાથી વાયુ જેવા બળવાળો થાય છે, વગેરે જાણવું. ૨૪

तत्त्व वैशारदी

बलेषु हस्तिबलादीनि । यस्य बले संयमस्तस्य बलं लभत इति ॥२४॥

જેના બળમાં સંયમ કરે, એના જેવો બળવાન થાય છે. ૨૪

★

प्रवृत्त्यालोकन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानम् ॥२५॥

(જ્યોતિષ્મતી) પ્રવૃત્તિના પ્રકાશનો ન્યાસ (પ્રયોગ) કરવાથી સૂક્ષ્મ, વ્યવધાનવાળા, અને દૂર રહેલા પદાર્થોનું જ્ઞાન થાય છે. ૨૫

ભાષ્ય

ज्योतिष्मती प्रवृत्तिरुक्ता मनसः (१। ३६) । तस्या य आलोकस्तं योगी सूक्ष्मे वा व्यवहिते वा विप्रकृष्टे वार्थे विन्यस्य तमर्थमधिगच्छति ॥२५॥

અગાઉ ૧.૩૬માં ચિત્તની જ્યોતિષ્મતી પ્રવૃત્તિ કહી છે. એના પ્રકાશનો ઉપયોગ કરીને યોગી સૂક્ષ્મ, આડશવાળા, અને દૂર રહેલા પદાર્થોનું જ્ઞાન મેળવે છે. ૨૫

तत्त्व वैशारदी

प्रवृत्त्यालोकन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानम् । सूक्ष्मे व्यवहिते विप्रकृष्टे वार्थे संयमनं विन्यस्य तमधिगच्छति ॥२५॥

સૂક્ષ્મ, અવરોધવાળા, અને દૂરના પદાર્થો પર સંયમનો ન્યાસ કરી, એમનું જ્ઞાન મેળવે છે. ૨૫

★

भुवनज्ञानं सूर्ये संयमात् ॥२६॥

સૂર્યમાં સંયમ કરવાથી ભુવન(વિશ્વ)નું જ્ઞાન થાય છે. ૨૬

भाष्य

तत्प्रस्तारः सप्तलोकाः । तत्रावीचेः प्रभृति मेरुपृष्ठं यावदित्येवंभूर्लोकः । मेरुपृष्ठादारभ्य ध्रुवाद् ग्रहनक्षत्रताराविचित्रोऽन्तरिक्षलोकः । ततः परः स्वर्लोकः पञ्चविधो, माहेन्द्रस्तृतीयो लोकः । चतुर्थः प्राजापत्यो महर्लोकः । त्रिविधो ब्राह्यः । तद्यथा- जनलोकस्तपोलोकः सत्यलोक इति ।

ब्राह्यस्त्रिभूमिको लोकः प्राजापत्यस्ततो महान् ।
माहेन्द्रश्च स्वरित्युक्तो दिवि तारा भुवि प्रजाः ॥

इति संग्रहश्लोकः ।

तत्रावीचेरुपर्युपरि निविष्टाः षण्महानरकभूमयो घनसलिलानलानिलाकाशतमःप्रतिष्ठा महाकालाम्बरीषरौरवमहारौरवकालसूत्रान्धतामिस्राः । यत्र स्वकर्मोपार्जितदुःखवेदनाः प्राणिनः कष्टमायुर्दीर्घकालमाक्षिप्य जायन्ते । ततो महातलरसातलातलसुतल-वितलतलातलपातालाख्यानि सप्त पातालानि । भूमिरियमष्टमी सप्तद्वीपा वसुमती, यस्याः सुमेरुर्मध्ये पर्वतराजः काञ्चनः । तस्य राजतवैदूर्यस्फटिकहेममणिमयानि शृङ्गाणि । तत्र वैदूर्यप्रभानुरागान्नीलोत्पलपत्रश्यामो नभसो दक्षिणो भागः । श्वेतः पूर्वः । स्वच्छः पश्चिमः । कुरण्डकाभ उत्तरः । दक्षिणपार्श्वे चास्य जम्बूः । यतोऽयं जम्बूद्वीपः । तस्य सूर्यप्रचाराद्रात्रिन्दिवं लग्नमिव विवर्तते । तस्य

नीलश्वेतशृङ्गवन्त उदीचीनास्त्रयः पर्वता द्विसाहस्त्रायामाः । तदन्तरेषु त्रीणि वर्षाणि नवनवयोजनसहस्राणि रमणकं हिरण्मयमुत्तराः कुरव इति । निषधहेमकूटहिमशैला दक्षिणतो द्विसहस्त्रायामाः । तदन्तरेषु त्रीणि वर्षाणि नवनवयोजनसहस्राणि हरिवर्षं किंपुरुषं भारतमिति । सुमेरोः प्राचीना भद्राश्वाः माल्यवत्सीमानः । प्रतीचीनाः केतुमालाः गन्धमादनसीमानः । मध्ये वर्षमिलावृतम् । तदेतद्योजनशतसहस्त्रं सुमेरोर्दिशि दिशि तदर्धेन व्यूढम् ।

स खल्वयं शतसहस्त्रायामो जम्बूद्वीपस्ततो द्विगुणेन लवणोदधिना वलयाकृतिना वेष्टितः । ततश्च द्विगुणा द्विगुणाः शाककुशक्रौञ्च-शाल्मलगोमेधपुष्करद्वीपाः समुद्राश्च सर्षपराशिकल्पा सविचित्रशैलावतंसा इक्षुरससुरासर्पिर्दधिमण्डक्षीरस्वादूदकाः सप्तसमुद्रपरिवेष्टिता वलयाकृतयो लोकालोकपर्वतपरिवाराः पञ्चाशद्योजनकोटिपरिसंख्याताः । तदेतत्सर्वं सुप्रतिष्ठितसंस्थानमण्डमध्ये व्यूढम् । अण्डं च प्रधानस्याणुरवयवो यथाकाशे खद्योत इति ।

तत्र पाताले जलधौ पर्वतेष्वेतेषु देवनिकाया असुरगन्धर्वकिंनरकिं-पुरुषयक्षराक्षसभूतप्रेतपिशाचापस्मारकाप्सरोब्रह्मराक्षसकूष्माण्डविनायकाः प्रतिवसन्ति । सर्वेषु द्वीपेषु पुण्यात्मानो देवमनुष्याः ।

सुमेरुस्त्रिदशानामुद्यानभूमिः । तत्र मिश्रवनं नन्दनं चैत्ररथं सुमानसमित्युद्यानानि, सुधर्मा देवसभा, सुदर्शनं पुरम्, वैजयन्तः प्रासादः ।

ग्रहनक्षत्रतारकास्तु ध्रुवे निबद्धा वायुविक्षेपनियमेनोपलक्षितप्रचाराः सुमेरोरुपर्युपरि संनिविष्टा दिवि विपरिवर्तन्ते ।

माहेन्द्रनिवासिनः षड् देवनिकायाः- त्रिदशा अग्निष्वात्ता याम्यास्तुषिता अपरिनिर्मितवशवर्तिनः परिनिर्मितवशवर्तिनश्चेति । ते सर्वे संकल्पसिद्धा अणिमाद्यैश्वर्योपपन्नाः कल्पायुषो वृन्दारकाः कामभोगिन औपपादिकदेहा उत्तमानुकूलाभिरप्सरोभिः कृतपरिवाराः ।

महति लोके प्राजापत्ये पञ्चविधो देवनिकायः — कुमुदा ऋभवः प्रतर्दना अञ्जनाभाः प्रचिताभा इति । एते महाभूतवशिनो ध्यानाहाराः कल्पसहस्त्रायुषः ।

प्रथमे ब्रह्मणो जनलोके चतुर्विधो देवनिकायो ब्रह्मपुरोहिता ब्रह्मकायिका ब्रह्ममहाकायिका अजरामरा इति । एते भूतेन्द्रियवशिनो द्विगुणद्विगुणोत्तरायुषः ।

द्वितीये तपसि लोके त्रिविधो देवनिकायः - आभास्वरा महाभास्वराः सत्यमहाभास्वरा इति । ते भूतेन्द्रियप्रकृतिवशिनो द्विगुणद्विगुणोत्तरायुषः सर्वे ध्यानाहाराः ऊर्ध्वरेतस ऊर्ध्वमप्रतिहतज्ञाना अधरभूमिष्वनावृतज्ञानविषयाः ।

तृतीये ब्रह्मणः सत्यलोके चत्वारो देवनिकायाः-अच्युताः शुद्धनिवासाः सत्याभाः संज्ञासंज्ञिनश्चेति । ते चाकृतभवनन्यासाः स्वप्रतिष्ठा उपर्युपरि स्थिताः प्रधानवशिनो यावत्सर्गायुषः ।

तत्राच्युताः सवितर्कध्यानसुखाः, शुद्धनिवासाः सविचारध्यानसुखाः, सत्याभा आनन्दमात्रध्यानसुखाः, संज्ञासज्ञिनश्चास्मितामात्रध्यानसुखाः । तेऽपि त्रैलोक्यमध्ये प्रतितिष्ठन्ति । त एते सप्त लोकाः सर्व एव ब्रह्मलोकाः । विदेहप्रकृतिलयास्तु मोक्षपदे वर्तन्त इति न लोकमध्ये न्यस्ता इति । एतद्योगिना साक्षात्करणीयं सूर्यद्वारे संयमं कृत्वा ततोऽन्यत्रापि । एवं तावदभ्यसेद्यावदिदं सर्वं दृष्टमिति ॥२६॥

એનો (ભુવનનો) વિસ્તાર સાત લોક સુધી છે. એમાં અવીચિથી શરૂ કરીને મેરુ પૃષ્ઠ સુધી ભૂર્લોક છે. મેરુ પૃષ્ઠથી ધ્રુવ સુધી ગ્રહ, નક્ષત્ર, તારા વગેરેથી વિચિત્ર જણાતો અન્તરિક્ષલોક છે. ત્યાર પછી ત્રીજો સ્વર્લોક છે. એ પાંચ પ્રકારનો છે અને મહેન્દ્રલોક કહેવાય છે. ચોથો મહર્લોક પ્રાજાપત્ય કહેવાય છે. આના પછી ત્રિવિધ બ્રહ્મલોક છે. જેમકે (પાંચમો) જનલોક, (છઠ્ઠો) તપોલોક અને (સાતમો) સત્યલોક-એ ત્રણ બ્રહ્મલોક છે. આ વિષે ગાથા છે :-

"બ્રાહ્મ ત્રિભૂમિક છે. એની પછી (નીચે) મહાન્
પ્રજાપતિલોક છે. પછી માહેન્દ્રસ્વર્લોક છે. પછી દ્યુલોકમાં
તારા અને પૃથ્વીમાં પ્રજા છે."

લોકોને વર્ણવતો આ ટૂંકો શ્લોક છે.

એમાં અવીચિથી ઉપર મહાકાલ, અંબરીષ, રૌરવ, મહારૌરવ, કાલસૂત્ર અને અંધતામિસ્ર એ છ મહાનરકભૂમિઓ છે, જેમાં પૃથ્વી, જળ, અગ્નિ, વાયુ, આકાશ અને અંધકારની અતિશયતા છે, અને જેમાં પોતાનાં કર્મોથી ઉપાર્જિત દુઃખો અનુભવનાર પ્રાણીઓ કષ્ટપૂર્વક લાંબા સમય સુધી રહેવા માટે જન્મે છે. ત્યાર પછી મહાતલ, રસાતલ, અતલ, વિતલ, સુતલ, તલાતલ, અને પાતાલ નામનાં સાત પાતાળ છે. આઠમી આ સાત દ્વીપવાળી પૃથ્વી કે વસુમતી છે, જેના મધ્યમાં સોનાનો પર્વતરાજ સુમેરુ આવેલો છે. એનાં શિખરો ચાંદી, વૈદૂર્ય, સ્ફટિક, સુવર્ણ, અને મણિમય છે. એના દક્ષિણ તરફના આકાશનો ભાગ વૈદૂર્યની પ્રભાના રંગથી નીલ કમળના પાન જેવો શ્યામ છે. પૂર્વભાગ સફેદ છે, પશ્ચિમ સ્વચ્છ છે, અને કુરંડક (કદી ન મુરઝાતું દિવ્યપુષ્પ)ની પ્રભા જેવો પીળો ઉત્તર ભાગ છે. એની દક્ષિણે જાંબુનું વૃક્ષ છે, તેથી એને જંબુદ્વીપ કહે છે. એની ચોતરફ સૂર્ય ફરતો હોવાથી નિરંતર રાત્રિ-દિવસ થયા કરે છે. એની ઉત્તરે બે હજાર યોજન વિસ્તારવાળા નીલ અને શ્વેત શિખરોવાળા ત્રણ પર્વતો છે. એમની વચ્ચેના અંતરમાં નવ હજાર યોજન વિસ્તારવાળાં રમણક, હિરણ્મય અને ઉત્તરકુરુ નામનાં ત્રણ વર્ષો (દેશો) છે. દક્ષિણે બે હજાર યોજન વિસ્તારવાળા, નિષધ હેમકૂટ અને હિમશૈલ પર્વતો છે. એમની વચ્ચેના અંતરમાં નવ હજાર યોજન વિસ્તારવાળાં હરિવર્ષ, કિંપુરુષવર્ષ, અને ભારતવર્ષ એ ત્રણ વર્ષો છે. સુમેરુની પૂર્વે માલ્યવાન્ પર્વતની સરહદવાળો ભદ્રાશ્વપ્રદેશ છે. પશ્ચિમે ગંધમાદન પર્વતની સીમાવાળો કેતુમાલ પ્રદેશ છે. મધ્યમાં ઈલાવૃત વર્ષ છે. આ બધા પ્રદેશો સુમેરુ સાથે ચારે દિશાઓમાં એક લાખ યોજન સુધી વિસ્તરેલા છે, જેનો અર્ધો ભાગ વ્યૂઢ (સુમેરુથી ઘેરાયેલો) છે.

એક લાખ યોજન વિસ્તારવાળો આ જંબુદ્વીપ છે. એ એનાથી બમણા ખારા પાણીના વલયાકાર સમુદ્રથી ઘેરાયેલો છે. એનાથી બે બે ગણા શાક, કુશ, ક્રૌંચ, શાલ્મલ, ગોમેધ અને પુષ્કર દ્વીપો અને સરસવના ઢગલા જેવા વિચિત્ર શિખરોવાળા, પર્વતોથી યુક્ત છે. એ દ્વીપો સાત સમુદ્રોથી ઘેરાયેલા છે, જેમાં શેરડીનો રસ, સુરા, ઘી, દહીંનું મંડ, દૂધ અને મીઠું પાણી ભરેલું છે. એ બધા વલયાકાર છે. તેઓ લોકાલોક પર્વતના પરિવાર

જેવા છે, અને બધા મળીને પચાસ કરોડ યોજન વિસ્તારમાં ફેલાયેલા છે. આ બધું અંડના મધ્યમાં વ્યવસ્થિત રીતે પ્રતિષ્ઠિત સંસ્થાન (આકાર)વાળું ગોઠવાઈને રહેલું છે. અને અંડ પ્રધાનનો અણુ જેવડો ભાગ-અવયવ- છે, જાણે આકાશમાં આગિયો.

પાતાળમાં, સમુદ્રમાં, પર્વતો પર દેવ, અસુર, ગંધર્વ, કિંનર, કિંપુરુષ, યક્ષ, રાક્ષસ, ભૂત, પ્રેત, પિશાચ, અપસ્માર, અપ્સરા, બ્રહ્મરાક્ષસ, કૂષ્માંડ, અને વિનાયકના ગણો વસે છે.

બધા દ્વીપોમાં દેવો અને મનુષ્યો પુણ્યાત્મા ગણાય છે. સુમેરુ દેવોની ઉદ્યાનભૂમિ છે. ત્યાં મિશ્રવન, નંદન, ચૈત્રરથ અને સમાનસ, એ ચાર વનો કે ઉદ્યાનો છે. સુધર્મા દેવસભા છે. સુદર્શન નગર છે. અને વૈજયન્ત રાજમહેલ છે.

ગ્રહો, નક્ષત્રો, તારાઓ ધ્રુવ સાથે સંકળાયેલા હોય એમ, એની ચોતરફ નિયમપૂર્વક ફરતા વાયુને લીધે ફરતા રહે છે. એ બધા સુમેરુથી ઉપરના ભાગમાં સંનિવિષ્ટ રહીને દ્યુલોકમાં વિચરણ કરે છે. માહેન્દ્રલોકમાં ત્રિદશ, અગ્નિષ્વાત્ત, યામ્ય, તુષિત, અપરનિર્મિતવશવર્તી અને પરનિર્મિતવશવર્તી એમ છ દેવસમૂહો છે. તેઓ સંકલ્પસિદ્ધ, અણિમા વગેરે ઐશ્વર્યવાળા, કલ્પ પર્યંત જીવનારા, વૃન્દારક કહેવાય છે. તેઓ ઇચ્છાનુસાર ભોગ કરનારા, ઔપપાદિક (માતાપિતાના સંયોગ વિનાના) દેહવાળા, ઉત્તમ, અનુકૂળ અપ્સરાઓ સાથે પરિવાર રચીને રહેનારા છે.

પ્રાજાપત્ય મહાન્ લોકમાં કુમુદ, પ્રભુ, પ્રતર્દન, અંજનાભ, અને પ્રચિતાભ એમ પાંચ દેવજાતિઓ વસે છે. તેઓ મહાભૂતોને વશમાં રાખનારા, ધ્યાનાહાર, હજાર કલ્પોના આયુષ્યવાળા છે.

જન નામના પહેલા બ્રહ્મલોકમાં બ્રહ્મપુરોહિત, બ્રહ્મકાયિક, બ્રહ્મમહાકાયિક અને અજરામર એમ ચાર દેવજાતિઓ વસે છે. તેઓ ભૂતો અને ઇન્દ્રિયોને વશમાં રાખનારા, ઉત્તરોત્તર બેગણા આયુષ્યવાળા છે. તપ નામના બીજા બ્રહ્મલોકમાં આભાસ્વર, મહાભાસ્વર અને સત્ય મહાભાસ્વર એમ ત્રણ દેવજાતિઓ વસે છે. તેઓ ભૂતો, ઇન્દ્રિયો અને પ્રકૃતિને વશમાં રાખનારા, ઉત્તરોત્તર બેગણા આયુષ્યવાળા, ધ્યાનનો જ આહાર કરનારા,

ઊર્ધ્વરેતા, એમનું જ્ઞાન ઉપરના લોકોમાં અવરોધ વગરનું અને નીચેના લોકોમાં અનાવૃત (પ્રગટ) હોય છે. સત્ય નામના ત્રીજા બ્રહ્મલોકમાં,અચ્યુત, શુદ્ધનિવાસ, સત્યાભ અને સંજ્ઞા-સંજ્ઞી એમ ચાર દેવજાતિઓ વસે છે. તેઓ નિવાસ માટે ભવનવિનાના, સ્વપ્રતિષ્ઠ કે દેહાશ્રયે જીવનારા, એક બીજાથી ઉપરના સ્તરોમાં નિવાસ કરનારા, પ્રધાનને વશમાં રાખનારા, અને સર્ગ પર્યંત જીવનારા છે. અચ્યુતો સવિતર્ક ધ્યાનથી સુખી રહે છે. શુદ્ધનિવાસ સવિચાર ધ્યાનથી, સત્યાભ આનંદમાત્ર ધ્યાનથી અને સંજ્ઞા-સંજ્ઞી દેવો અસ્મિતામાત્ર ધ્યાનથી સુખી રહે છે. તેઓ પણ ત્રૈલોક્યમાં પ્રતિષ્ઠિત છે. આ બધા જ સાત લોક બ્રહ્મલોક છે. વિદેહ અને પ્રકૃતિલયો મોક્ષપદમાં પ્રતિષ્ઠિત હોવાથી એમને લોકમાં વસતા વર્ણવ્યા નથી. યોગીએ સૂર્યદ્વાર (સુષુમ્ણા)માં સંયમ કરીને આવા ભુવનજ્ઞાનને સાક્ષાત્કાર દ્વારા મેળળવું જોઈએ. આ જ્ઞાન બીજાં સ્થાનોમાં સંયમ કરીને પણ મેળવી શકાય છે. આ બધું સાક્ષાત્ જોવાય નહીં, ત્યાં સુધી અભ્યાસ ચાલુ રાખવો જોઈએ.૨૬

तत्त्व वैशारदी

भुवनज्ञानं सूर्ये संयमात् । आ ध्रुवादितो मेरुपृष्ठात् ।

तदेवमनेन संग्रहश्लोकान्तेन संक्षेपतः सप्त लोकानुपन्यस्य विस्तरेणाह- तत्रावीचेरिति । घनशब्देन पृथिव्युच्यते । भूमिः स्थानमित्यर्थः । एते महानरका अनेकोपनरकपरिवारा बोद्धव्याः । एतानेव नामान्तरेणोपसंहरति- महाकालेति ।

तस्य सूर्यप्रचाराद् रात्रिन्दिवं लग्नमिव विवर्तते । यमेवास्य भागं सूर्यस्त्यजति तत्र रात्रिः । यमेव भागमलंकरोति तत्र दिनमिति । सकलजम्बूद्वीपपरिमाणमाह- तदेतद्योजनशतसहस्रम् । किभूतं योजनानां शतसहस्रमित्याह-सुमेरोर्दिशि दिशि तदर्धेन पञ्चाशद्योजनसहस्रेण व्यूढं संक्षिप्तम् ।

यतोऽस्य मध्यस्थः सुमेरुः समुद्राश्च सर्षपराशिकल्पा इति द्विगुणा द्विगुणा इति संबन्धः । यथा सर्षपराशिर्न व्रीहिराशिरिवोच्छ्रितो नापि भूमिसमस्तथा समुद्रा अपीत्यर्थः । विचित्रैः शैलैरवतंसैरिव सह वर्तन्त इति सविचित्रशैलावतंसा द्वीपाः । तदेतत्सर्वं सद्वीपविपिननगनगरनीरधिमालावलयं लोकालोकपरिवृतं विश्वम्भरामण्डलं ब्रह्माण्डमध्ये व्यूढं संक्षिप्तं, सुप्रतिष्ठितं संस्थानं संनिवेशो यस्य तत्तथोक्तम् ।

ये यत्र प्रतिवसन्ति तत्र तान्दर्शयति- तत्र पाताल इति ।

सुमेरोः संनिवेशमाह-सुमेरुरिति ।

तदेवं भूर्लोकं सप्रकारमुक्त्वा सप्रकारमेवान्तरिक्षलोकमाह-ग्रहेति । विक्षेपो व्यापारः ।

स्वर्लोकमादर्शयति-माहेन्द्रनिवासिन इति । देवनिकाया देवजातयः । षण्णामपि देवनिकायानां रूपोत्कर्षमाह-सर्वे संकल्पसिद्धा इति । संकल्पमात्रादेवैषां विषया उपनमन्ति । वृन्दारकाः पूज्याः । कामभोगिनो मैथुनप्रियाः । औपपादिकदेहाः पित्रोः संयोगमन्तरेणाकस्मादेव दिव्यं शरीरमेषां धर्मविशेषातिसंस्कृतेभ्योऽणुभ्यो भूतेभ्यो भवतीति ।

महर्लोकमाह-महतीति । महाभूतवशिनः । यद्यदेतेभ्यो रोचते तत्तदेव महाभूतानि प्रयच्छन्ति । तदिच्छतश्च महाभूतानि तेन तेन संस्थानेनावतिष्ठन्ते । ध्यानाहारा ध्यानमात्रतृप्ताः पुष्टा भवन्ति ।

जनलोकमाह-प्रथम इत्युक्तक्रमेण । भूतेन्द्रियवशिन इति । भूतानि पृथिव्यादीनीन्द्रियाणि श्रोत्रादीनि यथा नियोक्तुमिच्छन्ति तथैव नियुज्यन्ते ।

उक्तक्रमापेक्षया द्वितीयं ब्रह्मणस्तपोलोकमाह-द्वितीय इति । भूतेन्द्रियप्रकृतिवशिन इति । प्रकृतिः पञ्च तन्मात्राणि तद्वशिनः । तदिच्छतो हि तन्मात्राण्येव कायाकारेण परिणमन्त इत्यागमिनः । द्विगुणेति । आभास्वरेभ्यो द्विगुणायुषो महाभास्वराः । तेभ्योऽपि द्विगुणायुषः सत्यमहाभास्वरा इत्यर्थः । उर्ध्वमित्यूर्ध्वं सत्यलोकेऽप्रतिहतज्ञाना अवीचेस्तु प्रभृत्या तपोलोकं सूक्ष्मव्यवहितादि सर्वं विजानन्तीत्यर्थः ।

तृतीयं ब्रह्मणः सत्यलोकमाह-तृतीय इति । अकृतो भवनस्य गृहस्य न्यासो यैस्ते तथोक्ताः । आधाराभावादेव स्वप्रतिष्ठाः । स्वेषु शरीरेषु प्रतिष्ठा येषां ते तथोक्ताः । प्रधानवशिनः । तदिच्छतः सत्त्वरजस्तमांसि प्रवर्तन्ते यावत्सर्गायुषः । यथा च श्रूयते-

ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे ।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥
(कूर्मपु० १।१२।२७३; तुल० वायु १०१।८५) इति ।

तदेवं चतुर्णां देवनिकायानां साधारणधर्मानुक्त्वा नामविशेषग्रहणेन धर्मविशेषानाह-तत्रेति । अच्युता नाम देवाः स्थूलविषयध्यानसुखाः । तेन ते तृप्यन्ति । शुद्धनिवासा नाम देवाः सूक्ष्मविषयध्यानसुखाः । तेन ते तृप्यन्ति । सत्याभा नाम देवा इन्द्रियविषयध्यानसुखाः । तेन ते तृप्यन्ति । संज्ञासंज्ञिनो नाम देवा अस्मिता-

मात्रध्यानसुखाः । तेन ते तृप्यन्ति । त एते सर्वे संप्रज्ञातसमाधिमुपासते । अथासंप्रज्ञात-समाधिनिष्ठा विदेहप्रकृतिलयाः कस्मान्न लोकमध्ये न्यस्तन्त इत्यत आह- विदेह-प्रकृतिलयास्त्विति । बुद्धिवृत्तिमन्तो हि दर्शितविषया लोकयात्रां वहन्तो लोकेषु वर्तन्ते । न चैवं विदेहप्रकृतिलयाः सत्यपि साधिकारत्व इत्यर्थः । तदेतदासत्यलोकमा चावीचेर्योगिना साक्षात्करणीयं सूर्यद्वारे सुषुम्नायां नाड्याम् । न चैतावतापि तत्साक्षात्कारो भवतीत्यत आह- एवं तावदन्यत्रापि सुषुम्नाया अन्यत्रापि योगोपाध्यायोपदिष्टेषु यावदिदं सर्वं जगद् दृष्टमिति । बुद्धिसत्त्वं हि स्वभावत एव विश्वप्रकाशनसमर्थं तमोमलावृतं यत्रैव रजसोद्घाट्यते तदेव प्रकाशयति । सूर्यद्वारसंयमोद्घाष्टितं तु भुवनं प्रकाशयति । न चैवमन्यत्रापि प्रसङ्गः । तत्संयमस्य तावन्मात्रोद्घाटनसामर्थ्यादिति सर्वमवदातम् ॥२६॥

સૂર્યમાં સંયમ કરવાથી ધ્રુવથી મેરુ પૃષ્ઠ સુધીના ભુવનનું જ્ઞાન થાય છે. સંગ્રહશ્લોકથી ટૂંકમાં સાત લોક કહી, "तत्रावीचेः" વગેરેથી એમને વિસ્તારપૂર્વક કહે છે. ઘન એટલે પૃથ્વી. ભૂમિ એટલે સ્થાન. નરકો અનેક ઉપનરકોના પરિવારવાળાં જાણવાં. "મહાકાલ" વગેરેથી એમનાં બીજાં નામોનો નિર્દેશ કરે છે.

સૂર્યની ગતિથી સતત રાત-દિવસ થયા કરે છે. જે ભાગને સૂર્ય ત્યજે ત્યાં રાત્રિ, અને અલંકૃત (પ્રકાશિત) કરે ત્યાં દિવસ હોય છે. "तदेतद्योजन-शतसहस्रम्"થી જંબુદ્વીપનું પૂરું માપ જણાવે છે. કેવા એક લાખ યોજનવાળું ? એના જવાબમાં "सुमेरोर्दिशिदिशि" વગેરેથી કહે છે કે એના અર્ધા-પચાસહજાર યોજન-થી વ્યૂઢ કે સંક્ષિપ્ત છે. એના મધ્યમાં સુમેરુ હોવાથી, બે બે ગણા વિસ્તારવાળા સમુદ્રો સરસવના ઢગલા જેવા જણાય છે, એમ વાક્યનો સંબંધ છે. સરસવનો ઢગલો ડાંગરના ઢગલા જેવો ઊંચો અને પૃથ્વીની સમાંતર પણ હોતો નથી. એવા એ સમુદ્રો છે, એવો અર્થ છે. વિચિત્ર પર્વતોરૂપી શિરોભૂષણવાળા દ્વીપો છે. આવું દ્વીપ, વન, પર્વત, નગર, સમુદ્ર વગેરેની માળાથી વલયવાળું, લોકાલોક પર્વતને વીંટળાયેલું વિશ્વંભરામંડલ બ્રહ્માંડમાં વ્યૂઢ-સંક્ષિપ્ત-મર્યાદિત- છે, અને વ્યવસ્થિત સંનિવેશવાળું છે.

જે પ્રજાઓ જ્યાં વસે છે ત્યાં એમને "तत्र पातालेे" વગેરેથી દર્શાવે છે. "सुमेरोः" વગેરેથી સુમેરુનો સંનિવેશ વર્ણવે છે. આમ વિવિધ પ્રદેશોવાળા ભૂર્લોક વિષે કહીને "ग्रहनक्षत्र" વગેરેથી અંતરિક્ષ લોક વર્ણવે છે. વિક્ષેપ એટલે વ્યાપાર. "माहेन्द्रनिवासिनः" વગેરેથી સ્વર્લોક વર્ણવે છે. દેવનિકાયો એટલે દેવજાતિઓ. છ દેવજાતિઓના રૂપનો ઉત્કર્ષ "सर्वे संकल्पसिद्धाः..." વગેરેથી કહે છે. ફક્ત સંકલ્પથી વિષયો ઉપસ્થિત થાય છે. વૃન્દારક એટલે પૂજ્ય. કામભોગી એટલે

મૈથુનપ્રિય. "ઔપપાદિક દેહાઃ" એટલે માતાપિતાના સંયોગવગર અકસ્માત્ દિવ્ય શરીર ધારણ કરનારા. એમનું શરીર વિશેષ પ્રકારના ગુણોથી સંસ્કૃત અણુઓવાળા ભૂતોથી બને છે.

"મહતિ" વગેરેથી મહલોક વર્ણવે છે. મહાભૂતવશી એટલે એમને જે કાંઈ પસંદ હોય એ મહાભૂતો આપે એવા. એમની ઇચ્છા પ્રમાણે મહાભૂતો તે તે આકારવાળાં બનીને રહે છે. ધ્યાનાહાર એટલે ફક્ત ધ્યાનથી તૃપ્ત અને પુષ્ટ બનનારા. પ્રથમ વગેરે ક્રમથી જનલોક વર્ણવે છે. ભૂતેન્દ્રિયવશી એટલે પૃથ્વી વગેરે ભૂતો અને શ્રોત્ર વગેરે ઇન્દ્રિયોને ઇચ્છા પ્રમાણે યોજનારા. "દ્વિતીય" વગેરેથી બીજા ક્રમે આવતા બ્રહ્માના તપોલોકને વર્ણવે છે. તેઓ ભૂતેન્દ્રિયપ્રકૃતિવશી છે. પ્રકૃતિ એટલે પાંચ તન્માત્રાઓને વશમાં રાખનારા. એમની ઇચ્છા મુજબ તન્માત્રાઓ શરીરાકારે પરિણમે છે, એમ આગમ જાણનારા કહે છે. બમણા એટલે આભાસ્વર દેવોથી બે ગણા આયુષ્યવાળા મહાભાસ્વર દેવો છે, અને એમનાથી બેગણા આયુષ્યવાળા સત્યમહાભાસ્વર દેવો છે, એવો અર્થ છે. ઊર્ધ્વ એટલે સત્યલોકવિષે અવરોધ વગરના જ્ઞાનવાળા અને અવીચિથી તપોલોક સુધી સૂક્ષ્મ કે વ્યવધાનવાળા બધા પદાર્થોને પ્રગટ રીતે જોનારા, એવો અર્થ છે. "તૃતીય..." વગેરેથી બ્રહ્માના ત્રીજા સત્યલોકને વર્ણવે છે. ભવનવિનાના એટલે નિવાસ માટે ઘરની વ્યવસ્થા વગરના. તેથી તેઓ "અકૃતભવનન્યાસાઃ" કહેવાય છે. આધારવિના સ્વપ્રતિષ્ઠ, પોતાના દેહમાં જ નિવાસ કરનારા. પ્રધાનવશી એટલે સ્વેચ્છાથી સત્ત્વ, રજ અને તમને પ્રવૃત્ત કે નિવૃત્ત કરનારા. સર્ગપર્યંત આયુષ્યવાળા. આ વિષે શ્રુતિમાં કહ્યું છે : "એ બધા કૃતાત્માઓ પર અન્ત એટલે પ્રલયકાળ આવતાં બ્રહ્મા સાથે પરમપદમાં પ્રવેશે છે." (કૂર્મ પુરાણ, ૧.૧૨.૨૦૩, વાયુપુરાણ, ૧૦૧.૮૫).

ચાર દેવજાતિઓના સાધારણ ધર્મો કહીને, "તત્રાચ્યુતાઃ" વગેરેથી નામવિશેષ વડે વિશેષ ધર્મો કહે છે. અચ્યુત નામના દેવો સ્થૂલ વિષયક ધ્યાનથી સુખી-તૃપ્ત થાય છે. શુદ્ધનિવાસ દેવો સૂક્ષ્મ વિષયક ધ્યાનથી સુખી અને તૃપ્ત થાય છે. સત્યાભ દેવો ઇન્દ્રિયો વિષે ધ્યાન કરીને સુખી-તૃપ્ત થાય છે. સંજ્ઞાસંજ્ઞી દેવો ફક્ત અસ્મિતા વિષેના ધ્યાનથી સુખી-તૃપ્ત થાય છે. આ બધા સંપ્રજ્ઞાત સમાધિમાં નિષ્ઠાવાળા છે.

અસંપ્રજ્ઞાત સમાધિનિષ્ઠ વિદેહ અને પ્રકૃતિલયોને લોકમધ્યે કેમ મૂક્યા નથી ? એના જવાબમાં "વિદેહપ્રકૃતિલયાસ્તુ" વગેરેથી કહે છે કે બુદ્ધિવૃત્તિવાળા યોગીઓ પુરુષને વિષયો દર્શાવીને લોકયાત્રા વહન કરતા વિભિન્ન લોકોમાં વસે છે. સાધિકાર ચિત્તવાળા હોવા છતાં વિદેહ અને પ્રકૃતિલયો એવા નથી.

આ સત્યલોકથી અવીચિ સુધીના સંપૂર્ણ ભુવનનો યોગીએ સૂર્યદ્વાર રૂપ સુષુમ્ણા નાડીમાં સંયમ કરીને સાક્ષાત્કાર કરવો જોઈએ. "અન્યત્રાપિ" વગેરેથી કહે છે કે સુષુમ્ણા સિવાય બીજાં સ્થાનોમાં પણ યોગાચાર્યોના ઉપદેશ પ્રમાણે સંયમ કરવાથી ભુવનજ્ઞાન થાય છે. આવો સંયમ ત્યાં સુધી કરવો જોઈએ, જ્યાં સુધી આ સંપૂર્ણ વિશ્વ સાક્ષાત્ જોઈ ન લેવાય. બુદ્ધિસત્ત્વ સ્વભાવે વિશ્વને પ્રકાશિત કરવા માટે સમર્થ છે. તમોગુણના મળથી આવૃત થવાથી, જેટલો ભાગ રજોગુણથી ઉઘાડાય, એટલાને જ એ પ્રકાશિત કરે છે. સૂર્યદ્વારમાં કરવામાં આવતા સંયમથી એ પૂરેપૂરા વિશ્વને પ્રકાશિત કરે છે. આવો પ્રસંગ બીજા પ્રકારના સંયમોમાં થશે એમ માનવું નહીં. કારણ કે એ મર્યાદિત પદાર્થોને જ પ્રગટ કરવા સમર્થ હોય છે. આમ બધું સ્પષ્ટ છે. ૨૬

★

चन्द्रे ताराव्यूहज्ञानम् ॥२७॥

ચંદ્ર પર સંયમ કરવાથી તારાઓના વ્યૂહનું જ્ઞાન થાય છે. ૨૭

ભાષ્ય

चन्द्रे संयमं कृत्वा ताराणां व्यूहं विजानीयात् ॥२७॥

ચંદ્રમાં સંયમ કરી, તારાઓના વ્યૂહને જાણે. ૨૭

★

ध्रुवे तद्गतिज्ञानम् ॥२८॥

ધ્રુવમાં સંયમ કરવાથી તારાઓની ગતિનું જ્ઞાન થાય છે. ૨૮

ભાષ્ય

ततो ध्रुवे संयमं कृत्वा ताराणां गतिं विजानीयात् । ऊर्ध्वविमानेषु कृतसंयमस्तानि विजानीयात् ॥२८॥

ત્યાર પછી ધ્રુવ પર સંયમ કરી તારાઓની ગતિ જાણે, ઊર્ધ્વવિમાન-દ્યુલોકમાં સૂર્ય વગેરેના વિમાનરૂપ રથમાં સંયમ કરીને, એમને પણ જાણે.૨૮

नाभिचक्रे कायव्यूहज्ञानम् ॥२९॥

નાભિચક્રમાં સંયમ કરવાથી શરીરવ્યૂહનું જ્ઞાન થાય છે. ૨૯

ભાષ્ય

नाभिचक्रे संयमं कृत्वा कायव्यूहं विजानीयात् । वातपित्तश्लेष्माणस्त्रयो दोषाः । धातवः सप्त त्वग्लोहितमांसस्नाय्वस्थि-मज्जाशुक्राणि, पूर्वं पूर्वमेषां बाह्यमित्येव विन्यासः ॥२९॥

નાભિચક્ર પર સંયમ કરીને કાયવ્યૂહને જાણે. વાત, પિત્ત અને કફ, ત્રણ દોષો છે. ત્વચા, લોહી, માંસ, સ્નાયુ, હાડકાં, મજ્જા અને શુક્ર એ સાત ધાતુઓ છે. એમાં પૂર્વપૂર્વનું બહાર છે. આવો એમનો વિન્યાસ છે. ૨૯

★

कण्ठकूपे क्षुत्पिपासानिवृत्तिः ॥३०॥

કંઠછિદ્રમાં સંયમ કરવાથી ભૂખ-તરસ નિવૃત્ત થાય છે. ૩૦

ભાષ્ય

जिह्वाया अधस्तात्तन्तुः । ततोऽधस्तात्कण्ठः । ततोऽधस्तात्कूपः । तत्र संयमात्क्षुत्पिपासे न बाधेते ॥३०॥

જીભની નીચે તંતુ છે. એની નીચે કંઠ છે. એની નીચે કૂપ (છિદ્ર) છે. એમાં સંયમ કરવાથી ભૂખતરસનો ત્રાસ થતો નથી. ૩૦

★

कूर्मनाड्यां स्थैर्यम् ॥३१॥

કૂર્મનાડીમાં સંયમ કરવાથી ચિત્ત સ્થિર થાય છે. ૩૧

कूपादध उरसि कूर्माकारा नाडी । तस्यां कृतसंयमः स्थिरपदं लभते । यथा सर्पो गोधा चेति ॥३१॥

કંઠ છિદ્રની નીચે છાતીમાં કાચબાના આકારની નાડી છે. એમાં

સંયમ કરવાથી સ્થિરતા થાય છે. જેમ સાપ, ઘો એક જગાએ ચોંટી જાય છે. ૩૧

तत्त्व वैशारदी

चन्द्रे ताराव्यूहज्ञानम् । ध्रुवे तद्गतिज्ञानम् । नाभिचक्रे कायव्यूहज्ञानम् । कण्ठकूपे क्षुत्पिपासानिवृत्तिः । कूर्मनाड्यां स्थैर्यम् । तत्र तत्र जिज्ञासायां योगिनस्तत्र तत्र संयमः । एवं क्षुत्पिपासानिवृत्तिहेतुः संयमः स्थैर्यहेतुश्च सूत्रपदैरुपदिष्टो भाष्येण च निगदव्याख्यातेन व्याख्यात इति न व्याख्यातः ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

યોગીએ ઇચ્છા પ્રમાણે સંયમ કરવો. ભૂખ-તરસની નિવૃત્તિ અને સ્થિરતા માટેના સંયમો સૂત્રના શબ્દો વડે ઉપદેશાયા છે અને સ્પષ્ટ ભાષ્ય વડે સમજાવાયા છે. માટે ફરીથી વ્યાખ્યા કરી નથી. ૩૧

★

मूर्धज्योतिषि सिद्धदर्शनम् ॥३२॥

મસ્તકમાં રહેલા પ્રકાશમાં સંયમ કરવાથી સિદ્ધોનું દર્શન થાય છે. ૩૨

भाष्य

शिरःकपालेऽन्तश्छिद्रं प्रभास्वरं ज्योतिः, तत्र संयमं कृत्वा सिद्धानां द्यावापृथिव्योरन्तरालचारिणां दर्शनम् ॥३२॥

માથાના કપાળના ભાગની અંદર રહેલા અવકાશમાં ચમકતો પ્રકાશ છે. એમાં સંયમ કરવાથી દ્યુલોક અને પૃથ્વી વચ્ચે વિચરતા સિદ્ધોનું દર્શન પ્રાપ્ત થાય છે. ૩૨

तत्त्व वैशारदी

मूर्धज्योतिषि सिद्धदर्शनम् । मूर्धशब्देन सुषुम्ना नाडी लक्ष्यते तत्र संयम इति ॥३२॥

મૂર્ધ શબ્દથી સુષુમ્ણાનાડી લક્ષિત થાય છે. ત્યાં સંયમ કરવો. ૩૨

★

प्रातिभाद्वा सर्वम् ॥३३॥

સ્વયંસ્ફૂર્ત જ્ઞાનથી યોગી બધું જાણે છે. ૩૩

भाष्य

प्रातिभं नाम तारकम्, तद्विवेकजस्य ज्ञानस्य पूर्वरूपम्, यथोदये प्रभा भास्करस्य । तेन वा सर्वमेव जानाति योगी प्रातिभस्य ज्ञानस्योत्पत्ताविति ॥३३॥

પ્રાતિભ એટલે તારક. સૂર્યના ઉદય પહેલાંની પ્રભા જેવું, એ વિવેકજ્ઞાનનું પૂર્વરૂપ છે. આવા પ્રાતિભ વિવેકજ્ઞાનને લીધે યોગી બધું જ જાણે છે. ૩૩

तत्त्व वैशारदी

प्रातिभाद्वा सर्वम् । प्रतिभोहः । तद्भवं प्रातिभम् । प्रसंख्यानहेतुसंयमवतो हि तत्प्रकर्षे प्रसंख्यानोदयपूर्वलिङ्गं यदूहजं तेन सर्वं विजानाति योगी । तच्च प्रसंख्यानसंनिधापनेन संसारात्तारयतीति तारकम् ॥३३॥

પ્રતિભા એટલે ઊહ. એનાથી ઉત્પન્ન થયેલું જ્ઞાન પ્રાતિભ કહેવાય છે. પ્રસંખ્યાનના હેતુરૂપ સંયમવાળો યોગી એના પ્રકર્ષથી વિવેકજ્ઞાનના પૂર્વચિહ્ન જેવા, ઊહજન્ય જ્ઞાનથી બધું જાણે છે. આવું પ્રસંખ્યાન (ધ્યાન) મોક્ષની નજીક લઈ જનારું હોવાથી સંસારથી તારે છે, માટે તારક કહેવાય છે. ૩૩

★

हृदये चित्तसंवित् ॥३४॥

હૃદયમાં સંયમ કરવાથી ચિત્તનું જ્ઞાન થાય છે. ૩૪

भाष्य

यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म तत्र विज्ञानं तस्मिन्संयमाच्चित्तसंवित् ॥३४॥

આ બ્રહ્મપુર (શરીર)માં જે સૂક્ષ્મ પુંડરીક (હૃદયકમળ) રૂપ સ્થાન છે, એમાં વિજ્ઞાન (ચિત્ત) વસે છે. એમાં સંયમ કરવાથી ચિત્તનું જ્ઞાન થાય છે. ૩૪

तत्त्व वैशारदी

हृदये चित्तसंवित् । हृदयपदं व्याचष्टे-यदिदमस्मिन्ब्रह्मपुरे । बृहत्त्वादात्मा ब्रह्म । तस्य पुरं निलयः । तद्धि तत्र विजानातिस्वमिति । दहरं गर्तं तदेव

पुण्डरीकमधोमुखं वेश्म मनसः । चित्तसंवेदनत्वे हेतुमाह-तत्र विज्ञानमिति । तत्र संयमाच्चित्तं विजानाति स्ववृत्तिविशिष्टम् ॥३४॥

હૃદય શબ્દ "यदिदमस्मिन्ब्रह्मपुरे.." વગેરેથી સમજાવે છે. આત્મા બૃહત્ (મહાન્) હોવાથી બ્રહ્મ કહેવાય છે. એનું પુર એટલે રહેઠાણ. ત્યાં એ પોતાને "આ હું છું" એમ જાણે છે. દહર એટલે ગર્ત (ખીણ), એ જ અધોમુખ કમળ મનનું નિવાસસ્થાન છે. "तत्र विज्ञानम्.." થી ચિત્તના જ્ઞાનનો હેતુ કહે છે. એમાં સંયમ કરવાથી વૃત્તિવિશિષ્ટ ચિત્તને જાણે છે. ૩૪

★

सत्त्वपुरुषयोरत्यन्तासंकीर्णयोः प्रत्ययाविशेषो भोगः परार्थत्वात् स्वार्थसंयमात्पुरुषज्ञानम् ॥३५॥

અત્યંત ભિન્ન બુદ્ધિસત્ત્વ અને પુરુષના વિશેષ જ્ઞાનનો અભાવ ભોગ છે. કારણ કે સત્ત્વ બીજા માટે છે. સ્વાર્થમાં સંયમ કરવાથી પુરુષનું જ્ઞાન થાય છે.

भाष्य

बुद्धिसत्त्वं प्रख्याशीलं समानसत्त्वोपनिबन्धने रजस्तमसी वशीकृत्य सत्त्वपुरुषान्यताप्रत्ययेन परिणतम् । तस्माच्च सत्त्वात्परिणामिनोऽत्यन्तविधर्मा शुद्धोऽन्यश्चितिमात्ररूपः पुरुषः । तयोरत्यन्तासंकीर्णयोः प्रत्ययाविशेषो भोगः पुरुषस्य, दर्शितविषयत्वात् । स भोगप्रत्ययः सत्त्वस्य परार्थत्वाद् दृश्यः ।

यस्तु तस्माद्विशिष्टश्चितिमात्ररूपोऽन्यः पौरुषेयः प्रत्ययस्तत्र संयमात्पुरुषविषया प्रज्ञा जायते । न च पुरुषप्रत्ययेन बुद्धिसत्त्वात्मना पुरुषो दृश्यते, पुरुष एव तं प्रत्ययं स्वात्मावलम्बनं पश्यति । तथा ह्युक्तम्- विज्ञातारमरे केन विजानीयात् (बृ. २।४।१४; ४।५।१५) इति ॥३५॥

બુદ્ધિસત્ત્વ પ્રકાશશીલ છે. તેથી એ સત્ત્વગુણ સાથે સમાનપણે સંબંધમાં આવતા રજોગુણ અને તમોગુણને વશ કરીને, સત્ત્વ અને પુરુષની ભિન્નતાના જ્ઞાનરૂપે પરિણમે છે. આવા પરિણામી સત્ત્વથી જુદો અને અત્યંત વિરુદ્ધ ગુણધર્મવાળો પુરુષ શુદ્ધ ચૈતન્યમાત્ર સ્વરૂપ છે. એ બે તદ્દન ભિન્ન તત્ત્વોનું વિશેષ (સ્પષ્ટ) જ્ઞાન ન હોવું પુરુષનો ભોગ છે. કારણ કે બુદ્ધિ

એની સમક્ષ વિષયોનું નિવેદન કરે છે. સત્ત્વનો આવો ભોગપ્રત્યય બીજા માટે હોવાથી દૃશ્ય છે. એનાથી તદ્દન જુદા, ચિતિમાત્ર સ્વરૂપના પુરુષ વિષયક પ્રત્યયમાં સંયમ કરવાથી પુરુષવિષયકપ્રજ્ઞા ઉત્પન્ન થાય છે. આવા પુરુષ વિષયક પ્રત્યય (જ્ઞાન)થી બુદ્ધિસત્ત્વરૂપ (બુદ્ધિમાં પ્રતિબિંબિત થયેલો) પુરુષ દેખાતો નથી, પણ સ્વયં પુરુષ પોતાના અવલંબનરૂપ પ્રત્યયને જુએ છે. આ વિષે કહ્યું છે : "વિજ્ઞાતાને કોનાવડે જાણવો ?" (બૃહ. ૩૫. ૨.૪.૧૪; ૪.૫.૧૫). ૩૫

तत्त्व वौशारदी

सत्त्वपुरुषयोरत्यन्तासंकीर्णयोः प्रत्ययाविशेषो भोगः परार्थत्वात् स्वार्थ-संयमात्पुरुषज्ञानम् । यत्र प्रकाशरूपस्यातिस्वच्छस्य नितान्ताभिभूतरजस्तमस्तया विवेकख्यातिरूपेण परिणतस्य बुद्धिसत्त्वस्यात्यन्तिकश्चैतन्यादसंकरस्तत्र कैव कथा रजस्तमसोर्जडस्वभावयोरित्याशयवान्सूत्रकारः सत्त्वपुरुषयोरित्युवाच । इममेवाभिप्रायं गृहीत्वा भाष्यकारोऽप्याह-बुद्धिसत्त्वं प्रख्याशीलमिति । न केवलं प्रख्याशीलमात्रम्, अपि तु विवेकख्यातिरूपेण परिणतम् । अतो नितान्तशुद्धप्रकाशतयात्यन्तसारूप्यं चैतन्येनेति संकर इत्यत आह-समानेति । सत्त्वेनोपनिबन्धनमविनाभावः संबन्धः समानं सत्त्वोपनिबन्धनं ययो रजस्तमसोस्ते तथोक्ते । वशीकारोऽभिभवः । असंकरमाह-तस्माच्चेति । चकारोऽप्यर्थः । केवलं रजस्तमोभ्यामित्यर्थः । परिणामिन इति वैधर्म्यमपरिणामिनः पुरुषादुक्तम् । प्रत्ययाविशेषः शान्तघोरमूढरूपाया बुद्धेश्चैतन्य-बिम्बोद्ग्राहेण चैतन्यस्य शान्ताद्याकाराध्यारोपश्चन्द्रमस इव स्वच्छसलिलप्रतिबिम्बितस्य तत्कम्पात्कम्पनारोपः । भोगहेतुमाह- दर्शितविषयत्वादिति असकृद्व्याख्यातम् (१।२; १।४; २।१७; २।२३) । ननु बुद्धिसत्त्वमस्तु पुरुषभिन्नम्, भोगस्तु पुंसः कुतो भिद्यत इत्यत आह-स भोगप्रत्ययो भोगरूपः प्रत्ययः सत्त्वस्यातः परार्थत्वाद् दृश्यो भोग्यः । सत्त्वं हि परार्थम्, संहतत्वात् । तद्धर्मश्च भोग इति सोऽपि परार्थः । यस्मै च परस्मा असौ तस्य भोक्तुर्भोग्यः । अथवानुकूलप्रतिकूलवेदनीयस्तु सुखदुःखानुभवो भोगः । न चायमात्मानमेवानुकूलयति प्रतिकूलयति वा, स्वात्मनि वृत्तिविरोधात् । अतोऽनुकूलनीयप्रतिकूलनीयार्थो भोगः । स भोक्तात्मा तस्य दृश्यो भोग्य इति ।

यस्तु तस्मात्परार्थाद्विशिष्ट इति । परार्थादिति पञ्चम्यन्यपदाध्याहारेण व्याख्याता । स्यादेतत्- पुरुषविषया चेत्प्रज्ञा हन्त भोः पुरुषः प्रज्ञायाः प्रज्ञेय इति प्रज्ञान्तरमेव तत्रेत्यनवस्थापात इत्यत आह- न च पुरुषप्रत्येयेनेति । अयमभिसन्धिः-

चित्या जडः प्रकाश्यते । न जडेन चितिः । पुरुषप्रत्ययस्त्वचिदात्मा कथं चिदात्मानं प्रकाशयेत् । चिदात्मात्वपराधीनप्रकाशो जडं प्रकाशयतीति युक्तम् । बुद्धिसत्त्वात्मनेत्य-चिद्रूपतादात्म्येन जडत्वमाह । बुद्धिसत्त्वगतपुरुषप्रतिबिम्बालम्बनात्पुरुषालम्बनं, न तु पुरुषप्रकाशनात्पुरुषालम्बनम् । बुद्धिसत्त्वमेव तु तेन प्रत्ययेन संक्रान्तपुरुषप्रतिबिम्बं पुरुषच्छ्रायापन्नं चैतन्यमालम्बत इति पुरुषार्थः । अत्रैव श्रुतिमुदाहरति-तथा ह्युक्तमीश्वरेण विज्ञातारमिति । न केनचिदित्यर्थः ॥३५॥

જ્યાં પ્રકાશરૂપ, અત્યંત સ્વચ્છ અને રજોગુણ, તમોગુણને સદંતર દબાવી દઈ, વિવેકખ્યાતિરૂપે પરિણમેલા બુદ્ધિસત્ત્વથી પણ પુરુષ તદ્દન ભિન્ન છે, ત્યાં જડ સ્વભાવના રજસ્, તમસ્‌ની તો વાત જ શી ? એવા આશયથી સૂત્રકાર "सत्त्वपुरुषयोः" એમ સત્ત્વનો ઉલ્લેખ કરે છે. સૂત્રકારના આવા અભિપ્રાયને ધ્યાનમાં લઈ ભાષ્યકાર પણ "बुद्धिसत्त्वं प्रख्याशीलम्"એમ સૂત્રની વ્યાખ્યાનો પ્રારંભ કરે છે. ફક્ત પ્રકાશશીલ નહીં પણ વિવેકખ્યાતિ રૂપે પરિણત સત્ત્વ, નિતાન્ત પ્રકાશરૂપ હોવાથી ચૈતન્ય જેવા સ્વરૂપનું છે, માટે એ બેમાં મિશ્રણ થવું સંભવિત છે. એના નિરાકરણ માટે "समान सत्त्वोपनिबंधने" વગેરેથી કહે છે કે રજસ્, તમસ્ સત્ત્વ સાથે અવિનાભાવ સંબંધ (એકબીજા વિના ટકી ન શકે એવો સંબંધ) થી જોડાયેલા છે, છતાં એ બંનેને વશ કરીને સત્ત્વ ફક્ત સત્ત્વપુરુષ ભિન્નતાના જ્ઞાનરૂપે પરિણમે છે "तस्माच्च" વગેરેથી સત્ત્વ-પુરુષના મિશ્રણનો અભાવ કહે છે. "च" શબ્દ અપિ (પણ)ના અર્થમાં પ્રયોજ્યો છે. કેવળ સત્ત્વથી નહીં, રજસ્, તમસ્‌થી પણ અસંકર છે, એવો અર્થ છે. "પરિણામી"થી અપરિણામી પુરુષથી સત્ત્વ વિરુદ્ધ ધર્મવાળું છે, એમ જણાવ્યું. વિશેષ પ્રત્યયનો અભાવ એટલે શાંત, ઘોર અને મૂઢ રૂપે પરિણમતી બુદ્ધિ ચૈતન્યનું પ્રતિબિંબ પોતાની અંદર ગ્રહણ કરે છે; આ કારણે સ્વચ્છ પાણીમાં પ્રતિબિંબિત ચંદ્રમાં જેમ પાણીના કંપનનો આરોપ થાય, એમ ચૈતન્યમાં શાંત વગેરે આકારોનો આરોપ થતો હોવાથી એ બેના સ્પષ્ટ જ્ઞાનનો વિવેક થતો નથી, એવો અર્થ છે.

"दर्शितविषयत्वात्" બુદ્ધિ પુરુષ સમક્ષ વિષયો દર્શાવે છે, વગેરેથી ભોગનો હેતુ કહે છે. આ વાત અગાઉ વારંવાર ૧.૨, ૧.૪, ૨.૧૭, ૨.૨૩ કહેવામાં આવી છે. ભલે. બુદ્ધિસત્ત્વ પુરુષથી ભિન્ન છે, પણ ભોગ પુરુષથી ભિન્ન કેવી રીતે હોઈ શકે ? એના જવાબમાં "स भोगप्रत्ययः सत्त्वस्य.."વગેરેથી કહે છે કે એ ભોગરૂપ પ્રત્યય કે અનુભવ સત્ત્વનો છે, તેથી બીજા માટે છે, અને એ કારણે એ દૃશ્ય કે ભોગ્ય છે. સંહત (અન્ય સાથે મળીને કાર્ય કરતું) હોવાથી સત્ત્વ બીજા માટે છે, ભોગ એનો ધર્મ છે, માટે એ પણ બીજાને અર્થે છે. જે પુરુષ માટે છે, એ

ભોક્તાનું ભોગ્ય છે અથવા અનુકૂળ અને પ્રતિકૂળ વેદનાવાળાં સુખ-દુઃખનો અનુભવ ભોગ છે. એ અનુભવ પોતાના માટે અનુકૂળ કે પ્રતિકૂળ ન હોઈ શકે. કારણ કે બે વિરોધી વૃત્તિઓ પોતાના વિષે ન હોઈ શકે, એટલે કે પોતે જ પોતાને અનુભવે (કર્તા-કર્મ એક હોય) એવું બને નહીં. તેથી અનુકૂળતા અને પ્રતિકૂળતા વસ્તુમાં હોય છે, અને પુરુષ એનો ભોક્તા છે, જેને માટે એ દૃશ્ય કે ભોગ્ય છે.

એવા પરાર્થ (ભોગ્ય)થી વિશિષ્ટ (ભિન્ન) પુરુષમાં સંયમ કરવાથી પુરુષનું જ્ઞાન થાય છે. "પરાર્થાત્" એમ પાંચમી વિભક્તિ પ્રયોજીને વ્યાખ્યા કરી છે.

ભલે. પણ પુરુષવિષયક પ્રજ્ઞા ઉત્પન્ન થતી હોય, તો પુરુષ પ્રજ્ઞા વડે જ્ઞેય (જાણવાયોગ્ય) થયો. એ પ્રજ્ઞાને જાણવા બીજી પ્રજ્ઞા જોઈએ, એમ અનવસ્થા દોષ થાય છે. એના જવાબમાં "ન ચ પુરુષપ્રત્યયેન બુદ્ધિસત્ત્વાત્મના પુરુષો દૃશ્યતે" વગેરેથી કહે છે કે ચિતિવડે જડ પ્રકાશિત થાય છે, જડ વડે ચિતિ નહીં. પુરુષવિષેનો પ્રત્યય તો જડ છે, એ ચિદાત્માને કેવી રીતે પ્રકાશિત કરે ? ચિદાત્મા સ્વતંત્ર પ્રકાશવાળો છે, અને જડને પ્રકાશિત કરે છે, એમ સમજવું યોગ્ય છે. "બુદ્ધિસત્ત્વાત્મના"થી જડ સાથેના તાદાત્મ્યથી જડપણું કહ્યું છે. બુદ્ધિસત્ત્વમાં રહેલા પુરુષના પ્રતિબિંબના આલંબનથી બુદ્ધિવડે પુરુષનું આલંબન કહ્યું, પુરુષને પ્રકાશિત કરવાના કારણે પુરુષનું આલંબન કહ્યું નથી. બુદ્ધિસત્ત્વ એ પ્રત્યયના કારણે પુરુષના સંક્રાન્ત થયેલા પ્રતિબિંબવાળું બનીને કે પુરુષના ચૈતન્યની છાયા ગ્રહણ કરીને ચૈતન્યનું આલંબન કરે છે, માટે એ પુરુષાર્થ (પુરુષ માટે) છે. આ વિષયમાં શ્રુતિ ટાંકે છે. ઈશ્વરે પણ કહ્યું છે : "વિજ્ઞાતાને કોના વડે જાણવો ?" અર્થાત્ કોઈનાથી પણ નહીં. ૩૫

★

ततः प्रातिभश्रावणवेदनादर्शास्वादवार्ता जायन्ते ॥३६॥

એનાથી (પુરુષમાં કરેલા સંયમથી) પ્રાતિભ, શ્રાવણ, વેદન, આદર્શ, આસ્વાદ અને વાર્તા ઉત્પન્ન થાય છે. ૩૬

ભાષ્ય

प्रातिभात्सूक्ष्मव्यवहितविप्रकृष्टातीतानागतज्ञानम् । श्रावणाद्दिव्यशब्द श्रवणम् । वेदनाद्दिव्यस्पर्शाधिगमः । आदर्शाद्दिव्यरूपसंवित् । आस्वादा-द्दिव्यरससंवित् । वार्तातो दिव्यगन्धविज्ञानमित्येतानि नित्यं जायन्ते ॥३६॥

પ્રાતિભાના બળે સૂક્ષ્મ, વ્યવહિત, વિપ્રકૃષ્ટ, અતીત અને અનાગત

પદાર્થોનું જ્ઞાન થાય છે. શ્રાવણથી દિવ્ય શબ્દ સંભળાય છે. વેદનથી દિવ્ય સ્પર્શનો અનુભવ થાય છે. આદર્શથી દિવ્ય રૂપનું જ્ઞાન થાય છે. આસ્વાદથી દિવ્ય રસનું જ્ઞાન થાય છે. વાર્તાથી દિવ્ય ગંધનું જ્ઞાન થાય છે. આ બધાં જ્ઞાન નિત્ય ઉત્પન્ન થાય છે. ૩૬

तत्त्व वैशारदी

स च स्वार्थसंयमो न यावत्प्रधानं स्वकार्यं पुरुषज्ञानमभिनिर्वर्तयति तावत्तस्य पुरस्ताद्या विभूतीराधत्ते ताः सर्वा दर्शयति-ततः प्रातिभश्रावणवेदनादर्शास्वादवार्ता जायन्ते । तदनेन योगजधर्मानुगृहीतानां मनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानां यथासंख्यं प्रातिभज्ञानदिव्यशब्दाद्यपरोक्षहेतुभावा उक्ताः । श्रोत्रादीनां पञ्चानां दिव्यशब्दाद्युपलम्भकानां तान्त्रिक्यः संज्ञाः श्रावणाद्याः । सुगमं भाष्यम् ॥३६॥

સ્વાર્થસંયમ જ્યાં સુધી પોતાના મુખ્ય કર્તવ્યરૂપ પુરુષજ્ઞાનને ઉત્પન્ન કરતો નથી, ત્યાં સુધી એ પહેલાં જે જે વિભૂતિઓ લાવે છે, એ બધી "ततः प्रातिभश्रावण.." વગેરે સૂત્રથી દર્શાવે છે. યોગ વડે ઉત્પન્ન થતા ધર્મથી અનુગૃહીત ચિત્તમાં શ્રોત્ર, ત્વચા, ચક્ષુ, જિહ્વા અને નાસિકા વડે ક્રમશઃ દિવ્ય શબ્દ વગેરેનું અપરોક્ષ જ્ઞાન થાય છે, એમાં હેતુભૂત પ્રાતિભ જ્ઞાન વિષે સૂત્ર માહિતી આપે છે. દિવ્ય શબ્દ વગેરેનું જ્ઞાન મેળવનાર શ્રોત્ર વગેરે પાંચનાં તાંત્રિક નામ શ્રાવણ વગેરે છે. ભાષ્ય સરળ છે. ૩૬

★

ते समाधावुपसर्गा व्युत्थाने सिद्धयः ॥३७॥

એ સમાધિમાં વિઘ્નો અને વ્યુત્થાનમાં સિદ્ધિઓ છે. ૩૭

भाष्य

ते प्रातिभादयः समाहितचित्तस्योत्पद्यमाना उपसर्गाः, तद्दर्शन-प्रत्यनीकत्वात् । व्युत्थितचित्तस्योत्पद्यमानाः सिद्धयः ॥३७॥

એ પ્રાતિભ વગેરે સમાહિતચિત્તવાળા યોગી માટે ઉત્પન્ન થતાં વિઘ્નો છે. કારણ કે એ પુરુષદર્શનનાં વિરોધી છે. વ્યુત્થિત ચિત્તવાળા યોગી માટે ઉત્પન્ન થતી સિદ્ધિઓ છે. ૩૭

तत्त्व वैशारदी

कदाचिदात्मविषयसंयमे प्रवृत्तस्तत्प्रभावादमूरर्थान्तरसिद्धीरधिगम्य कृतार्थंमन्यः

संयमाद्विरमेदत आह-ते समाधावुपसर्गा व्युत्थाने सिद्धयः । व्युत्थितचित्तो हि ताः सिद्धीरभिमन्यते, जन्मदुर्गत इव द्रविणकणिकामपि द्रविणसंभारम् । योगिना तु समाहितचित्तेनोपनताभ्योऽपि ताभ्यो विरन्तव्यम् । अभिसंहिततापत्रयात्यन्तिकोपशमरूपपरमपुरुषार्थः स खल्वयं कथं तत्प्रत्यनीकासु सिद्धिषु रज्येतेति सूत्रभाष्ययोरर्थः ॥३७॥

આત્મવિષયક સંયમમાં પ્રવૃત્ત થયેલો યોગી, એના પ્રભાવથી આવી બીજી બાબતોની સિદ્ધિ મેળવીને હું કૃતાર્થ થયો, એમ માની વિરમે નહીં, એ માટે "ते समाधावुपसर्गाः" વગેરે સૂત્રથી કહે છે કે જન્મથી દરિદ્ર પુરુષ ધનની કણિકાઓ મેળવીને ખજાનો મળ્યો હોય એમ માને, એમ વ્યુત્થિતચિત્તવાળો યોગી એમને સિદ્ધિઓ ગણે છે. સમાહિત ચિત્તવાળા યોગીએ આવી સિદ્ધિઓ મળે તો પણ ન સ્વીકારવી જોઈએ. ત્રણ તાપોથી ઘેરાયેલો, એમની આત્યંતિક શાન્તિરૂપ પરમ પુરુષાર્થ માટે પ્રવૃત્ત થયેલો યોગી, એની વિરોધી આવી સિદ્ધિઓમાં કેવી રીતે રાગવાળો બને, એવો સૂત્રભાષ્યનો અર્થ છે. ૩૭

★

बन्धकारणशैथिल्यात्प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः ॥३८॥

બંધનું કારણ શિથિલ થતાં, અને ચિત્તના પ્રચારના જ્ઞાનથી બીજાના શરીરમાં પ્રવેશ થઈ શકે છે. ૩૮

ભાષ્ય

लोलीभूतस्य मनसोऽप्रतिष्ठस्य शरीरे कर्माशयवशाद् बन्धः-प्रतिष्ठेत्यर्थः । तस्य कर्मणो बन्धकारणस्य शैथिल्यं समाधिबलाद्भवति । प्रचारसंवेदनं च चित्तम्य समाधिजमेव, कर्मबन्धक्षयात्स्वचित्तस्य प्रचारसंवेदनाच्च योगी चित्तं स्वशरीरान्निष्कृष्य शरीरान्तरेषु निक्षिपति । निक्षिप्तं चित्तं चेन्द्रियाण्यानुपतन्ति । यथा मधुकरराजानं मक्षिका उत्पतन्तमनूत्पतन्ति निविशमानमनुनिविशन्ते, तथेन्द्रियाणि परशरीरावेशे चित्तमनुविधीयन्त इति ॥३८॥

લોલકની જેમ સદા અસ્થિર અને ભટકતું મન કર્માશયના કારણે શરીર સાથે બંધાય એને બંધ કે પ્રતિષ્ઠા કહે છે. બંધકારણરૂપ કર્મની શિથિલતા

સમાધિના બળે થાય છે. ચિત્તના પ્રચારનું જ્ઞાન પણ સમાધિથી ઉત્પન્ન થાય છે. કર્મબંધનો ક્ષય થતાં અને ચિત્તના પ્રચારનું જ્ઞાન થતાં, યોગી પોતાના શરીરમાંથી ચિત્તને બહાર કાઢીને અન્ય શરીરોમાં દાખલ કરે છે. ચિત્તની પાછળ ઇન્દ્રિયો પણ દાખલ થાય છે, જેમ મધમાખીઓનો રાજા ઊડે કે બેસે એની પાછળ મધમાખીઓ ઊડે કે બેસે એમ અન્ય શરીરમાં પ્રવેશ કરતા ચિત્તની પાછળ ઇન્દ્રિયો પણ પ્રવેશ કરે છે. ૩૮

तत्त्व वैशारदी

तदेवं ज्ञानरूपमैश्वर्यं पुरुषदर्शनान्तं संयमफलमुक्त्वा क्रियारूपमैश्वर्यं संयममफलमाह-बन्धकारणशैथिल्यात्प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः । समाधिबलादिति । बन्धकारणविषयसंयमबलात् । प्राधान्यात्समाधिग्रहणम् । प्रचरत्यनेनास्मिन्वेति प्रचारः । चित्तस्य गमागमाध्वानो नाड्यः । तस्मिन्प्रचारे संयमात्तद्वेदनम् । तस्माच्च बन्धकारणशैथिल्यात्र तेन प्रतिबध्यते । अप्रतिबद्धमप्युन्मार्गेण गच्छन्न स्वशरीरादप्रत्यूहं निष्क्रामति । न च परशरीरमाविशति । तस्मात्तत्प्रचारोऽपि ज्ञातव्यः । इन्द्रियाणि च चित्तानुसारीणि परशरीरे यथाधिष्ठानं निविशन्त इति ॥३८॥

પુરુષદર્શન પહેલાંનું જ્ઞાનરૂપ સંયમફળ કે ઐશ્વર્ય કહીને, "બંધકારણ શૈથિલ્યાત્" વગેરે સૂત્રથી ક્રિયારૂપ સંયમફળ કે ઐશ્વર્ય વર્ણવે છે. સંયમમાં સમાધિ મુખ્ય હોવાથી બંધકારણરૂપ કર્મની શિથિલતા સમાધિથી થાય છે, એમ સમાધિ શબ્દ પ્રયોજ્યો છે. જેના વડે કે જેની અંદર ગતિ થાય એને પ્રચાર કહે છે. નાડીઓ ચિત્તના પ્રચાર (જવા-આવવા)ના માર્ગો છે. એમાં સંયમ કરવાથી એનું જ્ઞાન થાય છે. એનાથી બંધનના કારણમાં શિથિલતા થતાં બંધનનો અભાવ થાય છે. ચિત્ત બંધાયેલું ન હોય, છતાં અવળા માર્ગે ગતિ કરે તો પોતાના શરીરમાંથી નિર્વિઘ્ને નીકળીને અન્ય શરીરમાં પ્રવેશી શકતું નથી. માટે એનો પ્રચારમાર્ગ જાણવો જરૂરી છે. ચિત્તને નિત્ય અનુસરતી ઇન્દ્રિયો પણ અન્ય શરીરમાં યોગ્ય સ્થાનોમાં પ્રવેશે છે. ૩૮

★

उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च ॥३९॥

ઉદાનવાયુના જયથી પાણી, કીચડ અને કાંટા વગેરે સાથે સંપર્ક થતો નથી અને ઉત્ક્રાન્તિ થાય છે. ૩૯

भाष्य

समस्तेन्द्रियवृत्तिः प्राणादिलक्षणा जीवनम् । तस्य क्रिया पञ्चतयी- प्राणो मुखनासिकागतिराहृदयवृत्तिः । समं नयनात्समान आनाभिवृत्तिः । अपनयनादपान आपादतलवृत्तिः । उन्नयनादुदान आशिरोवृत्तिः । व्यापी व्यान इति । एषां प्रधानः प्राणः । उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च प्रायणकाले भवति, तां वशित्वेन प्रतिपद्यते ॥३९॥

પ્રાણ વગેરેથી લક્ષિત થતી, બધી ઇન્દ્રિયોની પ્રવૃત્તિ જીવન છે. એ પાંચ રીતે કાર્ય કરે છે. પ્રાણ મુખ અને નાસિકાથી હૃદય સુધી ગતિશીલ રહે છે. સમાનપણે રસાદિ બધે પહોંચાડતો સમાન નાભિ સુધી ગતિ કરે છે. અપનયન-દૂર કરનાર હોવાથી અપાન પગનાં તળિયાં સુધી ગતિ કરે છે. ઉપરની તરફ ઉદાન મસ્તક સુધી ગતિ કરે છે. વ્યાન બધે વ્યાપીને રહે છે. આ બધામાં પ્રાણ મુખ્ય છે. ઉદાનજયથી યોગી પાણી, કાદવ, કાંટા વગેરેથી અસ્પૃષ્ટ રહે છે, અને મરણવખતે ઉત્ક્રાન્તિ-સ્વેચ્છાથી ગતિ કરે છે. ૩૯

तत्त्व वैशारदी

उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च । समस्तेन्द्रियवृत्तिर्जीवनम् । प्राणादिलक्षणा प्राणादयो लक्षणं यस्याः सा तथोक्ता । द्वयीन्द्रियाणां वृत्तिर्बाह्याभ्यन्तरी च । बाह्या रूपाद्यालोचनलक्षणा । आभ्यन्तरी तु जीवनम् । स हि प्रयत्नभेदः शरीरोपगृहीतमारुतक्रियाभेदहेतुः । सर्वकरणसाधारणः । यथाहुः-

सामान्यकरणवृत्तिः प्राणाद्या वायवः वञ्च । (सां. का. २९) इति । तैरस्य लक्षणीयत्वात्तस्य प्रयत्नस्य क्रिया कार्यं पञ्चतयी । प्राण आ नासिकाग्रादा च हृदयादवस्थितः । अशितपीताहारपरिणतिभेदं रसं तत्र तत्र स्थाने सममनुरूपं नयन्समानः । आ हृदयादा च नाभेरस्यावस्थानम् । मूत्रपुरीषगर्भादीनामपनयनहेतुरपानः । आ नाभेरा च पादतलादस्य वृत्तिः । उन्नयनादूर्ध्वं नयनाद्रसादीनामुदानः । आ नासिकाग्रादा च शिरसो वृत्तिरस्य । व्यापी व्यानः । एषामुक्तानां प्रधानं प्राणः । तदुत्क्रमे सर्वोत्क्रमश्रुतेः 'प्राणमुत्क्रामन्तमनु सर्वे प्राणा उत्क्रामन्ति" (बृहदा. ४।४।२) इति तदेवं प्राणादीनां क्रियास्थानभेदेन भेदं प्रतिपाद्य सूत्रार्थमवधारयति-उदानजयादिति । उदाने कृतसंयमस्तज्जयाज्जलादिभिर्न प्रतिहन्यते । उत्क्रान्तिश्चार्चिरादिमार्गेण भवति प्रायणकाले । तस्मात्तामुत्क्रान्तिं वशित्वेन प्रतिपद्यते । प्राणादिसंयमात्तद्विजये विभूतय एताः क्रियास्थानविजयादिभेदात्प्रतिपत्तव्याः ॥३९॥

પ્રાણ વગેરેથી લક્ષિત થતી બધી ઇન્દ્રિયોની પ્રવૃત્તિ જીવન છે. ઇન્દ્રિયોની બાહ્ય અને આંતર એમ બે પ્રકારની વૃત્તિ છે. રૂપ વગેરેની આલોચના બહારની અને જીવન અંદરની વૃત્તિ છે. એ પ્રયત્નભેદ શરીરવર્તી વાયુની ક્રિયાના ભેદનો હેતુ છે. એ બધાં કરણોમાં સમાન છે. કહ્યું છે :- "પ્રાણ વગેરે પાંચ વાયુઓ બધાં કરણોમાં સમાનપણે રહે છે." (સાંખ્ય કારિકા, ૨૯). એમનાથી લક્ષિત થતું હોવાથી એ પ્રયત્નનું કાર્ય પાંચ પ્રકારનું છે. પ્રાણ નાસિકાના અગ્રભાગથી હૃદય સુધી રહેલો છે. ખાધેલા, પીધેલા આહારના પરિણામ રૂપ રસોને તે તે સ્થાનમાં સમાન કે અનુરૂપપણે લઈ જતો હોવાથી સમાન કહેવાતો વાયુ હૃદયથી નાભિસુધી રહે છે. મળ, મૂત્ર, ગર્ભ વગેરેને દૂર હડસેલવામાં હેતુભૂત અપાન વાયુ નાભિથી પગનાં તળિયાં સુધી પ્રવર્તે છે. રસાદિને ઊપર લઈ જનાર ઉદાનવાયુ નાસિકાના અગ્રભાગથી મસ્તક સુધી ગતિશીલ રહે છે. વ્યાન બધે વ્યાપક છે. આ બધામાં પ્રાણ મુખ્ય છે. કારણ કે એના ઉત્ક્રમણથી બધાના ઉત્ક્રમણની શ્રુતિ છે. "પ્રાણનું ઉત્ક્રમણ થતાં, બધા પ્રાણો એની પાછળ ઉત્ક્રમણ કરે છે." (બૃહ. ઉપ. ૪૪.૨)

આમ સ્થાન અને કાર્યના ભેદથી પ્રાણ વગેરેના ભેદને રજૂ કરી, "ઉદાનજયાત્" વગેરે સૂત્રના અર્થનો નિશ્ચય કરે છે. ઉદાનમાં સંયમ કરીને એને જીતવાથી જળ વગેરેથી પ્રતિઘાત પામતો નથી, અને મૃત્યુ વખતે અર્ચિરાદિમાર્ગે ઉત્ક્રાન્તિ થાય છે. ઉત્ક્રાન્તિને પોતાના વશમાં કરે છે. પ્રાણ વગેરે પર સંયમ વડે, એમનો જય થતાં, એમના સ્થાન અને કાર્યના વિજયોને પણ જાણી લેવા જોઈએ.૩૯

★

समानजयाज्ज्वलनम् ॥૪૦॥

સમાનવાયુના જયથી અગ્નિની જેમ પ્રદીપ્ત બને છે. ૪૦

भाष्य

जितसमानस्तेजस उपध्मानं कृत्वा ज्वलति ॥૪૦॥

સમાનને જીતનાર યોગી તેજને ઉત્તેજિત કરી પ્રદીપ્ત થાય છે. ૪૦

तत्त्व वैशारदी

समानजयाज्ज्वलनम् । तेजसः शरीरस्योपध्मानमुत्तेजनम् ॥૪૦॥

શરીરસ્થિત તેજને ઉત્તેજિત કરવું ઉપધ્માન કહેવાય છે. ૪૦

★

श्रोत्राकाशयोः संबन्धसंयमाद्दिव्यं श्रोत्रम् ॥४१॥

શ્રોત્ર અને આકાશના સંબંધ પર સંયમ કરવાથી દિવ્ય શ્રોત્ર પ્રાપ્ત થાય છે.૪૧

भाष्य

सर्वश्रोत्राणामाकाशं प्रतिष्ठा सर्वशब्दानां च । यथोक्तम्-तुल्यदेशश्रवणानामेकदेशश्रुतित्वं सर्वेषां भवतीति । तच्चैतदाकाशस्य लिङ्गम् अनावरणं चोक्तम् ।

तथाऽमूर्तस्यानावरणदर्शनाद्विभुत्वमपि प्रख्यातमाकाशस्य । शब्दग्रहणानुमितं श्रोत्रम्, बधिराबधिरयोरेकः शब्दं गृह्णात्यपरो न गृह्णातीति, तस्माच्छ्रोत्रमेव शब्दविषयम् । श्रोत्राकाशयोः संबन्धे कृतसंयमस्य योगिनो दिव्यं श्रोत्रं प्रवर्तते ॥४१॥

બધાં શ્રોત્ર અને શબ્દો આકાશમાં પ્રતિષ્ઠિત છે. કહ્યું છે કે સમાન સ્થાનવાળાં બધાં શ્રવણોનું એકદેશશ્રુતિપણું છે. એ આકાશના અસ્તિત્વને જણાવતું ચિહ્ન છે. આવરણનો અભાવ પણ આકાશનું લક્ષણ કહેવામાં આવ્યું છે. અને અમૂર્ત તથા આવરણ વગરનું હોવાથી આકાશ વિભુ (વ્યાપક) છે, એ પ્રસિદ્ધ છે. શબ્દના ગ્રહણથી શ્રોત્રનું અનુમાન થાય છે. બહેરો માણસ શબ્દ ગ્રહણ કરતો નથી, પણ જે બહેરો નથી એ શબ્દ ગ્રહણ કરે છે. તેથી શબ્દ શ્રોત્રનો વિષય છે, એમ સિદ્ધ થાય છે. શ્રોત્ર અને આકાશના સંબંધ પર સંયમ કરનાર યોગીને દિવ્ય શ્રોત્રની પ્રાપ્તિ થાય છે.૪૧

तत्त्व वैशारदी

स्वार्थसंयमादन्वाचयशिष्टं श्रावणद्युक्तम् । संप्रति श्रावणाद्यर्थादेव संयमाच्छ्रावणादि भवतीत्याह-श्रोत्राकाशयोः संबन्धसंयमाद्दिव्यं श्रोत्रम् । संयमविषयं श्रोत्राकाशयोः संबन्धमाधाराधेयभावमाह-सर्वश्रोत्राणामाहङ्कारिकाणामप्याकाशं कर्णशष्कुलीविवरं प्रतिष्ठा तदायतनं श्रोत्रम्, तदुपकारापकाराभ्यां श्रोत्रस्योपकारापकारदर्शनात् । शब्दानां च श्रोत्रसहकारिणां पार्थिवादिशब्दग्रहणे कर्तव्ये कर्णशष्कुलीसुषिरवर्ति श्रोत्रं स्वाश्रयनभोगतासाधारणशब्दमपेक्षते । गन्धादिगुणसहकारिभिर्घ्राणादिभिर्बाह्यपृथिव्यादिवर्तिगन्धाद्यालोचनं कार्यं दृष्टम् । आहङ्कारिकमपि घ्राणरसनत्वक्चक्षुःश्रोत्रं भूताधिष्ठानमेव, भूतोपकारापकाराभ्यां घ्राणादीनामुपकारापकारदर्शनादित्युक्तम् । तच्चेदं

श्रोत्रमाहङ्कारिकमयःप्रतिममयस्कान्तमणिकल्पेन वक्तृवक्त्रसमुत्पन्नेन वक्त्रस्थेन शब्देनाकृष्टं स्ववृत्तिपरम्परया वक्तृवक्त्रमागतं शब्दमालोचयति । तथा च दिग्देशवर्तिशब्दप्रतीतिः प्राणभृन्मात्रस्य नासति बाधकेऽप्रमाणीकृता भविष्यतीति । तथा च पञ्चशिखस्य वाक्यम्-तुल्यदेशश्रवणानामेकदेशश्रुतित्वं सर्वेषां भवतीति । तुल्यदेशानि श्रवणानि श्रोत्राणि येषां चैत्रादीनां ते तथोक्ताः । सर्वेषां श्रवणान्याकाशवर्तीनीत्यर्थः । तच्च श्रोत्राधिष्ठानमाकाशं शब्दगुणतन्मात्रादुत्पन्नं शब्दगुणकं येन शब्देन सहकारिणा पार्थिवादीञ्शब्दान्गृह्णाति । तस्मात्सर्वेषामेकजातीया श्रुतिः शब्द इत्यर्थः । तदनेन श्रोत्राधिष्ठानत्वमाकाशस्य शब्दगुणत्वं च दर्शितमिति । तच्चैकदेशश्रुतित्वमाकाशस्य लिङ्गम् । सा ह्येकजातीया शब्दव्यञ्जिका श्रुतिर्यदाश्रया तदेवाकाशशब्दवाच्यम् । न हीदृशीं श्रुतिमन्तरेण शब्दव्यक्तिः । न चेदृशी श्रुतिः पृथिव्यादिगुणः । तस्य स्वात्मनि व्यङ्ग्यव्यञ्जकत्वानुपपत्तेरिति । अनावरणं चाकाशलिङ्गम् । यद्याकाशं नाभविष्यदन्योन्य-संपिण्डितानि मूर्तानि न सूचीभिरप्यभेत्स्यन्त । ततश्च सर्वैरेव सर्वमावृतं स्यात् । न च मूर्तद्रव्याभावमात्रादेवानावरणम् । अस्याभावस्य भावाश्रितत्वेन तदभावेऽभावात् । न च चितिशक्तिस्तदाश्रया भवितुमर्हति । अपरिणामितयावच्छेदकत्वाभावात् । दिक्कालादयः पृथिव्यादिद्रव्यव्यतिरिक्ताः सन्ति । तस्मात्तादृशः शब्दतन्मात्रस्य परिणतिभेदो नभस एवेति सर्वमवदातम् ।

अनावरणे चाकाशलिङ्गे सिद्धे यत्र यत्रानावरणं तत्र तत्र सर्वत्राकाशमिति सर्वगतत्वमप्याकाशस्य सिद्धमित्याह-तथाऽमूर्तस्येति । श्रोत्रसद्भावे प्रमाणमाह-शब्दग्रहणेति । क्रिया हि करणसाध्या दृष्टा । यथा छिद्रादिर्वास्यादिसाध्या । तदिह शब्दग्रहणक्रियायापि करणसाध्यया भवितव्यम् । यच्च करणं तच्च श्रोत्रमिति । अथास्याश्चक्षुरादय एव कस्मात्करणं न भवन्तीत्यत आह-बधिराबधिरयोरिति । अन्वयव्यतिरेकाभ्यामवधारणम् । उपलक्षणं चैतत् । त्वग्वातयोश्चक्षुस्तेजसो रसनोदकयोर्नासिकापृथिव्योः संबन्धसंयमाद्दिव्यत्वगाद्यप्यूहनीयम् ॥४१॥

સ્વાર્થ (પુરુષવિષે) સંયમથી શ્રાવણ વગેરે અવાન્તર ફળરૂપે સિદ્ધ થાય છે, એમ અગાઉ કહ્યું. હવે શ્રાવણ વગેરે માટે સંયમ કરવાથી શ્રાવણાદિ સિદ્ધ થાય છે એમ "શ્રોત્રાકાશયોઃ" વગેરે સૂત્રથી કહે છે. "સર્વશ્રોત્રાણાં આકાશં પ્રતિષ્ઠા..." વગેરેથી ભાષ્યકાર સંયમના વિષયરૂપ શ્રોત્ર અને આકાશના આધાર-આધેયભાવને કહે છે. અહંકારથી ઉત્પન્ન થતાં બધાં શ્રોત્રોની કાનના છિદ્રરૂપ આકાશ પ્રતિષ્ઠા છે, અને શ્રોત્રનું આયતન (રહેઠાણ) છે. કારણ કે એના ઉપકાર કે અપકારથી શ્રોત્રનો ઉપકાર કે અપકાર થતો દેખાય છે. શ્રોત્રના સહકારી પૃથ્વી વગેરેના શબ્દોને ગ્રહણ કરવાના હોય, ત્યારે કાનના છિદ્રમાં રહેલી શ્રોત્ર-ઇન્દ્રિય, પોતાના આશ્રય આકાશમાં

રહેલા અસાધારણ શબ્દની અપેક્ષા રાખે છે. ગંધ વગેરે ગુણો સાથે સહકાર કરતી ઘ્રાણ વગેરે ઇન્દ્રિયો વડે બહાર પૃથ્વી વગેરેમાં રહેલા ગંધ વગેરેનું આલોચન કાર્ય થતું જોવામાં આવે છે. અહંકારથી ઉત્પન્ન થયેલી ઘ્રાણ, રસના, ત્વચા, ચક્ષુ અને શ્રોત્ર ઇન્દ્રિયો ભૂતોના આશ્રયે રહે છે. કારણ કે ભૂતોના ઉપકાર કે અપકારથી ઘ્રાણ વગેરેનો ઉપકાર કે અપકાર થતો જોવામાં આવે છે. અહંકારથી પેદા થયેલી શ્રોત્ર ઇન્દ્રિય લોખંડ(ની સળી) જેવી છે. એ લોહચુંબક જેવા બોલનારના મુખથી ઉત્પન્ન થતા અને મુખમાં રહેતા શબ્દથી ખેંચાઈને, પોતાની વૃત્તિ-પરંપરાથી બોલનારના મુખ સુધી આવીને, શબ્દનું ગ્રહણ કરે છે. દિશાઓના વિવિધ પ્રદેશોમાં રહેતો શબ્દ, બાધક વિઘ્ન ન હોય તો બધાં પ્રાણીઓ માટે સમાનપણે પ્રામાણિક ગણાય છે. પંચશિખાચાર્ય કહે છેઃ "સમાન દેશમાં શ્રવણવાળા લોકોનું શ્રવણકેન્દ્ર એકદેશ(આકાશ)માં છે." ચૈત્ર વગેરે મનુષ્યોની શ્રવણેન્દ્રિય સમાન દેશવાળી છે. બધાની શ્રવણેન્દ્રિય આકાશમાં રહેલી છે. અને શ્રોત્રનું અધિષ્ઠાનરૂપ આકાશ શબ્દ ગુણવાળી તન્માત્રાથી ઉત્પન્ન થયું છે, તેથી શબ્દગુણવાળું છે. એ સહકારી શબ્દથી પૃથ્વી વગેરેના શબ્દોનું ગ્રહણ કરે છે. માટે બધાંની શ્રુતિ (કે શબ્દ) એક જાતિની છે. આનાથી આકાશ શ્રોત્રનું આશ્રય અને શબ્દગુણવાળું છે, એમ સ્પષ્ટ થયું. આ એકદેશશ્રુતિપણું આકાશનું ચિન્હ છે. એક જાતિની, શબ્દને વ્યક્ત કરતી શ્રુતિ જેના આશ્રયે રહે છે એ આકાશશબ્દથી ઓળખાય છે. આવી શ્રુતિ વગર શબ્દ પ્રગટ થાય નહીં. વળી આ શ્રુતિ પૃથ્વી વગેરેનો ગુણ નથી. કારણ કે એ પોતાનામાં વ્યંગ્ય-વ્યંજક ભાવ ધરાવે છે, એમ માનવું યોગ્ય નથી.

આવરણનો અભાવ આકાશનું ચિહ્ન છે. આકાશ ન હોય તો ભૂતો પરસ્પર પિંડની જેમ એકીભૂત બનીને સોય વડે પણ ભેદી ન શકાય એવાં બની જાય. બધું બધા વડે આવૃત થાત. મૂર્ત દ્રવ્યનો અભાવમાત્ર આવરણનો અભાવ (આકાશ) નથી. અભાવ ભાવના આશ્રયે રહે છે. માટે ભાવના અભાવમાં અભાવનો પણ અભાવ થાય. વળી ચિતિશક્તિ અનાવરણનો આશ્રય બની શકે નહીં, કારણ કે એ અપરિણામી હોવાથી કોઈનો આશ્રય બને નહીં. કાળ વગેરે પૃથ્વી વગેરે દ્રવ્યોથી અતિરિક્ત (ભિન્ન) નથી માટે એવો પરિણામ ભેદ આકાશનો જ છે, એમ સિદ્ધ થયું. બાકીનું બધું સ્પષ્ટ છે.

"તથા અમૂર્ત્તસ્ય.." વગેરેથી કહે છે કે અનાવરણ આકાશનું ચિન્હ સિદ્ધ થતાં, જ્યાં જ્યાં આવરણ નથી ત્યાં બધે જ આકાશ છે, એમ આકાશનું સર્વવ્યાપકત્વ પણ સિદ્ધ થયું. "શબ્દગ્રહણાનુમિતં શ્રોત્રમ્" વગેરેથી શ્રોત્રના અસ્તિત્વમાં પ્રમાણ રજૂ કરે છે. ક્રિયા કરણ (સાધન)થી સિદ્ધ થતી જોવામાં આવે છે. જેમ વાંસલા વગેરેથી છિદ્ર વગેરે સિદ્ધ થાય છે. એમ શબ્દગ્રહણ રૂપ ક્રિયા પણ કરણ સાધ્ય

હોવી જોઈએ. એ કરણ શ્રોત્ર છે. ચક્ષુ વગેરે એના કરણ કેમ ન બની શકે ? એના જવાબમાં "બધિરાબધિરયોઃ' વગેરેથી કહે છે કે બહેરો માણસ શબ્દ ગ્રહણ કરતો નથી અને બહેરો ન હોય એવો માણસ ગ્રહણ કરે છે, એમ અન્વયવ્યતિરેક (સહભાવ અને અસહભાવના નિયમ)થી શબ્દગ્રહણનું કરણ શ્રોત્ર સિદ્ધ થાય છે. આ ઉપલક્ષણ છે. ત્વચા અને વાયુ, ચક્ષુ અને તેજ, જિહ્વા અને રસ, નાસિકા અને પૃથ્વીના સંબંધ પર સંયમ કરવાથી દિવ્ય ત્વચા વગેરેની પ્રાપ્તિ પણ જાણવી જોઈએ. ૪૧

★

कायाकाशयोः संबन्धसंयमाल्लघुतूलसमापत्तेश्चा-
काशगमनम् ॥४२॥

શરીર અને આકાશના સંબંધ પર સંયમ કરવાથી અથવા હળવા રૂ (જેવા પદાર્થો)ની સમાપત્તિથી આકાશગમન થાય છે. ૪૨

भाष्य

यत्र कायस्तत्राकाशं तस्यावकाशदानात् कायस्य, तेन संबन्धः प्राप्तिः । तत्र कृतसंयमो जित्वा तत्संबन्धं लघुषु वा तूलादिष्वापरमाणुभ्यः समापत्तिं लब्ध्वा जितसंबन्धो लघुर्भवति । लघुत्वाच्च जले पादाभ्यां विहरति, ततस्तूर्णनाभितन्तुमात्रे विहृत्य रश्मिषु विहरति । ततो यथेष्टमाकाशगतिरस्य भवतीति ॥४२॥

જ્યાં શરીર છે ત્યાં આકાશ છે, કારણ કે એ શરીરને અવકાશ પ્રદાન કરે છે. એ બેના સંબંધને પ્રાપ્તિ કહે છે. એમાં સંયમ કરીને એ સંબંધને જીતવાથી અથવા રૂથી માંડીને પરમાણુ સુધીના હળવા પદાર્થો પર સંયમ વડે સમાપતિથી સંબંધને જીતીને યોગી હળવો બને છે. હળવો બનવાના કારણે પાણીપર પગવડે ચાલે છે, પછી કરોળિયાના સૂક્ષ્મ તંતુમાત્રમાં વિહાર કરીને સૂર્યકિરણોમાં વિહાર કરે છે. પછી સ્વેચ્છાથી આકાશમાં ગતિ કરે છે. ૪૨

तत्त्व वैशारदी

कायाकाशयोः संबन्धसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम् । कायाकाशसंबन्ध-संयमाद्वा लघुनि वा तूलादौ कृतसंयमात्समापत्तिं चेतसस्तत्स्थतदञ्जनतां लब्ध्वेति ।

सिद्धिक्रममाह-जल इति ॥४२॥

શરીર અને આકાશના સંબંધ પર કે હળવા રૂ જેવા પદાર્થો પર સંયમ વડે ચિત્તની સમાપત્તિ- એમાં રહીને એના ગુણો ગ્રહણ કરવાથી આકાશમાં ગતિ સિદ્ધ થાય છે. "જલે પાદાભ્યાં વિહરતિ..." વગેરેથી સિદ્ધિક્રમ કહે છે. ૪૨

★

बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः ॥४३॥

(શરીરની) બહાર અકલ્પિત વૃત્તિ મહાવિદેહા કહેવાય છે. એનાથી પ્રકાશના આવરણનો ક્ષય થાય છે. ૪૩

भाष्य

शरीराद्बहिर्मनसो वृत्तिलाभो विदेहा नाम धारणा ।

सा यदि शरीरप्रतिष्ठस्य मनसो बहिर्वृत्तिमात्रेण भवति सा कल्पितेत्युच्यते । या तु शरीरनिरपेक्षा बहिर्भूतस्यैव मनसो बहिर्वृत्तिः सा खल्वकल्पिता । तत्र कल्पितया साधयन्त्यकल्पितां महाविदेहामिति, यया परशरीराण्याविशन्ति योगिनः । ततश्च धारणातः प्रकाशात्मनो बुद्धिसत्त्वस्य यदावरणं क्लेशकर्मविपाकत्रयं-रजस्तमोमूलं तस्य च क्षयो भवति ॥४३॥

શરીરથી બહાર મનની વૃત્તિ સ્થિર થાય એને વિદેહા ધારણા કહે છે. જો શરીરમાં પ્રતિષ્ઠિત મન વૃત્તિમાત્રથી બહાર સ્થિર થાય તો એ કલ્પિત કહેવાય છે. પરંતુ શરીરની અપેક્ષાવિના બહાર નીકળી ગયેલા મનની વૃત્તિ બહાર સ્થિર થાય એ અકલ્પિત છે. કલ્પિતવડે અકલ્પિત કે મહાવિદેહા સિદ્ધ કરવામાં આવે છે, જેને લીધે યોગીઓ બીજાના શરીરમાં પ્રવેશ કરે છે. પછી ધારણાથી રજસ્, તમસ્ ના કારણે થયેલું બુદ્ધિસત્ત્વનું ક્લેશ, કર્મ અને વિપાક એ ત્રણરૂપ આવરણ નષ્ટ થાય છે. ૪૩

तत्त्व वैशारदी

अपरमपि परशरीरावेशहेतुं संयमं क्लेशकर्मविपाकक्षयहेतुमाह-बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः । विदेहामाह-शरीरादिति । अकल्पिताया महाविदेहाया य उपायस्तत्प्रदर्शनाय कल्पितां विदेहामाह-सा यदीति । वृत्तिमात्रं कल्पनाज्ञानमात्रं तेन । महाविदेहामाह-या त्विति । उपायोपेयते कल्पिताकल्पितयोराह-

तत्रेति । किं परशरीरावेशमात्रमितो नेत्याह-ततश्चेति । ततो धारणातो महाविदेहाया मनःप्रवृत्तेः सिद्धेः । क्लेशश्च कर्म च ताभ्यां विपाकत्रयं जात्यायुर्भोगाः । तदेतद्रजस्तमोमूलं विगलितरजस्तमसः सत्त्वमात्राद्विवेकख्यातिमात्रसमुत्पादात् । तदेतद्विपाकत्रयं रजस्तमोमूलतया तदात्मकं सद् बुद्धिसत्त्वमावृणोति । तत्क्षयाच्च निरावरणं योगिचित्तं यथेच्छं विहरति विजानाति चेति ॥४३॥

"બહિરકલ્પિતા" વગેરે સૂત્રથી બીજાના શરીરમાં પ્રવેશના હેતુરૂપ અને ક્લેશકર્મવિપાકના ક્ષયના હેતુરૂપ સંયમવિષે કહે છે. "शरीरादृ बहिः" વગેરેથી વિદેહા વર્ણવે છે. "सा यदि.." વગેરેથી અકલ્પિત મહાવિદેહાના ઉપાયને દર્શાવવા માટે કલ્પિત વિદેહા કહે છે. "या तु" વગેરેથી મહાવિદેહા કહે છે "तत्र कल्पितया" વગેરેથી કલ્પિતા ઉપાય અને અકલ્પિતા ઉપેય છે, એમ કહે છે. "ततश्च" વગેરેથી ફક્ત પરશરીર પ્રવેશ નહીં, અન્ય સિદ્ધિ પણ મળે છે, એમ કહે છે. પછી ધારણાથી મનની મહાવિદેહા પ્રવૃત્તિ સિદ્ધ થાય છે. ક્લેશ અને કર્મ એ બંનેથી જન્મ, આયુષ્ય અને ભોગ એમ ત્રણ વિપાકો થાય છે. એનું મૂળ રજસ્, તમસ્ છે. જેના રજસ્, તમસ્ ઓગળી ગયા હોય એ સત્ત્વમાત્રથી વિવેકખ્યાતિ પ્રાપ્તિ કરે છે. આ ત્રણ વિપાકો રજસ્, તમસ્ રૂપ મૂળવાળા છે, તેથી પોતાની સાથે જોડાયેલા સત્ત્વમાંથી પરિણમેલી બુદ્ધિનું આવરણ કરે છે. એમના ક્ષયથી આવરણ વિનાનું યોગીનું ચિત્તસત્ત્વ યથેચ્છ વિહાર કરે છે અને (બધા પદાર્થોને) જાણે છે. ૪૩

★

स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः ॥४४॥

(આકાશ વગેરે પાંચ ભૂતોની) સ્થૂલ, સ્વરૂપ, સૂક્ષ્મ, અન્વય, અને અર્થવત્ત્વ અવસ્થાઓ પર સંયમ કરવાથી ભૂતજય થાય છે. ૪૪

ભાષ્ય

तत्र पार्थिवाद्याः शब्दादयो विशेषाः सहकारादिभिर्धर्मैः स्थूलशब्देन परिभाषिताः । एतद्भूतानां प्रथमं रूपम् ।

द्वितीयं रूपं स्वसामान्यं मूर्तिर्भूमिः स्नेहो जलं वह्निरुष्णता वायुः प्रणामी सर्वतोगतिराकाश इत्येतत्स्वरूपशब्देनोच्यते । अस्य सामान्यस्य शब्दादयो विशेषाः । तथा चोक्तम्- एकजातिसमन्वितानामेषां धर्म-मात्रव्यावृत्तिरिति ।

सामान्यविशेषसमुदायोऽत्र द्रव्यम् । द्विष्ठो हि समूहः । प्रत्यस्तमित-भेदावयवानुगतः-शरीरं वृक्षो यूथं वनमिति । शब्देनोपात्तभेदावयवानुगतः समूहः-उभये देवमनुष्याः, समूहस्य देवा एको भागो मनुष्या द्वितीयो भागः । ताभ्यामेवाभिधीयते समूहः ।

स च भेदाभेदविवक्षितः । आम्राणां वनं ब्राह्मणानां सङ्घः, आम्रवणं ब्राह्मणसङ्घ इति ।

स पुनर्द्विविधो युतसिद्धावववोऽयुतसिद्धावयवश्च । युतसिद्धावयवः समूहो वनं सङ्घ इति । अयुतसिद्धावयवः सङ्गतः-शरीरं वृक्षः परमाणुरिति । अयुतसिद्धावयवभेदानुगतः समूहो द्रव्यमिति पतञ्जलिः । एतत्स्वरूप-मित्युक्तम् ।

अथ किमेषां सूक्ष्मरूपम् ? तन्मात्रं भूतकारणम् । तस्यैकोऽवयवः परमाणुः सामान्यविशेषात्माऽयुतसिद्धावयवभेदानुगतः समुदाय इत्येवं सर्वतन्मात्राण्येतत्तृतीयम् ।

अथ भूतानां चतुर्थं रूपं ख्यातिक्रियास्थितिशीला गुणाः कार्यस्वभावानुपातिनोऽन्वयशब्देनोक्ताः ।

अथैषां पञ्चमं रूपमर्थवत्त्वम्, भोगापवर्गार्थता गुणेष्वन्वयिनी, गुणास्तन्मात्रभूतभौतिकेष्विति सर्वमर्थवत् । तेष्विदानींभूतेषु पञ्चसु पञ्चरूपेषु संयमात्तस्य तस्य रूपस्य स्वरूपदर्शनं जयश्च प्रादुर्भवति । तत्र पञ्च भूतस्वरूपाणि जित्वा भूतजयी भवति । तज्जयाद्वत्सानुसारिण्य इव गावोऽस्य सङ्कल्पानुविधायिन्यो भूतप्रकृतयो भवन्ति ॥४४॥

પૃથ્વી વગેરેના શબ્દ વગેરે વિશેષો આકાર વગેરે ધર્મો સાથે "સ્થૂલ" એવા પારિભાષિક નામથી ઓળખવામાં આવે છે. ભૂતોનું આ પહેલું રૂપ છે. એમનું બીજું રૂપ પ્રત્યેકને સામાન્ય એવું પૃથ્વીનું મૂર્તિ (આકાર), જળનું સ્નેહ, અગ્નિની ઉષ્ણતા, વાયુની વહનશીલતા અને આકાશની વ્યાપકતા "સ્વરૂપ" એવી પારિભાષિક સંજ્ઞાથી ઓળખાય છે. આ સામાન્યોના શબ્દ વગેરે વિશેષો છે. આ વિષે કહ્યું છે : "એક (સામાન્ય) જાતિના આ બધા પોતપોતાના ધર્મોથી ભિન્ન જણાય છે."

આ શાસ્ત્રમાં સામાન્ય અને વિશેષના સમુદાયને દ્રવ્ય કહેવામાં આવે છે. કારણ કે સમૂહ બેથી બને છે. એ ભિન્ન છતાં અસ્ત પામેલા અવયવોમાં અનુગત હોવાથી એક જણાય છે. દાખલા તરીકે શરીર, વૃક્ષ, યૂથ (ઝુંડ) અને વન. "ઉભયે દેવમનુષ્યાઃ" એ સમૂહ પદમાં શબ્દથી કહેલા ભેદવાળા અવયવોમાં અનુગત સમુદાયમાં એક ભાગ દેવો અને બીજો ભાગ મનુષ્યો છે. એ બે મળીને સમૂહ બને છે. એ બોલનારની ઇચ્છા પ્રમાણે ભેદ કે અભેદથી કહેવાય છેઃ આમ્રવૃક્ષોનું વન, બ્રાહ્મણોનો સંઘ અને આમ્રવન, બ્રાહ્મણસંઘ. સમૂહ બે પ્રકારનો છે : યુતસિદ્ધાવયવ અને અયુતસિદ્ધાવયવ. વન, સંઘ વગેરે યુતસિદ્ધાવયવ (છૂટા અવયવોવાળો) અને શરીર, વૃક્ષ, પરમાણુ વગેરે અયુતસિદ્ધાવયવ (સંયુક્ત અવયવોવાળો) છે. અયુતસિદ્ધાવયવોના ભેદોમાં અનુગત સમૂહ દ્રવ્ય છે, એવો પતંજલિ ઋષિનો મત છે. એને સ્વરૂપ કહે છે.

એમનું સૂક્ષ્મ રૂપ શું છે ? ભૂતોના કારણરૂપ તન્માત્ર (એમનું સૂક્ષ્મ રૂપ છે). પરમાણુ એ તન્માત્રનો એક અવયવ છે. એ સામાન્ય તથા વિશેષરૂપ છે, અને અયુતસિદ્ધ અવયવોના ભેદોમાં અનુગત સમુદાય છે. બધાં ભૂતો તન્માત્રરૂપ છે, એ એમનું ત્રીજું "સૂક્ષ્મ" રૂપ છે.

પ્રકાશ, ક્રિયા અને સ્થિતિશીલતા રૂપ ગુણો ભૂતોનું ચોથું "અન્વય" રૂપ છે. ગુણો કાર્યના સ્વભાવ અનુસાર પ્રવર્તે છે, તેથી અન્વય શબ્દથી ઓળખવામાં આવે છે.

અર્થવત્ત્વ એમનું પાંચમું રૂપ છે. ગુણો (પુરુષના) ભોગ અને મોક્ષ અર્થે છે, માટે તેઓમાં અર્થવત્તા અનુગત છે. આમ ગુણો, તન્માત્રો, ભૂતો અને ભૌતિક પદાર્થોમાં અર્થવત્તા અનુગત હોવાથી બધું અર્થવત્ છે.

પાંચ રૂપોવાળા પાંચ મહાભૂતોમાં સંયમ કરવાથી તે તે રૂપના સ્વરૂપનું દર્શન અને જય પ્રાપ્ત થાય છે. પાંચ ભૂતસ્વરૂપોને જીતીને યોગી ભૂતજયી બને છે. એમનો જય કરવાથી ગાયો વાછરડાંને અનુસરે એમ ભૂતપ્રકૃતિઓ યોગીના સંકલ્પને અનુસરે છે. ૪૪

तत्त्व वैशारद्दी

स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः । स्थूलं च स्वरूपं च सूक्ष्मं

चान्वयश्चार्थवत्त्वं चेति स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वानि । तेषु संयमात्तज्जयः । स्थूलमाह-तत्रेति । पार्थिवाः पाथसीयास्तैजसा वायवीया आकाशीयाः शब्दस्पर्शरूपरसगन्धा यथासंभवं विशेषाः षड्जगान्धारादयः शीतोष्णादयो नीलपीतादयः कषायमधुरादयः सुरभ्यादयः । एते हि नामरूपप्रयोजनैः परस्परतो भिद्यन्त इति विशेषाः । एतेषां पञ्च पृथिव्याम् । गन्धवर्जं चत्वारोऽप्सु । गन्धरसवर्जं त्रयस्तेजसि । गन्धरसरूपवर्जं द्वौ नभस्वति । शब्द एवाकाशे । त एत ईदृशा विशेषाः सहाकारादिभिर्धर्मैः स्थूलशब्देन परिभाषिताः शास्त्रे । तत्र पार्थिवास्तावद्धर्माः -

आकारो गौरवं रौक्ष्यं वरणं स्थैर्यमेव च ।
वृत्तिर्भेदः क्षमा काश्यं काठिन्यं सर्वभोग्यता ॥

अपां धर्माः - स्नेहः सौक्ष्म्यं प्रभा शौक्ल्यं मार्दवं गौरवं च यत् ।
शैत्यं रक्षा पवित्रत्वं संधानं चोदका गुणाः ॥

तैजसा धर्माः - उर्ध्वभाक्पाचकं दग्धृ पावकं लघु भास्वरम् ।
प्रध्वंस्योजस्वि वै तेजः पूर्वाभ्यां भिन्नलक्षणम् ॥

वायवीया धर्माः - तिर्यग्यानं पवित्रत्वमाक्षेपो नोदनं बलम् ।
चलमच्छयता रौक्ष्यं वायोर्धर्माः पृथग्विधाः ॥

आकाशीया धर्माः- सर्वतोगतिरव्यूहोऽविष्टम्भश्चेति ते त्रयः ।
आकाशधर्मा व्याख्याताः पूर्वधर्मविलक्षणाः ॥

इति । त एत आकारप्रभृतयो धर्मास्तै सहेति । आकारश्च सामान्यविशेषो गोत्वादिः ।

द्वितीयं रूपमाह-द्वितीयं रूपं स्वसामान्यम् । मूर्तिः सांसिद्धिकं काठिन्यम् । स्नेहो जलं मज्जापुष्टिबलाधानहेतुः । वह्निरुष्णतौदर्ये सौर्ये भौमे च सर्वत्रैव तेजसि समवेतोष्णतेति । सर्वं चैतद्धर्मधर्मिणोरभेदविवक्षयाभिधानम् । वायुः प्रणामी वहनशीलः । तदाह-

चलनेन तृणादीनां शरीरस्याटनेन च ।
सर्वगं वायुसामान्यं नामित्वमनुमीयते ॥

सर्वतोगतिराकाशः, सर्वत्र शब्दोपलब्धिदर्शनात् । श्रोत्राश्रयाकाशगुणेन हि शब्देन पार्थिवादिशब्दोपलब्धिरित्युपपादितमधस्तात् (३।४१ टीका) । एतत्स्वरूप-शब्देनोक्तम् । अस्यैव मूर्त्यादिसामान्यस्य शब्दादयः षड्जादय उष्णत्वादयः शुक्लत्वादयः कषायत्वादयः सुरभित्वादयो मूर्त्यादीनां सामान्यानां भेदाः । सामान्यान्यपि मूर्त्यादीनि

जम्बीरपनसामलकफलादीनि रसादिभेदात्परस्परं व्यावर्तन्ते । तेनैतेषामेते रसादयो विशेषाः । तथा चोक्तम्-एकजातिसमन्वितानां प्रत्येकं पृथिव्यादीनामेकैकया जात्या मूर्तिस्नेहादिना समन्वितानामेषा षड्जादिधर्ममात्रव्यावृत्तिरिति । तदेवं सामान्यं मूर्त्याद्युक्तं विशेषाश्च शब्दादय उक्ताः ।

ये चाहुः सामान्यविशेषाश्रयो द्रव्यमिति तान्प्रत्याह-सामान्यविशेषसमुदायोऽत्र दर्शने द्रव्यम् । येऽपि तदाश्रयो द्रव्यमास्थिषत तैरपि तत्समुदायोऽनुभूयमानो नापह्नोतव्यः । न च तदपह्नवे तयोराधारो द्रव्यमिति भवति । तस्मात्तदेवास्तु द्रव्यम् । न तु ताभ्यां तत्समुदायाच्च तदाधारमपरं द्रव्यमुपलभामहे । ग्रावभ्यो ग्रावसमुदायादिव च तदाधारमपरं पृथग्विधं शिखरम् । समूहो द्रव्यमित्युक्तम् । तत्र समूहमात्रं द्रव्यमिति भ्रमापनुत्तये समूहविशेषो द्रव्यमिति निर्धारयितुं समूहप्रकारानाह-द्विष्ठो हीति । यस्मादेवं तस्मान्न समूहमात्रं द्रव्यमित्यर्थः । द्वाभ्यां प्रकाराभ्यां तिष्ठतीति द्विष्ठः । एकं प्रकारमाह-प्रत्यस्तमितेति । प्रत्यस्तमितो भेदो येषामवयवानां ते तथोक्ताः । प्रत्यस्तमितभेदा अवयवा यस्य स तथोक्तः । एतदुक्तं भवति-शरीरवृक्षयूथवनशब्देभ्यः समूहः प्रतीयमानोऽप्रतीतावयवभेदस्तद्वाचकशब्दप्रयोगात्समूह एकोऽवगम्यत इति । युतायुत-सिद्धावयवत्वेन चेतनाचेतनत्वेन चोदाहरणचतुष्टयम् । युतायुतसिद्धावयवत्वं चाग्रे वक्ष्यते । द्वितीयं प्रकारमाह-शब्देनोपात्तभेदावयवानुगतः समूह उभये देवमनुष्या इति । देवमनुष्य इति हि शब्देनोभयशब्दवाच्यस्य समूहस्य भागौ भिन्नावुपात्तौ । ननूभयशब्दात्तदवयवभेदो न प्रतीयते । तत्कथमुपात्तभेदावयवानुगम इत्यत आह-ताभ्यां भागाभ्यामेव समूहोऽभिधीयते । उभयशब्देन भागद्वयवाचिशब्दसहितेन समूहो वाच्यः । वाक्यस्य वाक्यार्थवाचकत्वादिति भावः ।

पुनर्द्वैविध्यमाह-स चेति । भेदेन चाभेदेन च विवक्षितः । भेदविवक्षितमाह-आम्राणां वनं ब्राह्मणानां सङ्घ इति । भेद एव षष्ठीश्रुतेः । यथा गर्गाणां गौरिति । अभेदविवक्षितमाह-आम्रवणं ब्राह्मणसङ्घ इति । आम्राश्च ते वनं चेति समूहसमूहिनोरभेदं विवक्षित्वा सामानाधिकरण्यमित्यर्थः ।

विधान्तरमाह-स पुनर्द्विविधः । युतसिद्धावयवः समूहः । युतसिद्धाः पृथक्सिद्धाः सान्तराला अवयवा यस्य स तथोक्तः, यूथं वनमिति । सान्तराला हि तदवयवा वृक्षाश्चा गावश्च । अयुतसिद्धावयवश्च समूहो वृक्षो गौः परमाणुः रिति । निरन्तरा हि तदवयवाः सामान्यविशेषा वा सास्नादयो वेति । तदेतेषु समूहेषु द्रव्यभूत समूहं निर्धारयति-अयुतसिद्धेति । तदेवं प्रासङ्गिकं द्रव्यं व्युत्पाद्य प्रकृतमुपसंहरति-एतत्स्वरूपमित्युक्तमिति ।

તૃતીયં રૂપં વિવક્ષુઃ પૃચ્છતિ-અથેતિ । ઉત્તરમાહ-તન્માત્રમિતિ । યસ્યૈકોઽવયવઃ । પરિમાણભેદઃ પરમાણુઃ, સામાન્યં મૂર્તિઃ, શબ્દાદયો વિશેષાસ્તદાત્મા, અયુતસિદ્ધા નિરન્તરા યેઽવયવાઃ સામાન્યવિશેષાસ્તદ્ભેદેષ્વનુગતઃ સમુદાયઃ । યથા ચ પરમાણુઃ સૂક્ષ્મં રૂપમેવં સર્વતન્માત્રાણિ સૂક્ષ્મં રૂપમિતિ । ઉપસંહરતિ-એતદિતિ ।

અથ ભૂતાનાં ચતુર્થ રૂપં ખ્યાતિક્રિયાસ્થિતિશીલા ગુણાઃ કાર્યસ્વભાવમનુપતિતુમનુગન્તું શીલં યેષાં તે તથોક્તાઃ । અત એવાન્વયશબ્દેનોક્તાઃ ।

અથૈષાં પઞ્ચમં રૂપમર્થવત્ત્વં વિવૃણોતિ-ભોગેતિ । નન્વેવમપિ સન્તુ ગુણા અર્થવન્તઃ । તત્કાર્યાણાં તુ કુતોઽર્થવત્ત્વમિત્યત આહ- ગુણા ઇતિ । ભૌતિકા ગોઘટાદયઃ । તદેવં સંયમવિષયમુક્ત્વા સંયમં તત્ફલં ચાહ-તેષ્વિતિ । ભૂતપ્રકૃતયો ભૂતસ્વભાવાઃ ॥૪૪॥

સ્થૂલ, સ્વરૂપ, સૂક્ષ્મ, અન્વય અને અર્થવત્ત્વ (એ પાંચ ભૂતોનાં રૂપ છે). એમાં સંયમ કરવાથી એમનો જય સિદ્ધ થાય છે. "તત્ર પાર્થિવાદ્યાઃ" વગેરેથી સ્થૂલવિષે કહે છે. પાર્થિવ, જલીય, તૈજસ, વાયવીય અને આકાશીય શબ્દ, સ્પર્શ, રૂપ રસ અને ગંધના યથાક્રમ વિશેષો ષડ્જ, ગાંધાર (સા, રે, ગ, મ) વગેરે શીત-ઉષ્ણ વગેરે, નીલ-પીત વગેરે, કષાય-મધુર વગેરે, તથા સુરભિ (સુગંધઃદુર્ગંધ) વગેરે છે. તેઓ નામ, રૂપ અને પ્રયોજનોથી પરસ્પર ભિન્ન હોવાથી વિશેષ કહેવાય છે.

આમાંના પાંચ ધર્મો પૃથ્વીમાં, ગંધસિવાયના ચાર જળમાં, ગંધરસસિવાયના ત્રણ તેજમાં, ગંધ રસ રૂપ સિવાયના બે વાયુમાં અને ફક્ત એક શબ્દ આકાશમાં રહે છે. આ વિશેષો આકાર વગેરે ધર્મો સાથે શાસ્ત્રમાં "સ્થૂલ" શબ્દથી પરિભાષિત થાય છે.

પૃથ્વીના ધર્મો નીચે પ્રમાણે છે :-

"આકાર, ગુરુતા, રુક્ષતા, વરણ (જગા રોકવી) સ્થિરતા, વૃત્તિ, ભિન્નતા, ક્ષમા (આશ્રય) કૃશતા, કઠિનતા અને સર્વભોગ્યતા."

"સ્નેહ (ચીકાશ) સૂક્ષ્મતા, સ્વચ્છતા, શુક્લતા, મૃદુતા, ગુરુતા, શીતતા, રક્ષા (સાચવણી), પવિત્રતા અને સંધાન (રૂઝાવવાનો ગુણ) એ જળના ધર્મો છે."

"ઊર્ધ્વગતિ, પકવવું, પ્રકાશવું, બાળવું, પવિત્ર કરવું, લઘુતા, તેજસ્વિતા, નાશ કરવો એ તેજના ગુણો છે, જે અગાઉ જણાવેલા બે ગુણસમૂહોથી જુદા છે."

"ચોતરફ ફેલાવું, પવિત્રતા, ફેંકવું, ગતિ આપવી, શક્તિ, ગતિશીલતા,

છાયારહિતતા, રુક્ષંતા, એ વાયુના વિવિધ ધર્મો છે.''

''સર્વતરફ ગતિશીલતા, ઘન રૂપે એકત્ર ન થવું અને અવરોધરહિતતા એ ત્રણ પહેલાંના ધર્મોથી જુદા આકાશના ધર્મો છે.''

આકાર વગેરે ધર્મો સાથે ભૂતો સ્થૂલ કહેવાય છે. ગાય વગેરે આકારો સામાન્ય તથા વિશેષ છે.

''દ્વિતીયં રૂપં સ્વસામાન્યમ્'' વગેરેથી ભૂતોનું બીજું રૂપ કહે છે. મૂર્તિ એટલે સ્વાભાવિક કઠિનતા. જળ સ્નેહ, મજ્જા, પુષ્ટિ અને બળ આપવામાં હેતુભૂત છે. અગ્નિની ગરમી જઠરાગ્નિમાં, સૂર્યમાં, પૃથ્વી પરના અગ્નિમાં અને તેજમાં સર્વત્ર સમવાય સંબંધથી રહેલી છે. આ બધું ધર્મ અને ધર્મીના અભેદની અપેક્ષાએ કહ્યું છે. વાયુ પ્રણામી કે વહનશીલ છે. એ આ વિષે કહ્યું છેઃ ''ઘાસ વગેરેના ચલનથી અને શરીરની ગતિશીલતાથી સર્વત્ર રહેલા વાયુનું નામિત્વ (વહનશીલતા) સૂચવાય છે'' આકાશ સર્વત્ર ગતિવાળું છે. કારણ કે શબ્દ બધે જ પ્રાપ્ત થાય છે. કાનના આશ્રયે રહેલા આકાશના ગુણરૂપ શબ્દ વડે પૃથ્વી વગેરેના શબ્દો ઉપલબ્ધ થાય છે, એમ અગાઉ (૩.૪૧) કહ્યું છે. આ ''સ્વરૂપ'' શબ્દથી ઓળખાય છે. ભૂતોના આ મૂર્તિ વગેરે સામાન્યોના ષડ્જ વગેરે, ગરમી વગેરે, શુક્લત્વ વગેરે, કષાય વગેરે, સુગંધ વગેરે ભેદો છે. મૂર્તિ વગેરે સામાન્યો પણ, લીંબું, ફણસ, આમળાં, વગેરે ફળોના તેમજ રસોના ભેદથી પરસ્પર ભિન્ન જણાય છે. તેથી એ સામાન્યોના રસ વગેરે વિશેષો છે. આ વિષે કહ્યું છેઃ ''એક જાતિના એટલે પૃથ્વી, જળ વગેરે પ્રત્યેક જાતિના મૂર્તિ, સ્નેહ વગેરેથી યુક્ત એવા એમના ષડ્જ વગેરે ધર્મો ભિન્ન હોય છે. આમ મૂર્તિ વગેરે સામાન્ય અને શબ્દ વગેરે વિશેષો કહ્યા.

જેઓ દ્રવ્ય સામાન્ય અને વિશેષનો આશ્રય છે એમ કહે છે, એમના પ્રત્યે ''સામાન્ય વિશેષ સમુદાયોત્ર દર્શને દ્રવ્યમ્''થી કહે છે કે આ શાસ્ત્રમાં સામાન્ય અને વિશેષના સમુદાયને (એમના આશ્રયને નહીં) દ્રવ્ય કહેવામાં આવે છે. જેઓ દ્રવ્યને એમના આશ્રય તરીકે સ્વીકારે છે, એમણે પણ એમના સમુદાયનો અનુભવ સ્વીકારવો જોઈએ. ન સ્વીકારવાથી કે છુપાવવાથી દ્રવ્ય એમનો આશ્રય બની જતું નથી. તેથી સમુદાય જ દ્રવ્ય છે. એ બેથી કે એમના સમુદાયથી ભિન્ન એમના આધારરૂપ પૃથક્ દ્રવ્યની ઉપલબ્ધિ થતી નથી. પત્થરો અને પત્થરોના સમુદાયથી ભિન્ન એમના આશ્રયરૂપ પૃથક્ શિખર હોતું નથી.

સમૂહ દ્રવ્ય છે, એમ કહ્યું. સમૂહ માત્ર દ્રવ્ય છે એવા ભ્રમને દૂર કરવા અને વિશેષ પ્રકારનો સમૂહ દ્રવ્ય છે એમ નક્કી કરવા સમૂહના પ્રકારો વર્ણવે છે, ''દ્વિષ્ઠો હિ સમૂહઃ'' વગેરેથી. આમ હોવાથી સમૂહમાત્ર દ્રવ્ય નથી. બે પ્રકારે રહે

એ દ્વિષ્ઠ છે. પહેલો પ્રકાર, "પ્રત્યસ્તમિતભેદાવયવાનુગતઃ" વગેરેથી વર્ણવતાં કહે છે કે જેના અવયવોનો ભેદ ન જણાતો હોય એવો સમૂહ. કહેવાનો આશય એ છે કે શરીર, વૃક્ષ, જૂથ અને વન શબ્દોથી જણાતો સમૂહ એવો છે, જેમાં અવયવવાચક શબ્દોનો પ્રયોગ ન કર્યો હોવાથી અવયવો પ્રતીત થતા નથી, પણ એક સમૂહ પ્રતીત થાય છે. યુતસિદ્ધ અને અયુતસિદ્ધ તેમજ ચેતન અને અચેતન અવયવોવાળા હોવાથી સમૂહનાં ચાર ઉદાહરણો આપે છે. યુતાયુતસિદ્ધ અવયવવિષે આગળ કહેવામાં આવશે.

"શબ્દેનોપાત્તભેદાવયવાનુગતઃ" વગેરેથી બીજો પ્રકાર કહે છે. શબ્દથી ભિન્ન અવયવો કહ્યા હોય એનો દાખલો "ઉભયે દેવમનુષ્યાઃ" છે. દેવ અને મનુષ્ય શબ્દથી સમૂહના ભાગો ભિન્ન રીતે કહ્યા છે. પણ એ શબ્દોથી અવયવોનો ભેદ કહેવાયો નથી, તો ભેદ કહ્યા એમ શી રીતે કહેવાય ? એના જવાબમાં કહે છે કે બે ભાગોથી જ સમૂહ કહેવાયો છે. બંને એટલે બે ભાગના વાચક શબ્દો સાથે સમૂહ કહેવાયો છે. વાક્ય એના અર્થનું વાચક હોય છે, એવો ભાવ છે.

"સ ચ ભેદાભેદવિવક્ષિતઃ"થી બીજા બે પ્રકારો કહે છે. ભેદથી અને અભેદથી કહેવાની ઇચ્છા પ્રમાણે, એમ બે પ્રકાર છે. આંબાનું વન અને બ્રાહ્મણોનો સંઘ એ ભેદ કહેવાની ઇચ્છાના દાખલા છે. ભેદમાં છઠ્ઠી વિભક્તિ પ્રયોજાય છે, જેમ ગર્ગોની ગાય. આમ્રવન અને બ્રાહ્મણસંઘ અભેદ કહેવાની ઇચ્છાના દાખલા છે. આંબાઓ અને વન એમ સમૂહી અને સમૂહનો અભેદ કહેવાની ઇચ્છા હોય ત્યારે સમાનાધિકરણ પ્રયોગ થાય છે.

"સ પુનર્દ્વિવિધઃ" વગેરેથી બીજો પ્રકાર કહે છે. યુતસિદ્ધ અવયવ એટલે પૃથક્, વચ્ચે અંતરવાળા અવયવોનો સમૂહ દાખલા તરીકે જૂથ, વન. એમાં ગાયો અને વૃક્ષોરૂપ અવયવો અંતરવાળા છે. અયુતસિદ્ધ અવયવોવાળો સમૂહ વૃક્ષ, ગાય, પરમાણુ છે. સામાન્ય-વિશેષ અને ગળાની ચામડી વગેરે અવયવો અંતર વિનાના છે. આ બધાઓમાંથી જે દ્રવ્યભૂત સમૂહ છે, એનો નિર્ણય "અયુતસિદ્ધાવયવભેદાનુગતઃ સમૂહઃ દ્રવ્યમ્" થી કરે છે. પ્રસંગવશાત્ દ્રવ્યનું વર્ણન કરીને મૂળ વાતનો ઉપસંહાર "એતત્સ્વરૂપમિત્યુક્તમ્" થી કરે છે.

"અથ" વગેરેથી ચોથા રૂપને કહેવાની ઇચ્છાથી પ્રશ્ન પૂછે છે. "તન્માત્રમ્" એમ જવાબ આપે છે. જેનો (તન્માત્રનો) એક અવયવ કે માપ પરમાણુ છે, મૂર્તિ સામાન્ય છે, શબ્દો વગેરે વિશેષો છે, એવા રૂપવાળો અને અયુતસિદ્ધ કે અંતર વિનાના ભિન્ન સામાન્ય વિશેષરૂપ અવયવોમાં અનુગત સમુદાય તન્માત્ર છે. પરમાણુ સૂક્ષ્મરૂપ છે એમ બધા તન્માત્રો સૂક્ષ્મરૂપ છે. "એતત્

तृतीयम्"થી ઉપસંહાર કરે છે.

ભૂતોનું ચોથું રૂપ પ્રકાશ, ક્રિયા અને સ્થિતિશીલ ગુણો છે. એ ગુણો કાર્યના સ્વભાવમાં અનુગત રહેનારા છે, માટે અન્વય શબ્દથી કહ્યા છે.

"ભોગાપવર્ગાર્થતા" વગેરેથી ભૂતોનું પાંચમું અર્થવત્ત્વ રૂપ કહે છે. ગુણો ભલે અર્થવાળા હોય, પણ એમનાં કાર્યોમાં અર્થવત્ત્વ કેવી રીતે હોઈ શકે ? જવાબમાં "गुणास्तन्मात्र" વગેરેથી કહે છે કે ગુણો તન્માત્રમાં, ભૂતોમાં અને ભૌતિક પદાર્થોમાં અનુગત છે, માટે બધું (જગત્) અર્થવત્ છે. ગાય, ઘડો વગેરે ભૌતિક છે. "तेषु" વગેરેથી સંયમનો વિષય કહીને, સંયમના ફળ વિષે કહે છે. ભૂતપ્રકૃતિ એટલે ભૂતસ્વભાવના. ૪૪

★

ततोऽणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघातश्च ॥४५॥

એનાથી (ભૂતજયથી) અણિમા વગેરે સિદ્ધિઓ ઉત્પન્ન થાય છે, શરીરસંપત્તિ અને એમના (ભૂતોના) ધર્મો આઘાત કરતા નથી. ૪૫

ભાષ્ય

तत्राणिमा भवत्यणुः लघिमा लघुर्भवति । महिमा महान्भवति । प्राप्तिरङ्गुल्यग्रेणापि स्पृशति चन्द्रमसम् । प्राकाम्यमिच्छानभिघातः, भूमावुन्मज्जति निमज्जति यथोदके । वशित्वं भूतभौतिकेषु वशी भवत्यवश्यश्चान्येषाम् । ईशितृत्वं तेषां प्रभवाप्ययव्यूहानामीष्टे । यत्र कामावसायित्वं सत्यसङ्कल्पता यथा सङ्कल्पस्तथा भूतप्रकृतीनामवस्थानम् । न च शक्तोऽपि पदार्थविपर्यासं करोति । कस्मात् ? अन्यस्य यत्र-कामावसायिनः पूर्वसिद्धस्य तथाभूतेषु सङ्कल्पादिति । एतान्यष्टावैश्वर्याणि ।

कायसंपद्वक्ष्यमाणा । तद्धर्मानभिघातश्च, पृथ्वी मूर्त्या न निरुणद्धि योगिनः शरीरादिक्रियाम्, शिलामप्यनुविशतीति, नापः स्निग्धाः क्लेदयन्ति, नाग्निरुष्णो दहति, न वायुः प्रणामी वहति । अनावरणात्मकेऽप्याकाशे भवत्यावृतकायः, सिद्धानामप्यदृश्यो भवति ॥४५॥

અણિમાથી અણુ જેવડો થાય છે. લઘિમાથી લઘુ-હલકો-થાય છે. મહિમાથી મહાન્-મોટો- થાય છે. પ્રાપ્તિથી આંગળી વડે ચંદ્રને સ્પર્શે છે.

પ્રાકામ્યથી ઇચ્છાનો વિઘાત થતો નથી. પાણીની જેમ પૃથ્વીમાં ડૂબકી મારીને બહાર આવે છે. વશિત્વથી ભૂત-ભૌતિકો વશ કરે છે, પોતે એમને વશ થતો નથી. ઇશિત્વથી એમને ઉત્પન્ન અને વિનષ્ટ કરી શકે છે. એનાથી કામાવસાયિત્વ કે સત્યસંકલ્પતા સિદ્ધ થાય છે. ભૂતપ્રકૃતિઓ એના સંકલ્પ મુજબ પ્રવર્તે છે અને સમર્થ હોવા છતાં પદાર્થ-વિપર્યાસ (ફેરફાર) કરતો નથી. કેમ ? કારણ કે પૂર્વસિદ્ધ બીજા યત્રકામાવસાયી (ઈશ્વર)નો ભૂતોવિષે એવો સંકલ્પ છે. આ આઠ ઐશ્વર્યો છે.

કાયસંપત્ આગળ કહેવાશે. ભૂતોના ધર્મો આઘાત કરતા નથી, એટલે પૃથ્વી પોતાની મૂર્તિ (ઘનતા)થી એના શરીર વગેરેની ક્રિયાને રોકતી નથી. પત્થરમાં પણ પ્રવેશ કરે છે. સ્નિગ્ધ જળ એને ભીંજવતાં નથી. ગરમ અગ્નિ એને બાળતો નથી. વહનશીલ વાયુ એને ખસેડતો નથી. અનાવરણ સ્વભાવના આકાશમાં પણ પોતાના શરીરને છુપાવે છે, અને સિદ્ધો વડે પણ અદૃશ્ય બને છે. ૪૫

तत्त्व वैशारदी

संकल्पानुविधाने भूतानां किं योगिनः सिध्यतीत्यत आह-ततोऽणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघातश्च । स्थूलसंयमजयाच्चतस्रः सिद्धयो भवन्तीत्याह-तत्राणिमा महानपि भवत्यणुः । लघिमा महानपि लघुर्भूत्वेषीकतुल इवाकाशे विहरति । महिमाल्पोऽपि ग्रामनगगगनपरिमाणो भवति । प्राप्तिः सर्वे भावाः संनिहिता भवन्ति योगिनः, तद्यथा भूमिष्ठ एवाङ्गुल्यग्रेण स्पृशति चन्द्रमसम् । स्वरूपसंयमविजयात्सिद्धिमाह-प्राकाम्यमिच्छानभिघातः । नास्य रूपं भूतस्वरूपैर्मूर्त्यादिभिरभिहन्यते । भूमावुन्मज्जति निमज्जति च यथोदके । सूक्ष्मविषयसंयमजयात्सिद्धिमाह-वशित्वम् इति । भूतानि पृथिव्यादीनि भौतिकानि गोघटादीनि । तेषु वशी स्वतन्त्रो भवति । तेषां त्ववश्यस्तत्कारणतन्मात्रपृथिव्यादिपरमाणुवशीकारात्तत्कार्यवशीकारः । तेन यानि यथावस्थापयति तानि तथावतिष्ठन्त इत्यर्थः । अन्वयविषयसंयमजयात्सिद्धिमाह-ईशितृत्वम् इति । तेषां भूतभौतिकानां विजितमूलप्रकृतिः सन् यः प्रभव उत्पादो यश्चाप्ययो विनाशो यश्च व्यूहो यथावदवस्थापनं तेषामीष्टे । अर्थवत्त्वसंयमात्सिद्धिमाह-यत्र कामावसायित्वं सत्यसङ्कल्पता । विजितगुणार्थवत्त्वो हि योगी यद्यदर्थतया सङ्कल्पयति तत्तस्मै प्रयोजनाय कल्पते । विषमप्यमृतकार्ये सङ्कल्प्य भोजयञ्जीवयतीति । स्यादेतत्-यथा शक्तिविपर्यासं करोत्येवं पदार्थविपर्यासमपि कस्मान्न करोति ? तथा

च चन्द्रमसमादित्यं कुर्यात्कुहूं च सिनीवालीमित्यत आह- न च शक्तोऽपीति । न खल्वेते यत्रकामावसायिनस्तत्रभवतः परमेश्वरस्याज्ञामतिक्रमितुमुत्सहन्ते । शक्तयस्तु पदार्थानां जातिदेशकालावस्थाभेदेनानियतस्वभावा इति युज्यते तासु तदिच्छानुविधानमिति। एतान्यष्टावैश्वर्याणि ।

तद्धर्मानभिघात इति । अणिमादिप्रादुर्भाव इत्यनेनैव तद्धर्मानभिघातसिद्धौ पुनरुपादानं कायसिद्धिवदेतत्सूत्रोपबद्धसकलविषयसंयमफलवत्त्वज्ञापनाय । सुगममन्यत् ॥४५॥

ભૂતોમાં સંયમ કરવાથી યોગીને માટે ભૂતો સંકલ્પાનુવિધાયી બનતાં કેવી સિદ્ધિ મળે છે ? "ततोऽणिमादि" વગેરે સૂત્રથી જવાબ આપે છે, ભૂતોના સ્થૂલરૂપમાં સંયમ કરવાથી ચાર સિદ્ધિઓ પ્રાપ્ત થાય છે. મોટો હોવા છતાં અણુ જેવડો બને એ અણિમા છે. લઘિમાથી મોટો છતાં હળવો બનીને હલકા ઘાસ કે રૂની જેમ આકાશમાં વિહરે છે. મહિમાથી નાનો હોવા છતાં ગામ, પર્વત કે આકાશ જેવડો બને છે. પ્રાપ્તિથી બધા પદાર્થો યોગીની નજીક આવી જાય છે, અને પૃથ્વી પર રહીને આંગળીના અગ્રભાગ (ટેરવા)થી ચંદ્રને સ્પર્શે છે. ભૂતોના સ્વરૂપનો સંયમ વડે વિજય કરવાથી મળતી સિદ્ધિઓ કહે છે. પ્રાકામ્ય એટલે ઇચ્છાના વિઘાતનો અભાવ. એનું રૂપ ભૂતોના મૂર્તિ વગેરે રૂપોથી આઘાત અનુભવતું નથી. પાણીની જેમ જમીનમાં ડૂબીને બહાર આવે છે. ભૂતોના સૂક્ષ્મનો સંયમ વડે જય કરીને મળતી સિદ્ધિઓ કહે છે. વશિત્વથી પૃથ્વી વગરે ભૂતો અને ગાય, ઘડો વગેરે ભૌતિકોવિષે વશી કે સ્વતંત્ર બને છે, એમના વશમાં આવતો નથી. ભૂતોના કારણરૂપ તન્માત્રો - પૃથ્વી વગેરેના પરમાણુઓ-ને સંયમવડે વશ કરીને, એમનાં કાર્યોને પણ વશ કરે છે. એમને જેમ સ્થાપે એમ જ રહે છે, એવો અર્થ છે. ભૂતોના અન્વયને સંયમ વડે વશ કરવાથી મળતી સિદ્ધિઓ કહે છે. ઇશિત્વ એટલે મૂળ પ્રકૃતિના વિજયથી ભૌતિકોના ઉત્પત્તિ-વિનાશ અને વ્યૂહ (સંસ્થાન) પર અધિકાર મેળવે છે. અર્થવત્ત્વ પર સંયમ વડે મળતી સિદ્ધિ કહે છે. યત્રકામાવસાયિત્વ એટલે સત્યસંકલ્પત્વ. ગુણોની અર્થવત્તા જીતીને યોગી જે ભૂતને જેના અર્થે સંકલ્પથી યોજે, એ તે તે પ્રયોજન સિદ્ધ કરે છે. સંકલ્પથી વિષને અમૃત તરીકે યોજીને જિવાડે છે.

ભલે પણ શક્તિ વિપર્યાસ (ફેરફાર)ની જેમ પદાર્થ વિપર્યાસ કેમ કરતો નથી ? એમ કરીને એ ચંદ્રને સૂર્ય તેમજ કુહૂ ને સિનીવાલી (અમાવાસ્યાના બે ભેદો) બનાવી શકે. એના જવાબમાં "शक्तोपि.." વગેરેથી કહે છે કે યત્ર કામાવસાયી યોગીઓ સમર્થ હોવા છતાં આદિયોગી પરમેશ્વરની આજ્ઞા ઉથાપવાનું

સાહસ કરતા નથી. પદાર્થોની શક્તિઓ તો જાતિ, દેશ, કાળ, અવસ્થાના ભેદોથી અનિશ્ચિત સ્વભાવની હોય છે. એમને યોગી પોતાના સંકલ્પમુજબ ચલાવે એ યોગ્ય છે. (પદાર્થ વિપર્યાસ યોગ્ય નથી). આ આઠ ઐશ્વર્યો છે. અણિમા વગેરેની પ્રાપ્તિથી ભૂતોના ધર્મો વડે અનભિઘાત સિદ્ધ છે, છતાં ફરીથી "तद्धर्मानभिघातश्च" કહેવાનો આશય એ છે કે કાયસિદ્ધિની જેમ આ સૂત્રમાં કહેલા બધા વિષયોમાં કરેલો સંયમ અવશ્ય સફળ થાય છે, એમ સમજવું જોઈએ. બીજું સુગમ છે. ૪૫

★

रूपलावण्यबलवज्रसंहननत्वानि कायसंपत् ॥४६॥

રૂપ, લાવણ્ય, બળ, વજ્ર જેવી દૃઢતા કાયસંપત્ છે. ૪૬

ભાષ્ય

दर्शनीयः कान्तिमानतिशयबलो वज्रसंहननश्चेति ॥४६॥

યોગી દર્શનીય રૂપવાળો, કાન્તિમાન્, અત્યંત બળવાન્ અને વજ્ર જેવા દૃઢ શરીરવાળો બને છે. ૪૬

तत्त्व वैशारदी

कायसंपदमाह-रूपलावण्यबलवज्रसंहननत्वानि कायसंपत् । वज्रस्येव संहननमवयवव्यूहो दृढो निबिडो यस्य स तथोक्तः ॥४६॥

"રૂપલાવણ્ય" વગેરે સૂત્રથી કાયસંપત્ કહે છે. વજ્રસંહનન એટલે દૃઢ, નિબિડ અવયવસંસ્થાનવાળો બને છે. ૪૬

ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः ॥४७॥

ગ્રહણ, સ્વરૂપ, અસ્મિતા, અન્વય અને અર્થવત્ત્વ પર સંયમથી યોગી ઇન્દ્રિયજય સિદ્ધ કરે છે. ૪૭

ભાષ્ય

सामान्यविशेषात्मा शब्दादिर्ग्राह्यः । तेष्विन्द्रियाणां वृत्तिर्ग्रहणम् । न च तत्सामान्यमात्रग्रहणाकारम् । कथमनालोचितः स विषयविशेष इन्द्रियेण मनसा वानुव्यवसीयेतेति । स्वरूपं पुनः प्रकाशात्मनो बुद्धिसत्त्वस्य सामान्य विशेषयोरयुतसिद्धावयवभेदानुगतः समूहो द्रव्यमिन्द्रियम् । तेषां तृतीयं रूपमस्मितालक्षणोऽहंकारः । तस्य सामान्यस्येन्द्रियाणि विशेषाः । चतुर्थं

रूपं व्यवसायात्मकाः प्रकाशक्रियास्थितिशीला गुणा येषामिन्द्रियाणि साहंकाराणि परिणामः । पञ्चमं रूपं गुणेषु यदनुगतं पुरुषार्थवत्त्वमिति । पञ्चस्वेतेष्विन्द्रियरूपेषु यथाक्रमं संयमस्तत्र तत्र जयं कृत्वा पञ्चरूपजयाद्इन्द्रियजयः प्रादुर्भवति योगिनः ॥४७॥

સામાન્ય, વિશેષરૂપવાળા શબ્દાદિ ગ્રાહ્ય છે. એમાં ઇન્દ્રિયોની વૃત્તિ ગ્રહણ છે. આ ફક્ત સામાન્યના ગ્રહણના આકારનું નથી. વિષયની વિશેષતા જાણ્યા વિના મનથી કે ઇન્દ્રિયથી અનુવ્યવસાય (પછીથી વિષયની પ્રાપ્તિનો નિર્ણય કે પ્રયત્ન) કેવી રીતે થાય ? સ્વરૂપ એટલે પ્રકાશસ્વરૂપ બુદ્ધિસત્ત્વના સામાન્ય-વિશેષરૂપ અયુતસિદ્ધ અવયવોના ભેદમાં અનુગત સમૂહરૂપ દ્રવ્ય ઇન્દ્રિય છે. એમનું ત્રીજું રૂપ અસ્મિતાલક્ષણ અહંકાર છે. એ સામાન્ય છે. ઇન્દ્રિયો એના વિશેષો છે. (અન્વય નામનું) ચોથું રૂપ વ્યવસાયાત્મક પ્રકાશ, ક્રિયા અને સ્થિતિશીલ ગુણો છે. અહંકાર સાથે ઇન્દ્રિયો એમનું પરિણામ છે. પાંચમું પુરુષાર્થવત્ત્વ રૂપ ગુણોમાં રહેલું છે. આ પાંચ ઇન્દ્રિયરૂપોમાં સંયમ કરવાથી તે તે સ્તરે જય પ્રાપ્ત થાય છે. અને પાંચે રૂપોના જયથી યોગી ઇન્દ્રિયજય સિદ્ધ કરે છે. ૪૭

तत्त्व वैशारदी

जितभूतस्य योगिन इन्द्रियजयोपायमाह-ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः । ग्रहणं च स्वरूपं चास्मिता चान्वयश्चार्थवत्त्वं च तेषु संयमस्तस्मादित्यर्थः । गृहीतिर्ग्रहणम्, तच्च ग्राह्याधीननिरूपणमिति ग्राह्यं दर्शयति-सामान्यविशेषात्मेति । ग्राह्यमुक्त्वा ग्रहणमाह-तेष्विति । वृत्तिरालोचनं विषयाकारा परिणतिरिति यावत् । ये त्वाहुः-सामान्यमात्रगोचरेन्द्रियवृत्तिरिति तान्प्रत्याह-न चेति । गृह्यत इति ग्रहणम् । न सामान्यमात्रगोचरं ग्रहणम् । बाह्येन्द्रियतन्त्रं हि मनो बाह्ये प्रवर्तते, अन्यथान्धबधिराद्यभावप्रसङ्गात् । तदिह यदि न विशेषविषयमिन्द्रियं तेनासावनालोचितो विशेष इति कथं मनसानुव्यवसीयेत । तस्मात्सामान्य-विशेषविषयमिन्द्रियालोचनमिति तदेतद्ग्रहणमिन्द्रियाणां प्रथमं रूपम् । द्वितीयं रूपमाह-स्वरूपं पुनरिति । अहङ्कारो हि सत्त्वभागेनात्मीयेनेन्द्रियाण्यजीजनत् । अतो यत्तत्र करणत्वं सामान्यं यच्च नियतरूपादिविषयत्वं विशेषस्तदुभयमपि प्रकाशात्मकमित्यर्थः । तेषां तृतीयं रूपमिति । अहङ्कारो हीन्द्रियाणां कारणमिति यत्रेन्द्रियाणि तत्र तेन भवितव्यमिति सर्वेन्द्रियसाधारण्यात्सामान्यमिन्द्रियाणामित्यर्थः । चतुर्थं रूपमिति ।

गुणानां हि द्वैरूप्यं व्यवसेयात्मकत्वं व्यवसायात्मकत्वं च । तत्र व्यवसेयात्मकतां ग्राह्यतामास्थाय पञ्च तन्मात्राणि भूतभौतिकानि निर्मिमीते व्यवसायात्मकत्वं तु ग्रहणरूपमास्थाय साहङ्काराणीन्द्रियाणीत्यर्थः । शेषं सुगमम् ॥४७॥

ભૂતજય પછી યોગી માટે ઇન્દ્રિયજયનો ઉપાય "ગ્રહણ સ્વરૂપ.." વગેરેથી કહે છે. ગ્રહણનું નિરૂપણ ગ્રાહ્યને આધીન છે. તેથી "સામાન્ય વિશેષાત્મા" વગેરેથી ગ્રાહ્ય વર્ણવે છે. ગ્રાહ્ય કહીને "તેષુ ઇન્દ્રિયાણાં વૃત્તિઃ" વગેરેથી ગ્રહણ કહે છે. વૃત્તિ એટલે આલોચન કે વિષયાકારે પરિણામ. ઇન્દ્રિયો ફક્ત સામાન્યોમાં પ્રવર્તે છે, એમ કહેનાર લોકો પ્રત્યે "ન ચ" વગેરેથી કહે છે કે ગ્રહણ થાય એને ગ્રહણ કહે છે. એ ગ્રહણ ફક્ત સામાન્યગોચર નથી. બહારતરફ વલણવાળી ઇન્દ્રિયોને આધીન રહીને મન બહાર પ્રવર્તે છે. નહીં તો કોઈ માણસ આંધળો-બહેરો હોઈ શકે નહીં. તેથી ઇન્દ્રિયો જો વિશેષને પોતાનો વિષય ન બનાવે તો વિશેષતાનો વિચાર કર્યા વિના મન કેવી રીતે અનુવ્યવસાય કરે ? માટે ઇન્દ્રિયનું આલોચન સામાન્ય અને વિશેષ બંનેને વિષય બનાવે છે. આ ગ્રહણ ઇન્દ્રિયોનું પહેલું રૂપ છે.

"स्वरूपं पुनः" વગેરેથી બીજું રૂપ કહે છે. અહંકાર પોતાના સત્ત્વભાગથી ઇન્દ્રિયો ઉત્પન્ન કરે છે. તેથી એનું સામાન્ય કરણપણું અને નિયતરૂપ વગેરેને વિષય બનાવવા રૂપ વિશેષપણું -એ બંને પ્રકાશાત્મક છે, એવો અર્થ છે. અસ્મિતાલક્ષણ અહંકાર એમનું ત્રીજું રૂપ છે. અહંકાર ઇન્દ્રિયોનું કારણ છે. જ્યાં ઇન્દ્રિયો હોય ત્યાં અહંકાર પણ હોય. આમ બધી ઇન્દ્રિયો માટે સમાન હોવાથી એ એમનું સામાન્ય રૂપ છે. ગુણો એમનું ચોથું રૂપ છે. ગુણો વ્યવસાય (ગ્રહણ) રૂપ અને વ્યવસેય (ગ્રાહ્ય) રૂપ છે. વ્યવસેયરૂપે ગ્રાહ્યતાનો સ્વીકાર કરી, પાંચ તન્માત્રો, ભૂતો અને ભૌતિકોનું નિર્માણ કરે છે, અને વ્યવસાયરૂપે ગ્રહણરૂપ સ્વીકારીને અહંકાર સાથે ઇન્દ્રિયો ઉત્પન્ન કરે છે. બાકીનું સુગમ છે. ૪૫

★

ततो मनोजवित्वं विकरणभावः प्रधानजयश्च ॥४८॥

એનાથી (ઇન્દ્રિયજયથી) મન જેવો વેગ, વિકરણભાવ અને પ્રધાનજય સિદ્ધ થાય છે. ૪૮

ભાષ્ય

कायस्यानुत्तमो गतिलाभो मनोजवित्वम् । विदेहानामिन्द्रियाणाम-भिप्रेतदेशकालविषयापेक्षो वृत्तिलाभो विकरणभावः । सर्वप्रकृति-

विकारवशित्वं प्रधानजय इति । एतास्तिस्रः सिद्धयो मधुप्रतीका उच्यन्ते । एताश्च करणपञ्चकस्वरूपजयादधिगम्यन्ते ॥४८॥

શરીરને અનુત્તમ (જેનાથી વધુ સારી ન હોય એવી) ગતિનો લાભ થાય, એને મનોજવિત્વ કહેવાય છે. ઇન્દ્રિયો દેહવગર ઇચ્છિત દેશ, કાળ અને વિષયોમાં વૃત્તિ લાભ કરે એને વિકરણ ભાવ કહે છે. પ્રકૃતિના બધા વિકારો વશ થાય એ પ્રધાનજય છે. આ ત્રણ સિદ્ધિઓ "મધુપ્રતીકા" કહેવાય છે, અને પાંચ કરણોના સ્વરૂપજયથી પ્રાપ્ત થાય છે. ૪૮

तत्त्व वैशारदी

पञ्चरूपेन्द्रियजयात्सिद्धीराह-ततो मनोजवित्वं विकरणभावः प्रधानजयश्च । विदेहानामिन्द्रियाणां करणभावो विकरणभावः । देशः काश्मीरादिः । कालोऽतीतादिः । विषयः सूक्ष्मादिः । सान्वयेन्द्रियजयात्सर्वप्रकृतिविकारवशित्वं प्रधानजयः । ता एताः सिद्धयो मधुप्रतीका इत्युच्यन्ते योगशास्त्रनिष्णातैः । स्यादेतत्-इन्द्रियजयादिन्द्रियाणि सविषयाणि वश्यानि भवन्तु । प्रधानादीनां तत्कारणानां किमायातमित्यत आह-एताश्चेति । करणानामिन्द्रियाणां पञ्च रूपाणि ग्रहणादीनि तेषां जयात् । एतदुक्तं भवति नेन्द्रियमात्रजयस्यैताः सिद्धयोऽपि तु पञ्चरूपस्य । तदन्तर्गतं च प्रधानादीति ॥४८॥

"ततो मनोजवित्वम्..." વગેરે સૂત્રથી પાંચ રૂપોવાળી ઇન્દ્રિયોનો જય કરવાથી થતી સિદ્ધિઓ કહે છે. દેશ કાશ્મીર વગેરે, કાળ, અતીત વગેરે, વિષય સૂક્ષ્મ વગેરે. અન્વય સાથે ઇન્દ્રિયોના જયથી પ્રકૃતિના બધા વિકારો વશ થાય, એ પ્રધાનજય છે. યોગશાસ્ત્રના વિશેષજ્ઞો આ સિદ્ધિઓને મધુપ્રતીક કહે છે.

ભલે. પણ ઇન્દ્રિયજયથી વિષયો સાથે ઇન્દ્રિયો વશ થાય, પરંતુ એમના કારણરૂપ પ્રધાન વગેરે કેવી રીતે વશ થાય ? જવાબમાં "એતાશ્ચ..." વગેરેથી કહે છે કે કરણરૂપ ઇન્દ્રિયોનાં પાંચ ગ્રહણ વગેરે રૂપોના જયથી પ્રધાનજયરૂપ સિદ્ધિ પ્રાપ્ત થાય છે, આશય એ છે કે ફક્ત ઇન્દ્રિયજયથી નહીં, પણ એમનાં પાંચ રૂપો-જેમાં પ્રધાન વગેરેનો સમાવેશ થાય છે-ના જયથી આ સિદ્ધિ પ્રાપ્ત થાય છે. ૪૮

★

सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च ॥४९॥

સત્ત્વ અને પુરુષની ભિન્નતાના જ્ઞાનમાત્રવાળું ચિત્ત સર્વ ભાવોનું અધિષ્ઠાતા અને સર્વજ્ઞ બને છે. ૪૯

भाष्य

निर्धूतरजस्तमोमलस्य बुद्धिसत्त्वस्य परे वैशारद्ये परस्यां वशीकारसंज्ञायां वर्तमानस्य सत्त्वपुरुषान्यताख्यातिमात्ररूपप्रतिष्ठस्य सर्वभावाधिष्ठातृत्वम् । सर्वात्मानो गुणा व्यवसायव्यवसेयात्मकाः स्वामिनं क्षेत्रज्ञं प्रत्यशेषदृश्यात्मत्वेनोपस्थिता इत्यर्थः । सर्वज्ञातृत्वं सर्वात्मनां गुणानां शान्तोदिताव्यपदेश्यधर्मत्वेन व्यवस्थितानामक्रमोपारूढं विवेकजं ज्ञानमित्यर्थ इति । एषा विशोका नाम सिद्धिर्यां प्राप्य योगी सर्वज्ञः क्षीणक्लेशबन्धनो वशी विहरति ॥४९॥

જ્યારે રજસ્, તમસ્ના મળવિનાનું બુદ્ધિસત્ત્વ, પર વૈરાગ્ય નામના પરમ વૈશારદ્ય (શ્રેષ્ઠ જ્ઞાન)માં પ્રવર્તે અને સત્ત્વ તેમજ પુરુષની અન્યતાના જ્ઞાનમાત્રમાં પ્રતિષ્ઠિત થાય, ત્યારે એ સર્વ ભાવો (અસ્તિત્વ ધરાવતા પદાર્થો)નું અધિષ્ઠાતા બને છે. વ્યવસાય (ગ્રહણ) અને વ્યવસેય (ગ્રાહ્ય) રૂપે ગુણો સર્વ (વિશ્વ)રૂપ છે. તેઓ સ્વામી ક્ષેત્રજ્ઞ (દ્રષ્ટા) પ્રત્યે સંપૂર્ણ દૃશ્યરૂપે ઉપસ્થિત થાય છે, એવો અર્થ છે. સર્વજ્ઞાતૃત્વ (સર્વજ્ઞપણું) એટલે શાન્ત, ઉદિત, અને અવ્યપદેશ્ય (ત્રણે કાળના) ધર્મો રૂપે રહેલા ગુણોનું ક્રમ વગરનું (એકી સાથે થતું) વિવેકજન્મ જ્ઞાન એવો અર્થ છે. આ વિશોકા નામની સિદ્ધિ છે, જેને પ્રાપ્ત કરીને યોગી સર્વજ્ઞ, નષ્ટ થયેલ ક્લેશ બંધનવાળો અને વશી બનીને વિહરે છે. ૪૯

तत्त्व वैशारदी

त एते ज्ञानक्रियारूपैश्वर्यहेतवः संयमाः साक्षात्पारम्पर्येण च स्वसिद्ध्युपसंहारसंपादितश्रद्धाद्वारेण यदर्थास्तस्याः सत्त्वपुरुषान्यताख्यातेरवान्तरविभूतीर्दर्शयति-सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च । निर्धूतरजस्तमोमलतया वैशारद्यम् । ततः परा वशीकारसंज्ञा । रजस्तमोभ्यामुपप्लुतं हि चित्तसत्त्वमवश्यमासीत्,

तदुपशमे तु तद्वश्यं योगिनो वशिनः । तस्मिन्वश्ये योगिनः सत्त्वपुरुषान्यताख्याति-मात्ररूपप्रतिष्ठस्य सर्वभावाधिष्ठातृत्वम् । एतदेव विवृणोति सर्वात्मान इति । व्यवसायव्यवसेयात्मानो जडप्रकाशरूपा इत्यर्थः । तदनेन क्रियैश्वर्यमुक्तम् । ज्ञानैश्वर्यमाह-सर्वज्ञातृत्वमिति । अस्या अपि द्विविधायाः सिद्धेर्वैराग्याय योगिजनप्रसिद्धां संज्ञामाह-एषा विशोकेति । क्लेशाश्च बन्धनानि च कर्माणि । तानि क्षीणानि यस्य स तथा ॥४९॥

"सत्वपुरुषान्यताख्याति" વગેરે સૂત્ર જ્ઞાન અને ક્રિયા રૂપ ઐશ્વર્યના કારણભૂત સંયમો - સાક્ષાત્ કે પરંપરાથી પોતે ઉત્પન્ન કરેલી સિદ્ધિઓના ઉપસંહાર (પરિણામ) રૂપે મેળવેલી શ્રદ્ધા વડે - જે ઉચ્ચતમ સિદ્ધિના સાધનરૂપ છે, એ સત્વ એ પુરુષની ભિન્નતાના જ્ઞાનથી ઉત્પન્ન થતી અવાન્તર (ગૌણ) સિદ્ધિઓ દર્શાવે છે. વૈશારદ્ય (જ્ઞાનનિષ્ઠા) રજસ્, તમસ્‌ના નાશથી થાય છે. એનાથી પરવશીકાર નામનો પરવૈરાગ્ય ઉત્પન્ન થાય છે. રજોગુણ અને તમોગુણના ઉપદ્રવોથી ઘેરાયેલું ચિત્ત યોગીના વશમાં ન હતું, એ ઉપદ્રવો શાન્ત થતાં એને વશ થાય છે. માટે આવો યોગી વશી કહેવાય છે. ચિત્ત વશ થતાં યોગી સત્વ અને પુરુષની અન્યતાના જ્ઞાનમાત્રમાં પ્રતિષ્ઠિત થાય છે. અને સર્વ ભાવોનો અધિષ્ઠાતા બને છે. "सर्वात्मानः" વગેરેથી આ બાબતનું સ્પષ્ટ વિવરણ કરે છે. આ ક્રિયારૂપ ઐશ્વર્ય કહ્યું. "सर्वज्ञातृत्वम्" વગેરેથી જ્ઞાનરૂપ ઐશ્વર્ય કહે છે. આ બે પ્રકારની સિદ્ધિમાં પણ વૈરાગ્ય થાય એ હેતુથી યોગીઓમાં પ્રસિદ્ધ સંજ્ઞા વિશોકા કહે છે. કલેશો અને કર્મો બંધનો છે. જે યોગીનાં બંધનો ક્ષીણ થયાં છે, એવો વશી યોગી સુખપૂર્વક વિહરે છે. ૪૯

★

तद्वैराग्यादपि दोषबीजक्षये कैवल्यम् ॥५०॥

એ (વિવેકખ્યાતિ) માં પણ વૈરાગ્ય થવાથી દોષના બીજ (અવિદ્યા)નો નાશ થતાં કૈવલ્ય (મોક્ષ) પ્રાપ્ત થાય છે. ૫૦

ભાષ્ય

यदास्यैवं भवति क्लेशकर्मक्षये सत्त्वस्यायं विवेकप्रत्ययो धर्मः, सत्त्वं च हेयपक्षे न्यस्तं पुरुषश्चापरिणामी शुद्धोऽन्यः सत्त्वादिति । एवमस्य ततो विरज्यमानस्य यानि क्लेशबीजानि दग्धशालिबीजकल्पान्य-

प्रसवसमर्थानि तानि सह मनसा प्रत्यस्तं गच्छन्ति । तेषु प्रलीनेषु पुरुषः पुनरिदं तापत्रयं न भुङ्क्ते । तदेतेषां गुणानां मनसि कर्मक्लेशविपाक-स्वरूपेणाभिव्यक्तानां चरितार्थानामप्रतिप्रसवे पुरुषस्यात्यन्तिको गुणवियोगः कैवल्यम् । तदा स्वरूपप्रतिष्ठा चितिशक्तिरेव पुरुष इति ॥५०॥

જ્યારે યોગીને એમ સમજાય છે કે ક્લેશકર્મોનો નાશ થતાં બુદ્ધિસત્ત્વમાં ઉત્પન્ન થયેલો આ વિવેક સત્ત્વનો ધર્મ છે, અને સત્ત્વ (ગુણ હોવાથી) હેય પક્ષમાં છે, અને આ પુરુષ અપરિણામી, શુદ્ધ અને સત્ત્વથી ભિન્ન છે, ત્યારે એ એનાથી પણ વિરક્ત થાય છે. અને (અવિદ્યા) વગેરે યોગીનાં જે ક્લેશબીજો છે, એ બળેલા ડાંગરના બીજ જેવાં, અંકુરિત થવામાં અસમર્થ બને છે, અને એ બધાંનો ચિત્ત સાથે અસ્ત થાય છે. એમનો અસ્ત કે પ્રલય થતાં પુરુષ (આત્મા) ફરીથી ત્રણ પ્રકારના તાપ ભોગવતો નથી. ચિત્તમાં ક્લેશ અને કર્મવિપાકરૂપે પ્રગટ થયા હતા, એ ગુણો ચરિતાર્થ (કૃતકૃત્ય) બનીને ફરીથી વિકારોરૂપે અંકુરિત થતા નથી, ત્યારે પુરુષનો આત્યંતિક (હંમેશ માટે) ગુણવિયોગ થાય છે, એ કૈવલ્ય છે. ત્યારે સ્વરૂપમાં પ્રતિષ્ઠિત થયેલી ચિતિશક્તિ જ પુરુષ (આત્મા) છે. (એટલે એ સ્થિતિમાં ચૈતન્યસ્વરૂપ આત્મા સ્વરૂપપ્રતિષ્ઠ કહેવાય છે). ૫૦

तत्त्व वैशारदी

संयमान्तराणां पुरुषार्थाभासफलत्वाद्विवेकख्यातिसंयमस्य पुरुषार्थतां दर्शयितुं विवेकख्यातेः परवैराग्योपजननद्वारेण कैवल्यं फलमाह-तद्वैराग्यादपि दोषबीजक्षये कैवल्यम् । यदास्य योगिनः क्लेशकर्मक्षयः एवं ज्ञानं भवति । किंभूतमित्याह-सत्त्वस्यायं विवेकप्रत्ययो धर्मः । शेषं तत्र तत्र व्याख्यातत्वात् सुगमम् ॥५०॥

"तद् वैराग्यादपि" વગેરે સૂત્ર બીજા સંયમો ફક્ત પુરુષાર્થાભાસ ફળવાળા છે, અને સાચો પુરુષાર્થ વિવેકખ્યાતિરૂપ સંયમથી સિદ્ધ થાય છે, એમ દર્શાવી વિવેકખ્યાતિ, પર વૈરાગ્ય ઉત્પન્ન કરીને, કૈવલ્યરૂપ ફળ આપે છે, એમ કહે છે. યોગીનાં ક્લેશકર્મ નાશ પામે, ત્યારે આવું જ્ઞાન ઉત્પન્ન થાય છે. કેવું જ્ઞાન થાય છે ? એના જવાબમાં "सत्त्वस्यायं विवेकप्रत्ययो धर्मः"થી કહે છે કે આ વિવેકજ્ઞાન સત્ત્વનો ધર્મ છે, અને પુરુષ એનાથી અન્ય છે એવું જ્ઞાન થાય છે. બાકીનું તે તે જગાએ સમજાવ્યું છે, માટે સરળ છે. ૫૦

★

स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात् ॥५१॥

સ્થાનવાળા (ઇન્દ્રાદિ) નિમંત્રે તો પણ સંગ કે અભિમાન ન કરવાં, કારણ કે એનાથી ફરીથી અનિષ્ટનો પ્રસંગ થાય છે. ૫૧

भाष्य

चत्वारः खल्वमी योगिनः प्रथमकल्पिको मधुभूमिकः प्रज्ञाज्योति-रतिक्रान्तभावनीयश्चेति । तयाभ्यासी प्रवृत्तमात्रज्योतिः प्रथमः । ऋतम्भरप्रज्ञो द्वितीयः । भूतेन्द्रियजयी तृतीयः सर्वेषु भावितेषु भावनीयेषु कृतरक्षाबन्धः कृतकर्तव्यसाधनादिमान् । चतुर्थो यस्त्वतिक्रान्तभावनीयः, तस्य चित्तप्रतिसर्ग एकोऽर्थः, सप्तविधास्य प्रान्तभूमिप्रज्ञा ।

तत्र मधुमतीं भूमिं साक्षात्कुर्वतो ब्राह्मणस्य स्थानिनो देवाः सत्त्वविशुद्धिमनुपश्यन्तः स्थानैरुपनिमन्त्रयन्ते-भो इहास्यतामिह रम्यतां कमनीयोऽयं भोगः कमनीयेयं कन्या रसायनमिदं जरामृत्यू बाधते वैहायसमिदं यानममी कल्पद्रुमाः पुण्या मन्दाकिनी सिद्धा महर्षय उत्तमा अनुकूला अप्सरसो दिव्ये श्रोत्रचक्षुषी वज्रोपमः कायः स्वगुणैः सर्वमिदमुपार्जितमायुष्मता प्रतिपद्यतामिदमक्षयमजरममरस्थानं देवानां प्रियमिति । एवमभिधीयमानः सङ्गदोषान्भावयेद्-घोरेषु संसाराङ्गारेषु पच्यमानेन मया जननमरणान्धकारे विपरिवर्तमानेन कथञ्चिदासादितः क्लेशतिमिरविनाशी योगप्रदीपः । तस्य चैते तृष्णायोनयो विषयवायवः प्रतिपक्षाः । स खल्वहं लब्धालोकः कथमनया विषयमृगतृष्णया वञ्चितस्तस्यैव पुनः प्रदीप्तस्य संसाराग्नेरात्मानमिन्धनीकुर्यामिति । स्वस्ति वः स्वप्नोपमेभ्यः कृपणजनप्रार्थनीयेभ्यो विषयेभ्य इत्येवं निश्चितमतिः समाधिं भावयेत् ।

सङ्गमकृत्वा स्मयमपि न कुर्यादेवमहं देवानामपि प्रार्थनीय इति । स्मयादयं सुस्थितंमन्यतया मृत्युना केशेषु गृहीतमिवात्मानं न भावयिष्यति । तथा चास्य च्छिद्रान्तरप्रेक्षी नित्यं यत्नोपचर्य प्रमादो लब्धविवरः क्लेशानुत्तम्भवष्यति । ततः पुनरनिष्टप्रसङ्गः । एवमस्य सङ्गस्मयावकुर्वतो भावितोऽर्थो दृढी भविष्यति । भावनीयश्चार्थोऽभिमुखीभविष्यति ॥५१॥

પ્રથમકલ્પિક, મધુભૂમિક, પ્રજ્ઞાજ્યોતિ અને અતિક્રાન્તભાવનીય એ ચાર પ્રકારના યોગીઓ છે. અભ્યાસ શરૂ કરતાં, જ્યોતિની પ્રવૃત્તિ ફક્ત શરૂ થઈ છે, એવો પહેલો પ્રથમકલ્પિક છે. ઋતંભરા પ્રજ્ઞાવાળો બીજો છે. ભૂતો અને ઇન્દ્રિયોને જીતનાર ત્રીજો છે, જેણે બધા ભાવિત અને ભાવનીયોમાં રક્ષાબંધની વ્યવસ્થા કરી છે, અને જે કર્તવ્યનાં સાધનોથી યુક્ત છે. ચોથા અતિક્રાન્ત ભાવનીય યોગી માટે ફક્ત ચિત્તવિલયરૂપ એક જ કર્તવ્ય બાકી છે; એની પ્રજ્ઞા સાત પ્રાન્તભૂમિઓવાળી છે.

મધુમતી ભૂમિને સાક્ષાત્કારથી પ્રાપ્ત કરનાર બ્રાહ્મણ પાસે સ્થાનવાળા દેવો, એ સત્ત્વ વિશુદ્ધિ કરશે એમ જોતાં, સ્થાનોમાં રહેવા માટે નિમંત્રણ (પ્રાર્થના) કરતાં કહે છેઃ" હે મહાત્મા, અહીં બેસો, અહીં રમો. આ ભોગ ઇચ્છવા યોગ્ય છે. આ કન્યા કમનીય છે. આ રસાયણ ઘડપણ અને મૃત્યુનો નાશ કરે છે. આ વિમાન આકાશગામી છે. આ કલ્પવૃક્ષો (ઇચ્છા પ્રમાણે ફળ આપે) છે. આ પુણ્યા મંદાકિની છે. આ સિદ્ધ મહર્ષિઓ છે. આ ઉત્તમ, અનુકૂળ અપ્સરાઓ છે. દિવ્ય શ્રોત્ર અને નેત્ર પ્રાપ્ત કરો. વજ્ર જેવું દૃઢ શરીર પ્રાપ્ત કરો. આ બધું આપ આયુષ્યમાને આપના ગુણોથી મેળવ્યું છે. આ સ્થાન અક્ષય, અજર, અમર અને દેવોને પ્રિય છે."

જ્યારે આવું કહેવામાં આવે ત્યારે સંગથી થતા દોષોની ભાવના કરે : "સંસારના ભયંકર અંગારાઓમાં શેકાતાં અને જન્મમરણના અંધકારમાં ભટકતાં, મેં કોઈ રીતે (પૂર્વપુણ્યથી) આ ક્લેશાંધકારનો નાશ કરનાર યોગ-પ્રદીપ પ્રાપ્ત કર્યો છે. તૃષ્ણાથી જન્મેલા વિષયવાયુઓ આ પ્રદીપના પ્રતિપક્ષી છે. તો જેને પ્રકાશ પ્રાપ્ત થયો છે એવો હું કેવી રીતે આ વિષયમૃગતૃષ્ણાથી છેતરાઈને, વળી પાછો એ જ પ્રજ્વલિત અગ્નિમાટે પોતાને ઇંધન બનાવું ? સ્વપ્ન જેવા અને કૃપણ લોકોવડે ઇચ્છનીય વિષયોનું કલ્યાણ થાઓ." એમ બુદ્ધિથી નિશ્ચય કરીને સમાધિની ભાવના ચાલુ રાખે. સંગ ન કરવો એટલું જ નહી, પણ દેવો મારી પ્રાર્થના કરે છે એમ અભિમાન પણ ન કરવું. જો અભિમાન ઉત્પન્ન થાય તો પોતાને ગન્તવ્ય પ્રાપ્ત થઈ ગયું છે એમ માનીને, મૃત્યુવડે કેશોમાં પકડાયેલો હોય એમ પોતાને માનશે નહી. અને એમ થતાં છિદ્ર ખોળતો અને સતત કરવા યોગ્ય પ્રયત્નમાં વિઘ્નરૂપ પ્રમાદ, બહાનું

મળતાં, ક્લેશો વધારી મૂકશે. એનાથી ફરીથી અનિષ્ટનો પ્રસંગ થશે. પણ સંગ અને સ્મય ન કરનાર યોગી ધ્યેયભાવનામાં દૃઢ બનશે અને એની ઉદાત્ત ભાવનાનો વિષય અભિમુખ બનશે. ૫૧

तत्त्व वैशारदी

संप्रति कैवल्यसाधने प्रवृत्तस्य योगिनः प्रत्यूहसंभवे तन्निराकरणकारण-मुपदिशति-स्थान्युपनिमन्त्रणे सङ्गस्मायाकरणं पुनरनिष्टप्रसङ्गात् । स्थानानि येषां सन्ति ते स्थानिनो महेन्द्रादयः । तैरुपनिमन्त्रणं तस्मिन्सङ्गश्च स्मयश्च न कर्तव्यः, पुनरनिष्टप्रसङ्गात् । तत्र यं देवाः स्थानैरुपमन्त्रयन्ते तं योगिनमेकं निर्धारयितुं यावन्तो योगिनः संभवन्ति तावत एवाह-चत्वार इति । तत्र प्रथमकल्पिकस्य स्वरूपमाह-तत्राभ्यासीति । प्रवृत्तमात्रं न पुनर्वशीकृतं ज्योतिर्ज्ञानं परचित्तादिविषयं यस्य स तथा । द्वितीयमाह-ऋतम्भरप्रज्ञ इति । यत्रेदमुक्तम्- "ऋतम्भरा तत्र प्रज्ञा" (१।४८) इति । स हि भूतेन्द्रियाणि जिगीषुः । तृतीयमाह-भूतेन्द्रियजयीति । तेन हि स्थूलादिसंयमेन ग्रहणादिसंयमेन च भूतेन्द्रियाणि जितानि । तमेवाह-सर्वेषु भावितेषु । निष्पादितेषु भूतेन्द्रियजयात्परचित्तादिज्ञानादिषु कृतरक्षाबन्धो यतस्तेभ्यो न च्यवते भावनीयेषु निष्पादनीयेषु विशोकादिषु परवैराग्यपर्यन्तेषु कर्तव्यसाधनवान् । पुरुषप्रयत्नस्य साधनविषयस्यैव साध्यनिष्पादकत्वात् । चतुर्थमाह-चतुर्थ इति । तस्य हि भगवतो जीवन्मुक्तस्य चरमदेहस्य चित्तप्रतिसर्ग एकोऽर्थः ।

तदेतेषु योगिषूपनिमन्त्रणविषयं योगिनमवधारयति-तत्र मधुमतीमिति । प्रथमकल्पिके तावन्महेन्द्रादीनां तत्प्राप्तिशङ्कैव नास्ति । तृतीयोऽपि तैर्नोपनिमन्त्रणीयः; भूतेन्द्रियवशित्वेनैव तत्प्राप्तेः । चतुर्थेऽपि परवैराग्यसंपत्तेरासङ्गशङ्का दूरोत्सारितैवेति पारिशेष्याद् द्वितीय एव ऋतम्भरप्रज्ञस्तदुपनिमन्त्रणविषय इति । वैहायसमाकाशगामि । अक्षयमविनाशि । अजरं सदाभिनवम् ।

स्मयकरणे दोषमाह-स्मयादयमिति । स्मयात्सुस्थितंमन्यो नानित्यतां भावयिष्यति । न तस्यां प्रणिधास्यतीत्यर्थः । सुगममन्यत् ॥५१॥

"स्थान्युपनिमंत्रणे.." વગેરે સૂત્રથી કૈવલ્યના સાધનમાં પ્રવૃત્ત થયેલા યોગીને વિઘ્નોની સંભાવના હોવાથી, એમના નિરાકરણ માટે ઉપદેશ કરે છે. સ્થાની એટલે સ્થાનવાળા મહેન્દ્ર વગેરે. એમની પ્રાર્થનાથી સંગ કે અભિમાન ન કરવાં, કારણ કે એનાથી ફરીવાર અનિષ્ટનો પ્રસંગ થાય છે. જેને દેવો સ્થાન વગેરેની લાલચ આપે છે, એ યોગીને નિશ્ચિત કરવા માટે "चत्वारः खल्वमी योगिनः".. વગેરેથી યોગીઓના બધા સંભવિત પ્રકારો વર્ણવે છે. એમાં પહેલા

પ્રથમકલ્પિકનું લક્ષણ "તત્રાભ્યાસી" વગેરેથી કહે છે. માત્ર શરૂઆત કરી છે, પણ પરચિત્ત વગેરેના જ્ઞાનરૂપ જ્યોતિને વશ કર્યો નથી, એવો યોગી પ્રથમકલ્પિક કહેવાય છે."ઋતંભરપ્રજ્ઞઃ" વગેરેથી બીજાવિષે કહે છે, જેને માટે "ઋતંભરા તત્ર પ્રજ્ઞા" ૧.૪૮. એમ કહ્યું છે. એ ભૂતો અને ઇન્દ્રિયોનો જય કરવા માગે છે. "ભૂતેન્દ્રિયજયી" વગેરેથી ત્રીજા વિષે કહે છે. એણે સ્થૂલ તેમજ ગ્રહણ વગેરે પર સંયમ કરીને ભૂતો અને ઇન્દ્રિયો જીત્યાં છે. "સર્વેષુ ભાવિતેષુ.." વગેરેથી એના વિષે આગળ કહે છે કે એણે ભૂતો અને ઇન્દ્રિયોનો જય કર્યો હોવાથી અને પરચિત્ત વગેરેનું જ્ઞાન મેળવ્યું હોવાથી પોતાનું રક્ષાબંધન કર્યું છે. એ કારણે એ ચ્યુત થતો નથી. વળી ભાવના વડે વિશોકા વગેરે ભૂમિઓ મેળવવાનાં અને પરવૈરાગ્ય સુધીનાં કર્તવ્યો માટેનાં જરૂરી સાધનો એણે મેળવ્યાં છે. પુરુષના સાધન વિષયક પ્રયત્નથી જ સાધ્ય સિદ્ધ થાય છે. "ચતુર્થઃ" વગેરે થી ચોથાવિષે કહે છે. એ જીવન્મુક્ત, ચરમ (છેલ્લા) દેહવાળા ભગવાનને ચિત્તવિલય એ એક કર્તવ્ય બાકી છે. "તત્ર મધુમતીમ્" વગેરેથી બધા પ્રકારના યોગીઓમાં જેને નિમંત્રણ આપવામાં આવે છે, એ યોગીને નક્કી કરે છે. પ્રથમકલ્પિકમાં મહેન્દ્રાદિ દેવોને એ(વિવેકપ્રાપ્તિ)ની શંકા જ નથી. ત્રીજાએ ભૂતો અને ઇન્દ્રિયો વશ કરીને એની પ્રાપ્તિ કરી છે, તેથી એને નિમંત્રણ કરવામાં આવતું નથી. ચોથાએ પરવૈરાગ્યવડે આસક્તિની સંભાવના પાછળ છોડી છે. માટે બાકી રહેલો ઋતંભરા પ્રજ્ઞાવાળો યોગી એમના ઉપનિમંત્રણનો વિષય છે. વૈહાયસ એટલે આકાશમાં ગતિ કરે એવું. અક્ષય એટલે અવિનાશી. અજર એટલે હંમેશ નવું રહે એવું. " સ્મયાદયં સુસ્થિતંમન્યતયા" વગેરેથી અભિમાનનો દોષ કહે છે. અભિમાનથી પોતાને સુસ્થિત માનીને અનિત્યતાની ભાવના નહીં કરે, એમાં ચિત્તનું પ્રણિધાન નહીં કરે. શેષ સુગમ છે. ૫૧

★

क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानम् ॥५२॥

ક્ષણ અને એમના ક્રમપર સંયમ કરવાથી વિવેકજન્ય જ્ઞાન ઉત્પન્ન થાય છે. ૫૨

ભાષ્ય

यथापकर्षपर्यन्तं द्रव्यं परमाणुरेवं परमाकर्षपर्यन्तः कालः क्षणः । यावता वा समयेन चलितः परमाणुः पूर्वदेशं जह्यादुत्तरदेशमुपसंपद्येत स कालः क्षणः, तत्प्रवाहाविच्छेदस्तु क्रमः । क्षणतत्क्रमयोर्नास्ति वस्तुसमाहार इति बुद्धिसमाहारो मुहूर्ताहोरात्रादयः । स खल्वयं कालो वस्तुशून्यो

बुद्धिनिर्माणः शब्दज्ञानानुपातो लौकिकानां व्युत्थितदर्शनानां वस्तुस्वरूप इवावभासते ।

क्षणस्तु वस्तुपतितः क्रमावलम्बी । क्रमश्च क्षणानन्तर्यात्मा । तं कालविदः काल इत्याचक्षते योगिनः । न च द्वौ क्षणौ सह भवतः । क्रमश्च न द्वयोः सहभुवोः असंभवात्, पूर्वस्मादुत्तरस्य भाविनो यदानन्तर्यं क्षणस्य स क्रमः । तस्माद्वर्तमान एवैकः क्षणो न पूर्वोत्तरक्षणाः सन्तीति । तस्मान्नास्ति तत्समाहारः । ये तु भूतभाविन क्षणास्ते परिणामान्विता व्याख्येयाः । तेनैकेन क्षणेन कृत्स्नो लोकः परिणाममनुभवति । तत्क्षणोपारूढाः खल्वमी सर्वे धर्माः । तयोः क्षणतत्क्रमयोः संयमात्तयोः साक्षात्करणम् । ततश्च विवेकजं ज्ञानं प्रादुर्भवति ।।५२।।

દ્રવ્યનો અંતિમ ભાગ પરમાણુ છે, એમ કાળનો અંતિમ ભાગ ક્ષણ છે. પરમાણુ ગતિશીલ બનીને જેટલા સમયમાં પૂર્વદેશ છોડી ઉત્તરદેશમાં જાય, એ સમય ક્ષણ છે. એનો અવિચ્છિન્ન પ્રવાહક્રમ છે. ક્ષણો અને એમનો ક્રમ વાસ્તવિક દૃષ્ટિએ એકીસાથે રહેતા નથી. તેથી મુહૂર્ત, રાત દિવસ વગેરે બુદ્ધિસમાહાર (માનસિક ખ્યાલ) છે. આ કાળ ખરેખર વસ્તુશૂન્ય છે, અને બુદ્ધિનિર્મિત છે, શબ્દજ્ઞાનને અનુસરીને થતો વિકલ્પમાત્ર છે, છતાં, વ્યુત્થિતચિત્તવાળા લૌકિક પુરુષોને એ જાણે કે વાસ્તવિક હોય એવો ભાસે છે.

પરંતુ ક્ષણ તો વાસ્તવિક છે અને ક્રમનું અવલંબન છે. એક પછી એક આવતી ક્ષણો ક્રમનો આત્મા (સ્વરૂપ) છે. એને કાળવિદ્ યોગીઓ કાળ કહે છે. બે ક્ષણો સાથે રહેતી નથી. એકી સાથે થનારાઓમાં ક્રમ હોતો નથી, કારણકે એ અસંભવિત છે. પહેલી ક્ષણ ગયા પછી આવનાર ક્ષણનું જે આનન્તર્ય (પછી આવવાપણું) છે, એ ક્ષણનો ક્રમ છે. તેથી વર્તમાન જ એક ક્ષણ છે, પહેલાંની કે પછીની ક્ષણો નથી. તેથી એમનો સમાહાર (એકઠાપણું) નથી. ભૂતકાલીન અને ભાવી ક્ષણોને પદાર્થના વર્તમાન ક્ષણમાં થતા પરિણામ સાથે અનુગત તરીકે સમજવી સમજાવવી જોઈએ. તેથી એક ક્ષણમાં જ સંપૂર્ણ લોક પરિણામ અનુભવે છે. બધા ધર્મો ક્ષણ પર આરૂઢ થયેલા છે. ક્ષણ અને એના ક્રમ પર સંયમ કરીને એ બેનો સાક્ષાત્કાર કરવો

જોઈએ. એનાથી વિવેકજન્ય જ્ઞાન ઉત્પન્ન થાય છે. ૫૨

तत्त्व वैशारदी

उक्ता क्वचित्क्वचित्संयमात्सर्वज्ञता । सा च न निःशेषज्ञता । अपि तु प्रकारमात्रविवक्षया, यथा सर्वैर्व्यञ्जनैर्भुक्तमिति । अत्र हि यावन्तो व्यञ्जनप्रकारास्तैर्भुक्तमिति गम्यते न तु निःशेषैरिति । अस्ति च निःशेषवचनः सर्वशब्दो यथोपनीतमन्नं सर्वमशितं प्राशकेनेति । तत्र हि निःशेषमिति गम्यते । तदिह निःशेषज्ञतालक्षणस्य विवेकजज्ञानस्य साधनं संयममाह-क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानम् । क्षणपदार्थ निदर्शनपूर्वकमाह-यथेति । लोष्टस्य हि प्रविभज्यमानस्य यस्मिन्नवयवेऽल्पत्वतारतम्यं व्यवतिष्ठते सोपकर्षपर्यन्तः परमाणुर्यथा तथापकर्षपर्यन्तः कालः क्षणः । पूर्वापरभागविकलकालकलेति यावत् । तमेव क्षणं प्रकारान्तरेण दर्शयति-यावता वेति । परमाणुमात्रं देशमतिक्रमेदित्यर्थः । क्रमपदार्थमाह-तत्प्रवाहेति । तत्पदेन क्षणः परामृश्यते । न चेदृशः क्रमो वास्तवः । किं तु काल्पनिकः । तस्य समाहाररूपस्यायुगपदुपस्थितेषु वास्तवत्वेन विचारासहत्वादित्याह-क्षणतत्क्रमयोरिति । अयुगपद्भाविक्षणधर्मत्वात्क्रमस्य क्षणसमाहारस्यावास्तवत्वात्क्षणतत्क्रमयोरप्यवास्तवत्वं समाहारस्य । नैसर्गिकवैतण्डिकबुद्धियतिशयरहिता लौकिकाः प्रतिक्षण एव व्युत्थितदर्शना भ्रान्ता ये कालमीदृशं वास्तवमभिमन्यन्त इति ।

तत्किं क्षणोऽप्यवास्तवो नेत्याह-क्षणस्तु वस्तुपतितो वास्तव इत्यर्थः । क्रमस्यावलम्बनमवलम्बः, सोऽस्यास्तीति, क्रमेणावलम्ब्यते वैकल्पिकेनेत्यर्थः । क्रमस्य क्षणावलम्बनत्वे हेतुमाह-क्रमश्चेति । क्रमस्यावास्तवत्वे हेतुमाह- न चेति । चो हेत्वर्थे । यस्तु वैजात्यात्सहभावमुपेयात्तं प्रत्याह-क्रमश्च न द्वयोरिति । कस्मादसंभव इत्यत आह-पूर्वस्मादिति । उपसंहरति-तस्मादिति । तत्किमिदानीं शशविषाणायमाना एव पूर्वोत्तरक्षणा नेत्याह-ये त्विति । अन्विताः साम्येन समन्वागता इत्यर्थः । उपसंहरति-तेनेति । वर्तमानस्यैवार्थक्रियासु स्वोचितासु सामर्थ्यादिति ॥५२॥

સંયમથી સર્વજ્ઞતા ઉત્પન્ન થાય છે, એમ ક્યાંક ક્યાંક કહ્યું છે. પણ એ નિઃશેષજ્ઞતા નથી, ફક્ત પ્રકારની વિવક્ષાએ એવું કહેવામાં આવે છે, જેમ બધાં વ્યંજનો ખાધાં, એટલે પીરસેલાં બધાં વ્યંજનો (ચટણી, શાક વગેરે)નો આસ્વાદ લીધો, એવો અર્થ થાય છે, જરાપણ બાકી રાખ્યા વિના, એવો અર્થ થતો નથી. સર્વ શબ્દ નિઃ-શેષતાનો વાચક પણ છે, જેમ જમનાર વ્યક્તિએ પીરસેલું બધું ખાધું. ત્યાં બધું એટલે નિઃશેષ એવો અર્થ જણાય છે.

"क्षणतत्क्रमयोः संयमात्" સૂત્રથી નિઃશેષતા લક્ષણવાળા વિવેકજન્ય

જ્ઞાનના સાધનરૂપ સંયમને કહે છે. "યથા" વગેરેથી દાખલો આપીને ક્ષણ શબ્દનો અર્થ કહે છે. જેમ ઢેખાળાના વિભાગો કરતાં કરતાં, જે અવયવમાં અલ્પતાનો છેડો આવે, એ અંતિમ ભાગને પરમાણુ કહે છે, એમ કાળના અંતિમ ભાગને ક્ષણ કહે છે. પહેલાં અને પછી એવા ભાગવિનાની કાળની કળા ક્ષણ છે. "યાવતા વા".. વગેરેથી ક્ષણને બીજી રીતે વર્ણવે છે. પરમાણુ જેવડા દેશનું અતિક્રમણ જેટલા સમયમાં થાય એ એક ક્ષણ છે. "તત્પ્રવાહ..." વગેરેથી ક્રમ શબ્દનો અર્થ કહે છે. "તત્" શબ્દથી ક્ષણનો ઉલ્લેખ કરે છે. આવો ક્રમ વાસ્તવિક નથી. પણ કાલ્પનિક છે. "ક્ષણતત્ક્રમયોઃ..." વગેરેથી કહે છે કે જુદી જુદી ક્ષણોમાં જણાતો સમાહાર (સંઘાત) વાસ્તવિક છે, એ વાત વિચાર કરતાં ટકી શકે એવી નથી. ક્રમ એકીસાથે ઉત્પન્ન ન થતી ક્ષણોના ધર્મવાળો હોવાથી, ક્ષણોનો સંઘાત અવાસ્તવિક છે. આ કારણે ક્ષણ અને એના ક્રમનો સહભાવ પણ અવાસ્તવિક છે. પંડિતો જેવી બુદ્ધિની નૈસર્ગિક સૂક્ષ્મતા વિનાના, પ્રતિક્ષણ વ્યુત્થિત દર્શનવાળા અને ભ્રાન્ત લોકો આવા કાળને વાસ્તવિક માને છે.

તો શું ક્ષણ પણ અવાસ્તવિક છે ? જવાબમાં ના કહે છે. ક્ષણ તો વસ્તુપતિત કે વાસ્તવિક છે. આ વાસ્તવિક ક્ષણને અવલંબતો ક્રમ કાલ્પનિક છે, એવો અર્થ છે. "ક્રમશ્ચ ન દ્વયોઃ સહભુવોઃ અસંભવાત્" વગેરેથી ક્રમ ક્ષણનું અવલંબન શાથી કરે છે, એ હેતુ જણાવે છે. "ન ચ..." વગેરેથી ક્રમની અવાસ્તવિકતાનો હેતુ કહે છે. અહીં "ચ" હેતુના અર્થમાં પ્રયોજ્યો છે. જે ભિન્ન જાતિની હોવાથી સહભાવ માને છે, એના પ્રત્યે "ક્રમશ્ચ ન દ્વયોઃ..." વગેરેથી કહે છે કે બે ક્ષણોનો સહભાવ અસંભવિત હોવાથી એમનો ક્રમ બનતો નથી. અસંભવ કેમ છે ? એના જવાબમાં "પૂર્વસ્માત્..." વગેરેથી કહે છે કે અસ્તિત્વ ધરાવતી પહેલી ક્ષણ સાથે પછીની ક્ષણ જોડાય એ ક્રમ કહેવાય. (એવો ક્રમ અહીં અસંભવ છે). "તસ્માત્" વગેરેથી ઉપસંહાર કરે છે. (વર્તમાન ક્ષણ જ સત્ય છે).

તો પહેલાંની અને પછીની ક્ષણો સસલાના શીંગડા જેવી છે ? જવાબમાં "યે તુ.." વગેરેથી ના કહે છે. (વસ્તુના વર્તમાન ક્ષણના પરિણામ સાથે ભૂત અને ભાવી ક્ષણો અનુગત છે). અન્વિત-અનુગત-એટલે સમાનપણે સર્વ અવયવોમાં રહેલી, એવો અર્થ છે. "તેન..." વગેરેથી ઉપસંહાર કરે છે કે એક વર્તમાન ક્ષણમાં સંપૂર્ણ લોક પરિણામ અનુભવે છે. વર્તમાન ક્ષણ જ પદાર્થોમાં પોતાને યોગ્ય પ્રયોજનવાળી ક્રિયા કરવામાં સમર્થ છે. ૫૨

★

तस्य विषयविशेष उपक्षिप्यते- એ (જ્ઞાન)નો ખાસ વિષય રજૂ કરે છે-

जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः ॥५३॥

જાતિ, લક્ષણ અને દેશથી જેમનો ભેદ ન જાણી શકાય, એવા એકસરખા બે પદાર્થોનું જ્ઞાન આનાથી (વિવેકજન્ય જ્ઞાનથી) થાય છે. ૫૩

ભાષ્ય

तुल्ययोर्देशलक्षणसारूप्ये जातिभेदोऽन्यताया हेतुर्गौरियं वडवेयमिति । तुल्यदेशजातीयत्वे लक्षणमन्यत्वकरं कालाक्षी गौः स्वस्तिमती गौरिति । द्वयोरामलकयोर्जातिलक्षणासारूप्याद्देशभेदोऽन्यत्वकर इदं पूर्वमिदमुत्तरमिति । यदा तु पूर्वमामलकमन्यव्यग्रस्य ज्ञातुरुत्तरदेश उपावर्त्यते तदा तुल्यदेशत्वे पूर्वमेतदुत्तरमेतदिति प्रविभागानुपपत्तिः । असंदिग्धेन च तत्त्वज्ञानेन भवितव्यमित्यत इदमुक्तं ततः प्रतिपत्तिर्विवेकजज्ञानादिति ।

कथम् ? पूर्वामलकसहक्षणो देश उत्तरामलकसहक्षणाद्देशाद्भिन्नः । ते चामलके स्वदेशक्षणानुभवभिन्ने । अन्यदेशक्षणानुभवस्तु तयोरन्यत्वे हेतुरिति । एतेन दृष्टान्तेन परमाणोस्तुल्यजातिलक्षणदेशस्य पूर्वपरमाणु-देशसहक्षणसाक्षात्करणादुत्तरस्य परमाणोस्तद्देशानुपपत्तावुत्तरस्य तद्देशानु-भवो भिन्नः सहक्षणभेदात्तयोरीश्वरस्य योगिनोन्यत्वप्रत्ययो भवतीति ।

अपरे तु वर्णयन्ति-येन्त्या विशेषास्तेऽन्यताप्रत्ययं कुर्वन्तीति । तत्रापि देशलक्षणभेदो मूर्तिव्यवधिजातिभेदश्चान्यत्वे हेतुः । क्षणभेदस्तु योगिबुद्धिगम्य एवेति । अत उक्तं-मूर्तिव्यवधिजातिभेदाभावान्नास्ति-मूलपृथक्त्वमिति वार्षगण्यः ॥५३॥

એકસરખા લક્ષણ અને સ્થાનવાળી બે વસ્તુઓનો ભેદ જાતિના ભેદથી જાણી શકાય છે કે આ ગાય છે અને આ ઘોડી છે. સમાન દેશ અને સમાન જાતિની બે વસ્તુઓમાં લક્ષણ વડે ભેદનું જ્ઞાન થાય છે કે આ ગાય કાલાક્ષી (કાળી આંખવાળી) અત્રે આ સ્વસ્તિમતી (કપાળમાં અર્ધચંદ્રના ચિહ્નવાળી) છે. બે સમાન જાતિ અને લક્ષણનાં આમળાંનો ભેદ સ્થાનના ભેદથી જણાય છે કે આ પૂર્વમાં અને આ ઉત્તરમાં રહેલું આમળું છે. પણ જ્યારે જાણનારનું ધ્યાન બીજી તરફ હોય ત્યારે પૂર્વના આમળાને ઉત્તરમાં

મૂકવામાં આવે તો, બંને આમળાંનો દેશ એકસરખો થવાથી આ પૂર્વનું અને આ ઉત્તરનું આમળું છે, એવો ભેદ જાણી શકાતો નથી, અને તત્ત્વજ્ઞાન તો અસંદિગ્ધ (સંશય વગરનું) હોવું જોઈએ. તેથી કહ્યું કે આ વિવેકજન્ય જ્ઞાનથી એવું નિઃસંદેહ જ્ઞાન થાય છે. કેવી રીતે ? પૂર્વના આમળાની સાથેની ક્ષણવાળો દેશ, ઉત્તરના આમળા સાથેની ક્ષણવાળા દેશ કરતાં જુદો છે. એ બે આમળાં પોતાના દેશ અને ક્ષણના અનુભવથી જુદાં છે. તેથી જુદા જુદા દેશ અને ક્ષણના અનુભવો એ બેના ભેદનો હેતુ છે. આ દૃષ્ટાન્તથી સમાન જાતિ, લક્ષણ અને દેશના પૂર્વ પરમાણુના દેશ સાથે રહેલી ક્ષણના સાક્ષાત્કારથી, ઉત્તરના પરમાણુમાં પણ એ જ દેશ હોય એ વાત યુક્તિયુક્ત નથી, તેથી ઉત્તરના પરમાણુનો પોતાના દેશનો અનુભવ ભિન્ન છે. કારણ કે એની સાથે રહેલી ક્ષણ ભિન્ન છે. આના લીધે ઈશ્વર અને યોગીને એ બેના ભેદનું જ્ઞાન થાય છે, એમ માનવું જોઈએ.

બીજા લોકો કહે છે કે અન્તિમ વિશેષો ભેદજ્ઞાન ઉત્પન્ન કરે છે. પરંતુ ત્યાં પણ દેશ અને લક્ષણનો ભેદ, તેમજ મૂર્તિ, વ્યવધાન (અંતર) અને જાતિનો ભેદ અન્યત્વ જ્ઞાનનો હેતુ છે. ક્ષણનો ભેદ તો યોગીની બુદ્ધિથી જ જાણી શકાય એવો છે. વાર્ષગણ્ય ઋષિએ કહ્યું છે : "મૂર્તિ, અંતર, અને જાતિના ભેદના અભાવને કારણે મૂળમાં પૃથક્પણું (ભેદ) નથી." ૫૩

तत्त्व वैशारदी

यद्यप्येतद्विवेकजं ज्ञानं निःशेषभावविषयमित्यग्रे वक्ष्यते, तथाप्यति-सूक्ष्मत्वात्प्रथमं तस्य विषयविशेष उपक्षिप्यते-जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः । लौकिकानां जातिभेदोऽन्यताया ज्ञापकहेतुः । तुल्या जातिर्गोत्वम् । तुल्यश्च देशः पूर्वादिः । कालाक्षीस्वस्तिमत्योर्लक्षणभेदः परमिति । द्वयोराम-लकयोस्तुल्यामलकत्वजातिः । वर्तुलत्वादि लक्षणं तुल्यम् । देशभेदः परमिति । यदा तु योगिज्ञानं जिज्ञासुना केनचित्पूर्वामलकमन्यव्यग्रस्य योगिनो ज्ञातुरुत्तरदेश उपावर्त्यते, उत्तरदेशमामलकं ततोऽपसार्य पिधाय वा तदा तुल्यदेशत्वे पूर्वमेतदुत्तरमेतदिति प्रविभागानुपपत्तिः प्राज्ञस्य लौकिकस्य त्रिप्रमाणानिपुणस्य । असन्दिग्धेन च तत्त्वज्ञानेन भवितव्यम् । विवेकजज्ञानवतो योगिनः संदिग्धत्वानुपपत्तेः । अत उक्तं सूत्रकृता-ततः प्रतिपत्तिः । तत इति व्याचष्टे-विवेकजज्ञानादिति ।

क्षणतत्क्रमसंयमाज्जातं ज्ञानं कथमामलकं तुल्यजातिलक्षणदेशादामलकान्तराद्विवेचयतीति पृच्छति-कथमिति । उत्तरमाह-पूर्वामलकसहक्षणो देशः पूर्वामलकेनैकक्षणो देशः । तेन सह निरन्तरपरिणाम इति यावत् । उत्तरामलकसहक्षणाद्देशादुत्तरामलकनिरन्तरपरिणामाद्भिन्नः । भवतु देशयोर्भेदः किमायातमामलकभेदस्येत्यत आह- ते चामलके स्वदेशक्षणानुभवभिन्ने । स्वदेशसहितो यः क्षणस्तस्यामलकस्य कालकला स्वदेशेन सहौत्तराधर्यरूपपरिणामलक्षिता सा स्वदेशक्षणः । तस्यानुभवः प्राप्तिर्वा ज्ञानं वा । तेन भिन्ने आमलके । ययोरामलकयोः पूर्वोत्ताभ्यां देशाभ्यामौत्तराधर्यपरिणामक्षण आसीत्तयोर्देशान्तरौत्तराधर्यपरिणामक्षणविशिष्टत्वमनुभवन्संयमी ते भिन्ने एव प्रत्येति । संप्रति तद्देशपरिणामेऽपि पूर्व भिन्नदेशपरिणामाद्विशिष्टस्य चैतद्देशपरिणामलक्षणस्य संयमतः साक्षात्करणात् । तदिदमुक्तम्-अन्यदेशक्षणानुभवस्तु तयोरन्यत्वे हेतुरिति । अनेनैव निदर्शनेन लौकिकपरीक्षकसंवादादिना परमाणोरपीदृशस्य भेदो योगीश्वरबुद्धिगम्यः श्रद्धेय इत्याह- एतेनेति ।

अपरे तु वर्णयन्ति । वर्णनमुदाहरति-य इति । वैशेषिका हि नित्यद्रव्यवृत्तयोऽन्त्या विशेषा इत्याहुः । तथा हि-योगिनो मुक्तांस्तुल्यजातिदेशकालान्यवधिरहितान्परस्परतो भेदेन प्रत्येकं तत्त्वेन च प्रतिपद्यन्ते । तस्मादस्ति कश्चिदन्त्यो विशेष इति । तथा च स एव नित्यानां परमाण्वादीनां द्रव्याणां भेदक इति । तदेतद्दूषयति-तत्रापीति । जातिदेशलक्षणान्युदाहृतानि । मूर्तिः संस्थानम् । यथैकं विशुद्धावयवसंस्थानोपपन्नमपसार्य तस्मिन्नेव देशेऽन्यव्यग्रस्य द्रष्टुः कुत्सितावयवसंनिवेश उपावर्त्यते तदा तस्य संस्थानभेदेन भेदप्रत्ययः । शरीरं वा मूर्तिः । तत्संबन्धेनात्मनां संसारिणां मुक्तात्मनां वा भूतचरेण यादृशतादृशेन भेद इति सर्वत्र भेदप्रत्ययस्यान्यथासिद्धेर्नान्त्यविशेषकल्पना । व्यवधिर्भेदकारणम् । यथा कुशपुष्करद्वीपयोर्देशस्वरूपयोरिति । यतो जातिदेशादिभेदा लोकबुद्धिगम्या अत उक्तम्- क्षणभेदस्तु योगिबुद्धिगम्य एवेति । एवकारः क्षणभेदमवधारयति न योगिबुद्धिगम्यत्वम् । तेन भूतचरेण देहसंबन्धेन मुक्तात्मनामपि भेदो योगिबुद्धिगम्य उन्नेय इति । यस्य तूक्ता भेदहेतवो न सन्ति तस्य प्रधानस्य भेदो नास्तीत्याचार्यो मेने । यस्मादूचे "कृतार्थं प्रतिनष्टमप्यनष्टं तदन्यसाधारणत्वात्" (२।२२) इति । तदाह-मूर्तिव्यवधीति । उक्तभेदहेतूपलक्षणमेतत् । जगन्मूलस्य प्रधानस्य पृथक्त्वं भेदो नास्तीत्यर्थः ॥५३॥

જો કે વિવેકજન્ય જ્ઞાન નિઃશેષ ભાવવિષયક છે, એ વાત આગળ કહેવાશે, છતાં એ અત્યંત સૂક્ષ્મ હોવાથી, પહેલાં એ જ્ઞાનનો ખાસ વિષય "જાતિલક્ષણ..."

વગેરે સૂત્રથી રજૂ કરે છે. લૌકિકો માટે જાતિનો ભેદ ભિન્નતા જાણવાનો હેતુ છે. જ્યારે ગાય વગેરે જાતિ સમાન હોય અને પૂર્વ વગેરે દેશ સમાન હાય, ત્યારે કાલાક્ષી કે સ્વસ્તિમતી એવાં લક્ષણો આ ગાયે બીજી છે, એ જાણવાનો વધારાનો હેતુ બને છે. બે આમળાં જાતિ અને ગોળાકાર લક્ષણથી એકસરખા હાય, ત્યા દેશભેદ એમના ભેદજ્ઞાનનો હેતુ બને છે. પણ જ્યારે યોગીના જ્ઞાનની પરીક્ષ કરવાની ઇચ્છાવાળો કોઈ યોગીનું ધ્યાન બીજે જતાં જાણનાર યોગીની પૂર્વ તરફના આમળાને, ઉત્તર તરફના આમળાને ખસેડીને કે ઢાંકી દઈને, એની જગાએ મૂકે તો બંને આમળાં એકસરખા દેશવાળાં હોવાથી આ પૂર્વ તરફનું અને આ ઉત્તરતરફનું છે, એવો ભેદ ત્રણ પ્રમાણોના વિશેષજ્ઞ લૌકિક પંડિતો પણ જાણી શકતા નથી. સાચું જ્ઞાન નિઃસંદેહ હોવું જોઈએ. વિવેકજન્ય જ્ઞાનયુક્ત યોગીના જ્ઞાનમાં સંદિગ્ધપણું યોગ્ય નથી. તેથી સૂત્રકારે "ततः प्रतिपत्तिः" એમ કહ્યું. ततः એટલે વિવેકજન્ય જ્ઞાનથી (યોગી) એવો ભેદ જાણે છે.

ક્ષણ અને એના ક્રમ પર સંયમ કરવાથી ઉત્પન્ન થયેલું જ્ઞાન કેવી રીતે સમાન જાતિ, લક્ષણ, અને દેશવાળાં બે આમળાંનો ભેદ જાણી શકે ? એવો પ્રશ્ન "कथम्..." વગેરેથી પૂછે છે. જવાબમાં "पूर्वामलकसहक्षणोदेशः..." વગેરે કહે છે. પૂર્વના આમળાના દેશની સહભાવી ક્ષણ એટલે એ ક્ષણથી અંતરવિનાનું પરિણામ ઉત્તરના આમળાના દેશની સહભાવી ક્ષણ અને ઉત્તરના આમળાના અંતર વિનાના પરિણામથી ભિન્ન છે. ભલે દેશભેદ હોય, પણ આમળાંના ભેદનું શું ? એના જવાબમાં "ते आमलके स्वदेशक्षणानुभवभिन्ने..." વગેરેથી કહે છે કે પોતાના દેશની સહભાવી ક્ષણ, પોતાના દેશ સાથે પહેલાંના અને પછીના રૂપવાળા પરિણામથી લક્ષિત થાય છે, એને સ્વદેશક્ષણ કહે છે. એનો અનુભવ એટલે જ્ઞાન. એ જ્ઞાનથી આમળાં ભિન્ન છે, એવું જ્ઞાન યોગીને થાય છે. જે બે આમળાંમાં પૂર્વ અને ઉત્તર દેશથી પૂર્વોત્તર રૂપ પરિણામ હતું- એ ભિન્ન દેશવાળું પૂર્વોત્તર પરિણામ-ક્ષણ વિશિષ્ટપણું અનુભવીને (સંયમી) યોગી એમની ભિન્નતા જાણે છે. હાલમાં આ દેશ પરિણામ હોવા છતાં, પહેલાંના ભિન્ન દેશ પરિણામથી વિશિષ્ટ આ દેશપરિણામક્ષણપર સંયમ કરીને યોગી ભેદનો સાક્ષાત્કાર કરે છે. તેથી ભાષ્યકારે "અન્ય દેશ અને ક્ષણનો અનુભવ એમના ભેદ જ્ઞાનનો હેતુ છે" એમ કહ્યું. "एतेन..." વગેરેથી લૌકિક પરીક્ષકોના સંવાદ રૂપ આ દાખલાથી પરમાણુઓનો પણ આવો ભેદ યોગી અને ઈશ્વરની બુદ્ધિથી જાણી શકાય એવો હોવાથી વિશ્વસનીય હોય છે, એમ કહે છે.

"ये अन्त्या विशेषा..." વગેરેથી બીજાઓનું કથન પ્રસ્તુત કરે છે. વૈશેષિકો નિત્યદ્રવ્યમાં રહેતા અંતિમ વિશેષોની વાત કરે છે. યોગીઓ સમાન જાતિ, દેશ

અને કાળવાળા તેમજ અંતર વિનાના મુક્ત પુરુષોને પરસ્પર ભિન્ન તરીકે અને પ્રત્યેકને તાત્ત્વિક રીતે જાણે છે. માટે કોઈ અન્તિમ વિશેષ હોવો જોઈએ. એ જ વિશેષ નિત્ય એવાં પરમાણુ વગેરે દ્રવ્યોનો ભેદ દર્શાવે છે.

"तत्रापि" વગેરેથી આ મતમાં દોષ દર્શાવે છે. જાતિ, દેશ અને લક્ષણો અગાઉ કહ્યાં છે. મૂર્તિ એટલે સંસ્થાન (આકાર). એક સારા અવયવ સંસ્થાનવાળાને ખસેડીને, એની જગાએ, જોનારનું ધ્યાન બીજી તરફ હોય ત્યારે, બીજા ખરાબ અવયવસંસ્થાનવાળાને મૂકવામાં આવે, તો એના ભિન્ન આકારને લીધે આ બીજો છે, એમ જાણી શકાય છે. અથવા મૂર્તિ એટલે શરીર. એના સંબંધથી સંસારી કે મુક્ત આત્માઓનો ભેદ ભૂતોના જેવા તેવા ભેદ વડે જાણી શકાય છે. આમ સર્વત્ર ભેદનું જ્ઞાન બીજી રીતે સિદ્ધ થતું હોવાથી અન્તિમ વિશેષની કલ્પના જરૂરી નથી. વળી અંતર ભેદનું કારણ છે, જેમ દેશરૂપ કુશ અને પુષ્કર દ્વીપોનો ભેદ. જાતિ અને દેશના ભેદો લોકબુદ્ધિથી જાણી શકાય એવા છે. માટે "ક્ષણભેદ તો યોગીની બુદ્ધિવડે જ જાણી શકાય એવો છે," એમ કહ્યું. "એવ" કાર ક્ષણભેદપર ભાર મૂકે છે, યોગિબુદ્ધિગમ્યત્વપર નહીં. માટે ભૂતોમાં વિચરતા દેહના સંબંધથી મુક્તાત્માઓનો પણ ભેદ યોગિબુદ્ધિથી જાણી શકાય એવો છે, એવું અનુમાન કરવું જોઈએ.

જેના મતમાં અહીં કહેલા ભેદહેતુઓ નથી, એને માટે પ્રધાનનો ભેદ નથી, એમ આચાર્ય (પતંજલિ) માને છે. કારણ કે એમણે "કૃતાર્થ પ્રત્યે નષ્ટ થયેલું પ્રધાન ખરેખર નષ્ટ થતું નથી કારણ કે બીજાઓ સમાનપણે એને જુએ છે" ૨.૨૨ એવું સૂત્ર રચ્યું છે. "मूर्तिव्यवधि..." વગેરેથી આ વાત કહી છે. કહેલા ભેદોનું એ ઉપલક્ષણ છે. (જગત ભેદોવાળું છે, એમ મૂર્તિ, અંતર વગેરે હેતુઓથી જણાય છે). પણ જગતના મૂળરૂપ પ્રધાનમાં ભેદો નથી, એવો અર્થ છે. ૫૩

★

तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानम् ॥५४॥

વિવેકજન્ય જ્ઞાન તારનારું, બધી રીતે, બધા પદાર્થોને વિષય કરનારું અને ક્રમવિનાનું (એકી સાથે ઉત્પન્ન થતું) જ્ઞાન છે. ૫૪

ભાષ્ય

तारकमिति स्वप्रतिभोत्थमनौपदेशिकमित्यर्थः । सर्वविषयत्वान्नास्यकिञ्चिदविषयीभूतमित्यर्थः । सर्वथाविषयमतीतानागतप्रत्युत्पन्नं सर्वं पर्यायैः सर्वथा जानातीत्यर्थः । अक्रममित्येकक्षणोपारूढं सर्वं सर्वथा

गृह्णातीत्यर्थः । एतद्विवेकजं ज्ञानं परिपूर्णम् । अस्यैवांशो योगप्रदीपो, मधुमतीं भूमिमुपादाय यावदस्य परिसमाप्तिरिति ॥५४॥

તારક એટલે પોતાની પ્રતિભાથી ઉત્પન્ન થયેલું, બીજાએ ઉપદેશેલું નહીં. સર્વવિષયક હોવાથી કોઈ પણ પદાર્થ એનો અવિષય નથી. સર્વવિષય એટલે ભૂત, ભવિષ્ય અને વર્તમાનના બધા પદાર્થોને એમના અવાન્તર પર્યાયો સાથે જાણનારું એવો અર્થ છે. અક્રમ એટલે એક ક્ષણપર આરૂઢ થયેલું અને બધાને બધી રીતે જાણતું એવો અર્થ છે. આ વિવેકજન્ય જ્ઞાન પરિપૂર્ણ છે. મધુમતી ભૂમિથી પ્રારંભ કરીને આ વિવેકજન્ય જ્ઞાનની પરિસમાપ્તિ સુધીનાં બધાં યોગપ્રદીપરૂપ જ્ઞાનો, આનો જ અંશ છે. ૫૪

तत्त्व वैशारदी

तदेवं विषयैकदेशं विवेकजज्ञानस्य दर्शयित्वा विवेकजं ज्ञानं लक्षयति-तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानम् । विवेकजं ज्ञानमिति लक्ष्यनिर्देशः । शेषं लक्षणम् । संसारसागरात्तारयतीति तारकम् । पूर्वस्मात्प्रातिभाद्विशेषयति-सर्वथाविषयमिति । पर्याया अवान्तरविशेषाः । अत एव विवेकजं ज्ञानं परिपूर्णम् । नास्य क्वचित्किञ्चित्कथञ्चित्कदाचिदगोचर इत्यर्थः । आस्तां तावज्ज्ञानान्तरम् । संप्रज्ञातोऽपि तावदस्यांशः । तस्मादतः परं किं परिपूर्णमित्याह-अस्यैवांशो योगप्रदीपः संप्रज्ञातः । किमुपक्रमः किमवसानश्चासावित्याह-मधुमतीमिति । ऋतम्भरा प्रज्ञैव मधु, मोदकारणत्वात् । यथोक्तं प्रज्ञाप्रासादमारुह्येति (द्र० १।४७ भाष्य) । तद्वती मधुमती । तामुपादाय यावदस्य परिसमाप्तिः सप्तधा प्रान्तभूमिः प्रज्ञा । अत एव विवेकजं ज्ञानं तारकं भवति । तदंशस्य योगप्रदीपस्य तारकत्वादिति ॥५४॥

વિવેકજન્ય જ્ઞાનના એકદેશરૂપ વિષયોને કહીને, "तारकं सर्व विषयम्..." વગેરે સૂત્રથી સ્વયં વિવેકજન્ય જ્ઞાનનું લક્ષણ કહે છે. "વિવેકજન્યજ્ઞાન"થી લક્ષ્યનો અને બાકીના શબ્દોથી લક્ષણનો નિર્દેશ કરે છે. તારક એટલે સંસારસાગરથી તારનારું "सर्वथा विषयम्..."થી અગાઉ કહેલા પ્રાતિભજ્ઞાનથી આની વિશેષતા દર્શાવે છે. પર્યાયો એટલે અવાન્તર વિશેષો. માટે વિવેકજન્ય જ્ઞાન પૂર્ણ છે. આના માટે ક્યાંય પણ, ક્યારે પણ, કાંઈ પણ અગોચર નથી. બીજાં જ્ઞાનો તો શું, સંપ્રજ્ઞાત પણ આનો અંશમાત્ર છે. "अस्यैवांशो योगप्रदीपः..." વગેરેથી કહે છે કે આનાથી વધુ પૂર્ણ જ્ઞાન કયું હોઈ શકે ? આનો પ્રારંભ અને અંત ક્યાં છે ? એના જવાબમાં "मधुमतीं भूमिमुपादाय..." વગેરેથી કહે છે કે મધુમતી ભૂમિથી શરૂ થતાં આ વિવેકજન્ય જ્ઞાનો આના જ અંશો છે. ઋતંભરા પ્રજ્ઞા આનંદ આપનાર હોવાથી મધુ

છે. અગાઉ "પ્રજ્ઞાપ્રાસાદમારુહ્ય..." વગેરેથી આ વિષે કહ્યું છે. મધુવાળી છે માટે મધુમતી કહેવાય છે. તેનાથી પ્રારંભ કરીને આની પરિસમાપ્તિ સુધી સાત પ્રાન્તભૂમિઓવાળી પ્રજ્ઞા છે. માટે વિવેકજન્ય જ્ઞાન તારક છે. કારણ કે એનો અંશ યોગપ્રદીપ પણ તારક છે. ૫૪

★

प्राप्तविवेकजज्ञानस्याप्राप्तविवेकजज्ञानस्य वा- વિવેકજન્ય જ્ઞાન પ્રાપ્ત થયું હોય અથવા ન થયું હોય એવા બંને પ્રકારના યોગીઓને-

सत्त्वपुरुषोः शुद्धिसाम्ये कैवल्यमिति ॥५५॥

સત્ત્વ અને પુરુષની સમાન શુદ્ધિ થાય ત્યારે કૈવલ્ય પ્રાપ્ત થાય છે. ૫૫

ભાષ્ય

यदा निर्धूतरजस्तमोमलं बुद्धिसत्त्वं पुरुषस्यान्यताप्रतीतिमात्राधिकारं दग्धक्लेशबीजं भवति तदा पुरुषस्य शुद्धिसारूप्यमिवापन्नं भवति, तदा पुरुषस्योपचरितभोगाभावः शुद्धिः । एतस्यामवस्थायां कैवल्यं भवतीश्वरस्यानीश्वरस्य वा विवेकजज्ञानभागिन इतरस्य वा । न हि दग्धक्लेशबीजस्य ज्ञाने पुनरपेक्षा काचिदस्ति । सत्त्वशुद्धिद्वारेणैतत्समाधिजमैश्वर्यं ज्ञानं चोपक्रान्तम् । परमार्थतस्तु ज्ञानाददर्शनं निवर्तते । तस्मिन्निवृत्ते न सन्त्युत्तरे क्लेशाः । क्लेशाभावात्कर्मविपाकाभावः । चरिताधिकाराश्चैतस्यामवस्थायां गुणा न पुरुषस्य दृश्यत्वेन पुनरुपतिष्ठन्ते । तत्पुरुषस्य कैवल्यम्, तदा पुरुषः स्वरूपमात्रज्योतिरमलः केवली भवति ॥५५॥

રજોગુણ અને તમોગુણના મળો વિનાનું બુદ્ધિસત્વ પુરુષની ભિન્નતાના જ્ઞાનમાત્ર અધિકારવાળું, બળેલા ક્લેશબીજોવાળું બને છે, ત્યારે પુરુષ જેવી શુદ્ધિવાળા રૂપવાળું બને છે, અને ત્યારે ઔપચારિક (બુદ્ધિવડે નિવેદન કરાયેલા) ભોગોનો અભાવ પુરુષની શુદ્ધિ છે. આ અવસ્થામાં ઈશ્વર કે અનીશ્વર (યોગૈશ્વર્યસંપન્ન કે એના વિનાના) વિવેકજન્ય જ્ઞાનવાળા કે એના વિનાના યોગીને કૈવલ્ય પ્રાપ્ત થાય છે. જેનાં ક્લેશ બીજો બળી ગયાં છે, એને જ્ઞાન માટે બીજા કશાની અપેક્ષા નથી. સત્ત્વશુદ્ધિ દ્વારા આવું સમાધિજન્ય ઐશ્વર્ય અને જ્ઞાન મળવું શરૂ થાય છે. હકીકતમાં, જ્ઞાન ઉત્પન્ન થતાં અજ્ઞાન (અવિદ્યા) નિવૃત્ત થાય છે. એ નિવૃત્ત થતાં, એની પછીના ક્લેશો રહેતા નથી. ક્લેશોના અભાવથી કર્મવિપાકનો અભાવ થાય છે. આ અવસ્થામાં ચરિતાધિકાર (કૃતકૃત્ય) ગુણો પુરુષ (દ્રષ્ટા) માટે દૃશ્ય તરીકે ફરીથી

ઉપસ્થિત થતા નથી. એ પુરુષનું કૈવલ્ય છે, ત્યારે પુરુષ સ્વરૂપમાત્રજ્યોતિ, નિર્મળ અને કેવલી બને છે. ૫૫

इति श्रीपातञ्जले योगशास्त्रे सांख्यप्रवचने व्यासभाष्ये विभूतिपादस्तृतीयः ॥३॥

આમ શ્રી પાંતજલ યોગશાસ્ત્રના સાંખ્યપ્રવચન નામના વ્યાસભાષ્યમાં ત્રીજો વિભૂતિપાદ સમાપ્ત થયો. ૩

तत्त्व वैशारदी

तदेवं परम्परया कैवल्यस्य हेतून्सविभूतीन्संयमानुक्त्वा सत्त्वपुरुषान्यताज्ञानं साक्षात्कैवल्यसाधनमित्यत्र सूत्रमवतारयति-प्राप्तेति । विवेकजं ज्ञानं भवतु मा वा भूत् । सत्त्वपुरुषान्यताख्यातिस्तु कैवल्यप्रयोजिकेत्यर्थः । सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति । इतिः सूत्रसमाप्तौ । ईश्वरस्य पूर्वोक्तैः संयमैर्ज्ञानक्रियाशक्तिमतोऽनीश्वरस्य वा समनन्तरोक्तेन संयमेन विवेकजज्ञानभागिन इतरस्य वानुत्पन्नज्ञानस्य न विभूतिषु काचिदपेक्षास्तीत्याह - न हीति । ननु यद्यनपेक्षिता विभूतयः कैवल्ये, व्यर्थस्तर्हि तासामुपदेश इत्यत आह-सत्त्वशुद्धिद्वारेणेति । इत्थम्भूतलक्षणे तृतीया । नात्यन्तमहेतवः कैवल्ये विभूतय किं तु न साक्षादित्यर्थः । ज्ञानं विवेकमुपक्रान्तम् । यच्च पारम्पर्येण कारणं तदौपचारिकं न तु मुख्यम् । परमार्थतस्तु ख्यातिरेव मुख्यमित्यर्थः । ज्ञानादिति प्रसंख्यानादित्यर्थः ॥५५॥

પરંપરાથી કૈવલ્યના હેતુરૂપ વિભૂતિઓ (સિદ્ધિઓ) સાથેના સંયમો કહી, સત્વ અને પુરુષની ભિન્નતાનું જ્ઞાન સાક્ષાત્ કૈવલ્યનું સાધન છે, એમ કહેવા માટે સૂત્રને પ્રસ્તુત કરવા "પ્રાપ્તવિવેકજજ્ઞાનસ્ય" વગેરેથી કહે છે કે યોગીને વિવેકજન્ય જ્ઞાન પ્રાપ્ત થયું હોય કે ન થયું હોય, સત્ત્વ અને પુરુષની અન્યતાનું જ્ઞાન કૈવલ્યરૂપ પ્રયોજન સિદ્ધ કરનારું છે, એવો અર્થ છે. ઇતિશબ્દ સૂત્ર (પાદ)ની સમાપ્તિ સૂચવે છે.

ઈશ્વર એટલે અગાઉ કહેલા સંયમોવડે મેળવેલી જ્ઞાન-ક્રિયા શક્તિયુક્ત યોગીને, અથવા એવી શક્તિવિનાના, પણ સાથે સાથે કહેલા સંયમવડે મેળવેલા વિવેકજન્યજ્ઞાનયુક્ત બીજા યોગીને અથવા એવા જ્ઞાન વિનાના યોગીને આ અવસ્થામાં કૈવલ્ય પ્રાપ્ત થાય છે. ''ન હિ'' વગેરેથી જ્ઞાન ઉત્પન્ન ન થયું હોય એવા યોગીને પણ કૈવલ્ય પ્રાપ્ત થાય છે, એ માટે વિભૂતિઓની અપેક્ષા નથી, એમ કહે છે.

પણ વિભૂતિઓ જરૂરી ન હોય તો એમનો ઉપદેશ વ્યર્થ છે, એવી આશંકાના નિરાકરણમાટે "सत्त्वशुद्धि द्वारेण..." વગેરેથી કહે છે કે સત્ત્વશુદ્ધિદ્વારા

સમાધિજન્ય ઐશ્વર્ય અને જ્ઞાનની શરૂઆત થાય છે. " ઇત્થંભૂતલક્ષણે..." સૂત્રથી તૃતીયા થઈ છે. કૈવલ્ય માટે વિભૂતિઓ અત્યંત અકારણ નથી, અને એનું સાક્ષાત્ કારણ પણ નથી. એમનાથી વિવેકજન્યજ્ઞાન શરૂ થાય છે. જે પરંપરાથી કારણ બને એ ઔપચારિક (ગૌણ) છે, મુખ્ય નથી. ખરેખર, ખ્યાતિ (જ્ઞાન) જ મુખ્ય કારણ છે. જ્ઞાનથી એટલે પ્રસંખ્યાન (ધ્યાન) થી એવો અર્થ છે. ૫૫

अत्रान्तरङ्गण्यङ्गानि परिणामाः प्रपञ्चिताः ।
संयमाद्भूतिसंयोगस्तासु ज्ञानं विवेकजम् ।
इति श्रीवाचस्पतिमिश्रविरचितायां पातञ्जलभाष्यव्याख्यायां
तत्त्ववैशारद्यां विभूतिपादस्तृतीयः ॥३॥

"આ પાદમાં યોગનાં અંતરંગ અંગો અને પરિણામો વિષે, તેમજ સંયમોથી વિભૂતિઓની પ્રાપ્તિ અને વિવેકજન્ય જ્ઞાનની ચર્ચા કરી.

આમ શ્રી વાચસ્પતિ મિશ્રે રચેલી તત્ત્વ વૈશારદી નામની પાતંજલભાષ્ય વ્યાખ્યામાં ત્રીજો વિભૂતિપાદ સમાપ્ત થયો. ૩

★★★

ચોથો કૈવલ્યપાદ

●

जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः ॥१॥

જન્મ, ઔષધિ, મંત્ર, તપ અને સમાધિથી સિદ્ધિઓ ઉત્પન્ન થાય છે. ૧.

भाष्य

देहान्तरिता जन्मना सिद्धिः । ओषधिभिरसुरभवनेषु रसायनेनेत्येवमादि । मन्त्रैराकाशगमनाणिमादिलाभः । तपसा संकल्पसिद्धिः कामरूपी यत्र तत्र कामग इत्येवमादि । समाधिजाः सिद्धयो व्याख्याताः ॥१॥

જન્મથી મળતી સિદ્ધિ દેહાન્તર (બીજો દેહ) પ્રાપ્ત થવા માત્રથી મળે છે. ઔષધિથી થતી સિદ્ધિ અસુરોના ભવનોમાં રસાયણનું સેવન કરવા વગેરેથી મળે છે. મંત્રોથી આકાશગમન, અણિમા વગેરે સિદ્ધિઓ પ્રાપ્ત થાય છે. તપથી સંકલ્પ સિદ્ધિ મળતાં, સ્વેચ્છાથી ગમે ત્યાં જઈ શકે છે, તેમજ અન્ય સિદ્ધિઓ પણ મળે છે. સમાધિથી થતી સિદ્ધિઓ અગાઉ કહી છે. ૧

तत्त्ववैशारदी

तदेवं प्रथमद्वितीयतृतीयपादैः समाधितत्साधनतद्विभूतयः प्राधान्येन व्युत्पादिताः। इतरत्तु प्रासङ्गिकमौपोद्घातिकं चोक्तम् । इहेदानीं तद्धेतुकं कैवल्यं व्युत्पादनीयम् । न चैतत्कैवल्यभागीयं चित्तं परलोकं च परलोकिनं विज्ञानातिरिक्तं चित्तकरणकसुखाद्यात्मकशब्दाद्युपभोक्तारमात्मानं च प्रसंख्यानपरमकाष्ठं च विना व्युत्पाद्य शक्यं वक्तुमिति तदेतत्सर्वमत्र पादे व्युत्पादनीयमितरच्च प्रसङ्गादुपोद्घाताद्वा । तत्र प्रथमं सिद्धचित्तेषु कैवल्यभागीयं चित्तं निर्धारयितुकामः पञ्चतयीं सिद्धिमाह-जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः । व्याचष्टे-देहान्तरितेति । स्वर्गोपभोगभागीयात्कर्मणो मनुष्यजातीयाचरितात्कुतश्चिन्निमित्तात्लब्धपरिपाकात्क्वचिद्देवनिकाये जातमात्रस्यैव दिव्यदेहान्तरिता सिद्धिरणिमाद्या भवतीति । ओषधिसिद्धिमाह-असुरभवनेष्विति । मनुष्यो हि कुतश्चिन्निमित्तादसुरभवनमुपसंप्राप्तः कमनीयाभिरसुरकन्याभिरुपनीतं रसायनमुपयुज्याजरामरत्वमन्याश्च सिद्धीरासादयति । इहैव वा

रसायनोपयोगेन यथा माण्डव्यो मुनी रसोपयोगाद्विन्ध्यवासीति । मन्त्रसिद्धिमाह- कामरूपीति । यदेव कामयतेऽणिमादि तदेकपदेऽस्य भवतीति । यत्र कामयते श्रोतुं वा मन्तुं वा तत्र तदेव शृणोति मनुते वेति । आदिशब्दाद्दर्शनादयः संगृहीता इति। समाधिजाः सिद्धयो व्याख्याता अधस्तने पादे ॥१॥

પહેલા, બીજા અને ત્રીજા પાદમાં સમાધિ, એનાં સાધન અને સાધનોના અનુષ્ઠાનથી પ્રાપ્ત થતી વિભૂતિઓ મુખ્યત્વે વર્ણવી. પ્રાસંગિક અને ઔપોદ્‌ઘાતિક (મુખ્ય વિષય પહેલાં પ્રસ્તાવના રૂપે કહેવા યોગ્ય) બાબતો પણ કહી. હવે એ બધાં જેને માટે છે, એ કૈવલ્યનું સ્વરૂપ કહેવું જોઈએ, અને એ કૈવલ્યતરફ વલણવાળા ચિત્ત, પરલોક, પરલોકમાં જનાર, ચિત્તરૂપ સાધનથી સુખદુઃખ પેદા કરનાર શબ્દ વગેરે વિષયોનો ભોક્તા, વિજ્ઞાનથી ભિન્ન આત્મા અને ધ્યાનની પરાકાષ્ઠા વગેરે બાબતો વર્ણવ્યા વિના કહી શકાય નહીં; તેથી એ બધા અને બીજા પ્રાસંગિક તેમજ ઔપોદ્ઘાતિક વિષયોનું વર્ણન આ પાદમાં કરવામાં આવશે.

પહેલાં અનેક પ્રકારનાં સિદ્ધચિત્તોમાંથી ક્યું ચિત્ત કૈવલ્યભાગી છે, એનો નિશ્ચય કરવા માટે "જન્મૌષધિ" વગેરે સૂત્રથી પાંચ પ્રકારની સિદ્ધિઓ કહે છે. મનુષ્યજાતિમાં (દેવને યોગ્ય) સ્વર્ગના ઉપભોગો આપે એવાં અને ફળ આપવા માટે પક્વ બનેલાં, ઉત્તમ કર્મરૂપ નિમિત્તોથી દેવજાતિમાં જન્મ થતાં જ દિવ્ય દેહાન્તરની પ્રાપ્તિથી અણિમા વગેરે સિદ્ધિઓ પ્રાપ્ત થાય છે, એમ "દેહાન્તરિતા જન્મના સિદ્ધિઃ"થી કહે છે. "અસુર ભવનેષુ..." વગેરેથી ઓષધિથી મળતી સિદ્ધિ કહે છે. મનુષ્ય કોઈ કર્મનિમિત્તથી અસુર ભવનમાં જાય, તો ત્યાં સુંદર અસુર કન્યાઓ વડે લાવવામાં આવેલા રસાયણનો ઉપયોગ કરીને અજરત્વ, અમરત્વ અને એવી બીજી સિદ્ધિઓ પ્રાપ્ત કરે છે. અથવા આ લોકમાં જ વિન્ધ્યવાસી માંડવ્ય મુનિની જેમ રસાયણના ઉપયોગથી એવી સિદ્ધિઓ મેળવે છે. "મંત્રૈઃ" વગેરેથી મંત્રસિદ્ધિ કહે છે. "તપસા.." વગેરેથી તપઃસિદ્ધિ કહે છે. "કામરૂપી..." વગેરેથી તપથી થતી સંકલ્પસિદ્ધિ કહે છે. અણિમા વગેરે જે સિદ્ધિ ઇચ્છે, એ તરત પ્રાપ્ત થાય છે. જે કાંઈ સાંભળવા કે વિચારવા ઇચ્છે, એ ત્યાં જ સાંભળે કે વિચારે છે. આદિ શબ્દોથી બીજી પણ દર્શન વગેરે સિદ્ધિઓ જાણવી. ગયા વિભૂતિપાદમાં સમાધિથી ઉત્પન્ન થતી સિદ્ધિઓ કહી છે. ૧

★

तत्र कायेन्द्रियाणामन्यजातिपरिणतानाम् - બીજી જાતિમાં પરિણત દેહ અને ઇન્દ્રિયોનું -

जात्यन्तरपरिणामः प्रकृत्यापूरात् ॥२॥

બીજી જાતિમાં પરિવર્તનરૂપ પરિણામ પ્રકૃતિના આપૂરણથી થાય છે. ૨.

भाष्य

पूर्वपरिणामापाय उत्तरपरिणामोपजनस्तेषामपूर्वावयवानुप्रवेशाद्भवति । कायेन्द्रियप्रकृतयश्च स्वं स्वं विकारमनुगृह्णन्त्यापूरेण धर्मादिनिमित्तमपेक्षमाणा इति ॥२॥

પહેલાંના પરિણામનો નાશ અને પછીના પરિણામની ઉત્પત્તિ એમના (દેહેન્દ્રિયોના) અપૂર્વ (નવા) અવયવોના પ્રવેશથી થાય છે. શરીર અને ઇન્દ્રિયોની પ્રકૃતિઓ, પોતપોતાના પરિણામનો, ધર્મ વગેરેની અપેક્ષાથી, આપૂરણવડે અનુગ્રહ કરે છે. ૨

तत्त्ववैशारदी

अथ चतसृषु सिद्धिष्वौषधादिसाधनासु तेषामेव कायेन्द्रियाणां जात्यन्तरपरिणतिरिष्यते । सा पुनर्नतावदुपादानमात्रात् । न हि तावन्मात्रमुपादानं न्यूनाधिकदिव्यादिव्यभावेऽस्य भवति । नो खल्वविलक्षणं कारणं कार्यवैलक्षण्यायालम् । मास्याकस्मिकत्वं भूदित्याशङ्क्य पूरयित्वा सूत्रं पठति-तत्र कायेन्द्रियाणामन्यजातिपरिणतानांजात्यन्तरपरिणामः प्रकृत्यापूरात् । मनुष्यजातिपरिणतानां कायेन्द्रियाणां यो देवतिर्यग्जातिपरिणामः स खलु प्रकृत्यापूरात् । कायस्य हि प्रकृतिः पृथिव्यादीनि भूतानि । इन्द्रियाणां च प्रकृतिरस्मिता । तदवयवानुप्रवेश आपूरस्तस्माद्भवति । तदिदमाह-पूर्वपरिणामेति । ननु यद्यापूरेणानुग्रहः कस्मात्पुनरसौ न सदातन इत्यत आह—धर्मादीति । तदनेन तस्यैव शरीरस्य बाल्यकौमारयौवनवार्धकादीनि च न्यग्रोधधानाया न्यग्रोधतरुभावश्च वह्निकणिकायास्तृणराशिनिवेशिताया वा प्रोद्भवज्वालासहस्रसमालिङ्गितगगनमण्डलत्वं च व्याख्यातम् ॥२॥

ઔષધિ વગેરે સાધનોથી થતી ચાર સિદ્ધિઓમાં એ જ શરીર અને ઇન્દ્રિયોનું બીજી જાતિમાં પરિણામ થાય છે. એ પરિણામ ફક્ત ઉપાદાનથી થતું નથી. ઉપાદાનમાત્ર દિવ્ય કે અદિવ્ય ભાવમાં ઓછા-વધારેપણું લાવી શકતું નથી. વિલક્ષણતાવિનાનું કારણ કાર્યમાં વિલક્ષણતા લાવવા સમર્થ બનતું નથી. આવો ફેરફાર આકસ્મિક છે, એવી આશંકા નિવારવા માટે ખૂટતા શબ્દો ઉમેરીને "જાત્યં-

તર પરિણામઃ...” વગેરે સૂત્ર પ્રસ્તુત કરે છે. મનુષ્યજાતિ રૂપે પરિણામ પામેલાં શરીર અને ઇન્દ્રિયોનું દેવ કે પશુ જાતિમાં પ્રકૃતિના આપૂરણથી પરિણામ થાય છે. પૃથ્વી વગેરે ભૂતો શરીરની પ્રકૃતિ છે, અને અસ્મિતા ઇન્દ્રિયોની પ્રકૃતિ છે. એમનાથી (ભૂતો અને અસ્મિતાથી) એમના (દેહ-ઇન્દ્રિયોના) અવયવોનો આપૂર-અનુપ્રવેશ થાય છે. આ વાત “પૂર્વ પરિણામાપાયે...” વગેરેથી કહે છે.

આપૂરણરૂપ અનુગ્રહ નિત્ય કેમ થતો નથી ? જવાબમાં “ધર્માદિનિમિત્તમપેક્ષમાણા...”—આપૂરણ ધર્મવગેરેની અપેક્ષાએ થાય છે – એમ કહે છે. આનાથી એ જ શરીરમાં બાલ્ય, કૌમાર, યૌવન, વાર્ધક્ય વગેરે પરિણામ થાય છે, વડના બીજનું વટવૃક્ષમાં પરિણામ થાય છે, અને ઘાસની ગંજીમાં પડેલા તણખાનું આકાશને અડકતી હજારો જ્વાળાઓમાં પરિણામ થાય છે, એ હકીકત સમજાવી. ૨

★

निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत् ॥३॥

(ધર્મ વગેરે) નિમિત્ત પ્રકૃતિઓનું પ્રયોજક નથી, પણ ખેડૂતની જેમ એનાથી વરણભેદ (પ્રતિબંધનિવૃત્તિ) થાય છે. ૩

ભાષ્ય

न हि धर्मादि निमित्तं तत्प्रयोजकं प्रकृतीनां भवति । न कार्येण कारणं प्रवर्तत इति । कथं तर्हि, वरणभेदस्तु ततः क्षेत्रिकवत् । यथा क्षेत्रिकः केदारादपां पूर्णात्केदारान्तरं पिप्लावयिषुः समं निम्नं निम्नतरं वा नाप पाणिनापकर्षत्यावरणं त्वासां भिनत्ति, तस्मिन्भिन्ने स्वयमेवापः केदारान्तरमाप्लावयन्ति, तथा धर्मः प्रकृतीनामावरणमधर्मं भिनत्ति, तस्मिन्भिन्ने स्वयमेव प्रकृतयः स्वं स्वं विकारमाप्लावयन्ति । यथा वा स एव क्षेत्रिकस्तस्मिन्नेव केदारे न प्रभवत्यौदकान्भौमान्वारसान्धान्यमूलान्यनुप्रवेशयितुम् । किंः तर्हि मुद्गगवेधुकश्यामाकादींस्ततोऽपकर्षति । अपकृष्टेषु तेषु स्वयमेव रसा धान्यमूलान्यनुप्रविशन्ति, तथा धर्मो निवृत्तिमात्रे कारणमधर्मस्य शुद्ध्यशुद्ध्योरत्यन्तविरोधात् । न तु प्रकृतिप्रवृत्तौ धर्मो हेतुर्भवतीति । अत्र नन्दीश्वरादय उदाहार्याः । विपर्ययेणाप्यधर्मो धर्मं बाधते । ततश्चाशुद्धिपरिणाम इति । तत्रापि नहुषाजगरादय उदाहार्याः ॥३॥

ધર્મ વગેરે નિમિત્ત પ્રકૃત્તિઓનું પ્રયોજક નથી. કાર્ય કારણનું પ્રવર્તક

બને નહીં. તો થાય છે શું ? એનાથી (નિમિત્તથી) ખેડૂતની જેમ વરણભેદ થાય છે. ખેડૂત એક ક્યારામાં રહેલા પાણીને બીજા ક્યારામાં લઈ જવા માટે, હાથ વડે નીચેની તરફ ખેંચતો નથી, ફક્ત પાણીને રોકતા માટીના આવરણને તોડે છે. અ તૂટતાં પાણી પોતાની મેળે બીજા ક્યારામાં જાય છે, એમ ધર્મ પ્રકૃતિઓના અધર્મરૂપ આવરણને ભેદે છે. એ ભેદાતાં, પ્રકૃતિઓ પોતપોતાનાં પરિણામો આપમેળે ઉત્પન્ન કરે છે. અથવા એ જ ખેડૂત એ જ ક્યારામાં ઊગેલા ધાન્યના છોડના મૂળમાં પૃથ્વીના કે જળના રસોને પ્રવેશ કરાવતો નથી. તો શું કરે છે ? ફક્ત બીજી જાતનાં મગ, ગવેધુ, સામા વગેરેને ક્યારામાંથી ઉખાડી નાખે છે. એ ઊખડી ગયા પછી રસો આપમેળે ધાન્યના મૂળમાં પ્રવેશે છે. એમ ધર્મ અધર્મની નિવૃત્તિનું કારણ છે. કારણકે શુદ્ધિ અને અશુદ્ધિ તદ્દન વિરોધી છે. ધર્મ પ્રકૃતિની પ્રવૃત્તિનો હેતુ નથી. આ વિષે નન્દીશ્વર વગેરેનાં ઉદાહરણો સમજવાં જોઈએ. એથી ઊલટું, અધર્મ ધર્મનો બાધ કરે છે, તેથી અશુદ્ધિપરિણામ થાય છે. આ વિષયમાં નહુષ અજગર બન્યો એના જેવાં દૃષ્ટાન્તો સમજવાં જોઈએ. ૩

तत्त्ववैशारदी

प्रकृत्यापूरादित्युक्तम् । तत्रेदं संदिह्यते-किमापूरः प्रकृतीनां स्वाभाविको धर्मादिनिमित्तो वेति ? किं प्राप्तम् ? सतीष्वपि प्रकृतिषु कदाचिदापूराद्धर्मादिनिमित्तश्रवणाच्च तन्निमित्त एवेति प्राप्तम् । एवं प्राप्त आह–निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत् । सत्यं धर्मादयो निमित्तं न तु प्रयोजकाः । तेषामपि प्रकृतिकार्यत्वात् । न च कार्यं कारणं प्रयोजयति । तस्य तदधीनोत्पत्तितया कारणपरतन्त्रत्वात् । स्वतन्त्रस्य च प्रयोजकत्वात् । न खलु कुलालमन्तरेण मृद्दण्डचक्रसलिलादय उत्पित्सितेनोत्पन्नेन वा घटेन प्रयुज्यन्ते । किं तु स्वतन्त्रेण कुलालेन । न च पुरुषार्थोऽपि प्रवर्तकः । किं तु तदुद्देशेनेश्वरः । उद्देशतामात्रेण पुरुषार्थः प्रवर्तक इत्युच्यते । उत्पित्सोस्त्वस्य पुरुषार्थस्याव्यक्तस्य स्थितिकारणत्वं युक्तम् । न चैतावता धर्मादीनामनिमित्तता । प्रतिबन्धापनयनमात्रेण क्षेत्रिकवदुपपत्तेः । ईश्वरस्यापि धर्माधिष्ठानार्थं प्रतिबन्धापनय एव व्यापारो वेदितव्यः । तदेतन्निगदव्याख्यातेन भाष्येणोक्तम् ॥३॥

બીજી જાતિમાં પરિણામ પ્રકૃતિના આપૂરણથી થાય છે. એમ કહ્યું. આ વિષે સંદેહ થાય છે કે પ્રકૃતિઓનું આપૂરણ સ્વાભાવિક છે કે ધર્મ વગેરેના નિમિત્તથી

થાય છે ? આનો શો જવાબ છે ? પ્રકૃતિઓમાં આપૂરણ કોઈ વાર જ થાય છે અને ધર્મ વગેરે નિમિત્ત શ્રુતિમાં કહ્યાં છે. તેથી નિમિત્તથી આપૂરણ થાય છે એમ ઠર્યું. આ વાતનો નિષેધ કરતાં કહે છે કે નિમિત્ત પ્રકૃતિઓનું પ્રયોજક નથી. ફક્ત ખેડૂતની જેમ આનાથી વરણભેદ-પ્રતિબંધનાશ-થાય છે. ધર્મ વગેરે નિમિત્ત છે એ વાત સાચી છે, પણ પ્રયોજક નથી, કારણકે એ (ધર્માદિનિમિત્તો) પ્રકૃતિનું કાર્ય છે, અને કાર્ય કદાપિ કારણને પ્રયોજે નહીં. કાર્યની ઉત્પત્તિ કારણાધીન છે, માટે એ કારણથી પરતંત્ર છે. સ્વતંત્રતા જ પ્રયોજક બની શકે. કુંભાર વગર માટી, દંડ, ચક્ર અને પાણી વગેરે ઉત્પન્ન થઈ રહેલા કે ઉત્પન્ન થયેલા ઘડાવડે પ્રયોજાય નહીં. ફક્ત સ્વતંત્ર કુંભાર જ એમને પ્રયોજી શકે.

વળી પુરુષાર્થ પણ પ્રવર્તક નથી. પરંતુ એના ઉદ્દેશથી ઈશ્વર પ્રવર્તક છે. ઉદ્દેશપણામાત્રથી પુરુષાર્થને પ્રવર્તક કહેવામાં આવે છે. ઉત્પન્ન થઈ રહેલા પુરુષાર્થને અવ્યક્તની સ્થિતિનું કારણ માનવું યોગ્ય છે. પણ તેથી ધર્મ વગેરે નિમિત્ત મટી જતાં નથી. ફક્ત પ્રતિબંધ દૂર કરવા માટે ખેડૂતની જેમ એમની ઉપયોગિતા છે. ઈશ્વર પણ ધર્મના અધિષ્ઠાન (સ્થાપન) માટે પ્રતિબંધ દૂર કરવાનું કાર્ય કરે છે, એમ સમજવું જોઈએ. આ વિષે ભાષ્ય સ્પષ્ટ છે. ૩

★

यदा तु योगी बहून्कायान्निर्मिमीते तदा किमेकमनस्कास्ते भवन्त्यथानेकमनस्का इति- યોગી ઘણાં શરીરોનું નિર્માણ કરે ત્યારે એ બધાં એક મનવાળાં કે અનેક મનવાળાં હોય છે ?-

निर्माणचित्तान्यस्मितामात्रात् ॥४॥

ફક્ત અસ્મિતાથી યોગી બીજાં ચિત્તોનું નિર્માણ કરે છે. ૪

ભાષ્ય

अस्मितामात्रं चित्तकारणमुपादाय निर्माणचित्तानि करोति । ततः सचित्तानि भवन्तीति ॥४॥

ચિત્તના કારણરૂપ અસ્મિતામાત્ર ઉપાદાનમાંથી યોગી અન્ય ચિત્તોનું નિર્માણ કરે છે. તેથી ચિત્તવાળાં શરીરો હોય છે. ૪

तत्त्ववैशारदी

प्रकृत्यापूरेण सिद्धीः समर्थ्य सिद्धिविनिर्मितनानाकायवर्तिचित्तैकत्व-नानात्वे

विचारयति- यदा त्विति । तत्र नानामनस्त्वे कायानां प्रतिचित्तमभिप्राय-भेदादेकाभिप्रायानुरोधश्च परस्परप्रतिसंधानं च न स्यातां पुरुषान्तरवत् । तस्मादेकमेव चित्तं प्रदीपवद्विसारितया बहूनपि निर्माणकायान्व्याप्नोतीति प्राप्त आह–निर्माण-चित्तान्यस्मितामात्रात् । यद्यावज्जीवच्छरीरं तत्सर्वमेकैकासाधारणचित्तान्वितं दृष्टम् । तद्यथा चैत्रमैत्रादिशरीरम् । तथा च निर्माणकाया इति सिद्धं, तेषामपि प्रातिस्विकं मन इत्यभिप्रायेणाह-अस्मितामात्रमिति ॥४॥

પ્રકૃતિના આપૂરણથી સિદ્ધિઓનું સમર્થન કરીને, સિદ્ધિથી વિનિર્મિત અનેક શરીરોમાં ચિત્ત એક હોય છે કે અનેક એ વિષે "यदा तु..." વગેરેથી વિચારે છે. ઘણાં શરીરોમાં ઘણાં મન હોય તો અન્ય પુરુષની જેમ બધાં મનમાં અભિપ્રાયો જુદા જુદા હોય, તેથી એક અભિપ્રાયનો અનુરોધ અને પરસ્પર અનુસંધાન સિદ્ધ થાય નહીં. માટે એક જ ચિત્ત પ્રદીપની જેમ પ્રકાશરૂપે વિસ્તરીને ઘણાં નિર્માણ શરીરોમાં વ્યાપીને રહે છે. એવો પ્રસંગ પ્રાપ્ત થતાં સૂત્રથી કહે છે કે અસ્મિતામાત્રથી નિર્માણ ચિત્તો પ્રગટ થાય છે. જેટલાં જીવતાં શરીરો છે, એ બધાં પ્રત્યેક, અસાધારણ (ભિન્ન) ચિત્તથી યુક્ત જોવામાં આવે છે, જેમ ચૈત્ર, મૈત્ર વગેરેનાં શરીર. નિર્માણ શરીરો પણ એવાં જ હોય છે, તેથી એ દરેકને પોતપોતાનું ચિત્ત હોય છે, એમ "अस्मितामात्रम्..." વગેરે ભાષ્યથી કહે છે. ૪

★

प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषाम् ॥५॥

અનેક ચિત્તોના પ્રવૃત્તિભેદમાં એક ચિત્ત પ્રયોજક (પ્રેરક) છે. ૫

ભાષ્ય

बहूनां चित्तानां कथमेकचित्ताभिप्रायपुरःसरा प्रवृत्तिरिति सर्व-चित्तानां प्रयोजकं चित्तमेकं निर्मिमीते, ततः प्रवृत्तिभेदः ॥५॥

એક ચિત્તના અભિપ્રાય પ્રમાણે ઘણાં ચિત્તોની પ્રવૃત્તિ કેવી રીતે થાય છે ? બધાં ચિત્તોને પ્રેરનારું એક ચિત્ત બનાવે છે, તેથી પ્રવૃત્તિ ભેદ શક્ય બને છે. ૫

तत्त्ववैशारदी

यदुक्तमनेकचित्तत्वे एकाभिप्रायानुरोधश्च प्रतिसंधानं च न स्यातामिति तत्रोत्तरं सूत्रम् प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषाम् । अभविष्यदेषदोषो यदि च चित्तमेकं

नानाकायवर्ति मनोनायकं न निरमास्यत, तन्निर्माणे त्वदोषः । न चैकं गृहीत्वा कृतं, प्रातिस्विकैर्मनोभिः कृतं वा नायकनिर्माणेन । निजस्यैव मनसो नायकत्वादिति वाच्यम् । प्रमाणसिद्धस्य नियोगपर्यनुयोगानुपपत्तेरिति । अत्र पुराणं भवति-

एकस्तु प्रभुशक्त्या वै बहुधा भवतीश्वरः ।
भूत्वा यस्मात्तु बहुधा भवत्येकः पुनस्तु सः ॥
तस्माच्च मनसो भेदा जायन्ते चैत एव हि ।

(वायुपु. ६६।१४३-१४४)

एकधा स द्विधा चैव त्रिधा च बहुधा पुनः ।
योगीश्वरः शरीराणि करोति विकरोति च ।
प्राप्नुयाद्विषयान्कैश्चित्कैश्चिदुग्रं तपश्चरेत् ॥
संहरेच्च पुनस्तानि सूर्यो रश्मिगणानिव ॥ (वायुपु० ६६।१५२)
इति । तदेतेनाभिप्रायेणाह-बहूनां चित्तानामिति ॥५॥

અનેક ચિત્તો હોય તો એક અભિપ્રાયનો અનુરોધ અને પરસ્પર અનુસંધાન નહીં થાય એમ કહ્યું. એના જવાબમાં પ્રસ્તુત સૂત્ર " પ્રવૃત્તિભેદે..." વગેરેથી કહે છે કે યોગી અનેક ચિત્તોની પ્રવૃત્તિને પ્રેરનારું એક નિયામક ચિત્ત બનાવે છે. આવો દોષ ત્યારે જ થાય જ્યારે ભિન્ન શરીરોમાં રહેલાં ચિત્તોનું એક નાયકચિત્ત બનાવાય નહીં. એનું નિર્માણ થાય તો દોષ આવે નહીં.

અનેક પ્રતિશરીર ભિન્ન ચિત્તો માટે એક નાયકચિત્ત બનાવવાની શી જરૂર છે ? યોગીનું પોતાનું જ ચિત્ત નાયકચિત્તનું કાર્ય કરશે, એમ કહેવું ન જોઈએ. કારણ કે જે વાત પ્રમાણસિદ્ધ છે, એમાં નવા તર્કો અને નવા પ્રશ્નો ઊભા ન કરવા જોઈએ. આ વિષે પુરાણ (પ્રમાણ) છે :-

"એક ઈશ્વર (ઐશ્વર્યસંપન્ન યોગી) પોતાની પ્રભુશક્તિથી અનેક બને છે, અનેક બન્યા પછી પાછો એક બને છે. તેથી આવાં ભિન્ન મન ઉત્પન્ન થાય છે." (વાયુપુરાણ, ૬૬,૧૪૩-૧૪૪)

"યોગીશ્વર એક રૂપ, બે રૂપ, ત્રણ રૂપ, અનેક રૂપ વાળો બને છે. અનેક શરીરો ઉત્પન્ન કરે છે અને નષ્ટ કરે છે. કેટલાંક શરીરોથી વિષયો પ્રાપ્ત કરે છે, કેટલાંકથી ઉગ્ર તપ કરે છે, અને સૂર્ય પોતાનાં કિરણો સમેટી લે, એમ એ બધાંને સમેટી લે છે."(વાયુપુરાણ, ૬૬,૧૫૨)

આવા અભિપ્રાયથી "બહુનાં ચિત્તાનાં..." વગેરે કહે છે. ૫

★

तत्र ध्यानजमनाशयम् ॥६॥

એ બધામાં ધ્યાનજન્ય ચિત્ત આશય વિનાનું છે. ૬

भाष्य

पञ्चविधं निर्माणचित्तं जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धय इति । तत्र यदेव ध्यानजं चित्तं तदेवानाशयम् । तस्यैव नास्त्याशयो रागादिप्रवृत्तिः । नातः पुण्यपापाभिसंबन्धः क्षीणक्लेशत्वाद्योगिन इति । इतरेषां तु विद्यते कर्माशयः ॥६॥

જન્મ, ઔષધિ, મંત્ર, તપ અને સમાધિથી સિદ્ધિઓ ઉત્પન્ન થાય છે, એમ કહ્યું, તેથી નિર્માણચિત્ત પાંચ પ્રકારનું છે. એમાં ધ્યાન (સમાધિ) જન્ય ચિત્ત જ આશય વિનાનું છે. એમાં રાગ વગેરેની પ્રવૃત્તિરૂપ આશય નથી તેથી એનો પુણ્ય, પાપસાથે સંબંધ નથી. કારણકે યોગીના કલેશો ક્ષીણ થયા છે. બીજાં ચિત્તોમાં કર્માશય છે. ૬

तत्त्ववैशारदी

तदेवमुदितेषु पञ्चसु सिद्धचित्तेष्वपवर्गभागीयं चित्तं निर्धारयति-तत्र ध्यानजमनाशयम् । आशेरत इत्याशयाः कर्मवासनाः क्लेशवासनाश्च । त एते न विद्यन्ते यस्मिंस्तदनाशयं चित्तमपवर्गभागीयं भवतीत्यर्थः । यतो रागादिनिबन्धना प्रवृत्तिर्नास्त्यतो नास्ति पुण्यपापाभिसंबन्धः । कस्मात्पुना रागादिजनिता प्रवृत्तिर्नास्तीत्यत आह-क्षीणक्लेशत्वादिति । ध्यानजस्यानाशयस्य मनोऽन्तरेभ्यो विशेषं दर्शयितुमितरेषामाशयवत्तामाह-इतरेषां त्विति ॥६॥

"तत्र ध्यानजम्..." વગેરે સૂત્રથી અગાઉ કહેલાં પાંચ સિદ્ધ ચિત્તોમાં મોક્ષભાગી ચિત્તનો નિશ્ચય કરે છે. કર્મવાસનાઓ અને ક્લેશવાસનાઓ જેમાં રહે એ આશય છે. જે ચિત્તમાં આશય નથી એને અનાશય કહે છે. એ ચિત્ત મોક્ષભાગી છે. એમાં રાગ વગેરેથી ઉત્પન્ન થતી પ્રવૃત્તિ નથી, તેથી પુણ્ય-પાપસાથે સંબંધ નથી. શાથી રાગાદિજન્ય પ્રવૃત્તિ નથી ? જવાબમાં ક્લેશો ક્ષીણ થયા હોવાથી એમ કહે છે. "ઇતરેષામ્..." વગેરેથી બીજાં આશયવાળાં ચિત્તોથી ધ્યાનજન્ય અનાશયચિત્તની વિશેષતા કહે છે. ૬

★

यत :- કારણકે

कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम् ॥७॥

યોગીનું કર્મ શુક્લ કે કૃષ્ણ હોતું નથી. બીજાઓનું ત્રણ પ્રકારનું (શુક્લ, કૃષ્ણ, મિશ્ર) હોય છે. ૭

भाष्य

चतुष्पदा खल्वियं कर्मजातिः । कृष्णा शुक्लकृष्णा शुक्ला-ऽशुक्लाकृष्णा चेति । तत्र कृष्णा दुरात्मनाम् । शुक्लकृष्णा बहिः साधनसाध्या, तत्र परपीडानुग्रहद्वारेणैव कर्माशयप्रचयः । शुक्ला तपःस्वाध्यायध्यानवताम् । सा हि केवले मनस्यायतत्वाद्बहिः साधनानधीना न परान्पीडयित्वा भवति । अशुक्लाकृष्णा संन्यासिनां क्षीणक्लेशानां चरमदेहानामिति । तत्राशुक्लं योगिन एव फलसंन्यासात्, अकृष्णं चानुपादनात् । इतरेषां तु भूतानां पूर्वमेव त्रिविधमिति ॥७॥

આ કર્મજાતિ ચાર સ્થાનોવાળી છે. કૃષ્ણ, શુક્લકૃષ્ણ, શુક્લ અને અશુક્લાકૃષ્ણ. દુરાત્માઓનું કર્મ કૃષ્ણ છે. શુક્લકૃષ્ણ કર્મ બાહ્ય સાધનોથી અને બીજાઓને પીડા કે સુખ પહોંચાડીને જ સિદ્ધ થાય છે, અને એમનાથી કર્માશય વધે છે. તપ, સ્વાધ્યાય, ધ્યાન વગેરેનું અનુષ્ઠાન કરનારનું કર્મ શુક્લ હોય છે. આ કર્મજાતિ ફક્ત મનથી થાય એવી, અને બાહ્ય સાધનોને આધીન ન હોવાથી, અન્યને પીડા પહોંચાડ્યા વિના થાય છે. અશુક્લાકૃષ્ણ કર્મજાતિ ક્ષીણક્લેશ, ચરમદેહવાળા સંન્યાસીઓની છે. યોગી ફળત્યાગ કરે છે તેથી અશુક્લ અને નવાં કર્મ ઉત્પન્ન થવા દેતો નથી, તેથી અકૃષ્ણકર્મવાળો કહેવાય છે. બાકીનાં પ્રાણીઓનાં કર્મ અગાઉ કહ્યાં એવાં ત્રણ પ્રકારનાં હોય છે. ૭

तत्त्ववैशारदी

तत्रैव च हेतुपरं सूत्रमवतारयति-यत इति । कर्माशुक्लाकृष्णं योगिनस्त्रि-विधमितरेषाम् । पदं स्थानम् । चतुर्षु समवेता चतुष्पदा । यद्यावद्बहिःसाधनसाध्यं तत्र सर्वत्रास्ति कस्यचित्पीडा । न हि व्रीह्यादिसाधनेऽपि कर्मणि परपीडा नास्ति । अवघातादिसमये पिपीलिकादिवधसंभवात् । अन्ततो बीजादिवधेन स्तम्बादि-

भेदोत्पत्तिप्रतिबन्धात् । अनुग्रहश्च दक्षिणादिना ब्राह्मणादेरिति । शुक्ला तपःस्वाध्याय-ध्यानवतामसंन्यासिनाम् । शुक्लत्वमुपपादयति-सा हीति । अशुक्लाकृष्णा संन्यासिनाम् । संन्यासिनो दर्शयति-क्षीणेति । कर्मसंन्यासिनो हि न क्वचिद्बहिःसाधनसाध्ये कर्मणि प्रवृत्ता इति न चैषामस्ति कृष्णः कर्माशयः । योगानुष्ठानसाध्यस्य कर्माशयफलस्येश्वरे समर्पणान्न शुक्लः कर्माशयः । निरत्ययफलो हि शुक्ल उच्यते । यस्य फलमेव नास्ति कुतस्तस्य निरत्ययफलत्वमित्यर्थः । तदेवं चतुष्टयीं कर्मजातिमुक्त्वा कतमा कस्येत्यवधारयति - तत्राशुक्लमिति ॥७॥

"यतः" કારણકે એમ કહીને કર્મભેદના હેતુપરક સૂત્ર "કર્માશુક્લા-કૃષ્ણમ્..." વગેરે પ્રસ્તુત કરે છે. પદ એટલે સ્થાન. ચાર સ્થાનવાળી હોવાથી કર્મજાતિ ચતુષ્પદા કહેવાય છે. જે કર્મો બાહ્ય સાધનોથી સાધ્ય હોય એ બધામાં કોઈને પીડા પહોંચતી જ હોય છે. ડાંગર વગેરે સાધનોવાળાં (યજ્ઞ) કર્મોમાં અન્યને પીડા થાય છે. ખાંડવા વગેરે કાર્યોમાં કીડીઓ વગેરેની હિંસા થાય છે. અંતતઃ બીજ વગેરેના નાશથી અંકુર વગેરે ભેદો ઉત્પન્ન થાય એવો પ્રતિબંધ છે. બ્રાહ્મણ વગેરેને દક્ષિણા વગેરે આપવાથી અનુગ્રહ પણ થાય છે. સંન્યાસ ન લીધો હોય એવા લોકો તપ, સ્વાધ્યાય, ધ્યાન વગેરે કરે એનાથી શુક્લ કર્મ ઉત્પન્ન થાય છે."सा हि..." વગેરેથી એમનું શુક્લપણું દર્શાવે છે. અશુક્લ-અકૃષ્ણ-કર્મજાતિ સંન્યાસીઓની છે. "क्षीणक्लेशानाम्..." વગેરેથી સંન્યાસીઓ વિષે કહે છે. કર્મસંન્યાસીઓ બહારના સાધનથી સાધ્ય કર્મમાં પ્રવૃત્ત થતા નથી. તેથી એમનો કર્માશય કૃષ્ણ નથી. જેનું ફળ ખરાબ ન હોય એ કર્મ શુક્લ છે. જેનું ફળ જ ન હોય એવું કર્મ ખરાબ ફળ આપનાર કેવી રીતે હોઈ શકે ?

આમ ચાર પ્રકારની કર્મજાતિ વર્ણવીને "तत्राशुक्लम्..." વગેરેથી કઈ જાતિ કોની છે એનો નિર્ણય કરે છે. ૭

★

ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम् ॥८॥

એમનાથી (ત્રણ પ્રકારનાં કર્મોથી) એમના વિપાકને અનુરૂપ વાસનાઓ જ અભિવ્યક્ત થાય છે. ૮

भाष्य

तत इति त्रिविधात्कर्मणः । तद्विपाकानुगुणानामेवेति । यज्जातीयस्य कर्मणो यो विपाकस्तस्यानुगुणा या वासनाः कर्मविपाकमनुशेरते

तासामेवाभिव्यक्तिः । न हि दैवं कर्म विपच्यमानं नारकतिर्यङ्मनुष्यवासनाभिव्यक्तिनिमित्तं संभवति । किं तु दैवानुगुणा एवास्य वासना व्यज्यन्ते । नारकतिर्यङ्मनुष्येषु चैवं समानश्चर्चः ॥८॥

એમનાથી એટલે ત્રિવિધ કર્મોથી, એમના વિપાક પ્રમાણે એટલે જે જાતિમાં કર્મોનો વિપાક થતો હોય એમને અનુરૂપ જ, તે તે કર્મના ફળને પ્રગટ કરે એવી વાસનાઓનો આવિર્ભાવ થાય છે. દેવની અવસ્થા પ્રગટ કરનારું કર્મ ફલોન્મુખ બને ત્યારે નરક, પશુ કે મનુષ્ય અવસ્થા પ્રગટ કરે એવી વાસનાઓની અભિવ્યક્તિનું કારણ બનતું નથી, પણ દેવોને યોગ્ય વાસનાઓના આવિર્ભાવનું કારણ બને છે. નરક, પશુ અને મનુષ્ય અવસ્થાઓ વિષે પણ આ નિયમ લાગુ પડે છે. ૮

तत्त्ववैशारदी

कर्माशयं विविच्य क्लेशाशयगतिमाह-ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम् । यज्जातीयस्य पुण्यजातीयस्यापुण्यजातीयस्य वा कर्मणो यो विपाको, दिव्यो वा नारको वा जात्यायुर्भोगस्तस्य विपाकस्यानुगुणाः । ता एवाहया वासनाः कर्मविपाकमनुशेरतेऽनुकुर्वन्ति । दिव्यभोगजनिता हि दिव्यकर्मविपाकानुगुणा वासनाः । न हि मनुष्यभोगवासनाभिव्यक्तौ दिव्य कर्मफलोपभोगसंभवः । तस्मात्स्वविपाकानुगुणा एव वासनाः कर्माभिव्यञ्जनीया इति भाष्यार्थः ॥८॥

કર્માશયનું વિવેચન કરીને, હવે "ततः तद्विपाकानुगुणानाम्..." વગેરે સૂત્રથી ક્લેશાશયની ગતિનું વિવરણ કરે છે. પુણ્યજાતિનાં કે પાપજાતિનાં કર્મોનો દિવ્ય કે નારકીય વિપાક એટલે જન્મ, આયુષ્ય અને ભોગરૂપ ફળને અનુરૂપ વાસનાઓ આવિર્ભૂત થાય છે. જે વાસનાઓ કર્મફળને અનુરૂપ છે, વગેરેથી એ જ વાત કહે છે કે દિવ્યભોગથી ઉત્પન્ન થયેલી વાસનાઓ, દિવ્ય કર્મને અનુરૂપ હોય છે. જો મનુષ્યોચિત ભોગવાસના ઉત્પન્ન થાય, તો દિવ્ય કર્મફળભોગ સંભવે નહીં. તેથી પોતાના વિપાકને અનુરૂપ વાસનાઓ જ કર્મોથી અભિવ્યક્ત થાય છે, એવો ભાષ્યનો અર્થ છે. ૮

★

जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृति-संस्कारयोरेकरूपत्वात् ॥९॥

સ્મૃતિ અને સંસ્કાર એક (સમાન) રૂપવાળાં હોવાથી જાતિ, દેશ અને કાળથી વ્યવહિત વાસનાઓનું પણ આનન્તર્ય (તરત કે પછી પ્રગટ થવાનું વલણ) હોય છે. ૯

ભાષ્ય

वृषदंशविपाकोदयः स्वव्यञ्जकाञ्जनाभिव्यक्तः, स यदि जातिशतेन वा दूरदेशतया वा कल्पशतेन वा व्यवहितः पुनश्च स्वव्यञ्जकाञ्जन एवोदियाद् द्रागित्येवं पूर्वानुभूतवृषदंशविपाकाभिसंस्कृता वासना उपादाय व्यज्येत । कस्मात् ? यतो व्यवहितानामप्यासां सदृशं कर्माभिव्यञ्जकं निमित्तीभूतमित्यानन्तर्यमेव । कुतश्च ? स्मृतिसंस्कारयोरेकरूपत्वात् । यथानुभवास्तथा संस्काराः । ते च कर्मवासनानुरूपाः । यथा च वासनास्तथा स्मृतिरिति जातिदेशकालव्यवहितेभ्यः संस्कारेभ्यः स्मृतिः । स्मृतेश्च पुनः संस्कारा इत्येवमेते स्मृतिसंस्काराः कर्माशयवृत्तिलाभवशाद्व्यज्यन्ते । अतश्च व्यवहितानामपि निमित्तनैमित्तिकभावानुच्छेदादानन्तर्यमेव सिद्धमिति ॥९॥

પોતાને વ્યક્ત કરનાર કારણોથી પ્રગટ થયેલો, બિલાડીની અવસ્થા ઉત્પન્ન કરે એવાં કર્મફળોનો ઉદય, સો જન્મો, દૂરદેશ, કે સો કલ્પોના વ્યવધાનવાળો હોય, તો પણ ફરીથી પોતાને પ્રગટ કરનાર કારણોથી અગાઉના જન્મમાં અનુભવેલા બિલાડીના અનુભવોરૂપ કર્મવિપાકના સંસ્કારની વાસનાઓને સાથે લઈને પ્રગટ થાય છે. કેમ ? કારણકે ભલે એ સંસ્કારો વ્યવધાનવાળા હોય, છતાં એમને અનુરૂપ ફળ પ્રગટ કરે એવું કર્મ એમને વ્યક્ત કરવામાં નિમિત્ત બને છે, માટે આનન્તર્ય (અવ્યવધાન) જ છે. બીજું શું કારણ છે ? સ્મૃતિ અને સંસ્કાર સમાન રૂપવાળાં છે. અનુભવ પ્રમાણે સંસ્કાર હોય છે. એ સંસ્કાર કર્મવાસનાને અનુરૂપ હોય છે. અને જેવી વાસના હોય એવી સ્મૃતિ હોય છે. માટે જન્મ, દેશ, કાળના વ્યવધાનવાળા સંસ્કારોથી પણ સ્મૃતિ ઉત્પન્ન થાય છે. અને સ્મૃતિથી પાછા સંસ્કારો ઉત્પન્ન થાય છે. આમ સ્મૃતિ અને સંસ્કાર કર્માશયને પ્રવર્તવાનો

અવકાશ મળતાં પ્રગટ થાય છે. માટે વ્યવધાન હોવા છતાં નિમિત્ત-નૈમિત્તિક ભાવ (કાર્ય-કારણભાવ)નો ઉચ્છેદ ન થતો હોવાથી આનન્તર્ય જ સિદ્ધ થાય છે. (વર્તમાન મનુષ્ય જન્મ પછી કર્મવશાત્ બિલાડીનો જન્મ મળે તો અગાઉ ઘણા કલ્પો પહેલાંના બિલાડી તરીકેના સંસ્કારો પ્રગટ થાય છે.) ૯

तत्त्ववैशारदी - લંબાણ

स्यादेतत्-मनुष्यस्य प्रायेणानन्तरमधिगतमार्जारभावस्यानन्तरतया मनुष्यवासनाया एवाभिव्यक्त्या भवितव्यम् । न खल्वस्ति संभवो यदनन्तरदिवसानुभूतं न स्मर्यते व्यवहितदिवसानुभूतं च स्मर्यत इत्यत आह– जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोरेकरूपत्वात् । भवतु वृषदंशवासनाया जात्यादिव्यवधिः, तथापि तस्याः फलत आनन्तर्यम् । वृषदंशाविपाकेन कर्मणा तस्या एव स्वविपाकानुगुणाया अभिव्यक्तौ तत्स्मरणसमुत्पादादित्याह-वृषदंशविपाकोदय इति । उदेत्यस्मादित्युदयः कर्माशयः । पुनश्च स्वव्यञ्जकाञ्जन एवोदियात्, अभिव्यज्येत विपाकारम्भाभिमुखः क्रियेतेत्यर्थः । अभिसंस्कारक्रिया उपादाय गृहीत्वा व्यज्येत । यदि व्यज्येत स्वविपाकानुगुणा एव वासना गृहीत्वा व्यज्येतेत्यर्थः । आनन्तर्यमेव फलतः कारणद्वारकमुपपाद्य कार्यद्वारमुपपादयति-कुतश्च स्मृतीति । एकरूपतया सादृश्यम् । तदेवाह- यथेति । नन्वनुभवसरूपाश्चेत्संस्कारास्तथा सत्यनुभवा विशरारव इत्येतेऽपि विशरारवः कथं चिरभाविनेऽनुभवाय कल्पेरन्नित्यत आह- ते च कर्मवासनानुरूपा इति । यथाऽपूर्वं १
स्थायि क्षणिककर्मनिमित्तमप्येवं क्षणिकानुभवनिमित्तोऽपि संस्कारः स्थायी । किंचिद्भेदाधिष्ठानं च सारूप्यम् । अन्यथाऽभेदे तत्त्वेन सादृश्यानुपपत्तेरित्यर्थः । सुगममन्यत् ॥९॥

ભલે. પણ મનુષ્ય મૃત્યુ પછી બિલાડી તરીકે જન્મે, તો તરત પહેલાંની મનુષ્યવાસના જ વ્યક્ત થવી જોઈએ. ગઈકાલે અનુભવ્યું હોય એ યાદ ન આવે અને ઘણા દિવસો પહેલાં અનુભવેલું યાદ આવે એ સંભવિત નથી. આ શંકાના સમાધાન માટે સૂત્રકાર "જાતિદેશકાલ.." વગેરે સૂત્રથી કહે છે કે જન્મ, દેશ અને કાળનું વ્યવધાન હોય તો પણ સંસ્કારોનું આનન્તર્ય (અવ્યવધાન) હોય છે, કારણકે સ્મૃતિ અને સંસ્કાર સમાન રૂપવાળાં છે. બિલાડીની વાસના જન્મ વગેરેના વ્યવધાનવાળી છે, છતાં ફળની દૃષ્ટિએ આનન્તર્ય છે. બિલાડીની અવસ્થા પ્રગટ કરે એવું કર્મ, પોતાના ફળને અનુરૂપ વાસનાનું સ્મરણ ઉત્પન્ન કરે છે, એ વાત "વૃષદંશવિ[illegible]ક" વગેરેથી કહે છે. ઉદય એટલે કર્માશય, કારણ કે એમાંથી સ્મૃતિનો ઉદય થાય છે. એ ફરીથી પોતાને વ્યક્ત કરનાર કારણવડે પ્રગટ થાય છે અને ફળ

આપવાનો આરંભ કરે છે, એવો અર્થ છે. સંસ્કારસાથે જ પ્રગટ થાય છે. જો પ્રગટ થાય, તો પોતાના વિપાકને અનુરૂપ વાસના સાથે જ પ્રગટ થાય એવો અર્થ છે. ફળરૂપ કારણથી આનન્તર્યનું સ્વરૂપ કહીને , "કુતશ્ચ, સ્મૃતિસંસ્કારયોરેક-રૂપત્વાત્"થી કાર્યદ્વારા પણ આનન્તર્ય થાય છે, એ હકીકત જણાવે છે. સ્મૃતિ અને સંસ્કાર એકરૂપ હોવાથી સમાન છે. "યથા..." વગેરેથી આ જ વાત કહે છે. સંસ્કારો જો અનુભવરૂપ હોય, તો અનુભવો જેમ ક્ષણમાં નષ્ટ થવાના સ્વભાવવાળા છે, એમ સંસ્કારો પણ તરત જ નષ્ટ થવા જોઈએ. તો પછી એ ઘણા લાંબા સમય પછી અનુભવ ઉત્પન્ન કરવા માટે સમર્થ કેવી રીતે બની શકે ? આના જવાબમાં " તે ચ કર્મવાસનાનુરૂપાઃ..." વગેરેથી કહે છે કે ક્ષણિક કર્મથી ઉત્પન્ન થયેલું "અપૂર્વ" સ્થાયી હોય છે, એમ ક્ષણિક અનુભવના નિમિત્તથી ઉત્પન્ન થયેલા સંસ્કાર પણ સ્થાયી હોય છે. સમાનરૂપતા થોડા ભેદના આશ્રયે રહે છે. જો અભેદ હોય તો સાદૃશ્ય થાય નહીં. બીજું સરળ છે. ૯

★

तासामनादित्वं चाशिषो नित्यत्वात् ॥१०॥

વાસનાઓ અનાદિ છે. કારણ કે (જીવતા રહેવાની) ઇચ્છા નિત્ય છે. ૧૦

भाष्य

तासां वासनानामाशिषोनित्यत्वादनादित्वम् । येयमात्माशीर्मा न भूवं भूयासमिति सर्वस्य दृश्यते सा न स्वाभाविकी । कस्मात् ? जातमात्रस्य जन्तोरननुभूतमरणधर्मकस्य द्वेषदुःखानुस्मृतिनिमित्तो मरणत्रासः कथं भवेत् ? न च स्वाभाविकं वस्तु निमित्तमुपादत्ते । तस्मादनादिवासनानु-विद्धमिदं चित्तं निमित्तवशात्काश्चिदेव वासनाः प्रतिलभ्य पुरुषस्य भोगायोपावर्तत इति ।

घटप्रासादप्रदीपकल्पं संकोचविकासि चित्तं शरीरपरिमाणा-कारमात्रमित्यपरे प्रतिपन्नाः । तथा चान्तराभावः संसारश्च युक्त इति ।

वृत्तिरेवास्य विभुनश्चित्तस्य संकोचविकासिनीत्याचार्यः ।

तच्च धर्मादिनिमित्तापेक्षम् । निमित्तं च द्विविधम्- बाह्यमाध्यात्मिकं च । शरीरादिसाधनापेक्षं बाह्यं स्तुतिदानाभिवादनादि । चित्तमात्राधीनं

श्रद्धाद्याध्यात्मिकम् । तथा चोक्तम्- ये चैते मैत्र्यादयो ध्यायिनां विहारास्ते बाह्यसाधननिरनुग्रहात्मानः प्रकृष्टं धर्ममभिनिर्वर्तयन्ति । तयोर्मानसं बलीयः । कथम् ? ज्ञानवैराग्ये केनातिशय्येते ? दण्डकारण्यं च चित्तबलव्यतिरेकेण कः शारीरेण कर्मणा शून्यं कर्तुमुत्सहेत ? समुद्रमगस्त्यवद्वा पिबेत्?॥१०॥

આશિષો (જીવવાની પ્રાર્થના) નિત્ય હોવાથી, એની વાસનાઓ પણ અનાદિ છે. પોતાના વિષે બધાં પ્રાણીઓની જે આ આશીઃ- પ્રાર્થના- છે કે હું ન હોઉં એમ નહીં, પણ હંમેશાં હોઉં, એ સ્વાભાવિક નથી (પણ સકારણ છે). કેમ ? પ્રાણી જન્મતાં જ, મરણધર્મના અનુભવવિના, દુઃખ તરફના દ્વેષની સ્મૃતિપૂર્વક મરણત્રાસ અનુભવે છે, એ શી રીતે બને ? સ્વાભાવિક બાબત નિમિત્તની અપેક્ષા રાખતી નથી. માટે અનાદિ વાસનાઓથી વીંધાયેલું ચિત્ત, નિમિત્તવશાત્ કેટલીક વાસનાઓનો સ્વીકાર કરીને, પુરુષના ભોગ માટે પ્રવર્તે છે.

કેટલાક લોકો ઘડામાં કે મહેલમાં રહેલા પ્રદીપ જેવું સંકોચ-વિકાસશીલ ચિત્ત છે, અને એ શરીરના માપ કે આકારે માત્રવાળું છે, એમ માને છે. આ રીતે દેહાન્તરપ્રાપ્તિ વચ્ચેના સમયમાં એની સ્થિતિ અને સંસાર સમજાવી શકાય છે, એમ કહે છે.

પરંતુ આચાર્ય સર્વવ્યાપક ચિત્તની વૃત્તિ જ સંકોચ-વિકાસશીલ છે, એમ કહે છે, એ ધર્મ વગેરે નિમિત્તની અપેક્ષાએ થાય છે. નિમિત્તો બે પ્રકારનાં છે. બાહ્ય અને આધ્યાત્મિક. શરીર વગેરે સાધનોની અપેક્ષાથી થતું સ્તુતિ, દાન, પ્રણામ વગેરે બાહ્ય છે. અને શ્રદ્ધા વગેરે ફક્ત ચિત્તને આધીન હોય એ આધ્યાત્મિક છે. આ વિષે કહ્યું છે :- "બાહ્ય સાધનની અપેક્ષા વિનાના ધ્યાનીયોગીઓના મૈત્રી વગેરે વિહારો ઉત્તમ પ્રકારના ધર્મને ઉત્પન્ન કરે છે." એ બેમાં માનસિક વધુ બળવાન છે. કેવી રીતે ? જ્ઞાન અને વૈરાગ્યથી ચડિયાતું શું છે ? મનોબળ વગર કોણ શારીરિક બળવડે દંડકારણ્યને શૂન્ય બનાવી શકે ? અથવા અગસ્ત્યની જેમ સમુદ્ર પી શકે ? ૧૦

तत्त्ववैशारदी

स्यादेतत्-व्यजेरन्पूर्वपूर्वतरजन्माभिसंस्कृता वासनाः । यदि पूर्वपूर्व-तरजन्मसद्भावे प्रमाणं स्यात् । तदेव तु नास्ति । न च जातमात्रस्य जन्तोर्हर्षशोकदर्शनमात्रं

प्रमाणं भवितुमर्हति । पद्मादिसंकोचविकासवत्स्वाभाविकत्वेन तदुपपत्तेरित्यत आह- तासामनादित्वं चाशिषो नित्यत्वात् । तासां वासनानामनादित्वं च न केवलमानन्तर्यमिति चार्थः । आशिषो नित्यत्वात् । आत्माशिषो वासनानामनादित्वे नित्यत्वाव्यभिचारादिति । ननु स्वाभाविकत्वेनाप्युपपत्तेरसिद्धमाशिषो नित्यत्वमित्यत आह—येयमिति । नास्तिकः पृच्छति-कस्मात् । उत्तरम्-जातमात्रस्य जन्तोरिति । अत एवैतस्मिञ्जन्मन्य- ननुभूतमरणधर्मकस्य मरणमेव धर्मः सोऽननुभूतो येन स तथोक्तस्तस्य मातुरङ्कात्प्रस्खलतः कम्पमानस्य माङ्गल्यचक्रादिलाच्छितं तदुरःसूत्रमतिगाढं पाणिग्राहमवलम्बमानस्य बालकस्य कम्पभेदानुमिता द्वेषानुषक्ते दुःखे या स्मृतिस्तन्निमित्तो मरणत्रासः कथं भवेदिति । ननूक्तं स्वभावादित्यत आह- न च स्वाभाविकं वस्तु निमित्तमुपादत्ते गृह्णति स्वोत्पत्तौ । एतदुक्तं भवति-बालकस्येदृशो दृश्यमानः कम्पो भयनिबन्धन ईदृशकम्पत्वादस्मदादिकम्पवत् । बालकस्य भयं द्वेषदुःखस्मृतिनिमित्तं भयत्वाद- स्मदादिभयवत् । आगामिप्रत्यवायोत्प्रेक्षालक्षणं च भयं न दुःखस्मृतिमात्राद्भवति, अपि तु यतो बिभेति तस्य प्रत्यवायहेतुभावमनुमाय संप्रत्यपि प्रत्यवायं भयं च विदध्यादिति । तस्माद्यज्जातीयादनुभूतचराद् द्वेषानुषक्तं दुःखमुपपादितं तस्य स्मरणात् तज्जातीयस्यानुभूयमानस्य तद्दुःखहेतुत्वमनुमाय ततो बिभेति । न च बालकेनास्मिञ्जन्मनि स्खलनस्यान्यत्र दुःखहेतुत्वमवगतम् । न च तादृशं दुःखमुपलब्धम् । तस्मात्प्राग्भवीयोऽनुभवः परिशिष्यते । तच्चैतदेवं प्रयोगमारोहति- जातमात्रस्य बालस्य स्मृतिः पूर्वानुभवनिबन्धना स्मृतित्वादस्मदादिस्मृतिवदिति । न च पद्मसंकोचविकासावपि स्वाभाविकौ । न हि स्वाभाविकं कारणान्तरमपेक्षते । वह्नेरौष्ण्यं प्रत्यपि कारणान्तरापेक्षाप्रसङ्गात् । तस्मादागन्तुकमरुणकरसंपर्कमात्रमेव कमलिनीविकासकारणम् । संकोचकारणं च संस्कारः स्थितिस्थापक इति । एवं स्मिताद्यनुमितहर्षादयोऽपि प्राचि भवे हेतवो वेदितव्याः । तदास्तां तावत् । प्रकृतमुपसंहरति- तस्मादिति । निमित्तं लब्धविपाककालं कर्म । प्रतिलम्भोऽभिव्यक्तिः ।

प्रसङ्गतश्चित्तपरिमाणविप्रतिपत्तिं निराचिकीर्षुर्विप्रतिपत्तिमाह-घटप्रासादेति । देहप्रदेशवर्तिकार्यदर्शनाद्देहाद्बहिः सद्भावे चित्तस्य न प्रमाणमस्ति । न चैतदणुपरिमाणम् । दीर्घशष्कुलीभक्षणादावपर्यायेण ज्ञानपञ्चकानुत्पादप्रसङ्गात् । न चाननुभूयमानक्रमकल्पनायां प्रमाणमस्ति । न चैकमणु मनो नानादेशैरिन्द्रियैरपर्यायेण संबन्धमर्हति । तत्पारिशेष्यात्कायपरिमाणं चित्तं घटप्रासादवर्तिप्रदीपवत् । संकोचविकासौ पुत्तिकाहस्तिदेहयोरस्योत्पत्स्येते । शरीरपरिमाणमेवाकारः परिमाणं यस्येत्यरे प्रतिपन्नाः । नन्वेवं कथमस्य क्षेत्रबीजसंयोगः । न खल्वेतदनाश्रयं मृतशरीरान्मातृपितृदेहवर्तिनी लोहितरेतसी प्राप्नोति, परतन्त्रत्वात् । न हि स्थाण्वादिष्वगच्छत्सु तच्छाया गच्छति ।

न चागच्छति पटे तदाश्रयं चित्रं गच्छति । तथा च न संसारः स्यादित्यत आह- तथा चान्तराभावः संसारश्च युक्त इति । तथा च शरीरपरिमाणत्वे देहान्तरप्राप्तये पूर्वदेहत्यागो देहान्तरप्राप्तिश्चान्तरास्यातिवाहिकशरीरसंयोगाद् भवतः । तेन खल्वयं देहान्तरे सञ्चरेत् ॥ तथा च पुराणम्-

अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात् । (महाभा० वन० ३।२९७।१७) सोऽयमन्तराभावः । अत एव संसारश्च युक्त इति ।

तदेतदमृष्यमाणः स्वमतमाह-वृत्तिरेवास्य विभुनश्चित्तस्य सङ्कोच-विकासिनीत्याचार्यः स्वयंभूः प्रतिपेदे । इदमत्राकूतम्-यद्यनाश्रयं चित्तं न देहान्तरसञ्चारि कथमेतदातिवाहिकमाश्रयते । तत्रापि देहान्तरकल्पनायामनवस्था । न चास्य देहान्निष्कर्ष आतिवाहिकस्य सम्भवति । निष्कृष्टस्य चेतसस्तत्सम्बन्धात् । अस्तु तर्हि सूक्ष्मशरीरमेवा सर्गादा च प्रलयान्नियतं चित्तानामधिष्ठानं षाट्कौशिकशरीरमध्यवर्ति । तेन हि चित्तमा-सत्यलोकादा चावीचेस्तत्र तत्र शरीरे सञ्चरति । निष्कर्षश्चास्योपपन्नः षाट्कौशिकात्कायात् । तत्र हि तदन्तराभावस्तस्य नियतत्वात् । न चास्यापि सद्भावे प्रमाणमस्ति । न खल्वेतदध्यक्षगोचरः । न च संसारोऽस्यानुमानम्, आचार्य-मतेनाप्युपपत्तेः । आगमस्तु पुरुषस्य निष्कर्षमाह । न च चित्तं वा सूक्ष्मशरीरं वा पुरुषः, किं तु चितिशक्तिरप्रतिसंक्रमा । न चास्या निष्कर्षः संभवतीत्यौपचारिको व्याख्येयः । तथा च चित्तेश्चित्तस्य च तत्र तत्र वृत्त्यभाव एक निष्कर्षार्थः । यच्च स्मृतीतिहासपुराणेषु मरणानन्तरं प्रेतशरीरप्राप्तिस्तद्विमोकश्च सपिण्डीकरणादिभिरित्युक्तं तदनुजानीमः । आतिवाहिकत्वं तस्य न मृष्यामहे । न चात्रास्ति कश्चिदागमः । लब्धशरीर एव च यमपुरुषैरपि पाशबद्धो नीयते । न त्वातिवाहिकशरीरः । तस्मादाहङ्कारिकत्वाच्चेतसोऽहङ्कारस्य च गगनमण्डलवत्त्रैलोक्यव्यापित्वाद्विभुत्वं मनसः । एवं चेदस्य वृत्तिरपि विभ्वीतिसर्वज्ञतापत्तिरित्यत उक्तं वृत्तिरेवास्येति ।

स्यादेतत्-चित्तमात्राधीनाया वृत्तेः सङ्कोचविकासौ कुतः कादाचित्काविति आह- तच्च चित्तं धर्मादिनिमित्तापेक्षम् । वृत्तौ निमित्तं विभजते-निमित्तं चेति । आदिग्रहणेनेन्द्रियधनादयो गृह्यन्ते ।

श्रद्धादीति । अत्रापि वीर्यस्मृत्यादयो गृह्यन्ते । आन्तरत्वे संमतिमाचार्याणामाह- तथा चोक्तम् । विहारो व्यापारः । प्रकृष्टं शुक्लम् । तयोर्बाह्याभ्यन्तरयोर्मध्ये । ज्ञानवैराग्ये तज्जनितौ धर्मौ केन बाह्यसाध्येन धर्मेणातिशय्येते अभिभूयेते । ज्ञानवैराग्यजावेव धर्मौ तमभिभवतः, बीजभावादपनयत इत्यर्थः । अत्रैव सुप्रसिद्धमुदाहरणमाह-दण्डकारण्यमिति ॥१०॥

ભલે. પૂર્વ અને પૂર્વતર (પહેલાંના અને એની પણ પહેલાંના) જન્મોના સંસ્કારોથી ઉત્પન્ન થયેલી વાસનાઓ વ્યક્ત થાય, જો પૂર્વ અને પૂર્વતર જન્મોના અસ્તિત્વમાં કોઈ પ્રમાણ હોય. પણ એ જ તો નથી. તરત જન્મેલા બાળકમાં હર્ષશોક જણાય એ જ પ્રમાણ ગણાય નહીં. એ કમળના સંકોચ-વિકાસની જેમ સ્વાભાવિક છે, એ રીતે સમજાવી શકાય છે. આ શંકાના નિરાકરણ માટે "તાસામનાદિત્વં ચાશિષો નિત્યત્વાત્" સૂત્રથી કહે છે કે વાસનાઓનું આનન્તર્ય જ નહીં, અનાદિપણું પણ સિદ્ધ કરી શકાય છે, એમ "ચ"નો પ્રયોગ કરીને કહે છે. આશિષો નિત્ય છે. પોતાના વિષેની આશિષો કે વાસનામૂલક ઇચ્છાઓ અનાદિ અને નિત્ય છે. કારણ કે એમાં કોઈ ફેરફાર થતો નથી.

આશિષો સ્વાભાવિક છે, એમ સમજાવી શકાય એવી હોવાથી એમનું નિત્યત્વ અસિદ્ધ છે. એના જવાબમાં "યા ઇયમ્..." વગેરેથી કહે છે કે પોતાના વિષે જે આ હું હોઉં, એવી ઇચ્છા સ્વાભાવિક નથી. નાસ્તિક પૂછે છે : કેમ ? એના જવાબમાં "જાતમાત્રસ્ય જન્તોઃ" વગેરેથી કહે છે કે આ જન્મમાં જેણે મરણધર્મ અનુભવ્યો નથી, એવું તરત જન્મેલું બાળક માતાના ખોળામાંથી પડી જતાં ધ્રૂજે છે, અને એના ગળામાં પહેરેલા મંગળસૂત્રને પોતાના હાથથી પકડી રાખે છે. એનાથી દુઃખ પ્રત્યેના દ્વેષ સાથે જોડાયેલી સ્મૃતિથી ઉત્પન્ન થતો મરણભય જણાય છે, એ કેવી રીતે ઉત્પન્ન થયો ? સ્વભાવિક રીતે આમ બને નહીં. કારણ કે સ્વાભાવિક ધર્મ. ઉત્પન્ન થવા માટે નિમિત્તની અપેક્ષા રાખતો નથી. આશય એ છે કે આપણામાં જેમ એવું ભયજન્ય કંપન હોય છે, એવો બાળકમાં જણાતો કંપ પણ ભયને લીધે છે. બાળકને થતો ભય, દુઃખ તરફ દ્વેષની સ્મૃતિથી ઉત્પન્ન થાય છે, જેમ આપણને ભય થાય છે. વળી, આગામી કષ્ટના અનુમાનરૂપ લક્ષણવાળો ભય ફક્ત દુઃખના સ્મરણથી થતો નથી, પણ જેનાથી ડરે છે, એ દુઃખનો હેતુ છે, એવું અનુમાન કરીને, હમણાં પણ એવું દુઃખ ઉત્પન્ન કરશે, એમ સમજીને ડરે છે. તેથી જે પ્રકારનું દુઃખ આવી પડ્યું હતું, એનું સ્મરણ કરીને, એ પ્રકારના વર્તમાન અનુભવને પણ, એ દુઃખનો હેતુ છે, એવું અનુમાન કરીને, એનાથી ડરે છે. અને બાળક પડી જવા સિવાય, આ જન્મમાં બીજા પ્રકારના દુઃખના હેતુને જાણતું નથી, કે એવું દુઃખ એણે અનુભવ્યું નથી. માટે પૂર્વજન્મનો અનુભવ જ બાકી રહે છે.

આ અનુમાનનો પ્રયોગ આ રીતે કરી શકાય :- "તરત જન્મેલા બાળકની સ્મૃતિ પૂર્વ અનુભવને લીધે છે, સ્મૃતિ હોવાના કારણે, આપણી સ્મૃતિની જેમ." કમળનો સંકોચ - વિકાસ પણ સ્વાભાવિક નથી. સ્વાભાવિક બાબત અન્ય કારણની અપેક્ષા રાખતી નથી. નહીં તો, અગ્નિની ઉષ્ણતા માટે પણ અન્ય કારણની અપેક્ષાનો પ્રસંગ થાય. માટે કમળના વિકાસનું આગંતુક કારણ અરુણના કિરણનો સંપર્ક છે.

અને સંસ્કાર સ્થિતિ-સ્થાપકતારૂપ સંકોચનું કારણ છે. આ રીતે બાળકના સ્મિત વગેરે માટે પણ પૂર્વજન્મના હર્ષ વગેરે હેતુઓ જાણવા જોઈએ. આ ચર્ચા અહીં સમાપ્ત કરીએ.

"तस्मात्" વગેરેથી વિષયનો ઉપસંહાર કરે છે. નિમિત્ત એટલે ફળ આપવા માટે તૈયાર થયેલું-પાકી ગયેલું - કર્મ અને પ્રતિલંભ એટલે અભિવ્યક્તિ.

પ્રસંગવશાત્ ચિત્તના પરિમાણ (માપ) વિષે વિરોધી વિચારોનું નિરાકરણ કરવા માટે "घटप्रासादप्रदीपकल्पम्..." વગેરેથી વિરુદ્ધ મત પ્રસ્તુત કરે છે. દેહના પ્રદેશની મર્યાદામાં કાર્ય કરતું જણાવાથી, શરીરની બહાર ચિત્તના અસ્તિત્વમાં કોઈ પ્રમાણ નથી. અને એ અણુ જેવું પણ નથી. કારણ કે જો એમ હોય તો મોટી જલેબી ખાતાં એકી સાથે પાંચ પ્રકારનાં જ્ઞાન ઉત્પન્ન થઈ શકે નહીં. વળી ન અનુભવાતા ક્રમની કલ્પનામાં કોઈ પ્રમાણ નથી. અણુ જેવું એક મન જુદાં જુદાં સ્થાનોમાં રહેલી ઇન્દ્રિયો સાથે સંબંધમાં આવી શકે નહીં. તેથી બાકી રહેલા વિકલ્પ મુજબ ચિત્ત ઘડા કે મહેલમાં રહેલા પ્રદીપ જેવું શરીરના પરિમાણનું માનવું જોઈએ. આ રીતે હાથી અને માખીના શરીરમાં ચિત્તનો સંકોચ-વિકાસ યુક્તિસંગત બનશે માટે શરીરના પરિમાણ જેવડા આકાર કે માપનું ચિત્ત છે, એમ કેટલાક માને છે.

જો એમ હોય તો એનો ક્ષેત્ર અને બીજ સાથે સંયોગ કેવી રીતે થાય છે ? મૃત શરીરમાંથી નીકળીને, આશ્રયવિના માતાપિતાના દેહમાં રહેલા લોહી-રેતસને પ્રાપ્ત કરી શકે નહીં. કારણ કે એ પરતંત્ર છે. સ્તંભ વગેરે ગતિશીલ ન હોય તો એમની છાયા ગતિશીલ હોઈ શકે નહીં, અને વસ્ત્ર ગતિશીલ ન હોય તો એના આશ્રયે રહેલું ચિત્ર ચાલતું નથી. વળી સંસાર પણ સિદ્ધ ન થાય, તેથી કહે છે, "तथा चान्तराभावः संसारश्च युक्तः" એટલે કે શરીરના માપનું ચિત્ત હોય તો પૂર્વદેહનો ત્યાગ અને અન્ય દેહની પ્રાપ્તિ પણ આતિવાહિક શરીરના સંયોગથી સિદ્ધ થશે. એના આશ્રયે એ બીજા દેહમાં જશે. પુરાણમાં કહ્યું છે :-

"અંગૂઠા જેવડા પુરુષને યમે બળપૂર્વક ખેંચ્યો." (મહાભારત, વનપર્વ, ૩. ૨૯૭.૧૭) આ વચગાળાની (ચિત્તની) સ્થિતિ છે. માટે સંસાર પણ સિદ્ધ થશે.

આ મત અસ્વીકાર્ય લાગવાથી પોતાનો મત "वृत्तिरेवास्य विभुनश्चित्तस्य संकोचविकासिनीत्याचार्यः"થી કહે છે કે સ્વયંભૂ - હિરણ્યગર્ભ - આ શાસ્ત્રના આદિ આચાર્ય ચિત્ત સર્વવ્યાપક છે અને એની વૃત્તિ જ સંકોચવિકાસશીલ છે, એમ માને છે. રહસ્ય એ છે કે જો ચિત્ત આશ્રયવિના બીજા દેહમાં જતું નથી, તો એ (સ્થૂલ દેહ ત્યાગીને) આતિવાહિક દેહમાં કેવી રીતે જાય છે ? એ સમયગાળામાં પણ અન્ય દેહની કલ્પના કરવામાં આવે તો અનવસ્થા થાય (અંતહીન કલ્પનાનો દોષ

થાય). સ્થૂલ શરીરમાંથી આતિવાહિક શરીરનું ખેંચાવું સંભવતું નથી. કારણ કે એની સાથે ચિત્તનો સંબંધ છે. તો પછી સર્ગથી પ્રલય સુધી નિયત અને ચિત્તના આશ્રયરૂપ, છ કોશોવાળા સ્થૂલ શરીરમાં રહેતું સૂક્ષ્મ શરીર માનવું જોઈએ. એના આશ્રયે ચિત્ત સત્યલોકથી અવીચિ સુધી તે તે સ્થૂલ શરીરોમાં સંચરણ કરશે. છ કોશોવાળા ભૌતિક શરીરમાંથી એને ખેંચીને બહાર લાવવાની વાત પણ યુક્તિસંગત બનશે, અને સ્થૂલ શરીર છોડ્યા પછી અન્તરાભાવ - વચગાળામાં હયાતિ - નિયત સૂક્ષ્મશરીરથી સિદ્ધ થશે.

પરંતુ આવા સૂક્ષ્મ શરીરના અસ્તિત્વમાં કોઈ પ્રમાણ નથી. એ ઇન્દ્રિયગોચર નથી. સંચરણના હેતુથી એનું અનુમાન પણ ન થઈ શકે. કારણ કે આચાર્યના મત મુજબ સંચરણ સમજાવી શકાય છે. આગમ પુરુષને બહાર ખેંચવાની વાત કહે છે, ચિત્ત કે સૂક્ષ્મ શરીરને નહીં. અને ચિત્ત કે સૂક્ષ્મ શરીર પુરુષ નથી, પણ (વિષયોમાં) ગતિવિનાની ચિતિશક્તિ પુરુષ છે. એનું બહાર ખેંચાવું સંભવિત નથી, માટે એ વાત ઔપચારિક માનવી જોઈએ. ચિત્તની કે ચિતિશક્તિની વૃત્તિનો તે તે ગાળામાં અભાવ ખેંચવાના અર્થમાં સમજી શકાય છે. વળી સ્મૃતિ, ઇતિહાસ અને પુરાણોમાં મરણ પછી પ્રેતશરીરની પ્રાપ્તિ અને સપિંડીકરણ વગેરેથી એની મુક્તિ કહી છે, એનો અમે સ્વીકાર કરીએ છીએ. પણ એનું આતિવાહિકત્વ સ્વીકારતા નથી. આ વિષે પણ શ્રુતિ પ્રમાણ નથી. યમપુરુષો વડે શરીરવાળાને જ પાશથી બાંધીને લઈ જવામાં આવે છે, આતિવાહિક શરીરવાળાને નહીં. ચિત્ત અહંકારથી પેદા થાય છે. અને અહંકાર આકાશની જેમ ત્રૈલોક્યવ્યાપી હોવાથી ચિત્ત સર્વવ્યાપક છે. વળી એની વૃત્તિ પણ વિભુ હોય તો સર્વજ્ઞતાનો પ્રસંગ આવે, તેથી કહ્યું કે એની પ્રગટ થતી વૃત્તિ જ સંકોચવિકાસશીલ છે.

ભલે, પણ ચિત્તને આધીન એની વૃત્તિનો સંકોચવિકાસ હોય તો એ ક્યારેક જ થાય એવું શાથી ? જવાબમાં "तच्च धर्मादिनिमित्तापेक्षम्"થી કહે છે કે ધર્માદિની અપેક્ષાએ ચિત્ત સંકુચિત કે વિકસિત થાય છે. "निमित्तं च द्विविधम्"થી વૃત્તિના સંકોચવિકાસના નિમિત્તને બે પ્રકારનું કહે છે. એમાં બાહ્યનિમિત્ત શરીર વગેરે સાધનોની અપેક્ષા રાખે છે. વગેરે શબ્દથી ઇન્દ્રિય, ધન વગેરે સાધનોનું ગ્રહણ સમજવું જોઈએ. આધ્યાત્મિક નિમિત્તોમાં શ્રદ્ધા વગેરે કહ્યાં. ત્યાં પણ "આદિ" શબ્દથી ઉત્સાહ, સ્મૃતિ (સતત જાગરૂકતા) વગેરેનું ગ્રહણ સમજવું જોઈએ. "तथा चोक्तम्"થી આન્તર સાધનો વિષે આચાર્યોની સંમતિ દર્શાવે છે. વિહાર એટલે વ્યાપાર (વ્યવહાર). પ્રકૃષ્ટ એટલે શુકલ (શુદ્ધ) "तयोः" એટલે બાહ્ય અને આભ્યન્તર એ બેમાંથી. જ્ઞાન વૈરાગ્યથી એટલે એમનાથી ઉત્પન્ન થયેલો ધર્મ ક્યા

બાહ્ય સાધન-સાધ્ય ધર્મથી ઓછો ગણાય ? જ્ઞાનવૈરાગ્યજન્ય ધર્મો જ એમના કરતાં વધુ બળવાન છે. તેથી એમના બીજભાવને દૂર કરે છે. "દંડકારણ્યમ્" વગેરેથી આ વિષયમાં સુપ્રસિદ્ધ દૃષ્ટાન્ત પ્રસ્તુત કરે છે. ૧૦

★

हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः ॥११॥

હેતુ, ફળ, આશ્રય અને આલંબન વડે (વાસનાઓનો) સંગ્રહ થતો હોવાથી, એમના (હેતુ વગેરેના) અભાવથી એમનો અભાવ થાય છે. ૧૧.

ભાષ્ય

हेतुर्धर्मात्सुखमधर्माद्दुःखं सुखाद्रागो दुःखाद्द्वेषस्ततश्च प्रयत्नस्तेन मनसा वाचा कायेन वा परिस्पन्दमानः परमनुगृह्णात्युपहन्ति वा । ततः पुनर्धर्माधर्मौ सुखदुःखे रागद्वेषाविति प्रवृत्तमिदं षडरं संसारचक्रम् । अस्य च प्रतिक्षणमावर्तमानस्याविद्या नेत्री मूलं सर्वक्लेशानामित्येष हेतुः । फलं तु यमाश्रित्य यस्य प्रत्युत्पन्नता धर्मादेः, नह्यपूर्वोपजनः । मनस्तु साधिकारमाश्रयो वासनानाम् । न ह्यवसिताधिकारे मनसि निराश्रया वासनाः स्थातुमुत्सहन्ते । यदभिमुखीभूतं वस्तु यां वासनां व्यनक्ति तस्यास्तदालम्बनम् । एवं हेतुफलाश्रयालम्बनैरेतैः संगृहीताः सर्वा वासनाः । एषाभावे तत्संश्रयाणामपि वासनानामभावः ॥११॥

હેતુ એટલે ધર્મથી સુખ, અધર્મથી દુઃખ, સુખથી રાગ, દુઃખથી દ્વેષ, પછી પ્રયત્ન વખતે મન, વચન અને શરીરથી કર્મો કરતાં પુરુષ બીજાનું હિત કે અહિત કરે છે. એનાથી ફરીવાર ધર્મ, અધર્મ, સુખ, દુઃખ, રાગ અને દ્વેષ ઉત્પન્ન થાય છે. આમ આ છ અરાઓવાળું સંસારચક્ર પ્રવર્તે છે. પ્રતિક્ષણ ફરતા આ ચક્રની નેત્રી (નાયિકા) અને મૂળ અવિદ્યા બધા કલેશોનું કારણ હોવાથી "હેતુ" કહેવાય છે. જેને અનુલક્ષીને ધર્મ વગેરે આચરાય એ "ફળ" છે. એમાં કોઈ નવીન વસ્તુ ઉત્પન્ન થતી નથી. (જે અનાગત હતું એની વર્તમાનતા થાય છે.) સાધિકાર મન વાસનાઓનો "આશ્રય" છે. ચરિતાધિકાર (કૃતકૃત્ય) મનમાં આશ્રયવિના વાસનાઓ રહી શકતી નથી. સન્મુખ ઉપસ્થિત થતી વસ્તુ વાસનાને પ્રગટ કરે એ એનું "આલંબન" છે. આમ, બધી વાસનાઓ હેતુ, ફળ, આશ્રય અને આલંબનને

કારણે સંગ્રહાય છે. એમના અભાવમાં, એમના આશ્રયે રહેલી વાસનાઓનો પણ અભાવ થાય છે. ૧૧

तत्त्ववैशारदी

अथैताश्चित्तवृत्तयो वासनाश्चानादयश्चेत्कथमासामुच्छेदः । न खलु चितिशक्तिरनादिरुच्छिद्यत इत्यत आह-हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः । अनादेरपि समुच्छेदो दृष्टः । तद्यथाऽनागतत्वस्येति सव्यभिचारत्वादसाधनम् । चितिशक्तिस्तु विनाशकारणाभावान्न विनश्यति, न त्वनादित्वात् । उक्तं च वासनानामनादीनामपि समुच्छेदे कारणं सूत्रेणेति । अनुग्रहोपघातावपि धर्माधर्मादिनिमित्तमुपलक्षयतः । तेन सुरापानादयोऽपि संगृहीता भवन्ति । नेत्री नायिका । अत्रैव हेतुमाह-मूलमिति । प्रत्युत्पन्नता वर्तमानता न तु धर्मस्वरूपोत्पादः । अत्रैव हेतुमाह-न हीति । यदभिमुखीभूतं वस्तु कामिनीसंपर्कादि । व्यापकाभावे व्याप्यस्याभाव इति सूत्रार्थः ॥११॥

હવે આ ચિત્તવૃત્તિઓ અને વાસનાઓ અનાદિ હોય તો એમનો નાશ શી રીતે થાય ? અનાદિ ચિતિશક્તિનો નાશ થતો નથી. આના જવાબમાં "હેતુફલ" વગેરે સૂત્રથી કહે છે કે હેતુ, ફળ, આશ્રય અને આલંબનથી સંગ્રહીત-સંચિત- થતી વાસનાઓ, એમના અભાવથી નાશ પામે છે. અનાદિનો પણ નાશ જોવામાં આવે છે. દાખલા તરીકે અનાગતપણું (અનાદિ છતાં સાન્ત છે). આમ અનાદિપણું સવ્યભિચાર (નિયમપૂર્વક શાશ્વતતાનો હેતુ ન હોવાથી) છે, તેથી એ અવિનાશીપણાને સિદ્ધ ન કરી શકે. ચિતિશક્તિ વિનાશના કારણના અભાવને લીધે શાશ્વત છે, અનાદિપણાને લીધે નહીં. અને અનાદિ વાસનાઓના નાશનું કારણ સૂત્રમાં દર્શાવ્યું છે. અન્યનો અનુગ્રહ અને ઉપઘાત પણ ધર્મ અને અધર્મનો હેતુ દર્શાવે છે. આનાથી મદ્યપાન વગેરેનું ગ્રહણ થયેલું જાણવું જોઈએ. નેત્રી એટલે નાયિકા કે પ્રેરક. "મૂલમ્" (અવિદ્યા બધાનું મૂળ છે) કહીને પ્રેરકપણાનો હેતુ બતાવ્યો છે. પ્રત્યુત્પન્નતા એટલે વર્તમાનતા, ધર્મના સ્વરૂપની નવીન ઉત્પત્તિ નહીં. "ન હિ" વગેરેથી એનો હેતુ કહે છે. "यदभिमुखीभूतम्" - જે સમક્ષ ઉપસ્થિત થાય - એટલે કામિની સંપર્ક વગેરે. વ્યાપક ન હોય તો વ્યાપ્ય પણ ન હોઈ શકે, એવો સૂત્રનો અર્થ છે.૧૧

★

नास्त्यसतः संभवः, न चास्ति सतो विनाशः इति द्रव्यत्वेन संभवन्त्यः कथं निर्वर्तिष्यन्ते वासना इति - અસત્ ઉત્પન્ન થતું નથી, અને સત્નો વિનાશ થતો

નથી. તો દ્રવ્ય તરીકે ઉત્પન્ન થતી વાસનાઓ નષ્ટ કેવી રીતે થાય છે ?-

अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणाम् ॥१२॥

અતીત અને અનાગત સ્વરૂપથી છે. કારણ કે ધર્મોનો ત્રણ અધ્વો(કાળો)માં ભેદ હોય છે. ૧૨

ભાષ્ય

भविष्यद्व्यक्तिकमनागतम्, अनुभूतव्यक्तिकमतीतम् । स्वव्यापारोपारूढं वर्तमानम् । त्रयं चैतद्वस्तु ज्ञानस्य ज्ञेयम् । यदि चैतत् स्वरूपतो नाभविष्यन्नेदं निर्विषयं ज्ञानमुदपत्स्यत, तस्मादतीतानागतं स्वरूपतोऽस्तीति । किञ्च भोगभागीयस्य वापवर्गभागीयस्य वा कर्मणः फलमुत्पित्सु यदि निरुपाख्यमिति तदुद्देशेन तेन निमित्तेन कुशलानुष्ठानं न युज्यते । सतश्च फलस्य निमित्तं वर्तमानीकरणे समर्थं नापूर्वोपजनेन । सिद्धं निमित्तं नैमित्तिकस्य विशेषानुग्रहं कुरुते, नापूर्वमुत्पादयतीति ।

धर्मी चानेकधर्मस्वभावः । तस्य चाध्वभेदेन धर्माः प्रत्यवस्थिताः । न च यथा वर्तमानं व्यक्तिविशेषापन्नं द्रव्यतोऽस्त्येवमतीतमनागतं च । कथं तर्हि ? स्वेनैव व्यङ्ग्येन स्वरूपेणानागतमस्ति, स्वेन चानुभूतव्यक्तिकेन स्वरूपेणातीतमिति, वर्तमानस्यैवाध्वनः स्वरूपव्यक्तिरिति, न सा भवत्यतीतानागतयोरध्वनोः । एकस्य चाध्वनः समये द्वावध्वानौ धर्मिसमन्वागतौ भवत एवेति, नाभूत्वा भावस्त्रयाणामध्वनामिति ॥१२॥

અનાગતની અભિવ્યક્તિ ભવિષ્યમાં થાય છે. જેની અભિવ્યક્તિ અનુભવાઈ ગઈ છે, એ અતીત છે. અને જે પોતાના વ્યાપારમાં આરૂઢ થઈને પ્રગટ થયું છે, એ વર્તમાન છે. આ ત્રણ વસ્તુઓ જ્ઞાનવડે જ્ઞેય બને છે. જો એ સ્વરૂપથી ન હોત તો આવું જ્ઞાન નિર્વિષય બનવાથી ઉત્પન્ન ન થઈ શક્ત. માટે અતીત અને અનાગત સ્વરૂપથી છે. વળી ભોગભાગી કે મોક્ષભાગી કર્મનું ફળ ઉત્પન્ન થવાનું જ છે. એમ જો કર્તાવડે નિરૂપણ કરાય એવું ન હોય તો, એને ઉદ્દેશીને, એના નિમિત્તથી શાણા પુરુષો કર્મનું અનુષ્ઠાન કરે છે, એ અયોગ્ય ઠરે. નિમિત્ત અપ્રગટ પણ અસ્તિત્વ ધરાવતા ફળને વર્તમાન બનાવવામાં સમર્થ છે, અસત્ નું સર્જન કરવામાં નહીં.

પૂર્ણપણે કાર્યશીલ નિમિત્ત પોતાનાથી ઉત્પન્ન થનાર ફળપર વિશેષ અનુગ્રહ કરે છે, એને નવેસર પેદા કરતું નથી.

ધર્મી સ્વભાવથી અનેક ધર્મોવાળો છે. એના ધર્મો અધ્વ(કાળ) ભેદથી વ્યવસ્થિત રહેલા છે. અતીત અને અનાગત વર્તમાનની જેમ દ્રવ્યતરીકે વિશેષ પ્રકારની અભિવ્યક્તિરૂપે પ્રગટેલા હોતા નથી. તો કેવા છે ? પોતાના વ્યંગ્ય (પ્રગટ થનારા) સ્વરૂપ સાથે અનાગત રહે છે. પોતાના અનુભૂત થઈ ચૂકેલા વ્યક્ત સ્વરૂપસાથે અતીત રહે છે. વર્તમાનમાં જ એનું (કાર્યકારી) સ્વરૂપ પ્રગટ હોય છે. એવું અતીત અને અનાગત કાળમાં હોતું નથી. અને એક અધ્વના સમય દરમ્યાન બીજા બે અધ્વો ધર્મીમાં અનુગત હોય છે જ, તેથી આ ત્રણે અધ્વો અભાવથી ભાવરૂપ બનતા નથી. ૧૨

तत्त्ववैशारदी

उत्तरं सूत्रमवतारयितुं शङ्कते-नास्तीति । असत इति तु संपातायातं निदर्शनाय वा । अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणाम् । नासतामुत्पादो न सतां विनाशः । किं तु सतामेव धर्माणामध्वभेदपरिणाम एवोदयव्ययाविति सूत्रार्थः । अनुभूता प्राप्ता येन व्यक्तिस्तत् तथा । संप्रति व्यक्तिर्नास्तीति यावत् । इतश्च त्रैकाल्येऽपि धर्मः सन्नित्याह-यदि चेति । न ह्यसज् ज्ञानविषयः संभवतीति निरुपाख्यत्वात् । विषयावभासं हि विज्ञानं नासति विषये भवति । त्रैकाल्यविषयं च विज्ञानं योगिनामस्मदादीनां च विज्ञानमसति विषये नोत्पन्नं स्यात् । उत्पद्यते च । तस्मादतीतानागते सामान्यरूपेण समनुगते स्त इति । एवमनुभवतो ज्ञानं विषयसत्त्वे हेतुरुक्तम् । उद्देश्यत्वादप्यनागतस्य विषयत्वेन सत्त्वमेवेत्याह-किं च भोगभागीयस्येति । कुशलो निपुणः । अनुष्ठेयेऽपि च यद्यन्निमित्तं तत्सर्वं नैमित्तिके सत्येव विशेषमाधत्ते । यथा काण्डलाववेदाध्यायादयः । न खल्वेते काण्डलावादयोऽसन्तमुत्पादयन्ति । सत एव तु तत्प्राप्तिविकारौ कुर्वन्ति । एवं कुलालादयोऽपि सत एव घटस्य वर्तमानीभावहेतव इत्याह-सतश्चेति ।

यदि तु वर्तमानत्वाभावादतीतानागतयोरसत्त्वं हन्त भो वर्तमानस्याप्य-भावोऽतीतानागतत्वाभावात् । अध्वधर्म्यविशिष्टतया तु सत्त्वं त्रयाणामप्य-विशिष्टमित्यभिप्रायेणाह-धर्मी चेति । प्रत्येकमवस्थानं प्रत्यवस्थितिरिति । द्रव्यत इति । द्रव्ये धर्मिणि । सार्वविभक्तिकस्तसिः । यद्यतीतानागतावतीतानागतत्वेन स्तस्तर्हि वर्तमानसमये तत्त्वाभावान्न स्यातामित्यत आह- एकस्य चेति । प्रकृतमुपसंहरति-इति नाभूत्वा भाव इति ॥१२॥

"નાસ્તિ અસતઃ સંભવઃ..." વગેરેથી આગળના સૂત્રને પ્રસ્તુત કરવા માટે શંકા ઉઠાવે છે. "અસત્ ઉત્પન્ન થાય નહીં" એ વિધાન અગાઉના સૂત્રના ક્રમમાં આવેલું અથવા દાખલારૂપ ગણવું જોઈએ. "અતીતાનાગતમ્" વગેરે સૂત્રથી કહે છે કે અસત્‌ની ઉત્પત્તિ અને સત્‌નો વિનાશ થતો નથી. પરંતુ અસ્તિત્વ ધરાવતા ધર્મો અધ્વભેદથી પરિણમીને ઉત્પન્ન અને નષ્ટ થાય છે, એવો સૂત્રનો અર્થ છે. અનુભૂત એટલે ભૂતકાળમાં વ્યક્તપણું અનુભવ્યું હતું એવા ધર્મો. એટલે કે વર્તમાનમાં જેમની અભિવ્યક્તિ નથી એવા. "યદિ ચૈતત્સ્વરૂપતોના ભવિષ્યત્..." વગેરેથી કહે છે કે ધર્મો ત્રણે કાળમાં હોય છે. અસત્‌નું નિરૂપણ અશક્ય હોવાથી જ્ઞાનનો વિષય બને નહીં. જ્ઞાન વિષયને પ્રકાશિત કરે છે, વિષય ન હોય તો એ હોતું નથી. વિષય ન હોત તો યોગીઓને ત્રણે કાળનું જ્ઞાન અને આપણા જેવાઓને સાધારણ જ્ઞાન થાત નહીં. પણ એ ઉત્પન્ન થાય છે, તેથી અતીત અને અનાગત સામાન્ય રૂપથી અનુગત છે. આમ અનુભવનારનું જ્ઞાન વિષયના અસ્તિત્વનો હેતુ કહ્યો. "કિં ચ ભોગભાગીયસ્ય"... વગેરેથી કહે છે કે ઉદ્દેશ્યરૂપ અનાગતનું પણ વિષયતરીકે અસ્તિત્વ છે જ. કુશળ એટલે નિપુણ. અનુષ્ઠાનની સિદ્ધિમાં જે નિમિત્તો છે, એ નૈમિત્તિક (નિમિત્તસાધ્યફળ) હોય, તો જ એમાં વિશેષતા ઉત્પન્ન કરે છે. દાખલા તરીકે ખેડૂત અને વૈદાધ્યયન કરનાર વિદ્યાર્થી, ખેડૂત વગેરે અસત્‌ને ઉત્પન્ન કરતા નથી, પણ સદ્‌વસ્તુને જ પ્રાપ્ત કરીને એમાં વિકાર (પરિણામ) ઉત્પન્ન કરે છે. "સતશ્ચ..." વગેરેથી કહે છે કે કુંભાર વગેરે અસ્તિત્વ ધરાવતા ઘડાના વર્તમાન ભાવના હેતુ છે.

જો અતીત અને અનાગત વર્તમાનમાં નથી માટે છે જ નહીં એમ કહીએ તો અતીત અને અનાગતના અભાવથી વર્તમાનનો પણ અભાવ છે, એમ કહેવું પડશે. "ધર્મી ચ" વગેરેથી કહે છે કે અધ્વોની વિશેષતાઓ વિનાનો ધર્મી ત્રણે કાળમાં સમાન રૂપે હયાત હોય છે. પ્રત્યવસ્થિતિ એટલે પ્રત્યેકની અવસ્થિતિ. "દ્રવ્યતઃ"માં દ્રવ્ય ધર્મીવાચક છે. બધી વિભક્તિઓ સૂચવવા "તસિ" વપરાય છે. જો અતીત અને અનાગત ફક્ત ભૂતકાળમાં અને ભવિષ્યકાળમાં હોય તો વર્તમાનમાં એમની સત્તા (અસ્તિત્વ)નો અભાવ થશે. માટે "એકસ્ય ચાધ્વનઃ સમયે..." વગેરેથી કહે છે કે એક અધ્વના સમયગાળામાં બીજા બે અધ્વો ધર્મીમાં અનુગત હોય છે જ. "નાભૂત્વા ભાવઃ ત્રયાણામધ્વનામ્"થી ઉપસંહાર કરતાં કહે છે કે અભાવમાંથી ભાવ ઉત્પન્ન થતો નથી. ૧૨

★

ते व्यक्तसूक्ष्मा गुणात्मानः ॥१३॥

એ ત્રણે કાળમાં રહેતા ધર્મો વ્યક્ત અને સૂક્ષ્મરૂપમાં રહે છે, અને ગુણો એમનું મૂળ સ્વરૂપ છે. ૧૩

भाष्य

ते खल्वमी त्र्यध्वानो धर्मा वर्तमाना व्यक्तात्मानोऽतीतानागताः सूक्ष्मात्मानः षडविशेषरूपाः । सर्वमिदं गुणानां संनिवेशविशेषमात्रमिति परमार्थतो गुणात्मानः । तथा च शास्त्रानुशासनम्-

गुणानां परमं रूपं न दृष्टिपथमृच्छति ।
यत्तु दृष्टिपथं प्राप्तं तन्मायेव सुतुच्छकम् ॥ इति ॥ १३॥

આ ત્રણ કાળવાળા ધર્મો વર્તમાનમાં વ્યક્તરૂપવાળા અને અતીત તેમજ અનાગતમાં સૂક્ષ્મરૂપવાળા હોય છે, તથા છ અવિશેષ રૂપ હોય છે. આ બધું (જગત્) ગુણોનો વિશેષ સંનિવેશમાત્ર છે, તેથી હકીકતમાં બધું ગુણાત્મક છે. આ વિષે શાસ્ત્ર ઉપદેશે છેઃ-

"ગુણોનું પરમ (મૂળ) રૂપ દૃષ્ટિગોચર થતું નથી. જે જોવામાં આવે છે, એ માયાની જેમ અત્યંત તુચ્છ છે."૧૩

तत्त्ववैशारदी

स्यादेतत्-अयं तु नानाप्रकारो धर्मिधर्मावस्थापरिणामरूपो विश्वभेदप्रपञ्चो न प्रधानादेकस्माद्भवितुमर्हति । न ह्यविलक्षणात्कारणात्कार्यभेदसंभव इत्यत आह- ते व्यक्तसूक्ष्मा गुणात्मानः । ते त्र्यध्वानो धर्मा व्यक्ताश्च सूक्ष्माश्च गुणात्मानो न त्रैगुण्यातिरिक्तमेषामस्ति कारणम् । वैचित्र्यं तु तदाहितानादिक्लेशवासनानुगताद्वैचित्र्यात् । यथोक्तं वायुपुराणे-

वैश्वरूप्यात्प्रधानस्य परिणामोऽयमद्भुतः ॥ (५३/१२०)

इति । व्यक्तानां पृथिव्यादीनामेकादशेन्द्रियाणां च वर्तमानानामतीतानागतत्वं षडविशेषा यथायोगं भवन्ति । संप्रति विश्वस्य नित्यानित्यरूपे विभजन्नित्यरूपमाह- सर्वमिदमिति दृश्यमानम् । संनिवेशः संस्थानभेदवान्परिणाम इत्यर्थः । अत्रैव षष्टितन्त्रशास्त्रस्यानुशिष्टिः । मायेव न तु माया । सुतुच्छकं विनाशि । यथा हि मायाह्ययैवान्यथा भवत्येवं विकारा अप्याविर्भावतिरोभावधर्माणः प्रतिक्षणमन्यथा ।

प्रकृतिर्नित्यतया मायाविधर्मिणी परमार्थेति ॥१३॥

ભલે, પણ આ વિવિધ પ્રકારના ધર્મી, ધર્મ અને અવસ્થા પરિણામ રૂપવાળો વિશ્વરૂપ પ્રપંચ એક પ્રધાનથી ઉત્પન્ન થઈ શકે નહીં. એક કારણથી કાર્યભેદ સંભવે નહીં. તેથી "તે વ્યક્તસૂક્ષ્મા ગુણાત્માનઃ" સૂત્રથી કહે છે કે આ બધા ત્રણ અધ્વવાળા ધર્મો વ્યક્ત, સૂક્ષ્મ તેમજ ગુણોરૂપ છે. ત્રણ ગુણોથી જુદું એમનું કોઈ કારણ નથી. એમનાથી ઉત્પન્ન થયેલી અનાદિ ક્લેશવાસનાઓમાં રહેલી વિચિત્રતાને લીધે જગતમાં વૈચિત્ર્ય જણાય છે. વાયુપુરાણમાં કહ્યું છેઃ-

"પ્રધાન વિશ્વરૂપ હોવાથી આવું અદ્‌ભુત પરિણામ ઉત્પન્ન થાય છે." (વાયુ પુરાણ, ૫૩, ૧૨૦)

વ્યક્ત પૃથ્વી વગેરે ભૂતોનું અને અગિયાર ઇન્દ્રિયોનું વર્તમાન, ભૂત અને ભવિષ્યપણું તેમજ છ અવિશેષો યથાયોગ (સ્થળ કાળની યોગ્યતા મુજબ) થાય છે. આ વિષે ષષ્ટિતંત્ર શાસ્ત્ર ઉપદેશે છેઃ-"ગુણોનું પરમરૂપ દૃષ્ટિગોચર બનતું નથી." વગેરે, માયા જેવું એટલે ફક્ત માયા નહીં. સુતુચ્છ એટલે નશ્વર. જેમ માયા જોતજોતામાં બીજારૂપવાળી દેખાય છે, એમ વિકારો પણ આવિર્ભાવ, તિરોભાવ ધર્મવાળા હોઈ પ્રતિક્ષણ રૂપ બદલે છે. પ્રકૃતિ નિત્ય હોવાથી માયા કરતાં વિરુદ્ધ ધર્મવાળી અને સત્ય છે. ૧૩

★

यदा तु सर्वे गुणाः, कथमेकः शब्दः एकमिन्द्रियमिति- જ્યારે બધું ત્રણ ગુણરૂપ છે, તો એક પરિણામ શબ્દરૂપ અને બીજું ઇન્દ્રિયરૂપ શાથી થાય છે-

परिणामैकत्वाद्वस्तुतत्त्वम् ॥१४॥

પરિણામની એકતાને લીધે વસ્તુતત્ત્વમાં એકતા થાય છે. ૧૪

ભાષ્ય

प्रख्याक्रियास्थितिशीलानां गुणानां ग्रहणात्मकानां करणभावेनैकः परिणामः श्रोत्रमिन्द्रियम् । ग्राह्यात्मकानां शब्दतन्मात्रभावेनैकः परिणामः शब्दो विषय इति । शब्दादीनां मूर्तिसमानजातीयानामेकः परिणामः पृथियीपरमाणुस्तन्मात्रावयवः । तेषां चैकः परिणामः पृथिवी गौर्वृक्षः पर्वत इत्येवमादिः । भूतान्तरेष्वपि स्नेहौष्ण्यप्रणामित्वावकाशदानान्युपादाय सामान्यमेकविकारारम्भः समाधेयः

नास्त्यर्थो विज्ञानविसहचरः, अस्ति तु ज्ञानमर्थविसहचरं स्वप्नादौ कल्पितमित्यनया दिशा ये वस्तुस्वरूपमपह्नुवते, ज्ञानपरिकल्पनामात्रं वस्तु स्वप्नविषयोपमं न परमार्थतोऽस्तीति य आहुस्ते तथेति प्रत्युपस्थितमिदं स्वमाहात्म्येन वस्तु कथमप्रमाणात्मकेन विकल्पज्ञानबलेन वस्तुस्वरूपमुत्सृज्य तदेवापलपन्तः श्रद्धेयवचनाः स्युः ॥१४॥

પ્રકાશ, ક્રિયા અને સ્થિતિશીલ ગુણો જ્યારે એક ગ્રહણાત્મક કરણભાવે પરિણમે ત્યારે શ્રોત્ર ઇન્દ્રિય ઉત્પન્ન થાય છે, અને ગ્રાહ્યરૂપ તન્માત્રભાવે એક પરિણામ પામે ત્યારે વિષયરૂપ શબ્દ ઉત્પન્ન થાય છે. મૂર્તિ સાથે સમાનજાતિની શબ્દ વગેરેની તન્માત્રાઓનું પૃથ્વીના પરમાણુરૂપે એક પરિણામ થાય છે. એ પરમાણુ તન્માત્રાનો અવયવ છે. અને એમનું એક પરિણામ ગાય, વૃક્ષ, પર્વત વગેરેરૂપે થાય છે. આ રીતે જળ વગેરે ભૂતોના સ્નેહ, ઉષ્ણતા, વહનશીલતા, અને અવકાશપ્રદાન કરવો વગેરે ગુણોનો સ્વીકાર કરીને સમાન એવું એક પરિણામ થાય છે, એમ સમજવું જોઈએ. કોઈપણ પદાર્થ જ્ઞાન સાથે અસહભાવી નથી. (પદાર્થ અને એના જ્ઞાનનો નિત્ય સહભાવ છે.) પરંતુ જ્ઞાન પદાર્થ વગર પણ સ્વપ્ન વગેરેમાં કલ્પિતરૂપવાળું જોવામાં આવે છે. આના આધારે કેટલાક લોકો પદાર્થને જ્ઞાનની પરિકલ્પનામાત્ર ગણીને, એના સ્વરૂપને નકારે છે, અને પદાર્થો સ્વપ્નમાં જોયેલા વિષયો જેવા છે, હકીકતમાં અસ્તિત્વ ધરાવતા નથી, એમ કહે છે. પરંતુ વસ્તુસત્તારૂપ જગત પોતાના સામર્થ્યથી અસ્તિત્વ ધરાવે છે. તેઓ કાલ્પનિક અને અપ્રમાણિક જ્ઞાનનો દાખલો આપીને વસ્તુસત્તાને નકારીને એનો અપલાપ કરે છે; એમના કથનમાં શ્રદ્ધા કેવી રીતે રખાય ? ૧૪

तत्त्ववैशारदी

भवतु त्रैगुण्यस्येत्थं परिणामवैचित्र्यम् । एकस्तु परिणामः पृथिवीति वा तोयमिति वा कुतः नानात्मन एकत्वविरोधादित्याशङ्क्य सूत्रमवतारयति-यदा तु सर्वे गुणा इति । परिणामैकत्वाद्वस्तुतत्त्वम् । बहूनामप्येकः परिणामो दृष्टः । तद्यथा गवाश्वमहिषमातङ्गानां रुमानिक्षिप्तानामेको लवणत्वजातीयलक्षणः परिणामो वर्तितैलानलानां च प्रदीप इति । एवं बहुत्वेऽपि गुणानां परिणामैकत्वम् ।

ततस्तन्मात्रभूतभौतिकानां प्रत्येकं तत्त्वमेकत्वम् । ग्रहणात्मकानां सत्त्वप्रधानतया प्रकाशात्मनामहंकारावान्तरकार्याणां करणभावेनैकः परिणामः श्रोत्रमिन्द्रियम् । तेषामेव गुणानां तमःप्रधानतया जडत्वेन ग्राह्यात्मकानां शब्दतन्मात्रभावेनैकः परिणामः शब्दो विषयः । शब्द इति शब्दतन्मात्रम् । विषय इति जडत्वमाह, न तु तन्मात्रस्य श्रोत्रविषयत्वसंभव इति । शेष सुगमम् ।

अथ विज्ञानवादिनं वैनाशिकमुत्थापयति-नास्त्यर्थो विज्ञानविसहचर इति । यदि हि भूतभौतिकानि विज्ञानमात्राद्भिन्नानि भवेयुस्ततस्तदुत्पत्तिकारणमीदृशं प्रधानं कल्प्येत, न तु तानि विज्ञानातिरिक्तानि सन्ति परमार्थतः । तत्कथं प्रधानकल्पनम् ? कथं च गृहणानामिन्द्रियाणामहंकारविकाराणां कल्पनेति ? तथा हि-जडस्यार्थस्य स्वयमप्रकाशत्वान्नास्त्यर्थो विज्ञानविसहचरः । साहचर्यं संबंधः । तदभावो विसहचरत्वम् । विरभावार्थः । विज्ञानासंबन्धो नास्तीति व्यवहारयोग्य इत्यर्थः । अस्ति तु ज्ञानमर्थविसहचरम् । तस्य स्वयंप्रकाशत्वेन स्वगोचरास्तिताव्यवहारे कर्तव्ये जडमर्थं प्रत्यपेक्षाभावात् । तदनेन वेद्यत्वसहोपलम्भनियमौ सूचितौ विज्ञानवादिना । तौ चैवं प्रयोगमारोहतः-तद्वेद्यते येन वेदनेन तत्ततो न भिद्यते । यथा ज्ञानस्यात्मा । वैद्यन्ते च भूतभौतिकानीति विरुद्धव्याप्तोपलब्धिर्निषेध्यभेदविरुद्धेन व्याप्तं वेद्यत्वं दृश्यमानं स्वव्यापकमभेदमुपस्थापयत्तद्विरुद्धं भेदं प्रतिक्षिपतीति । तथा यद्येन नियतसहोपलम्भं तत्ततो न भिद्यते । यथैकस्माच्चन्द्राद् द्वितीयश्चन्द्रः । नियतसहोपलम्बश्चार्थो ज्ञानेनेति व्यापकविरुद्धोपलब्धिः । निषेध्यभेदव्यापकानियमविरुद्धो नियमोऽनियमं निवर्तयंस्तद्व्याप्तं भेदं प्रतिक्षिपतीति । स्यादेतत्-अर्थश्चेन्न भिन्नो ज्ञानात्कथं भिन्नवत्प्रतिभासत इत्यत आह-कल्पितमिति । यथाहुर्वैनाशिकाः -

सहोपलम्भनियमादभेदो नीलतद्धियोः ।
भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वये ॥

इति । कल्पितत्वं विशदयति-ज्ञानपरिकल्पनेति । निराकरोति-त इति । ते कथं श्रद्धेयवचनाः स्युरिति संबन्धः । प्रतिज्ञानमुपस्थितं प्रत्युपस्थितम् । कथम्-तथेति । यथा यथावभासत इदंकारास्पदत्वेन तथा तथा स्वयमुपस्थितं न तु कल्पनोपकल्पितं विज्ञानविषयतापन्नम् । स्वमाहात्म्येनेति विज्ञानकारणत्वमर्थस्य दर्शयति । यस्मादर्थेन स्वकीयया ग्राह्यशक्त्या विज्ञानमजनि तस्मादर्थस्य ग्राहकम् । तदेवं भूतं वस्तु कथमप्रमाणात्मकेन विकल्पविज्ञानबलेन विकल्पस्याप्रामाणिकत्वात्तद्बलस्यापि तदात्मनोऽप्रमाणात्मकत्वम् । तेन वस्तुस्वरूपमुत्सृज्योपप्लुतं कृत्वा । उपगृह्येति क्वाचित्कः पाठः । तत्रापि स एवार्थः । तदेवापलपन्तः

श्रद्धातव्यवचनाः स्युरिति । इदमत्राकूतम्-सहोपलम्भनियमश्च वेद्यत्वं च हेतू सन्दिग्धव्यतिरेकतयाऽनैकान्तिकौ । तथा हि- ज्ञानाकारस्य भूतभौतिकादेर्यदेतद्बाह्यत्वं स्थूलत्वं च भासेते न ते ज्ञाने संभवतः । तथा हि- नानादेशव्यापिता स्थौल्यं विच्छिन्नदेशता च बाह्यत्वम् । न चैकविज्ञानस्य नानादेशव्यापिता विच्छिन्नदेशता चोपपद्यते । तद्देशत्वातद्देशत्वलक्षणविरुद्धधर्मसंसर्गस्यैकत्रासंभवात् । संभवे वा त्रैलोक्यस्यैकत्वप्रसङ्गात् । अत एवास्तु विज्ञानभेद इति चेत् ? हन्त भोः, परमसूक्ष्मगोचराणां प्रत्ययानां परस्परवार्तानभिज्ञानां स्वगोचरमात्रजागरूकाणां कुतस्त्योऽयं स्थूलावभासः । न च विकल्पगोचरोऽभिलापः । संसर्गाभावाद्विशदप्रतिभासत्वाच्च । न च स्थूलमालोचितं यतस्तदुपाधिकस्य विशदता भवेत्तत्पृष्ठभाविनः । न चाविकल्पवद्विकल्पोऽपि स्वाकारमात्रगोचरः, तस्य चास्थूलत्वान्न स्थूलगोचरो भवितुर्महति । तस्माद्बाह्ये च प्रत्यये स्थूलस्य बाह्यस्य चासंभवादलीकमेतदास्थातव्यम् । न चालीकं विज्ञानादभिन्नम् । विज्ञानस्य तद्वत्तुच्छत्वप्रसङ्गात् । तथा च वेद्यत्वस्याभेदव्याप्यत्वाभावात्कुतो भेदप्रतिपक्षत्वम् । सहोपलम्भनियमश्च सदसतोरिव विज्ञानस्थौल्ययोः सतोरपि स्वभावाद्वा कुतश्चित्प्रतिबन्धाद्वोपपत्स्यते, तस्मादनैकान्तिकत्वादेतौ हेत्वाभासौ विकल्पमात्रमेव बाह्याभावे प्रसुवाते । न च प्रत्यक्षमाहात्म्यं विकल्पमात्रेणापोद्यते । तस्मात्साधूक्तं कथमप्रमाणात्मकेन विकल्पज्ञानबलेनेति । एतेन प्रत्ययत्वमपि स्वप्नादिप्रत्ययदृष्टान्तेन निरालम्बनत्वसाधनमपास्तम् । प्रमेयविकल्पस्त्ववयविव्यवस्थापनेन प्रयुक्तः । विस्तरस्तु न्यायकणिकायामनुसरणीय इति तदिह कृतं विस्तरेणेति ॥१४॥

ભલે ત્રણ ગુણોનું આવું પરિણામવૈચિત્ર્ય હોય. પરંતુ પૃથ્વી અથવા જળ એમ એક પરિણામ શાથી થાય છે ? વૈવિધ્ય અને એકત્વ વિરુદ્ધ છે, એવી આશંકાથી "यदा तु" વગેરેથી ભૂમિકા બાંધીને "परिणामैकत्वाद् वस्तु तत्त्वम्" સૂત્ર પ્રસ્તુત કરે છે. અનેક કારણોનું એક પરિણામ જોવા મળે છે. દાખલા તરીકે ગાય, ઘોડો, પાડો, હાથી વગેરેને એકીસાથે ક્ષારવાળા ખાડામાં નાખવામાં આવે તો, ક્ષારજાતિનું એક પરિણામ થાય છે. દિવેટ, તેલ અને અગ્નિનું એક પ્રદીપરૂપ પરિણામ થાય છે. એ રીતે અનેક ગુણોનું એક પરિણામ થાય છે. તેથી તન્માત્રા, ભૂતો અને ભૌતિક પદાર્થોનું તત્ત્વ એક છે. ગુણોનું ગ્રહણ રૂપથી પ્રકાશાત્મક સત્ત્વગુણની પ્રધાનતાને કારણે, અહંકારનાં અવાન્તર કાર્યોનું કરણભાવે શ્રોત્ર ઇન્દ્રિયરૂપ એક પરિણામ થાય છે. એ જ ગુણોનું તમોગુણની પ્રધાનતાના કારણે જડપણારૂપ ગ્રાહ્યભાવે શબ્દ તન્માત્રા રૂપ, એકવિષયરૂપ શબ્દભાવે પરિણામ થાય છે. શબ્દ એટલે શબ્દ તન્માત્રા. વિષય શબ્દથી જડપણું દર્શાવ્યું. તન્માત્રા (અત્યંત સૂક્ષ્મ

હોવાથી) શ્રોત્રનો વિષય બની શકે નહીં. બાકીનું સુગમ છે.

હવે વિજ્ઞાનવાદી બૌદ્ધનો મત પ્રસ્તુત કરે છે, "નાસ્ત્યર્થો વિજ્ઞાન-વિસહચરઃ" વગેરેથી. જો ભૂતો અને ભૌતિક પદાર્થો વિજ્ઞાન માત્રથી ભિન્ન હોય તો એમની ઉત્પત્તિનું કારણ પ્રધાન પણ એવું જ્ઞાનરહિત (જડ) કલ્પવું જોઈએ. હકીકતમાં તેઓ વિજ્ઞાનથી અતિરિક્ત (ભિન્ન) નથી. તો પ્રધાનની કલ્પના શા માટે કરવી જોઈએ ? અને શા માટે ગ્રહણરૂપ ઇન્દ્રિયો અહંકારના પરિણામે ઉત્પન્ન થાય છે એવી કલ્પના કરવી જોઈએ ? એટલે કે જડ પદાર્થ સ્વયંપ્રકાશ નથી, માટે પદાર્થ વિજ્ઞાન સાથે અસહભાવી નથી. સાહચર્ય સંબંધ છે. એનો અભાવ એટલે વિસહચરત્વ. અહીં "વિ" અભાવના અર્થમાં પ્રયોજ્યો છે. વિજ્ઞાન સાથે અસંબદ્ધ નથી, માટે એ વ્યવહારયોગ્ય બને છે. પરંતુ જ્ઞાન પદાર્થથી વિસહચર, અસહભાવી છે. જ્ઞાન સ્વયંપ્રકાશ છે. માટે પોતાના અસ્તિત્વના વ્યવહાર માટે જડ પદાર્થની અપેક્ષા રાખતું નથી. આનાથી વેદ્યત્વ-જ્ઞેયપણું-અને સહોપલંભ નિયમ (સાથે જ ઉપલબ્ધિ થાય એવો નિયમ) વિજ્ઞાનવાદીએ સૂચવ્યાં. આ વિષે નીચે મુજબના બે અનુમાન પ્રયોગો થાય :-

"જે વસ્તુ જે જ્ઞાનવડે જણાય એ એનાથી ભિન્ન નથી, જેમ જ્ઞાનનો આત્મા. ભૂતો અને ભૌતિક પદાર્થો જાણવામાં આવે છે, તેથી તેઓ જ્ઞાનથી વ્યાપ્ત છે અને જ્ઞાન વ્યાપક છે. તેથી વિરુદ્ધ એવા વ્યાપ્તની ઉપલબ્ધિ થાય છે. એ નિષેધ કરવા યોગ્ય ભેદથી વિરુદ્ધ વડે વ્યાપ્ત વેદ્યત્વ જણાય છે, એ પોતાના વ્યાપક એવા અભેદને ઉપસ્થિત કરીને એનાથી વિરુદ્ધ એવા ભેદનો તિરસ્કાર કરે છે." અને

"જે વસ્તુ જેની સાથે નિયતપણે ઉપલબ્ધ થાય એ એનાથી ભિન્ન હોતી નથી, જેમ એક ચંદ્રથી બીજો ચંદ્ર (ભિન્ન હોતો નથી). પદાર્થ નિયમિત રીતે જ્ઞાનસાથે ઉપલબ્ધ થાય છે, માટે વ્યાપકથી વિરુદ્ધ ઉપલબ્ધિ છે. નિષેધ કરવા યોગ્ય ભેદ, વ્યાપકના નિયમથી વિરુદ્ધ છે. આ નિયમ અનિયમિતને નિવૃત્ત કરી, એનાથી વ્યાપ્ત ભેદને નિવૃત્ત કરે છે."

ભલે, પણ પદાર્થ જ્ઞાનથી ભિન્ન ન હોય તો ભિન્ન હોય એમ શાથી દેખાય છે? જવાબમાં "કલ્પિતમ્" વગેરેથી કહે છે કે કલ્પનાને કારણે એવો ભેદ જણાય છે. બૌદ્ધો કહે છે :-

"નીલ અને નીલબુદ્ધિ સાથે ઉપલબ્ધ થતાં હોવાથી એ બેનો સહોપલંભ નિયમ છે, તેથી એ બેમાં અભેદ છે. પણ ભ્રાન્તિ જ્ઞાનથી એક ચંદ્ર બે દેખાય એમ અ બે માં ભેદ જણાય છે."

"જ્ઞાનપરિકલ્પના" વગેરેથી કલ્પિતપણાને વધારે સ્પષ્ટ કરે છે. "તે..."

વગેરેથી એમના મતનું નિરાકરણ કરે છે. તેઓ કેવી રીતે શ્રદ્ધેય વાત કહેનારા માની શકાય, એમ વાક્યનો સંબંધ છે. પ્રત્યુપસ્થિત એટલે પ્રત્યેક જ્ઞાન સમયે ઉપસ્થિત કેવી રીતે ? જેમ જેમ ઇદં રૂપે-આ છે એવા રૂપે-ઉપસ્થિત થાય છે, તેમ તેમ ભાસિત થાય છે. માત્ર કલ્પનાથી માની લીધેલું કે વિજ્ઞાનવિષયમાત્રરૂપ નથી. "સ્વમાહાત્મ્ય" શબ્દથી પદાર્થને વિજ્ઞાનના કારણ તરીકે દર્શાવે છે.પદાર્થ પોતાની ગ્રાહ્યશક્તિથી જ્ઞાન ઉત્પન્ન કરે છે, તેથી જ્ઞાન પદાર્થનું ગ્રાહક છે. આવો પદાર્થ કાલ્પનિક જ્ઞાનના બળે કેવી રીતે નકારી શકાય ? વિકલ્પ અપ્રમાણિક છે, તેથી તેનું બળ પણ અપ્રમાણિક છે. આવા વિકલ્પથી વસ્તુના સ્વરૂપનો ત્યાગ કરીને, એનો અપલાપ કરનારા, એને નકારનારા, કેવી રીતે શ્રદ્ધેય વચનવાળા કહેવાય ? "ઉપગૃહ્ય" એવો પાઠ કેટલાક ગ્રંથોમાં મળે છે, એનો પણ એ જ અર્થ છે. રહસ્ય એ છે કે સહોપલંભ અને વેદ્યત્વ એ બે હેતુઓ સંદેહસાથે સંબંધિત હોવાથી અનૈકાન્તિક છે (નિશ્ચયાત્મક નથી). ભૂત, ભૌતિક વગેરેના જ્ઞાનના આકારમાં બહાર હોવાપણું અને સ્થૂલતા જણાય છે. એ જ્ઞાનમાં સંભવિત નથી. જુદાં સ્થાનોમાં રહેવું, સ્થૂલતા, સ્થાનનો વિચ્છેદ બહાર હોવાનાં લક્ષણો છે. એકરૂપ જ્ઞાનમાં આવું ભિન્ન સ્થાનોમાં રહેવાપણું અને સ્થાનનો વિચ્છેદ હોઈ શકે નહીં. આ દેશમાં હોવું અને આ દેશમાં ન હોવું - એવા લક્ષણવાળા વિરુદ્ધ ધર્મો એક જગાએ રહી શકે નહીં. જો રહે તો ત્રૈલોક્યનું એકપણું થાય .

તેથી તેઓ વિજ્ઞાનમાં ભેદ સ્વીકારવા તૈયાર થાય, તો અત્યંત સૂક્ષ્મ જ્ઞાનો, જે પરસ્પરની વાત જાણતાં નથી અને પોતાને જણાતા ભાવમાત્ર પ્રત્યે જાગરૂક છે, એમાં સ્થૂલતાનો ભાસ ક્યાંથી થશે ? પદાર્થ ફક્ત વિકલ્પગોચર છે એમ કહી ન શકાય, કારણ કે એમ હોય તો સંસર્ગનો અભાવ થાય, પણ પદાર્થો તો સ્પષ્ટ ભાસે છે, (અને સંસર્ગ પણ થાય છે). સ્થૂલ વસ્તુ આલોચિત બનતી નથી, કારણ કે એની ઉપાધિવાળો વિચાર (વસ્તુઆકારનો વિચાર) એની પાછળ વસ્તુ જો કાલ્પનિક રૂપમાં ઉપસ્થિત હોય, તો સ્પષ્ટપણે જણાય નહીં. વળી વિકલ્પ જેવી છે એવી અને એના સ્થાનમાં રહેલી વસ્તુને વિષય બનાવતો નથી, જે રીતે વિકલ્પ દોષ વિનાનું જ્ઞાન એને વિષય બનાવે છે. કલ્પના સ્વયં સ્થૂલ નથી. માટે એ સ્થૂલના ક્ષેત્રમાં પોતાનું કાર્ય કરે એ અયોગ છે. બહાર જોવાતા વિચારમાં સ્થૂલતા અને બાહ્યતા ન હોવાથી, વસ્તુ વિચારમાત્ર છે એ વાત અલીક (અસત્ય) છે એમ સમજવું જોઈએ. અલીક વિજ્ઞાનથી અભિન્ન નથી. નહીં તો અલીકની જેમ વિજ્ઞાન પણ તુચ્છ છે, એમ માનવાનો પ્રસંગ આવશે. વેદ્યત્વ અભેદવ્યાપ્ય નથી (એની પોતાની કોઈ ઓળખ નથી) તો પછી એ ભેદનું વિરોધી કેવી રીતે હોય ? (વસ્તુ અને એના જ્ઞાનમાં ભેદ નથી એવું વેદ્યત્વ જણાવી ન શકે). સ્વતંત્રપણે

અસ્તિત્વ ધરાવતાં વિજ્ઞાન અને સ્થૂલ પદાર્થના સહોપલંભનો નિયમ સત્ અને અસત્ના સહોપલંભની જેમ સ્વભાવથી કે કોઈ પ્રતિબંધના કારણે છે, એ રીતે સમજાવી શકાય માટે વિજ્ઞાનવાદીએ રજૂ કરેલા બે હેતુઓ અનેકાન્ત (અનિર્ણીત) હોવાથી સાચા નથી, પણ હેતુનો આભાસમાત્ર છે, જે બાહ્યવસ્તુનું અસ્તિત્વ નથી, એવા કાલ્પનિક ખ્યાલને ઉત્પન્ન કરે છે. ફક્ત વિકલ્પના બળે પ્રત્યક્ષનું માહાત્મ્ય નકારી શકાય નહીં. તેથી ભાષ્યકારે બરોબર કહ્યું છે કે તેઓ અપ્રામાણિક વિકલ્પના બળે કેવી રીતે બાહ્ય જગતના અસ્તિત્વને નકારી શકે ?

આનાથી સ્વપ્નજ્ઞાનના દૃષ્ટાન્તથી, વસ્તુના આલંબનવગર પણ જ્ઞાન ઉત્પન્ન થાય છે, એ વિધાન ખોટું ઠરે છે. જ્ઞેય વસ્તુ કલ્પનાથી સર્જી શકાય છે, એ વિચારનું આશ્રયના અસ્તિત્વની સ્થાપના દ્વારા ખંડન કર્યું છે. આ વિષયનો વિસ્તાર "ન્યાયકણિકા"માં જોવો. અહીં એ ચર્ચ્યો નથી. ૧૪

★

। कुतश्चैतदन्याय्यम् ? - વળી શાથી આ વાત ન્યાયસંગત નથી ? -

वस्तुसाम्ये चित्तभेदात्तयोर्विभक्तः पन्थाः ॥१५॥

વસ્તુ સમાન હોય છતાં એ વિષે ચિત્તોનો ભેદ હોવાથી, એ બેનો (વસ્તુ અને ચિત્તનો) માર્ગ ભિન્ન છે. ૧૫.

ભાષ્ય

बहु चित्तालम्बनीभूतमेकं वस्तु साधारणम् । तत्खलु नैकचित्तपरिकल्पितं नाप्यनेकचित्तपरिकल्पितम् किं तु स्वप्रतिष्ठम् । कथम् ? वस्तुसाम्ये चित्तभेदात् । धर्मापेक्षं चित्तस्य वस्तुसाम्येऽपि सुखज्ञानं भवत्यधर्मापेक्षं तत एव दुःखज्ञानमविद्यापेक्षं तत एव मूढज्ञानं सम्यग्दर्शनापेक्षं तत एव माध्यस्थ्यज्ञानमिति । कस्य तच्चित्तेन परिकल्पितम् ? न चान्यचित्तपरिकल्पितेनार्थेनान्यस्य चित्तोपरागो युक्तः । तस्माद्वस्तुज्ञानयोर्ग्राह्यग्रहणभेदभिन्नयोर्विभक्तः पन्थाः । नानयोः संकरगन्धोऽप्यस्तीति ।

सांख्यपक्षे पुनर्वस्तु त्रिगुणं चलं च गुणवृत्तमिति धर्मादिनिमित्तापेक्षं चित्तैरभिसंबध्यते । निमित्तानुरूपस्य च प्रत्ययस्योत्पद्यमानस्य तेन तेनात्मना हेतुर्भवति ॥१५॥

ઘણા ચિત્તોનું આલંબન બનેલી એક સાધારણ વસ્તુ એક ચિત્તવડે

કે અનેક ચિત્તોવડે કલ્પિત નથી, પણ સ્વપ્રતિષ્ઠ છે. વસ્તુ સમાન હોય, છતાં ચિત્તોના ભેદને લીધે એક ચિત્તને ધર્મની અપેક્ષાએ સુખનું જ્ઞાન થાય છે, બીજા ચિત્તને અધર્મની અપેક્ષાએ એ જ વસ્તુમાં દુઃખનું જ્ઞાન થાય છે, અને અવિદ્યાની અપેક્ષાએ એ જ વસ્તુમાં અન્ય ચિત્તને મૂઢતાનું જ્ઞાન થાય છે, તેમજ સમ્યક્ દર્શનની અપેક્ષાએ એ જ પદાર્થમાં વિવેકવાળા ચિત્તને તટસ્થતાનું જ્ઞાન થાય છે. એ વસ્તુ કોના ચિત્તે કલ્પી છે ? વળી એક ચિત્તે કલ્પેલી વસ્તુથી બીજા ચિત્તનો ઉપરાગ યોગ્ય નથી. તેથી ભિન્ન એવી ગ્રાહ્ય વસ્તુ અને એના ગ્રહણરૂપ જ્ઞાનના માર્ગો જુદા છે. આ બેમાં સંકર (મિશ્રણ)ની ગંધ પણ નથી. સાંખ્યદર્શનના સિદ્ધાન્ત પ્રમાણે વસ્તુ ત્રિગુણાત્મક છે, અને ગુણવૃત્ત સતત ગતિશીલ છે, તેથી ધર્મ વગેરે નિમિત્તોની અપેક્ષાએ વસ્તુ ચિત્ત સાથે સંબંધિત થાય છે, અને નિમિત્તોને અનુરૂપ ઉત્પન્ન થતા જ્ઞાનનો તે તે રૂપે હેતુ બને છે. ૧૫

तत्त्ववैशारदी

तदेवमुत्सूत्रं भाष्यकृद्विज्ञानातिरिक्तस्थापने युक्तिमुक्त्वा सौत्रीं युक्तिमवतारयति- कुतश्चैतदिति । वस्तुसाम्ये चित्तभेदात्तयोर्विभक्तः पन्थाः । यन्नानात्वे यस्यैकत्वं तत्ततोऽत्यन्तं भिद्यते । यथा चैत्रस्य ज्ञानमेकं भिन्नेभ्यो देवदत्तविष्णुमित्रमैत्रप्रत्ययेभ्यो भिद्यते । ज्ञाननानात्वेऽपि चार्थो न भिद्यत इति भवति विज्ञानेभ्योऽन्यः । अभेदश्चार्थस्य ज्ञानभेदेऽपि प्रमातृणां परस्परप्रतिसंधानादवसीयते । अस्ति हि रक्तद्विष्टविमूढमध्य- स्थानामेकस्यां योषिति प्रतीयमानायां प्रतिसंधानं या त्वया दृश्यते सैव मयापीति । तस्माद्वस्तुसाम्ये चित्तभेदाज्ज्ञानभेदात्तयोरर्थज्ञानयोर्विभक्तः पन्थाः स्वरूपभेदोपायः । सुखज्ञानं कान्तायां कान्तस्य, सपत्नीनां दुःखज्ञानम् । चैत्रस्य तु तामविन्दतो मूढज्ञानं विषादः । स्यादेतत्-य एकस्य चित्तेन परिकल्पितः कामिनीलक्षणोऽर्थस्तेनैवान्येषामपि चित्तमुपरज्यत इति साधारणमुपपद्यत आह- न चान्येति । तथा सत्येकस्मिन्नीलज्ञानवति सर्व एव नीलज्ञानवन्तः स्युरिति ।

नन्वर्थवादिनामप्येकोऽर्थः कथं सुखादिभेदभिन्नविज्ञानहेतुः । न ह्यविलक्षणात्कारणात्कार्यभेदो युक्त इत्यत आह-सांख्यपक्ष इति । एकस्यैव बाह्यस्य वस्तुनस्त्रैगुण्यपरिणामस्य त्रैरूप्यमुपपन्नम् । एवमपि सर्वेषामविशेषेण सुखदुःखमोहात्मकं विज्ञानं स्यादित्यत आह-धर्मादिनिमित्तापेक्षमिति । रजःसहितं सत्त्वं धर्मापेक्षं सुखज्ञानं जनयति । सत्त्वमेव तु विगलितरजस्कं विद्यापेक्षं माध्यस्थ्यज्ञानमिति । ते च धर्मादयो

न सर्वे सर्वत्र पुरुषे सन्ति, किं तु कश्चित्कचिदित्युपपन्ना व्यवस्थेति ॥१५॥

ભાષ્યકાર સૂત્રકારથી સ્વતંત્રપણે વિજ્ઞાન અને વસ્તુના ભેદની સ્થાપના કરનાર યુક્તિ દર્શાવીને, હવે સૂત્રકારે કહેલી યુક્તિ "कुतश्च" વગેરેથી રજૂ કરે છે. જેની વિવિધતામાં જે વસ્તુનું એકત્વ હોય, એ એનાથી તદ્દન ભિન્ન હોય છે. જેમ ચૈત્રનું એક જ્ઞાન દેવદત્ત, વિષ્ણુમિત્ર અને મૈત્રના વિભિન્ન જ્ઞાનોથી જુદું છે. જ્ઞાનોના અનેકપણામાં પણ વસ્તુ એક હોઈ શકે છે. તેથી એ વસ્તુ જ્ઞાનોથી જુદી છે. પ્રમાતાઓના જ્ઞાનોમાં ભેદ હોવા છતાં વસ્તુની એકતાનો નિર્ણય પરસ્પર વિચારવિમર્શથી થઈ શકે છે. એક જ દેખાતી સ્ત્રી વિષે રાગ, દ્વેષ, મોહ અને તટસ્થતા અનુભવતા વિભિન્ન મનુષ્યો વિચારવિનિમય કરીને એવો નિર્ણય કરી શકે છે કે જેને મેં જોઈ હતી એ જ સ્ત્રી તમે પણ જોઈ હતી. તેથી વસ્તુ સમાન હોય, છતાં ચિત્તભેદથી જ્ઞાનમાં ભેદ થાય છે. તેથી જ્ઞાન અને વસ્તુ એ બેના માર્ગો જુદા છે, જેનાથી એમના સ્વરૂપનો ભેદ જાણી શકાય છે.

કાન્તામાં કાન્તને સુખનું જ્ઞાન, સપત્નીઓને દુઃખનું જ્ઞાન, અને ચૈત્રને એ મળી નહીં તેથી મોહ કે વિષાદનું જ્ઞાન થાય છે. "न चान्यचित्तपरिकल्पित..." વગેરેથી કહે છે કે એકના ચિત્તે કલ્પેલી કામિનીરૂપ વસ્તુથી બીજાઓનું પણ ચિત્ત રંગાય એવું સાધારણપણે બનતું નથી. જો એમ થાય તો એકને નીલજ્ઞાન થતાં બધાને નીલજ્ઞાન થાય.

બાહ્ય પદાર્થના અસ્તિત્વને માનનારના મતમાં એક જ વસ્તુ સુખ વગેરે જુદાં જુદાં જ્ઞાનોનું કારણ કેવી રીતે બને છે ? એક અવિલક્ષણ કારણથી કાર્યભેદ યોગ્ય નથી. એના જવાબમાં "सांख्यपक्षे..." વગેરેથી કહે છે કે ત્રણ ગુણોના પરિણામ રૂપ એક બાહ્ય વસ્તુ ત્રણ રૂપોવાળી જણાય, એ યોગ્ય છે. આ રીતે બધાને જ સુખ, દુઃખ અને મોહાત્મક જ્ઞાન થશે, તેથી "धर्मादिनिमित्तापेक्षम्.." વગેરેથી કહે છે કે રજોગુણ અને સત્ત્વગુણ ધર્મની અપેક્ષાએ સુખ ઉત્પન્ન કરે છે. અને રજોગુણવિનાનું કેવળ શુદ્ધ સત્ત્વ વિદ્યાની અપેક્ષાએ મધ્યસ્થતાનું જ્ઞાન ઉત્પન્ન કરે છે. ધર્મ વગેરે નિમિત્તો બધા પુરુષોમાં સમાન હોતાં નથી. પરંતુ ક્યાંક કોઈ એક પુરુષમાં હોય છે, માટે આવી વ્યવસ્થા યોગ્ય છે. ૧૫

★

केचिदाहुः ज्ञानसहभूरेवार्थो भोग्यत्वात्सुखादिवदिति । त एतया द्वारा साधारणत्वं बाधमानाः पूर्वोत्तरक्षणेषु वस्तुरूपमेवापह्नुते- કેટલાક લોકો કહે છે કે વસ્તુ જ્ઞાનસાથે ઉત્પન્ન થાય છે, કારણ કે એ સુખ વગેરેની જેમ ભોગ્ય છે, તેઓ

આ વિચારથી અનેક ચિત્તોમાટે એક સાધારણ વસ્તુ છે એનો બાધ કરે છે, અને પહેલાંની અને પછીની ક્ષણોમાં રહેતી વસ્તુના સ્વરૂપને છુપાવે છે -

न चैकचित्ततन्त्रं वस्तु तदप्रमाणकं तदा किं स्यात् ॥१६॥

બાહ્ય વસ્તુ એકચિત્ततંત્ર નથી. કારણ કે જ્યારે એ જ્ઞાનરૂપ પ્રમાણનો વિષય ન હોય, ત્યારે એનું શું થાય ? ૧૬.

भाष्य

एकचित्ततन्त्रं चेद्वस्तु स्यात्तदा चित्ते व्यग्रे निरुद्धे वा स्वरूपमेव तेनापरामृष्टमन्यस्याविषयीभूतमप्रमाणकमगृहीतमस्वभावकं केनचित्तदानीं किं तत्स्यात् ? संबध्यमानं च पुनश्चित्तेन कुत उत्पद्येत ? ये चास्यानुपस्थिता-भागास्ते चास्य न स्युरेवं नास्ति पृष्ठमित्युदरमपि न गृह्येत । तस्मात्स्व-तन्त्रोऽर्थः सर्वपुरुषसाधारणः, स्वतन्त्राणि च चित्तानि प्रतिपुरुषं प्रवर्तन्ते । तयोः संबन्धादुपलब्धिः पुरुषस्य भोग इति ॥१६॥

વસ્તુની સત્તા જો એક ચિત્તને આધીન હોય, તો એ ચિત્ત વ્યગ્ર કે નિરુદ્ધ હોય ત્યારે વસ્તુ સ્વરૂપ એનાવડે જોવાતું-વિચારાતું નથી, અને બીજા ચિત્તનો વિષય ન હોય, ત્યારે પ્રમાણના અભાવમાં એનો સ્વભાવ (પોતાનું અસ્તિત્વ) અગ્રહીત બને, ત્યારે એ વસ્તુનું શું થાય છે ? અને ફરીથી એ વસ્તુ ચિત્તથી સંબંધિત થાય, ત્યારે ક્યાંથી ઉત્પન્ન થાય છે ? વસ્તુના દૃષ્ટિસમક્ષ ઉપસ્થિત ન થતા ભાગો પણ ચિત્તમાટે અસ્તિત્વ ધરાવતા ન હોવાથી, એની સાથે જોડાયેલા દેખાતા ભાગો પણ નથી, એટલે પીઠ નથી માટે પેટ પણ નથી એવો ઘાટ થશે. તેથી બધા પુરુષો માટે સાધારણ સ્વતંત્ર પદાર્થ છે, અને પ્રત્યેક પુરુષમાં સ્વતંત્ર ચિત્ત પ્રવર્તે છે. એ બેના સંબંધથી વસ્તુની ઉપલબ્ધિ પુરુષનો ભોગ છે. ૧૬

तत्त्ववैशारदी

अत्र केचिदाहुः प्रावादुका ज्ञानसहभूरेवार्थो भोग्यत्वात्सुखादिवदिति । एतदुक्तं भवति-भवत्यर्थो ज्ञानाद्व्यतिरिक्तस्तथाप्यसौ जडत्वान्न ज्ञानमन्तरेण शक्यः प्रतिपत्तुम् । ज्ञानेन तु भासनीयः । तथा च ज्ञानसमय एवास्ति नान्यदा प्रमाणाभावादिति । तदेतदुत्सूत्रं तावद् दूषयति भाष्यकारः- त एतया द्वारेति । वस्तु खलु सर्वचित्तसाधारण-मनेकक्षणपरम्परोह्यमानं परिणामात्मकमनुभूयते लौकिकपरीक्षकैः । तच्चेद्विज्ञानेन सह

भवेन्नूनमेवंविधमेवं चेदिदमंशस्योपरि कोऽयमनुरोधो येन सोऽपि नापह्नूयेतेत्यर्थः ।

मा वा भूदिदमंशस्यापह्नवो ज्ञानसहभूरेवास्त्वर्थः । तत्राप्याह-न चैकचित्ततन्त्रं वस्तु तदप्रमाणकं तदा किं स्यात् । यद्धि घटग्राहि चित्तं तद्यदा पटद्रव्यव्यग्रतया न घटे वर्तते, यद्वा विवेकविषयमासीत्तदैव च निरोधं समापद्यते तदा घटज्ञानस्य वा विवेकज्ञानस्य वाऽभावाद्विवेको वा घटो वा ज्ञानभेदमात्रजीवनस्तन्नाशान्नष्ट एव स्यादित्याह-एकचित्तेति ।

किं तत्स्यान्न स्यादित्यर्थः । सम्बध्यमानं च चित्तेन तद्वस्तु विवेको वा घटो वा कुत उत्पद्येत । नियतकारणान्वयव्यतिरेकानुविधायिभावानि हि कार्याणि न स्वकारणमतिवर्त्य कारणान्तराद्भवितुमीशते । मा भूदकारणत्वे तेषां कादाचित्कत्व-व्याघातः । न च तज्ज्ञानकारणत्वमेव तत्कारणत्वमिति युक्तम् । आशामोदकस्यो-पार्जितमोदकस्य चोपयुज्यमानस्य रसवीर्यविपाकादिसाम्यप्रसङ्गात् । तस्मात्साधूक्तं संबध्यमानं च पुनश्चित्तेनेति । अपि च यो योऽर्वाग्भागः स सर्वो मध्यपरभागव्याप्तः । ज्ञानाधीने सद्भावे त्वस्यानुभूयमानत्वान्मध्यपरभागौ न स्त इति व्यापकाभावादर्वाग्भागोऽपि न स्यादित्यर्थाभावात्कुतो ज्ञानसहभूरर्थ इत्याह- ये चास्येति। अनुपस्थिता अज्ञाताः। उपसंहरति- तस्मादिति । सुगमं शेषम् ॥१६॥

આ વિષે કેટલાક પ્રતિપક્ષીઓ કહે છે કે પદાર્થ જ્ઞાનસાથે જ ઉત્પન્ન થાય છે, કારણ કે એ સુખ વગેરેની જેમ ભોગ્ય છે. એમનો કહેવાનો આશય એ છે કે ભલે પદાર્થ જ્ઞાનથી ભિન્ન હોય, છતાં એ જડ હોવાથી જ્ઞાન વિના જાણી શકાય નહીં. જ્ઞાનવડે એ પ્રકાશિત થાય છે. તેથી જ્ઞાનસમયે જ એ છે, બીજા સમયે નહીં, કારણ કે એ સમય દરમ્યાન એના અસ્તિત્વમાં કોઈ પ્રમાણ નથી. "તે એતયા દ્વારા..." વગેરેથી ભાષ્યકાર સૂત્રકારે ન કહેલી વાતથી આ પક્ષનો દોષ દર્શાવે છે. વસ્તુ બધાં ચિત્તોમાટે સમાન, અને અનેક ક્ષણોની પરંપરાના પ્રવાહમાં વહેતી, લૌકિક પરીક્ષકોવડે જોવામાં આવે છે. વસ્તુ જ્ઞાન સમયે જ ઉત્પન્ન થાય છે, એવું નિશ્ચિતપણે માનીએ, તો એનો જે ઇદં-આ-અંશ છે, એમાં એવો ક્યો અનુરોધ - પ્રભાવ-છે, જેથી એ લુપ્ત થતો નથી ?

ભલે ઇદં અંશ પ્રગટ રહે અને પદાર્થ જ્ઞાન સાથે જ ઉત્પન્ન થાય છે એમ માની લઈએ, તો પણ "न चैकचित्ततंत्रं वस्तु..." વગેરે સૂત્રથી કહે છે કે ઘડાને ગ્રહણ કરતું ચિત્ત વસ્ત્રરૂપ દ્રવ્યમાં વ્યગ્ર થતાં ઘડાનું ગ્રહણ ન કરે અથવા વિવેક વિષયવાળું બને અને નિરુદ્ધ થઈ જાય, ત્યારે ઘટજ્ઞાન અને વિવેકજ્ઞાનના અભાવમાં ઘડો કે વિવેક જ્ઞાનમાત્ર રૂપ હોવાથી એના નાશથી નષ્ટ જ થાય. આ વાત "એક ચિત્તતંત્રં ચેદ્વસ્તુ" વગેરે ભાષ્યથી કહે છે. "किं तत्स्यात् ?" એટલે न स्यात्-न

રહે. એવો અર્થ છે. વળી પાછી એ વસ્તુ અથવા વિવેક ચિત્તથી સંબંધિત થાય ત્યારે ક્યાંથી ઉત્પન્ન થાય છે ? નિશ્ચિત કારણોથી પેદા થતાં કાર્યો અન્વય (સહભાવ) અને વ્યતિરેક (સહ-અભાવ)ના નિયમનો પોતાના કારણોને ઓળંગીને, ભંગ કરીને, અન્ય કારણથી ઉત્પન્ન થતાં નથી. કારણ ન હોય તો કાર્ય ક્યારે પણ અસ્તિત્વમાં આવે નહીં. પદાર્થના પોતાના જ્ઞાનના કારણપણાને પદાર્થનું કારણપણું માનવું યોગ્ય નથી. નહીં તો, આશાથી કલ્પેલા લાડુ અને શ્રમથી બનાવેલા લાડુનો ઉપયોગ સમાનપણે રસ, બળ અને વિપાકને ઉત્પન્ન કરે છે એવો પ્રસંગ ઉપસ્થિત થશે. તેથી ભાષ્યકારે બરોબર કહ્યું કે વસ્તુ ફરીથી ચિત્ત સાથે સંબંધિત થાય, ત્યારે ક્યાંથી ઉત્પન્ન થાય છે ?

વળી ઘડાનો સંમુખ દેખાતો ભાગ, એના ન દેખાતા મધ્ય અને પાછલા ભાગથી વ્યાપ્ત છે. એની હયાતિ જ્ઞાનને આધીન હોય તો અનુભવાતા સંમુખવાળા ભાગથી ભિન્ન મધ્ય અને પાછળના ભાગ નથી, તેથી વ્યાપકના અભાવમાં વ્યાપ્યનો અભાવ થતાં જ્ઞાનનો સહભાવી પદાર્થ ક્યાં છે ? આ વાત "ये चास्यानुपस्थिता भागाः !" વગેરેથી કહે છે. અનુપસ્થિત એટલે અજ્ઞાત. "तस्मात्स्वतंत्रोर्थः" વગેરેથી ઉપસંહાર કરે છે. ૧૬

★

तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम् ॥१७॥

એ વસ્તુથી રંગાવાની અપેક્ષાવાળું ચિત્ત વસ્તુને જાણે છે અથવા જાણતું નથી. ૧૭

भाष्य

अयस्कान्तमणिकल्पा विषया अयःसधर्मकं चित्तमभिसंबध्यो-परञ्जयन्ति, येन च विषयेणोपरक्तं चित्तं स विषयो ज्ञातस्ततोऽन्यः पुनरज्ञातः । वस्तुनो ज्ञाताज्ञातस्वरूपत्वात्परिणामि चित्तम् ॥१७॥

લોહચુંબક જેવા વિષયો લોખંડ (ની સળીઓ) જેવા ચિત્તને પોતાની સાથે સંબંધિત કરીને, પોતાના રંગે રંગે છે. જે વિષયવડે ચિત્ત રંગાયું હોય એને એ જાણે છે, અને અન્ય વિષયોને જાણતું નથી. વસ્તુને જાણનાર અને ન જાણનાર સ્વરૂપવાળું ચિત્ત પરિણામી છે. ૧૭

तत्त्ववैशारदी

स्यादेतत्-अर्थश्चेत्स्वतन्त्रः, स च जडस्वभाव इति न कदाचित्प्रकाशेत ।

प्रकाशने वा जडत्वमप्यस्यापगतिमिति भावोऽप्यपगच्छेत् । न जातु स्वभावमपहाय भावो वर्तितुमर्हति । न चेन्द्रियाद्याधेयो जडस्वभावस्यार्थस्य धर्मः प्रकाश इति साम्प्रतम् । अर्थधर्मत्वे नीलत्वादिवत्सर्वपुरुषसाधारण इत्येकः शास्त्रार्थज्ञः इति सर्व एव विद्वांसः प्रसज्येरन्न जाल्मः कश्चिदस्ति । न चातीतानागतयोर्धर्मः प्रत्युत्पन्नो युक्तः। तस्मात्स्वतन्त्रोऽर्थ उपलम्भविषय इति मनोरथमात्रमेतदित्यत आह- तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम् । जडस्वभावोऽप्यर्थ इन्द्रियप्रणालिकया चित्तमुपरञ्जयति । तदेवंभूतं चित्तदर्पणमुपसंक्रान्तप्रतिबिम्बा चितिशक्तिश्चित्तमर्थोपरक्तं चेतयमानार्थमनुभवति, न त्वर्थे किञ्चित्प्राकट्यादिकमाधत्ते । नाप्यसंबद्धा चित्तेन तत्प्रतिबिम्बसंक्रान्तेरुक्तत्वादिति । यद्यपि च सर्वगतत्वाच्चित्तस्य चेन्द्रियस्य चाहङ्कारिकस्य विषयेणास्ति संबन्धस्तथापि यत्र शरीरे वृत्तिमच्चित्तं तेन सह न संबन्धो विषयाणामित्ययस्कान्तमणिकल्पा इत्युक्तम् । अयः सधर्मकं चित्तमिति । इन्द्रियप्रणालिकयाभिसंबन्ध्योपरञ्जयन्ति । अत एव चित्तं परिणामीत्याह- वस्तुन इति ॥१७॥

ભલે, પણ પદાર્થ સ્વતંત્ર હોય, તો એ સ્વભાવે જડ હોવાના કારણે, ક્યારે પણ પ્રકાશિત થાય નહીં. જો થાય તો એનું જડપણું જાય, અને એનું અસ્તિત્વ પણ જાય, કારણ કે સ્વભાવવિના વસ્તુનો ભાવ હોઈ શકે નહીં. જડ સ્વભાવના પદાર્થમાં ઇન્દ્રિયો વગેરે વડે પ્રકાશધર્મનું આધાન (સ્થાપન) થાય છે, એમ માનવું યોગ્ય નથી. પ્રકાશ જો પદાર્થનો ધર્મ હોય, તો નીલપણા વગેરેની જેમ, બધા પુરુષો માટે સમાન હોય, અને એક પુરુષ શાસ્ત્રના અર્થને જાણે એટલે બધા પુરુષો એવા જાણકાર વિદ્વાન છે, એવો પ્રસંગ થશે. તો કોઈ અજ્ઞાની રહેશે નહીં. વળી અતીત અને અનાગતનો ધર્મ વર્તમાનમાં પ્રગટ થાય એ પણ યોગ્ય નથી. તેથી પદાર્થ સ્વતંત્ર છે, અને ઉપલબ્ધિનો વિષય છે, એમ માનવું મનોરથમાત્ર છે. આ શંકાના નિવારણ માટે સૂત્રકાર "तदुपरागापेक्षित्वाच्चित्तस्य" વગેરે સૂત્રથી કહે છે કે ચિત્ત વસ્તુના રંગે રંગાવાની અપેક્ષાએ એને જાણે છે, કે જાણતું નથી. જડ સ્વભાવનો પદાર્થ ઇન્દ્રિયની પ્રણાલીથી ચિત્તને રંગે છે. આવા ચિત્તદર્પણમાં પ્રતિબિંબિત થયેલી ચિતિશક્તિ, પદાર્થના રંગે રંગાયેલા ચિત્તને પદાર્થ વિષે સભાન બનેલું હોય, એમ અનુભવે છે, પદાર્થમાં પ્રાગટ્ય (પ્રકાશ) જેવું કાંઈ ઉમેરતી નથી. ચિતિશક્તિ ચિત્તથી અસંબદ્ધ નથી. કારણકે અગાઉ જણાવ્યું એમ ચિત્તમાં એનું પ્રતિબિંબ પડે છે. ચિત્ત સર્વવ્યાપક હોવાથી અને ઇન્દ્રિયો અહંકારનું પરિણામ હોવાથી, પદાર્થો સાથે સંબંધમાં આવી ન શકે, છતાં શરીરમાં પ્રવર્તમાન ચિત્ત મર્યાદિત બનેલું હોવાથી, પદાર્થના સંબંધમાં આવે છે, તેથી વિષયોને લોહચુંબક

જેવા કહ્યા છે, અને ચિત્તને લોખંડ જેવા ધર્મવાળું કહ્યું છે. ઇન્દ્રિયપ્રણાલીથી વિષયો ચિત્તના સંબંધમાં આવીને એને પોતાના રંગથી રંગે છે. તેથી "वस्तुनः ज्ञाताज्ञातस्वरूपत्वात्." વગેરેથી કહે છે કે ચિત્ત વસ્તુને જાણતું અથવા ન જાણતું હોવાથી પરિણામી છે. ૧૭

★

यस्य तु तदेव चित्तं विषयस्तस्य- એ ચિત્ત જ જેનો વિષય છે, એ પુરુષને તો -

सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वात् ॥१८॥

ચિત્તના સ્વામી પુરુષને એની વૃત્તિઓ સદા જ્ઞાત હોય છે. કારણ કે પુરુષ અપરિણામી છે. ૧૮

भाष्य

यदि चित्तवत्प्रभुरपि पुरुषः परिणमेत ततस्तद्विषयाश्चित्तवृत्तयः शब्दादिविषयवज्ज्ञाताज्ञाताः स्युः । सदाज्ञातत्वं तु मनसस्तत्प्रभोः पुरुषस्यापरिणामित्वमनुमापयति ॥१८॥

ચિત્તની જેમ એનો સ્વામી પુરુષ પણ પરિણામી હોય, તો એની વિષયભૂત વૃત્તિઓ, શબ્દ વગેરે વિષયોની જેમ જ્ઞાત અથવા અજ્ઞાત હોય. પરંતુ ચિત્તના સ્વામીને એની વૃત્તિઓ હંમેશાં જ્ઞાત હોય છે. તેથી પુરુષના અપરિણામીપણાનું અનુમાન થાય છે. ૧૮

तत्त्ववैशारदी

तदेवं चित्तव्यतिरेकिणमर्थमवस्थाप्य तेभ्यः परिणतिधर्मकेभ्यो व्यतिरिक्त-मात्मानमादर्शयितुं तद्वैधर्म्यमपरिणामित्वमस्य वक्तुं पूरयित्वा सूत्रं पठति-यस्य तु तदेव चित्तं विषयस्तस्य-सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वात् । क्षिप्तमूढविक्षिप्तैकाग्रतावस्थितं चित्तमा निरोधात्सर्वदा पुरुषेणानुभूयते वृत्तिमत् । तत्कस्य हेतोः ? यतः पुरुषोऽपरिणामी । परिणामित्वे चित्तवत् पुरुषोऽपि ज्ञाताज्ञातविषयो भवेत् । ज्ञातविषय एव त्वयम् । तस्मादपरिणामी । ततश्च परिणामिभ्योऽतिरिच्यत इति । तदेतदाह-यदि चित्तवदिति । सदा ज्ञातत्वं तु मनसः सवृत्तिकस्य तस्य यः प्रभुः स्वामी भोक्तेति यावत् तस्य प्रभोः पुरुषस्या-परिणामित्वमनुमापयति । तथा चापरिणामिनस्तस्य पुरुषस्य परिणामिनश्चित्ताद्भेद इति

भावः ॥१८॥

આમ પદાર્થ ચિત્તથી ભિન્ન છે, એમ પ્રસ્થાપિત કરીને પરિણામધર્મવાળાં ચિત્તોથી આત્મા ભિન્ન છે એમ દર્શાવવા, અને ચિત્તથી વિપરીત એનું અપરિણામીપણું સિદ્ધ કરવા "यस्य तु" વગેરે ખૂટતા શબ્દો જોડીને "सदा ज्ञाताश्चित्तवृत्तयः" વગેરે સૂત્ર પ્રસ્તુત કરે છે. ચિત્ત નિરુદ્ધ બને ત્યાં સુધી હંમેશાં વૃત્તિયુક્ત - ક્ષિપ્ત, વિક્ષિપ્ત અને એકાગ્ર-ચિત્તને પુરુષ અનુભવે છે. શાથી ? કારણ કે પુરુષ અપરિણામી છે. જો પરિણામી હોય તો ચિત્તની જેમ પુરુષ પણ ક્યારેક પોતાના વિષયભૂત ચિત્તને જાણે અને ક્યારેક ન જાણે. પરંતુ એ હંમેશાં જ્ઞાતવિષય જ છે, તેથી અપરિણામી છે, અને પરિણામી ચિત્તથી ભિન્ન છે. આ વાત "यदि चित्तवत्..." વગેરેથી કહે છે. ચિત્તનો સ્વામી ભોક્તા છે. એ વૃત્તિયુક્ત મનને હંમેશાં જાણે છે. આનાથી પુરુષના અપરિણામીપણાનું અનુમાન થાય છે. આમ અપરિણામી પુરુષ પરિણામી ચિત્તથી ભિન્ન છે, એવો ભાવ છે. ૧૮

★

स्यादाशङ्का चित्तमेव स्वाभासं विषयाभासं च भविष्यत्यग्निवत्- એવી આશંકા થાય કે ચિત્ત જ અગ્નિની જેમ સ્વયંપ્રકાશ અને વિષયોને પ્રકાશિત કરનારું બનશે -

न तत्स्वाभासं दृश्यत्वात् ॥१९॥

એ (ચિત્ત) સ્વપ્રકાશ નથી. કારણ કે એ દૃશ્ય છે. ૧૯

ભાષ્ય

यथेतराणीन्द्रियाणि शब्दादयश्च दृश्यत्वान्न स्वाभासानि तथा मनोऽपि प्रत्येतव्यम् ।

न चाग्निरत्र दृष्टान्तः । न ह्यग्निरात्मस्वरूपमप्रकाशं प्रकाशयति । प्रकाशश्चायं प्रकाश्यप्रकाशकसंयोगे दृष्टः । न च स्वरूपमात्रेऽस्ति संयोगः । किञ्च स्वाभासं चित्तमित्यग्राह्यमेव कस्यचिदिति शब्दार्थः । तद्यथा-स्वात्मप्रतिष्ठमाकाशं न परप्रतिष्ठमित्यर्थः । स्वबुद्धिप्रचारप्रतिसंवेदनात्सत्त्वानां प्रवृत्तिर्दृश्यते-क्रुद्धोऽहं भीतोऽहममुत्र मे रागोऽमुत्र मे क्रोध इति । एतत्स्वबुद्धेरग्रहणे न युक्तमिति ॥१९॥

જેમ બીજી ઇન્દ્રિયો અને શબ્દ વગેરે વિષયો દૃશ્ય હોવાના કારણે

સ્વપ્રકાશ નથી, એમ મન પણ સ્વપ્રકાશ નથી, એમ સમજવું જોઈએ.

આ વિષયમાં અગ્નિ દૃષ્ટાન્ત નથી. અગ્નિ પોતાના અપ્રકાશિત સ્વરૂપને પ્રકાશિત કરતો (જાણતો) નથી. આવો પ્રકાશ પણ પ્રકાશ્ય અને પ્રકાશકના સંયોગ સમયે દેખાય છે. સ્વરૂપ માત્રમાં સંયોગ ન હોઈ શકે. વળી ચિત્ત સ્વપ્રકાશ છે એ શબ્દોનો અર્થ એ કોઈનાથી પણ અગ્રાહ્ય (અજ્ઞેય) છે, એવો થાય. જેમ આકાશ સ્વપ્રતિષ્ઠ છે, એટલે પરપ્રતિષ્ઠ નથી એવો અર્થ થાય છે. પોતાની બુદ્ધિના પ્રચારના પ્રતિસંવેદનથી પ્રાણીઓની પ્રવૃત્તિ જોવામાં આવે છે. "હું ક્રુદ્ધ છું, હું ભયભીત છું, અમુક પદાર્થમાં મારો રાગ છે, અમુકમાં ક્રોધ છે," વગેરે. આવું પુરુષ પોતાની બુદ્ધિને ન જાણતો હોય તો બને નહીં. ૧૯

तत्त्ववैशारदी

अत्र वैनाशिकमुत्थापयति-स्यादाशङ्केति । अयमर्थः - स्यादेतदेवं यदि चित्तमात्मनो विषयः स्यात् । अपि तु स्वप्रकाशमेतद्विषयाभासं पूर्वचित्तं प्रतीत्य समुत्पन्नम् । तत्कुतः पुरुषस्य सदाज्ञातविषयत्वम् ? कुतस्तरां वाऽपरिणामितया परिणामिनश्चित्ताद्भेद इति ? न तत्स्वाभासं दृश्यत्वात् । भवेदेतदेवं यदि स्वसंवेदनं चित्तं स्यात् । न त्वेतदस्ति । तद्धि परिणामितया नीलादिवदनुभवव्याप्यम् । यच्चानुभवव्याप्यं न तत्स्वाभासं भवितुमर्हति । स्वात्मनिवृत्तिविरोधात् । न हि तदेव क्रिया च कर्म च कारकं च । न हि पाकः पच्यते, छिदा वा छिद्यते । पुरुषस्त्वपरिणामी नानुभवकर्मेति नास्मिन्स्वयंप्रकाशता न युज्यते । अपराधीनप्रकाशतो ह्यस्य स्वयम्प्रकाशता, नानुभवकर्मतः । तस्माद् दृश्यत्वाद्दर्शनकर्म चित्तं न स्वाभासम् । आत्मप्रकाशप्रतिबिम्बतयैव चित्तस्य तद्वृत्तिविषयाः प्रकाशन्त इति भावः ।

ननु दृश्योऽग्निः स्वयंप्रकाशश्च । न हि यथा घटादयोऽग्निना व्यज्यन्त एवमग्निरग्न्यन्तरेणेत्यत आह- न चाग्निरत्रेति । कस्मात् ? न हीति । मा नामाग्निरग्न्यन्तरात्प्राकाशिष्ट विज्ञानात्तु प्रकाशत इति न स्वयं प्रकाशत इति न व्यभिचार इत्यर्थः । प्रकाशश्चायमिति । अयमिति पुरुषस्वभावात्प्रकाशाद्वयवच्छिनत्ति । क्रियारूपः प्रकाश इति यावत् । एतदुक्तं भवति- या या क्रिया सा सा सर्वा कर्तृकरणकर्मसम्बन्धेन दृष्टा । यथा पाको दृष्टश्चैत्राग्नितण्डुलसम्बन्धेन । तथा प्रकाशोऽपि क्रियेति तयापि तथा भवितव्यम् । सम्बन्धश्च भेदाश्रयो नाभेदे सम्भवतीत्यर्थः । किं च स्वाभासं चित्तमित्यग्राह्यमेव कस्यचिदिति शब्दार्थः । स्यादेतत्-मा भूद् ग्राह्यं चित्तम् । न हि

ग्रहणास्याकारणस्याव्यापकस्य च निवृत्तौ चित्तनिवृत्तिरित्यत आह-स्वबुद्धीति । बुद्धिश्चित्तम्, प्रचारा व्यापाराः, सत्त्वाः प्राणिनः चित्तस्य वृत्तिभेदाः क्रोधलोभादयः स्वाश्रयेण चित्तेन स्वविषयेण च सह प्रत्यात्ममनुभूयमानाश्चित्तस्याग्राह्यतां विघटयन्तीत्यर्थः । स्वबुद्धिप्रचारप्रतिसंवेदनमेव विशदयति-क्रुद्धोऽहमिति ॥१९॥

"स्यादाशंका" વગેરેથી વૈનાશિક (બૌદ્ધ) મત પ્રસ્તુત કરે છે. એનો અર્થ એ છે કે એવું બને (પુરુષ ચિત્તથી જુદો હોય) જો ચિત્ત આત્માનો વિષય હોય. પણ ચિત્ત સ્વપ્રકાશ છે અને વિષયને પ્રકાશિત કરે છે, અને પૂર્વચિત્તને પ્રતીત્ય (પ્રતીતિનો વિષય બનાવીને, એના આધારે) - જાણીને ઉત્પન્ન થાય છે. તો પુરુષનું સદા જ્ઞાતવિષયપણું કેવી રીતે સિદ્ધ થાય ? તેમજ અપરિણામીપણાથી પરિણામી ચિત્તથી એનો ભેદ કેવી રીતે સિદ્ધ થાય ? જવાબમાં "न तत्स्वाभासम्..." વગેરેથી કહે છે કે ચિત્ત સ્વપ્રકાશ નથી, કારણ કે એ દૃશ્ય છે. ચિત્ત સ્વસંવેદ્ય હોય તો એવું બને, પણ ચિત્ત એવું નથી. એ પરિણામી હોવાથી નીલ વગેરેની જેમ અનુભવવ્યાપ્ય છે. અને જે અનુભવગમ્ય હોય એ સ્વપ્રકાશ ન હોઈ શકે. કેમકે એનાથી પોતાની અંદર વૃત્તિવિરોધનો દોષ આવે. એ જ ક્રિયા, કર્મ અને કારક ન હોઈ શકે. પાક રંધાતો નથી અને છેદ છેદાતો નથી. પુરુષ અપરિણામી હોવાથી અનુભવનું કર્મ નથી, તેથી એમાં સ્વપ્રકાશતા અયોગ્ય નથી. પોતાનો પ્રકાશ એને સ્વાધીન છે, માટે એ સ્વપ્રકાશ છે, અનુભવના કર્મ તરીકે નહીં. પણ ચિત્ત દૃશ્ય-દર્શનનું કર્મ-હોવાથી સ્વપ્રકાશ નથી. આત્માના પ્રકાશનું પ્રતિબિંબ ગ્રહણ કરીને ચિત્તની વૃત્તિઓ અને વિષયો પ્રકાશિત બને છે, એવો ભાવ છે.

પણ અગ્નિ દૃશ્ય છે અને સ્વપ્રકાશ પણ છે. જેમ ઘડો વગેરે અગ્નિવડે પ્રગટ થાય છે એમ અગ્નિ બીજા અગ્નિવડે વ્યક્ત થતો નથી. આના જવાબમાં "न अग्निरत्र दृष्टान्तः" વગેરેથી કહે છે કે ભલે અગ્નિ બીજા અગ્નિવડે પ્રકાશિત થતો ન હોય, જ્ઞાનથી તો એ પ્રકાશિત થાય છે, તેથી એ સ્વપ્રકાશ નથી, એ વાતમાં કોઈ ફેરફારને અવકાશ નથી, એવો અર્થ છે.

"प्रकाशश्चायं" વગેરેથી કહે છે કે આ પ્રકાશ પ્રકાશ્ય-પ્રકાશકના સંયોગથી દેખાય છે. "अयम्" આ-શબ્દ પ્રયોજીને પુરુષના સ્વભાવરૂપ પ્રકાશથી એને જુદો પાડે છે. એટલે કે આ પ્રકાશ ક્રિયારૂપ છે. આશય એ છે કે જે ક્રિયા હોય એ કર્તા, કરણ અને કર્મના સંબંધથી થતી જોવામાં આવે છે. દાખલા તરીકે, ચૈત્ર અગ્નિ અને ચોખાના સંબંધથી પાકરૂપ ક્રિયા થતી જોવામાં આવે છે. પ્રકાશ પણ ક્રિયા છે, તેથી એ પણ એવો સંબંધજન્ય હોવો જોઈએ. સંબંધ ભિન્ન વસ્તુઓનો થાય. અભેદમાં સંબંધ સંભવતો નથી.

વળી ચિત્ત સ્વપ્રકાશ છે એનો અર્થ એ થાય કે એ બીજા કોઈવડે ગ્રાહ્ય બનતું નથી. ભલે ચિત્ત ગ્રાહ્ય ન હોય. અકારણ અને અવ્યાપક એવા ગ્રહણની નિવૃત્તિ થતાં ચિત્તની નિવૃત્તિ થાય નહીં. એના જવાબમાં "સ્વબુદ્ધિ પ્રચાર સંવેદનાત્" વગેરેથી કહે છે કે બુદ્ધિ કે ચિત્તનો પ્રચાર કે વ્યાપાર બધાં પ્રાણીઓ જાણે છે. ક્રોધ, લોભ વગેરે ચિત્તના વૃત્તિભેદો પોતાના આશ્રય એવા ચિત્ત અને એના વિષયોસાથે પ્રત્યેક આત્મા વડે અનુભવાતા હોવાથી ચિત્ત અગ્રાહ્ય છે, એ વાતને વિઘટિત (ખંડિત)કરે છે "હું ગુસ્સે થયો છું", વગેરે દાખલાઓ વડે પોતાની બુદ્ધિના પ્રચાર-વ્યાપારનું સંવેદન વધુ સ્પષ્ટ કરે છે. ૧૯

★

एकसमये चोभयानवधारणम् ॥२०॥

એક સમયે (સ્વ અને પર) બંનેનું જ્ઞાન થાય નહીં. ૨૦

भाष्य

न चैकस्मिन्क्षणे स्वपररूपावधारणं युक्तम् । क्षणिकवादिनो यद्भवनं सैव क्रिया तदेव च कारकमित्यभ्युपगमः ॥२०॥

એક ક્ષણમાં પોતાનું અને બીજાનું નિશ્ચયાત્મક જ્ઞાન યોગ્ય નથી. ક્ષણિકવાદી બૌદ્ધના મતમાં હોવું જ ક્રિયા અને કારક છે, એવો અભિગમ છે. ૨૦

तत्त्ववैशारदी

एकसमये चोभयानवधारणम् । स्वाभासं विषयाभासं चित्तमिति ब्रुवाणो न तावद्येनैव व्यापारेणात्मानमवधारयति तेनैव विषयमपीति वक्तुमर्हति । न ह्यविलक्षणो व्यापारः कार्यभेदाय पर्याप्तः । तस्माद्व्यापारभेदोऽङ्गीकर्तव्यः । न च वैनाशिकानामुत्पत्तिभेदातिरिक्तोऽस्ति व्यापारः । न चैकस्या एवोत्पत्तेरविलक्षणायाः कार्यवैलक्षण्यसम्भवः, तस्याकस्मिकत्वप्रसङ्गात् । न चैकस्योत्पत्तिद्वयसम्भवः । तस्मादर्थस्य च ज्ञानरूपस्य चावधारणं नैकस्मिन्समय इति । तदेतद्भाष्येणोच्यते-न चैकस्मिन्क्षण इति । तथा चोक्तं वैनाशिकैः-

भूतिर्येषां क्रिया सैव कारकं सैव चोच्यते ।

इति । तस्माद् दृश्यत्वमेतच्चित्तस्य सदातनं स्वाभासत्वमपनयद् द्रष्टारं च द्रष्टुरपरिणामित्वं च दर्शयतीति सिद्धम् ॥२०॥

ચિત્ત પોતાને અને વિષયને પ્રકાશિત કરે છે, એમ કહેનાર બૌદ્ધ ચિત્ત જે વ્યાપારથી પોતાનું નિર્ધારણ કરે છે, એ જ વ્યાપારથી વિષયનું પણ નિર્ધારણ કરે છે, એમ કહી શકે નહીં. એક અવિલક્ષણ વ્યાપાર ભિન્ન કાર્યો કરવા માટે પર્યાપ્ત નથી. માટે વ્યાપારભેદ સ્વીકારવો જોઈએ. વૈનાશિકોના મત પ્રમાણે ઉત્પત્તિથી જુદો કોઈ વ્યાપાર નથી. અને એક, અવિલક્ષણ, ઉત્પત્તિ બે કાર્યો કરી શકે નહીં. જો કરે તો આકસ્મિકતાનો પ્રસંગ આવશે. એકમાંથી બે ઉત્પત્તિઓ સંભવે નહીં. તેથી પદાર્થોનું અને એમના જ્ઞાનનું અવધારણ એક સમયમાં થાય નહીં. આ વાત "ન ચૈકસ્મિન્ક્ષણે." વગેરે ભાષ્યથી કહેવામાં આવી છે. વૈનાશિકોએ કહ્યું છે :-

"ભૂતિ (ભવન-હોવું) એ જ ક્રિયા છે અને કારણ પણ છે." તેથી ચિત્તનું આવું સદાતન (સનાતન) દૃશ્યપણું એના સ્વપ્રકાશપણાને દૂર કરી એના દ્રષ્ટાને અને એ દ્રષ્ટાના અપરિણામીપણાને દર્શાવે છે, એમ સિદ્ધ થયું. ૨૦

★

स्यान्मतिः, स्वरसनिरुद्धं चित्तं चित्तान्तरेण समनन्तरेण गृह्यत इति- એવો અભિપ્રાય હોઈ શકે કે પોતાની સત્તામાં નિરુદ્ધ થયેલું ચિત્ત, પછી તરત ઉત્પન્ન થતા બીજા ચિત્તથી ગ્રહીત થાય છે -

चित्तान्तरदृश्ये बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसंकरश्च ॥२१॥

એક ચિત્ત બીજા વડે જોવાતું હોય તો બુદ્ધિ બુદ્ધિને જુએ છે, એને જોવા માટે અન્ય બુદ્ધિ જોઈએ એમ અતિપ્રસંગ દોષ અને સ્મૃતિમિશ્રણ દોષ થશે. ૨૧

भाष्य

अथ चित्तं चेच्चित्तान्तरेण गृह्येत बुद्धिबुद्धिः केन गृह्यते, साप्यन्यया साप्यन्ययेत्यतिप्रसङ्गः । स्मृतिसंकरश्च, यावन्तो बुद्धिबुद्धीनामनुभावास्तावत्यः स्मृतयः प्राप्नुवन्ति । तत्संकराच्चैकस्मृत्यनवधारणं च स्यादिति । एवं बुद्धिप्रतिसंवेदिनं पुरुषमपलपद्भिर्वैनाशिकैः सर्वमेवाकुलीकृतम् । ते तु भोक्तृस्वरूपं यत्र क्वचन कल्पयन्तो न न्यायेन संगच्छन्ते । केचित्तु सत्त्वमात्रमपि परिकल्प्यास्ति स सत्त्वो य एतान्पञ्च स्कन्धान्निक्षिप्यान्यांश्च प्रतिसंदधातीत्युक्त्वा तत एव पुनस्त्रस्यन्ति । तथा स्कन्धानां महानिर्वेदाय विरागायानुत्पादाय प्रशान्तये गुरोरन्तिके ब्रह्मचर्यं

चरिष्यामीत्युक्त्वा सत्त्वस्य पुनः सत्त्वमेवापह्नुवते । सांख्ययोगादयस्तु प्रवादाः स्वशब्देन पुरुषमेव स्वामिनं चित्तस्य भोक्तारमुपयन्तीति ॥२१॥

હવે એક ચિત્ત બીજા ચિત્ત વડે જોવાય, તો બુદ્ધિને જોનાર બુદ્ધિનું ગ્રહણ કોણ કરશે ? અને જેટલા બુદ્ધિને જોનારી બુદ્ધિના અનુભવો હશે એટલી સ્મૃતિઓ થશે. એ સ્મૃતિઓનું મિશ્રણ થતાં એક સ્મૃતિનો નિર્ણય નહીં થાય. આમ બુદ્ધિના પ્રતિસંવેદી પુરુષને નકારનારા બૌદ્ધોએ બધું અવ્યવસ્થિત કર્યું છે. તેઓ કોઈ પણ જગાએ ભોક્તા - આત્માનું સ્વરૂપ કલ્પીને ન્યાયને અનુસરતા નથી. કેટલાક સત્ત્વમાત્રને કલ્પીને, એ સત્ત્વ આ અશુદ્ધ પાંચ સ્કંધોને ત્યાગીને, બીજા શુદ્ધ પાંચ સ્કંધો સ્વીકારે છે, એમ કહીને, એનાથી પણ ત્રાસ પામે છે, (એને પણ સિદ્ધ કરી શકતા નથી.) અને સ્કંધોના મહાનિર્વાણ માટે, વૈરાગ્ય માટે, એ ફરીવાર ઉત્પન્ન ન થાય એ માટે, પ્રશાન્તિ માટે, ગુરુ પાસે જઈને બ્રહ્મચર્ય પાળીશ એમ કહીને સત્ત્વનું સત્ત્વપણું જ છુપાવે છે. સાંખ્યયોગ વગેરે સિદ્ધાન્તો સ્વશબ્દથી ચિત્તના સ્વામી પુરુષને ભોક્તા તરીકે સ્વીકારે છે. ૨૧

तत्त्ववैशारदी

पुनर्वैनाशिकमुत्थापयति-स्यान्मतिः मा भूद् दृश्यत्वेन स्वसंवेदनम् । एवमप्यात्मा न सिध्यति । स्वसंतानवर्तिना चरमचित्तक्षणेन स्वरसनिरुद्धस्वजनकचित्तक्षणग्रहणादित्यर्थः । समं च तज्ज्ञानत्वेन, अनन्तरं चाव्यवहितत्वेन, समनन्तरं तेन । चित्तान्तरदृश्ये बुद्धिबुद्धेरतिप्रसंगः स्मृतिसंकरश्च । बुद्धिरिति चित्तमित्यर्थः । नागृहीता चरमा बुद्धिः पूर्वबुद्धिग्रहणसमर्था । न हि बुद्ध्याऽसंबद्धा पूर्वबुद्धिर्बुद्धा भवितुमर्हति । न ह्यगृहीतदण्डो दण्डिनमवगन्तुमर्हति । तस्मादनवस्थेति । विज्ञानवेदनासंज्ञारूपसंस्काराः स्कन्धाः । सांख्ययोगादयः प्रवादाः । सांख्याश्च योगाश्च त एवादयो येषां वैशेषिकादिप्रवादानां ते सांख्ययोगादयः प्रवादाः । सुगममन्यत् ॥२१॥

"स्यान्मति..." વગેરેથી ફરીવાર વૈનાશિક મત રજૂ કરે છે. દૃશ્ય હોવાથી ભલે ચિત્તનું સ્વસંવેદન ન હોય. એમ પણ આત્મા સિદ્ધ થતો નથી. પોતાના પ્રવાહમાં વહી આવતા અંતિમ ચિત્તક્ષણ વડે સ્વસત્તામાં નિરુદ્ધ થયેલા, પોતાને પેદા કરનાર ચિત્તનું ગ્રહણ થશે, એવો અર્થ છે. સમ્ એટલે સમાન અને અનંતર એટલે વ્યવધાન રહિત તરત ઉત્પન્ન થતા ચિત્તને સમનન્તર કહે છે. બુદ્ધિ એટલે

ચિત્ત. અગ્રહીત ચરમ (છેલ્લી) બુદ્ધિ પૂર્વબુદ્ધિના ગ્રહણ માટે સમર્થ નથી. બુદ્ધિથી અસંબદ્ધ પૂર્વ બુદ્ધિ જાણી શકાય નહીં. જેણે દંડ ગ્રહણ ન કર્યો હોય એ દંડીને જાણી શકે નહીં. તેથી અનવસ્થા દોષ થાય. વિજ્ઞાન, વેદના, સંજ્ઞા, રૂપ અને સંસ્કાર પાંચ સ્કંધો છે. સાંખ્ય-યોગ આદિ છે જેમના એવા વૈશેષિક વગેરે સિદ્ધાન્તો સાંખ્યયોગાદિ કહેવાય. બાકીનું સુગમ છે. ૨૧

★

कथम् ? - કેવી રીતે -

चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम् ॥२२॥

વિષયોમાં સંચરણ ન કરતી ચિતિ, પોતાની બુદ્ધિને, એના આકારવાળી બનીને, જાણે છે. ૨૨.

ભાષ્ય

अपरिणामिनी हि भोक्तृशक्तिरप्रतिसंक्रमा च, परिणामिन्यर्थे प्रतिसंक्रान्तेव तद्वृत्तिमनुपतति, तस्याश्च प्राप्तचैतन्योपग्रहस्वरूपाया बुद्धिवृत्तेरनुकारमात्रतया बुद्धिवृत्त्यविशिष्टा हि ज्ञानवृत्तिराख्यायते । तथा चोक्तम्-

न पातालं न च विवरं गिरीणां
नैवान्धकारं कुक्षयो नोदधीनाम् ।
गुहा यस्यां निहितं ब्रह्म शाश्वतं
बुद्धिवृत्तिमविशिष्टां कवयो वेदयन्ते ॥ इति ॥२२॥

ભોક્તૃશક્તિ અપરિણામી અને વિષયોમાં સંચરણ ન કરનારી છે. એ પરિણામી પદાર્થ (બુદ્ધિ)માં જાણે કે પ્રતિબિંબત થઈને, એની વૃત્તિને અનુસરે છે. પ્રાપ્ત કર્યું છે ચૈતન્ય જેવું સ્વરૂપ જેણે, એવી બુદ્ધિવૃત્તિને અનુસરનાર ચૈતન્યને જ્ઞાનવૃત્તિ કહે છે. આ વિષે કહ્યું છે :-

"પાતાળ, પર્વતોની ગુફાઓ, અંધકાર, અને સમુદ્રનું પેટાળ એ ગુહા નથી, જેમાં શાશ્વત બ્રહ્મ વસે છે. ચિતિની છાયાથી યુક્ત હોવાથી ચિતિ જેવી જણાતી બુદ્ધિવૃત્તિરૂપ ગુફામાં બ્રહ્મ વસે છે, એવું કવિઓ જણાવે છે." ૨૨

तत्त्ववैशारदी

स्यादेतत्-यदि चित्तं न स्वाभासं नापि चित्तान्तरवेद्यमात्मनापि कथं भोक्ष्यते चित्तम् । न खल्वात्मनः स्वयंप्रकाशस्याप्यस्ति काचित्क्रिया । न च तामन्तरेण कर्ता न चासंबद्धश्चित्तेन कर्मणा तस्य भोक्तातिप्रसङ्गादित्याशयवानपृच्छति-कथमिति । सूत्रेणोत्तरमाह-चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम् । यत्तदवोचद् 'वृत्तिसारूप्यमितरत्र' (१।४) इति तदितः समुत्थितम् । चितेः स्वबुद्धिसंवेदनं बुद्धेस्तदाकारापत्तौ चितिप्रतिबिम्बाधारतया तद्रूपतापत्तौ सत्याम् । यथा हि चन्द्रमसः क्रियामन्तरेणापि संक्रान्तचन्द्रप्रतिबिम्बममलं जलमचलं चलमिव चन्द्रमसमवभासयत्येवं विनापि चितिव्यापारमुपसंक्रान्तचितिप्रतिबिम्बं चित्तं स्वगतया क्रियया क्रियावतीमसंगतामपि संगतां चितिशक्तिमवभासयद्भोग्यभावमासादयद्भोक्तृभावमापादयति तस्या इति सूत्रार्थः । भाष्यमप्येतदर्थमसकृत्तत्र तत्र (२।६; २।२०) व्याख्यातमिति न व्याख्यातमत्र । बुद्धिवृत्त्यविशिष्टत्वे ज्ञानवृत्तेरागममुदाहरति—तथा चोक्तम्-न पातालमिति । शाश्वतस्य शिवस्य ब्रह्मणो विशुद्धस्वभावस्य चितिच्छायापन्नां मनोवृत्तिमेव चितिच्छायापन्नत्वाच्चितेरप्यविशिष्टां गुहां वेदयन्ते । तस्यामेव गुहायां तद् गुह्यं ब्रह्म तदपनये तु स्वयंप्रकाशमनावरणमनुपसर्गं प्रद्योतते चरमदेहस्य भगवत इति ॥२२॥

